Siddhāntasāravaliḥ

by Trilocana Śivācārya

with the Commentary of Ananta Śivācārya

Bulletin of the Government Oriental Manuscripts Library, Madras

1/ 17.1 (1965): 29–68 (vv. 1–10), eds. A. A. Ramanathan and T. H. Viswanathan

2/ 17.2 (1965): 1–48 (vv. 11–32), eds. R. K. Parthasarathi and T. H. Viswanathan

3/ 18.1 (1968): 1–64 (vv. 33–59), eds. R. K. Parthasarathi and T. H. Viswanathan

4/ 18.2 (1968): 1–64 (vv. 60–109), eds. R. K. Parthasarathi and T. H. Viswanathan

5/ 19.1 (1969): 53–84 (vv. 110–130), eds. R. K. Parthasarathi and T. H. Viswanathan

6/ 19.2 (1972): 1–48 (vv. 131–150), eds. T. H. Viswanathan, P. G. Seetharaman, R. Ganesan

7/ 20.2 (1972): 49–71 (vv. 151–167), eds. T. H. Viswanathan, P. G. Seetharaman, R. Ganesan

Vol. XVII No. 1

Bulletin of The Government Oriental Manuscripts Library, Madras.

EDITED
BY
R. K. PARTHASARATHI, M.A., L.T.,
DIP. in FRENCH AND GERMAN,
Curator, Government Oriental Manuscripts Library, Madras.

© Government of Madras, 1965

1965

Price Rs. 2

तच्च देवलोके प्रसिद्धम् । तदपि [1]बालाकटाक्षवशात् वयं जानीमः । तथापि मनुष्यलोकप्रचाराभावात् मया न लिखितम् । त्रेतायां तु पूर्वयुगवच्च चन्द्रस्फुटवशेन [2]भागायुरानयनं । दशाधिपतयस्तु चन्द्रमारभ्य क्रमेण नेयाः । द्वापरे तु अस्य सूत्रशास्त्रस्य प्रवृत्तिः । पर्यायस्तु विंशाधिकशतम् । इतरत सर्वमपि तद्वशेनैव ज्ञातव्यं । द्वापरे तु व्यासशिष्यो जैमिनिः व्यासप्रसादादष्टाध्यायं सूत्रशास्त्रमकरोत् । पूर्वकाले तु सर्वेऽपि ज्ञानचक्षुषः । तस्मादेतच्छास्त्रमनपेक्ष्यम् । अस्मिन् युगे तु ज्ञानदृष्ट्यभावात् अवश्यं कर्तव्यमिति महामुनिनोक्तम् । तद्व्यासः श्रुत्वा यावत् ज्ञानचक्षुषः लोके स्थास्यन्ति तावत् ज्ञानेनैव सर्वमपि वेदयिष्यन्ति । तदनन्तरमेतत् ग्रन्थनिर्देशः आवश्यक इति उवाच । एतावत्पर्यन्तं दत्तात्रेयादिमुनयो लोके सञ्चारं कृत्वा सर्वमपि वेदयिष्यते (अवेदिषुः) । इदानीं तु तेऽपि न दृग्गोचरा इति मया श्रीबालामुपतिष्ठमानेन देवीपरमेश्वरयोः कृपाकटाक्षवशात् प्रकटीकृतम् । देवोऽपि स्वप्ने मामुवाच कलावेकोनविंशाब्दपरिवृत्तौ काण्वः कृतोदनो नाम ऋषिः शापेन वाञ्छिनाथ इति दाक्षिणात्यो भविष्यति तावदवधिकमयं त्वत्कृतो ग्रन्थः जनेषु प्रचरिष्यतीति । तदर्थमिमे निर्मिता ग्रन्थाः । अत्र दशाप्रकरणे संक्षेपः सूत्रव्याख्यायां ज्योतिषकल्पलतायाम् अस्मत्पुत्रेण सोमनाथमिश्रेण प्रकाशीकृतम् । तदग्नि दृष्ट्वा दशानिर्णयः कर्तव्यः ।

अध्यायाः द्वात्रिंशद् ग्रन्थमितिः संख्यया द्विसाहस्रम् ।
तत्र ज्योतिषसंख्या चतुरधिकशतं च दशसहस्रमपि ॥
भो भो ज्योतिषकाःकिमत्र कथनैः शास्त्रान्तरैः केवलैः
प्राप्तव्यं यदि वः फलं नवसुधाकल्पं प्रभूणां ततः ।
कृष्णीयां मधुराकृतिं मधुभिदः प्रीत्यै महातूलिकां
कण्ठे क्षोणिपतेः सदा विदधतां धत्तां मुदं सन्ततम् ॥

॥ इति श्रीबालात्रिपुरसुन्दरीकृपाकटाक्षसमधिगत समस्तविद्यावैदुष्य श्रीकृष्णमिश्रकृतौ फलरत्नमालायां ग्रन्थागमयुगादिलक्षणं नामाष्टाविंशोऽध्यायः ॥

श्रीः श्रीः श्रीः

1. क. रामकटाक्ष क. स्वामि. ग. शिव. 2. च. नयेदायुषम् ।

SIDDHĀNTASĀRĀVALIḤ BY TRILOCANA ŚIVĀCĀRYA

WITH

THE COMMENTARY OF ANANTA ŚIVĀCĀRYA

Edited by
Sri A. A. RAMANATHAN, M.A., L.T.,
and
Sri T. H. VISWANATHAN

It is a well known fact that most of us experience pressing agonies in our day today life either physically, mentally or emotionally. In order to get rid of these agonies many of us are striving collectively and individually to find out a solution. The more we try to find out a way the more the problem becomes very much complicated and extremely confusing to the average mind.

Fortunately some of our ancient sages, merciful of the sufferings of the people, recorded the result of their personal experiences in the form of Dars'anas. These darśanas are roughly divided in to two as Āstikadarśanas and Nāstikadars'anas. The former is in its turn divided into six and out of them the Uttaramīmāṁsā darśana or Brahmavidyā is the most important and is respected by eminent protagonists of other darśanas also like Udayanācārya, Kumārila Bhaṭṭa, prabhākara Mis'ra etc.

This Uttara mimāmsā darśana which is otherwise called Vedānta Darśana is, as suggested by the name itself, embedded in theUpaniṣads which are considered to be the last portion of the Vedas. The sage Veda Vyāsa, in order to reconcile some apparently contradictory statements of the Upanisads composed the Brahmasutras, which are also called S'ārīraka mīmāmsā Sūtras. In further stages the Brahma sūtras were considered to be very brief and they were commented upon by eminent scholars like S'aṅkara Bhagavatpāda, S'rī Rāmānuja, Śrīmad S'rīkaṇṭha Sivācārya etc. These Acāryas in order to establish there view points have drawn upon many Vedic as well as other authoritative passages in their support. In this connection some Vaiṣṇava and S'aiva Ācāryas gave equal authority

to their respective Āgamas also. All the above commentaries are called Bhāṣyas.

All these bhāṣyas began to occupy such a high position that the commentators were considered to be the founders of their respective schools of thought and they were enriched by many erudite commentaries and Super-commentaries, which constitute the literature in the Adhikaraṇa prasthāna.

In further stages, to meet the adverse criticisms of other schools of thought and to establish the final import of their respective śāstras by independent reasoning, many works like Advaita Siddhi, Nyāya bhāskara, Nyāyāmtṛta etc. were composed in the name of Vāda prasthāna.

In this way not only the bulk of this literature has grown enormously but the style also has become very tough and it has become very difficult for the average people to grasp the final conclusions of the respective sastras. So it became necessary to compose independent small works like VedāntaParibhāṣā, Siddhāntaleśa sangraha etc., to drive home the conclusions of that śāstra. These literatures form the variety of Prakarṇa Prasthāna.

Siddhāntasārāvali, which is now taken up for publication and which belongs to the last variety, is a systematic exposition of the chief tenets of S'aiva philosophy as well as of S'aiva Āgamas. Since the author of this work belongs to the tradition of Kamikāgama and its branch Mṛgendrāgama, this has been composed in the style of Mṛgendrāgama and has been divided into four chapters or pādas called Jnāna, Kriyā, Yoga and Caryā pādas. The first Jñānapāda contains 32 stanzas as stated in the commentary itself while the other three consist of 88, 7 and 40 stanzas respectively.

The author of this work is a Trilocana Sivācārya who was the head of the Āmarndaka Mutt which is considered to be the parent Mutt of the other three muts that were situated near the reiver Godavari. This information can be had from the 90th stanza of Kriyāpāda and the 40th stanza of Caryāpāda of this text itself.

Siddhāntasāravaliḥ. Kriyāpāda 90th Stanza.

बिन्दोस्तत्स्थमहेश्वरात् शिवकुलं गायत्रि शक्त्यङ्कितं

विद्येशादिसुरक्रमादुदभवद् दुर्वाससेह क्षितौ ।

ऋष्यादेस्तदनुग्रहोदयजुषः वर्षेऽभवद्भारते

श्रीमन्मुख्य कदम्ब भूषणयुतं चामर्दसंज्ञाश्रमम् ॥

Under the name of Trilocana Sivācarya, another S'aiva work called Siddhānta samuccaya is available in this library. But it is not known whether the Trilocana S'ivācarya of Siddhānta-samuccaya is identical with the author of this work or a different person, since it is said in this work that he was the head of Amardaka Mutt which appears to be near the Godavari whereas it is said in Siddhāntasamuccaya that he was the head of Sitāraṇya Mutt which seems to be in Tiruvenkadu, a village in the Tanjore district.

Siddhānta sanuccaya. R. 6635 (d).

त्रिलोचनशिवाचार्यैः सितारण्यमठाधिपैः ।

सर्वागमात् समुद्धृत्य सिद्धान्तस्य समुच्चयम् ॥

सर्वेषां शैवमुख्यानामस्माभिः सम्यगीरितम् ॥

This work is accompanied with the commentary of Ananta S'ambhu or Ananta S'ivācarya who appears to be a native of Tiruvarur or Vedaranya in Tanjore district. From his benedictory stanza it is understood that he is a staunch devotee of Vātāpi Vighneśvara at Tiruvarur and Lord Vaidyanātha the presiding diety at Vaithisvaran Kovil.

Siddhāntasārāvalivyākhyā.

वन्दे वारिधिजापुरीसुनिलयं वातापिविघ्नेश्वरम् ।

My thanks are due to Sri Swaminatha Gurukkal of Kapalisvarar Temple, Mylapore who was kind enough to lend his manuscript for collation. The present edition is based on the following manuscripts.

(1) A paper manuscript written in Grantha script. It contains 454 pages with 23 lines to a page. This is available here under D. No. 5554.

(2) A palm leaf manuscript, written in Grantha script and described under R. 2085 is termed as ख. This is complete and contains 288 pages with 9 lines to a page.

(3) D5555 palm leaf Grantha. Incomplete. Contains 338 pages. This is termed as ग.

(4) R. 6062 palm leaf. Grantha, Incomplete. 492 pages and 5 to 7 lines to a page. This is termed as घ.

(5) R. 3884. palm leaf. Grantha. Very much injured. Incomplete. 492 pages and 5 lines to a page. This is termed as ङ.

(6) R. 9784. palm leaf. Grantha. Injured. This is termed as च. Contans 179 folios and lines 7to 9 to a page. Complete.

(7) A palm leaf manuscript borrowed from Sri Swaminatha Gurukkal of Kapalisvarar temple, Mylapore, Madras. Contains 286 pages and 11 lines to a page. Written in Grantha script. Almost complete. This is termed as क.

॥ सिद्धान्तसारावलिः ॥

॥ सव्याख्या ॥

॥ श्रीरस्तु ॥

॥ ओं महागणाधिपतये नमः । श्रीदुर्वासमहागुरवे नमः ॥

मन्दान्दोलितकर्णतालविलसद्वयालोलभृङ्गावली-
झङ्कारश्रवणाय दत्तहृदयं श्रीशैलजानन्दनम् ।
प्रत्यूहान्धतमस्सहस्रकिरणं सेव्यं दयासागरं
वन्दे वारिधिजापुरीसुनिलयं वातापिविघ्नेश्वरम् ॥

ज्ञानस्य प्रतिपादिते विरचिता द्वात्रिंशतः श्लोकत-
स्त्वष्टाशीतिभिरन्विता गणनया कर्मण्यपादे मुनिः ।
योगे रावणबाहुयुग्मगणनायुक्ता(प्रयुक्तास्सदा) [च चर्यापदे]
आयुष्षष्टिमुनीन्द्रक्लृप्तगणना सिद्धान्तसारावलिः ॥

श्रीमद्वैद्येशलिङ्गं परममुनिगणैस्सेवितं सत्पदार्थैः
स्वस्य प्राच्यादिकाष्ठागतयुगमनुभिस्संयुतं लिङ्गरूपैः ।
नत्वानन्ताख्यशम्भुः परगुरुकरुणाम्भोधिसंसिक्तचेताः
श्रीमत्सिद्धान्तसारावलिविवृतिमहं वच्मि गूढार्थसिद्ध्यै ॥

तत्र तावदामर्दकमठनिवासी सकलागमपारदृश्वा **त्रिलोचनशिवाचार्यः** स्वसन्तानागमसम्भूतकामिकादिसिद्धं तत्तद्भेदं मृगेन्द्राद्यागममालोच्य, तत्र शब्दार्थयोः सामर्थ्येन लब्धप्रमाणश्लोकैरनेकैर्निर्णीतार्थं पदार्थत्रययुक्तं सपादचतुष्टयं सिद्धान्तसारावलिनामधेयं ग्रन्थं चिकीर्षुस्तस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं निष्कलं मूलमन्त्रस्योच्चारणभेदेन तुर्यावस्थास्वरूपं शिवमाद्येन श्लोकेन प्रणमति—**ओतं येनेत्यादिना** ।

ओतं येन जगच्चराचरमिदं प्रोतश्च सर्वं सदा
च्योतन्ते पशवोऽपि पाशनिकराद्यस्य प्रसादेन तत् ।
ओमित्यादिमनूच्चरध्वनिगतं ज्योतिष्मतां द्योतकं
व्योमव्यापि परं शिवाख्यमकलं ज्योतिः प्रपद्ये धिया ॥१॥

यथा कुविन्दस्य पटकार्यं प्रति निमित्तत्वं तथैव येन निमित्तकारणभूतेन व्यापकशीलेन परमशिवेन इदं प्रपञ्चाकारेण दृश्यमानं **चराचरं** चरं चाचरं चेति चराचरम्। अत्र चरशब्देन जङ्गमात्मकमुच्यते। यथा पश्वादीनां चरस्वरूपत्वम्। अचरशब्देन स्थावरात्मकम्। यथा शैलादीनामचरस्वरूपत्वम्। तत्र जङ्गमात्मकमित्यनेनात्मनामसाधारणानि सूक्ष्मशरीराणि, साधारणासाधारणानि भुवनशरीराण्युच्यन्ते। स्थावरात्मकमित्यनेन साधारणभुवनानि ॥

तच्चराचरात्मकं पुनर्द्विविधम् शुद्धाशुद्धस्वरूपभेदेन। शान्त्यतीतकलायां पञ्चदश भुवनानि, शान्तिकलायामष्टादश भुवनानि। तानि त्रयस्त्रिंशद्भुवनान्येव शुद्धात्मकानि। शुद्धभुवनस्थितानामात्मनां शरीराणि शुद्धान्येव। विद्याकलायां सप्तविंशति भुवनानि। प्रतिष्ठाकलायां षट्पञ्चाशद्भुवनानि। निवृत्तिकलायां अष्टोत्तरशतभुवनानि। तान्येकनवत्युत्तरशतानि भुवनान्यशुद्धानि। अशुद्धभुवनस्थितानामात्मनां शरीराण्यशुद्धान्येव।

इत्थंभूतं सर्वं समस्तं तत्प्रसिद्धं **जगत्**। सर्वशब्देनात्र महदादिविशेषान्तं जगदित्युच्यते। वेदान्तादिमतेषु महदादिविशेषान्तजगच्छब्देन प्रकृतितत्त्वमारभ्य पृथ्वीतत्त्वपर्यन्तं जगदभिधीयते। शैवमते निरूपितं महच्छब्देन शिवतत्त्वम्। विशेषशब्देन ब्रह्माण्डोपलक्षितपार्थिवतत्त्वं जगदिति सर्वशब्देन सूचितम्। शिवशब्देन शक्तितत्त्वमस्तकस्थं बिन्दुभुवनं ज्ञेयम्। एवं शुद्धभुवनादि जगत् सदा सार्वकालं ओतं प्रोतम् ऊर्ध्वाधारूपेण सृष्टम्। ऊर्ध्वभुवनं शान्तिविद्यान्तर्गतभुवनं, अधोभुवनं प्रतिष्ठानिवृत्तिकलान्तर्गतम्। उक्तञ्च—

निवृत्तिश्च प्रतिष्ठा च त्वधोभागप्रवर्तके।
विद्याशान्तिस्तथाप्यूर्ध्वे शान्त्यतीता त्वधिष्ठिता ॥ इति।

यथा पटं प्रति तन्तूनां समवायिकारणत्वं तथैव शुद्धभुवनापेक्षया समवायिकारणभूतेन बिन्दुना निमित्तकारणभूतेन परमशिवेन शुद्धभुवनमोतप्रोतस्वरूपेण कृतं व्याप्तं च। चशब्दो व्याप्तिसूचकः। अशुद्धभुवनापेक्षया समवायिकारणभूतया मायया निमित्तकारणभूतानन्तादिद्वारेणाशुद्धभुवनं सृष्टम्, व्याप्तञ्च। तथाचोक्तम्—

निमित्तमीश्वरस्तेषामुपादानं स बिन्दुराट्।
शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ॥
मायोपरि महामाया………… । इति ॥

महामायेति बिन्दुरित्यर्थः। एवं परमशिवेन पशूनामात्मनां भोगाय भुवनानां भुवनजशरीराणां च करणकर्मावलेः पाकाय संहृतिश्च सार्वकालं क्रियत इत्यर्थः ॥ भुवनेषु स्थितानामात्मनां कदा मोक्षप्रसङ्ग इत्याह— **पशव इति।** पशवस्त्रिविधाः विज्ञानाकल–प्रळयाकल-सकलभेदेन। मलमात्रयुक्तः विज्ञानाकलः। मलकर्मसंयुक्तः प्रळयाकलः। मलमायाकर्मयुक्तः सकलः। अपिशब्दात् विशिष्टपरिपक्वमलाः अनन्तादयोऽष्टौ, अनन्ताद्यपेक्षया तारतम्यतोऽपरिपक्वमलाः मन्त्रमन्त्रेश्वराश्च प्रोच्यन्ते। **पाशनिकरात्** पाशानां मलादिपञ्चकानां निकरात् समूहात् मलमायाकर्मबिन्दुरोधशक्त्यात्मकाद्यस्य परमशिवस्य प्रसादेन **च्योतन्ते** गळिता भवन्ति। पञ्चकृत्यैः क्रमेण भोगमोक्षं प्रापिता भवन्तीत्यर्थः। शिवप्रसादं विना केवलात्मज्ञानेन मुक्तिर्न भवतीति तात्पर्यम्। तथा चोक्तं भोजदेवेन—“मुक्तात्मानोऽपि शिवाः किन्त्वेते तत्प्रसादतो मुक्ताः” इति।

मूलमन्त्रोच्चारभेदेन हृदयादिस्थानतो ब्रह्मादिकारणेश्वरत्यागक्रमेण उन्मन्यन्तस्थपरमशिवं सोऽहम्भावात्मिकया बुद्ध्या स्मरामीत्याह—**ओमित्यादिना। ओमित्यादिमनूच्चरध्वनिगतम्** ओमिति आदिः यस्य स ओमित्यादिः, स चासौ मनुश्च ओमित्यादिमनुः। परमशिववाचकप्रासादमन्त्रः। **तेन उच्चरती**त्युच्चरः उच्चारणभूतो यो ध्वनिः नादो नादान्तश्च। तस्मात् ध्वनेरन्तर्गतं दूरंगतं दूरे विद्यमानमित्यर्थः। अतिसूक्ष्मोच्चारणेन तस्मिन् ध्वनौ अन्तर्गतमिति वा व्याख्येयम्। ‘ध्वनिमध्यगतं ज्योतिः ज्योतिर्मध्यगतः शिवः’ इति वचनात् ॥

प्रासादमन्त्रस्योच्चारः पञ्चविधः ह्रस्वदीर्घप्लुतसूक्ष्मातिसूक्ष्मभेदेन। ह्रस्वोच्चारो बिन्द्वन्तः, अर्धेन्द्वन्तो दीर्घोच्चारः, निरोधिन्यन्तः प्लुतोच्चारः, सूक्ष्मोच्चारो नादान्तः, अतिसूक्ष्मोच्चारो व्यापिन्यन्तः। प्रासादमन्त्रस्य ह्रस्वोच्चारेण ब्रह्मविष्णुरुद्राणां त्यागः। तत्रस्थमकारस्य रुद्रवाचकस्य, वाच्यभूतेन रुद्रेण तालुमध्ये त्यागः। प्रासादमन्त्रस्य दीर्घप्लुतोच्चाराभ्यामीश्वरत्यागः।

बिन्दोरीश्वरवाचकस्य वाच्यभूतेनेश्वरेण भ्रूमध्ये त्यागः ॥ तत्रैवार्धचन्द्रनिरोधिन्योरन्तर्भावः। प्रासादमन्त्रस्य सूक्ष्मातिसूक्ष्मोच्चाराभ्यां सदाशिवत्यागः। नादस्य सदाशिववाचकस्य वाच्यभूतेन सदाशिवेन सह ब्रह्मबिले त्यागः। तत्रैव शक्तिव्यापिन्योरन्तर्भावः। ब्रह्मबिलोपरि एकाङ्गुलमानेन शक्तिस्थानम्, तदूर्ध्वं द्व्यङ्गुलमानेन व्यापिन्याः स्थानम्। व्यापिनीपर्यन्तं सदाशिवव्याप्तिः। एवमोमित्यादिमनूच्चारपर्यन्तेन ब्रह्मादिपञ्चकारणेश्वराणां त्यागः क्रमेण सूचितो भवति। **व्योमव्यापिपरं**—व्योमेति व्यापिन्या उपरि चतुरङ्गुलमानेन समनायाः स्थानमुच्यते। तद्व्याप्नोतीति व्योमव्यापी अनाहतशिवः। तस्मात् व्योमव्यापिनः परं उपरि वर्तमानम्। अनेनानाहतशिवत्यागः सूचितः। तदन्ते परमशिवोऽमनस्क इति प्रासादमन्त्रोच्चारत्यागेन उन्मनीरूपेण प्रासादेन द्रष्टव्यः। तथा श्रुतिरपि—

"वेदान्तविज्ञानसुनिश्चितार्थाः सन्यासयोगाद्यतयश्शुद्धसत्त्वाः।
ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे॥" इति॥

अत्र वेदशब्देन प्रणवः। अन्तशब्देन नादः तद्विज्ञानगम्योऽर्थो यैस्सुनिश्चितः ते वेदान्तविज्ञानसुनिश्चितार्थाः। यतयः जितेन्द्रियाः, शुद्धसत्त्वाः दीक्षया निर्मलात्मानः। ते ब्रह्मलोके ब्रह्मबिले सदाशिवभुवने। तुशब्दोऽवधारणार्थः। बृंहणत्वाद् बृहत्त्वाच्च ब्रह्म सदाशिवतनुरिति, तद्भुवने स्थित्वा परान्तकाले पराया उन्मनाया अन्तकाले लयकाले सन्यासयोगात् अकाराद्यधिष्ठातॄणां स्वस्वकारणे सम्यग्विक्षेपः सन्यासः तद्योगात्, परामृतात् परमशिवज्ञानात्। स्वात्मानं शिवे संयोज्य परितो मुच्यन्ति संसारान् मुच्यन्ते। शिवत्वं यान्तीत्यर्थः।

ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे।
युक्तचित्तः तथात्मानं शिवे संयोजयेत् परे। इति याज्ञवल्क्यः।

अथवा अन्यप्रकारेण त्यागः कर्तव्यः। बिन्द्वर्धचन्द्रनिरोधीनामधिपतिरीश्वरः। तत्त्यागेन त्रयाणां त्यागः। नादनादान्तयोः सदाशिवत्यागेन द्वयोस्त्यागः। शक्तिव्यापिनीसमनानामधिपतिरनाहतशिवः। तत्त्यागेन शक्त्यादित्रयाणां त्यागः। अस्मिन् पक्षे व्योमशब्देन शक्त्यादिस्थानत्रयमुच्यते। प्रासादमन्त्रस्य सूक्ष्मोच्चारेण सदाशिवत्यागः। अतिसूक्ष्मोच्चारेणानाहतशिवत्यागः। तथा चोक्तं भगवता ज्ञानशिवाचार्येण पूजास्तोत्रे—

श्रीमन्मूलमनूत्थनादशिखया ब्रह्मादि सादाशिव-
स्थानत्यागगतिक्रमोर्ध्वविमलव्योमान्तसंस्थायिने॥ इति।

तथा स्वच्छन्दे—

अकारश्च उकारश्च मकारो बिन्दुरेव च।
अर्धचन्द्रो निरोधी च नादो नादान्त एव च॥

शक्तिश्च व्यापिनी चैव समनैकादश स्मृताः।
उन्मना तु ततोऽतीतं तदतीतं निरामयम्॥ इति॥

ज्योतिष्मतां—ज्योतींषि एषां सन्तीति ज्योतिष्मन्तः। तेषां ज्योतिष्मतां पूर्वोक्तानामनाहतशिवसदाशिवेश्वररुद्राच्युतब्रह्मादीनां द्योतकं सर्वत्र प्रकाशमानम्। परमशिवज्योतिषैव एषां ज्योतींषि विद्यन्त इत्यर्थः। तथाऽऽगमः—

सर्वेषां तेजसां चैव निधिश्च भगवाच्छिवः।

प्रकाशकारकत्वाच्च तेजो ज्योतिरिति स्मृतः॥ इति॥

तथा श्रुतिरपि—"दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनश्शिवसङ्कल्पमस्तु" इति। शिवाख्यं शिवनामधेयम्। तज्ज्योतिस्सर्वत्र संपूर्णत्वेन प्रकाशमानम्। उक्तश्च—

यदिन्धनाग्निसंयोगात्सोमार्कमणिजं च यत्।
तेजस्तस्मात् सुसंपूर्णं प्रकाशं ज्योतिरुत्तमम्॥ इति।

धिया प्रपद्ये—सोऽहम्भावात्मिकया बुद्ध्या परशिवे स्वात्मानं विलीनं भावयामीत्यर्थः।

ननु बुद्धिस्तावदन्तःकरणमध्ये एका। नामजात्यादिसहितसविकल्पकज्ञानमन्तःकरणसाध्यम्। निर्विकल्पकशिवज्ञानस्य वस्तुरूपमात्रस्य ग्रहणं नान्तःकरणसाध्यम्। अन्तःकरणस्य पाशत्वात्। उक्तश्च—

अन्तःकरणवृत्तिर्या बोधाख्या सा महेश्वरम् ।
न प्रकाशयितुं शक्ता पाशत्वान्निगळादिवत् ॥ इति ।

कथं धिया प्रपद्य इत्युक्तं इत्याशङ्कायां परिहारः—दीक्षिताः निर्मलाः साधकवराः पूर्वोक्तमूलमनूच्चनादादिक्रमेण स्वचित्प्रकाशिकया बुद्ध्या निष्कळं शिवं पश्यन्ति प्रासादमन्त्रानुष्ठानसामर्थ्येन—उक्तञ्च ।

शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा ।
शिवं शक्त्यादिभिस्सार्धं पश्यत्यात्मा गतावृतिः ॥ इति ॥ १ ॥

इदानीं सृष्ट्यादिकरणार्थं मनोमात्रसंयुक्तस्य पाशातीतस्य परशिवस्य परशक्त्या संयुक्तस्य सदाशिवादिसंज्ञान्तरमस्तीत्याह—शान्त इति ॥

शान्तस्सर्वकृदव्ययः सकलवित् स्वान्यः प्रकाशोऽचलो-
ऽमेयो ब्रह्मपरो ह्यनादिरतुलः सूक्ष्मो महान् चिद्घनः ।
व्यापी मुक्तसखस्सशक्तिरमलोऽप्युद्योगवान् ब्रह्मगः
सादाख्यः सकलाधिपोऽध्वनि सितेऽनन्तश्च रुद्रोऽसिते ॥२॥

शान्तः—रागद्वेषादिरहितः, तत्कारणस्य मलादेरसंभवात् । **सर्वकृत्**—सर्वं समस्तं करोतीति सर्वकृत् । स्वतन्त्रतया सर्वकर्तेत्यर्थः । **अव्ययः**—व्ययो नाशः महाप्रळयेषु व्यक्तानां शक्त्यात्मनावस्थानम् । परिपूर्णत्वेन तद्रहितत्त्वादव्ययः । **सकलवित्** सकलं समस्तं वेत्ति ज्ञानशक्त्या जानातीति सकलवित् । सर्वज्ञ इत्यर्थः । **स्वान्यः**—स्व एवान्यो यस्य सः स्वान्यः । एक एवेत्यर्थः ॥

प्रकाशः सर्वत्र प्रकाशमानः । यद्वा स्वश्चान्यश्च स्वान्यौ, तयोः प्रकाशः स्वान्यप्रकाशः । स्वान्यौ प्रकाशयतीति वा स्वान्यप्रकाशः । स्वप्रकाशपरप्रकाशक इति यावत् । यथा दिवाकरः लोकानां तमःपटलमुत्सार्य आत्मप्रकाशको भूत्वा, स्वान्यसूर्यकान्तशिलादीनां तेजस उत्पादकत्वेन परप्रकाशको भवति तद्वत् शुद्धाध्ववासिनां आत्मनामावरणभूतमलमपसार्य स्वशक्तिकिरणात्मकत्वेनाधिष्ठाय स्वप्रकाशको भूत्वा स्वसामर्थ्यकल्पितानन्तादीनामपि शिवतेजस उत्पादकत्वेन परप्रकाशकश्च भवतीत्यर्थः ॥

अचलः—चलनरहितः कार्यकरणे कुलालादिवत् स्वदेहस्पन्दनादिराहित्यात् । सङ्कल्पमात्रेण सकलकरणाच्चलनरहित इत्यर्थः । **अमेयः**—मेयरहितः । प्रत्यक्षादिप्रमाणेनापरिच्छेद्यः । वाङ्मनसयोः पन्थानमतीत इत्यर्थः । **ब्रह्मपरः** वेदान्तशास्त्रादिप्रतिपादितब्रह्मणः मेयात् परः श्रेष्ठः । "ब्रह्मविदाप्नोति परम्" इति श्रुतेर्विद्यमानत्वादित्यर्थः । **अनादिः** स्वभावसिद्धः । **अतुलः** सादृश्यरहितः । **सूक्ष्मः** सूक्ष्मरूपी । **महान्**—महत्स्वरूपी । "अणोरणीयान् महतो महीयान्" इत्यर्थः । **चिद्घनः** चिच्छब्देन ज्ञानक्रियाशक्ती त एव घनं देहस्वरूपं यस्य सः चिद्घनः । बैन्दवशरीरादिवत् जडशरीररहित इत्यर्थः । **व्यापी**—बिन्द्वादेरपि व्यापकत्वात् स्वस्य व्यापकान्तररहितत्वाच्च व्यापनशीलः । तदुक्तं रत्नत्रये—

व्यापको भुवनादीनामभिव्याप्तस्स बिन्दुना ।
बिन्दुः शक्त्या शिवेनैषा नान्येन व्याप्यते शिवः ॥ इति ।

मुक्तसखः मुक्तानां मुक्तात्मनां सखा मुक्तसखः । मोक्षकारीत्यर्थः । **सशक्तिः** परशक्त्या युक्तः । **अमलः**—अनादिमलरहितः । निर्मलस्य सृष्ट्यादिकरणमयुक्तमित्याशङ्क्य महासंहारात्पूर्वमार्जितसत्कर्मणामात्मनां तत्कर्मभोगाय सृष्ट्यादिकरणं युक्तमेवेति ज्ञापनार्थमपिशब्दः कृत इत्यवगन्तव्यः । **उद्योगवान्**—सृष्ट्यादिव्यापारवान् । **ब्रह्मगः**—ब्रह्माणि मूर्तितत्त्वभूतपिण्डकलापदब्रह्माणि गच्छतीति ब्रह्मगः । मूर्त्यादिब्रह्मस्वरूप इत्यर्थः । तथा शुद्धाख्ये—

मूर्तिब्रह्म तथा पूर्वं तत्त्वब्रह्म द्वितीयकम् ।
भूतब्रह्म तृतीयं स्यात् पिण्डब्रह्म चतुर्थकम् ॥
पञ्चमं तु कलाब्रह्म पदब्रह्मसमीरितम् ॥ इति ।

साकल्यादिपञ्चप्रणवो मूर्तिब्रह्म । शुद्धमूलतत्त्वाद्यात्मनामधेयाः पञ्चप्रासादाः तत्त्वब्रह्म । लवरयहकारकाः भूतब्रह्म । शिवबीजजातसद्योजातादि पञ्च पिण्डब्रह्म । ईशानस्सर्वविद्यानामिति कलाब्रह्म । ईशानमूर्ध्नायेत्यादिना व्योमव्यापिपदमध्यपठितं पदब्रह्म । व्योमव्यापिभेदेन पदब्रह्माणि बहुप्रकाराणि ।

ब्रह्मत्वात् सर्वव्यापकत्वात् ब्रह्म सदाशिवतनुः । तदुक्तम्—

ब्रह्मत्वात् बृंहणत्वाच्च ब्रह्म सादाशिवतनुः । इति ।

सादाख्यः सदाशिवनामधेयः । **सितेऽध्वनि** शुद्धाध्वनि । **सकलाधिपः** सकलानामनन्तादीनामधिपः । स्वतन्त्रतया कर्ता भवतीति शेषः । **अनन्तः** अनन्तेश्वरः । **रुद्रश्च** श्रीकण्ठरुद्रः । **असिते** अशुद्धाध्वनि उभौ अधिपौ भवतः । शुद्धाशुद्धविषयेऽनन्तः । अशुद्धाध्वविषये श्रीकण्ठ इत्यर्थः । परशिवात्सदाशिवः । सदाशिवादनन्तेशः । अनन्तात् श्रीकण्ठ इति पारम्पर्यमवगन्तव्यम् ।

तथोक्तं श्रीमता ज्ञानशिवेन—

अग्राही किल ईश्वरः परशिवस्तस्मात्सदेशश्शिवो

नादात्मा सकलाकलः प्रभुस्तोऽनन्तेशभट्टारकः ।

तस्मादण्डजविष्णुवासवविधिश्रीकण्ठरुद्रस्तथा

तन्त्राणामवतारको मुनिवरो दुर्वासनामा गुरुः ॥ इति ॥ २ ॥

परमशिवसदाशिवयोर्धर्मिधर्मस्वरूपयोर्मध्ये योगेन भावस्वरूपमुत्पन्नमित्याह—**परानपेक्षमिति ।**

परानपेक्षं शिवसंज्ञमस्य

रूपं परापेक्षमपि श्रुतिज्ञाः ।

शक्त्याख्यमाहुस्तदभिन्नरूपः

सधर्म ईशस्स च धर्मिरूपः ॥ ३ ॥

परशिवादनाहतशिवः । अनाहतशिवात् सदाशिवः । अत एवानाहतशिवसापेक्षमेव न तु परशिवापेक्षमित्युक्तम् । मध्ये व्यवधानादिति भावः । **परापेक्षं** परमपेक्षत इति परापेक्षम् । अपिशब्दः समुच्चयार्थः । परशिवानाहतशिवयोर्व्योमव्यापकत्वेनेति निष्कळतया ऐक्यमेव, न भेद इति परापेक्षमित्युक्तम् । एवंविधं सदाशिवस्वरूपं श्रुतिज्ञाः आगमज्ञानसहिताचार्याः शक्त्याख्यं परशक्त्योत्पन्नमित्याहुः उक्तवन्तः । परशक्तिपरशिवयोस्समवेततया स्वभेदं मन्यमानैराचार्यैः शक्त्याख्यमिति प्रतिपादितमित्यर्थः । **तदभिन्नरूपः** तस्मात् परशिवादभिन्नरूपः ऐक्यरूपः । तस्मात् कारणादिति वा व्याख्येयम् । **ईशः** सदाशिवः ॥ **सधर्मः** समानो धर्मो

यस्य सः सधर्मः । आकाशे विद्युद्रूपमिव सर्वत्र प्रकाशमान उत्पत्तिविनाशशून्यः चैतन्यादिगुणयुक्तो ज्योतीरूपोऽयं धर्मः । स च परशिवः धर्मिरूपः । धर्मोऽस्यास्तीति धर्मी, धर्मिणो रूपं यस्य स धर्मिरूपः । सदाशिवपरशिवयोर्धर्मधर्मिस्वरूपत्वेन सदाशिवः परशिवस्य मूर्त्याकारेण स्थितः । परशिवस्तु सदाशिवस्यान्तस्थरूपेण स्थितः । तयोर्योगेन यद्रूपं तद्रूपमेव भावाकारेण स्थितमित्यर्थः । तथोक्तम्—

शिवश्च तत्त्वमित्युक्तो मूर्तिश्चैव सदाशिवः ।

तयोर्योगेन यद्रूपं तद्रूपं भावमुच्यते ॥

सततं चैव भावत्वात् सादाख्यमिति कथ्यते ।

सर्वेषां ध्यानपूजार्थं निष्कळं सकळं भवेत् ॥ इति ॥ ३ ॥

इत्थं परशिवसदाशिवयोः धर्मिधर्मस्वरूपयोर्योगेन उपचारभूतभावाकारं दर्शयित्वा, अधिकारावस्थां प्राप्तस्य सदाशिवस्य जगत्कार्यविषये स्वशक्त्यात्मकं करणमस्तीत्याह—**शक्तिरिति ।**

शक्तिश्चित्तनुरीश्वरस्य करणं ज्ञेयेषु कार्येषु तद्-

भेदैस्सोपहिता प्रयाति गुणतो भेदं क्रियाज्ञानतः ।

नित्यं तत्सकलान्यकर्तृनिहिता वर्त्मन्यशुद्धे सिते

कृत्यं सैव करोति पत्यनुगता वामादिशक्त्यात्मिका ॥ ४ ॥

सदाशिवस्यापि निष्कळतया देहेन्द्रियादिरहितस्य जगत्कर्तृत्वं न घटत इति स्वसामर्थ्येन सर्वं करोतीति सूचनार्थं शक्तिरिति । **चित्तनुः** शक्तेरपि मायाबिन्द्वोरिव जडधर्मरूपपरिणामित्वं नास्तीति ज्ञापनार्थं चित्तनुरित्युक्तम् । मायाबिन्द्वोरुपादानकारणत्वं सिद्धं समवायिकारणं विना जगदुत्पत्त्यभावात् । उक्तं च भोजदेवेन—

कर्ता विना न कार्यं न तथोपादानकरणाभ्याम् । इति ।

चिच्छब्देन ज्ञानक्रियारूपं चैतन्यं गृह्यते । चिदेव तनुः शरीराकृतिर्यस्याः सा चित्तनुः शक्तिः पराशक्तिः । ईश्वरस्य सदाशिवस्य ज्ञेयेषु ज्ञातुं योग्येषु विषयेषु कार्येषु कर्तुं योग्येषु वस्तुषु च करणं साधकतमं प्रकृष्टोपकारकम् । ज्ञानशक्त्या ज्ञेयं विषयं जानाति । क्रियाशक्त्या कार्यं वस्तु करोतीत्यर्थः ।

ज्ञानं तावद् द्विविधम् सविकल्पकं निर्विकल्पकं चेति। तत्र सविकल्पकं शिवस्य भोगाधिकारविषयम्। निर्विकल्पकं लयविषयकम्। सविकल्पकं नाम जात्यादियोजनात्मकम्। निर्विकल्पकं वस्तुमात्रावगाहि। तथोक्तं पौष्करे—

विकल्पयोगायोगाभ्यां तच्च द्विविधमिष्यते।
वस्तुस्वरूपमात्रस्य ग्रहणं निर्विकल्पकम्॥ इति॥

तत्रैव लयविषयस्य—

शक्तोऽयं शक्तयो यस्मादुद्योगादिक्रियाच्युताः।
शिव एवावतिष्ठन्ते निष्कलश्च स एव तु॥
उपसंहृतकार्यात्मा यदा बिन्दुर्व्यवस्थितः।
तदा लयाह्वयं तत्त्वं शिवतत्त्वं तदेव हि॥

तत्रैव सविकल्पकस्य—

नामजात्यादिसम्बन्धसहितं सविकल्पकम्।
एतच्चेन्द्रियसापेक्षं निरपेक्षं तथैव च॥
तत्रेन्द्रियानपेक्षं च सर्वथा त्यक्तबन्धया।
चिच्छक्त्या निखिलार्थेषु योगः स्वाभाविको मतः॥ इति॥

क्रियापि द्विविधा सङ्कल्परूपा करणरूपा चेति। तत्र प्रथमा परशिवस्य मुक्तानाञ्च। द्वितीया बद्धात्मनाम्। तदुक्तं पौष्करे—

न हि सङ्कल्पमात्रेण कुलालैः क्रियते घटः।
शिवः सङ्कल्पमात्रेण बिन्दुक्षोभकरस्सदा॥
अधिकारे क्रियोद्रिक्ता कार्येष्वधिकृता यतः।
कार्यं च करणीयं च गुणसङ्कल्पसंस्कृतिः॥
न तु व्यापार इत्युक्ता विभोस्तद्विषया कृतिः।
तस्माज्ज्ञातृत्वकर्तृत्वे ज्ञानरूपे हृदि स्थिते॥ इति॥

तस्माद्विभस्य गुणस्मरणसङ्कल्प एव क्रिया शिवस्य। **सा** पञ्चधा सृष्ट्यादिभेदेन। **सा** शक्तिः। **तद्भेदैः** तेषां तेषां ज्ञेयकार्यादीनां भेदैः नानाप्रकारैः सह। **उपहिता** प्राप्ता सती। **गुणतः** अप्रधानतः। **क्रियाज्ञानतः** क्रियाशक्तिज्ञानशक्त्यादितः। अत्र ज्ञानादित इत्यादिशब्दो लुप्तो द्रष्टव्यः। आदिशब्देन इच्छाशक्तिवामादिशक्तयो गृह्यन्ते। **भेदं** नानाप्रकारं। **याति**

गच्छति। यथा अग्नेः शक्तिरेकापि लोहकाष्ठलवणौदनादिविषयोपाधिभेदेन द्राविका दाहिका स्फोटिका पाचिकाभिधानमुपैति, तथा शिवशक्तिरेकापि शुद्धाशुद्धतत्त्वविषये ज्ञेयकार्योपाधिभेदोपचारात् ज्ञानशक्त्यादिशक्तिभेदं प्राप्नोति। परमार्थतः वस्तुभेदो नास्तीत्यर्थः। उक्तं च—

एकैवानेकतां याति शिवशक्तिरुपाधितः। इति।

तथा मृगेन्द्रे—

करणं च न शक्त्यन्यत् शक्तिर्नाचेतना चितः।
विषयानियमादेकं बोधे कृत्ये च तत्तथा॥ इति॥

अस्यार्थः। शक्त्यन्यत्करणं न, शक्त्या विरहितं साधकतमं शिवस्य नास्ति। समवेतशक्तिरेवेति तात्पर्यम्। चितश्शक्तिरचेतना न। चैतन्यस्वरूपैवेत्यर्थः। विषयानियमात्, कार्यानेकात्। यथा बोधे ज्ञाने तथा कृत्ये कार्ये च तत् करणमेकमेव। तत् तस्मात्कारणात् शक्तिः करणस्वरूपा इत्यर्थः। **वामादिशक्त्यात्मिका** वामादिशक्तिस्वरूपा। आदिशब्देन ज्येष्ठादयो गृह्यन्ते। **पत्यनुगता** पत्युः परमशिवस्यानुगता समवेता सैव पराशक्तिः **सिते शुद्धे वर्त्मनि** अध्वनि नित्यं सार्वकालं **कृत्यं** पञ्चकृत्यं करोति। सदाशिवादिदेवेषु मनोन्मन्यादिस्वरूपेण पराशक्तिर्भार्यात्वं यातीति ज्ञापनार्थं पतिसमवेतेत्युक्तम्। तथा कामिके—

मूर्तिस्सादाशिवी यत्र कल्प्यते तत्र कल्पिताम्।
तदा मनोन्मनीसंज्ञां लभते विप्रपुङ्गवाः॥ इति॥

एवकारस्तु क्रियाकुण्डलिन्योः पर्यायनामधेयं कृत्वा क्रियेति कुण्डलिनीशक्तिरेव नान्येति विचार्यमाणानां केषाञ्चित् आचार्याणां मतस्य बहिष्करणार्थं कृत इत्यवगन्तव्यम्। तथोक्तमाचार्यैः—

केचिदाचक्षते बिन्दुस्समवेतशिवे ततः।
दृक्च्छक्तिवत्क्रियाशक्तिरियं कुण्डलिनी परा॥
द्वे शक्ती समवायिन्यौ शिवे ज्ञानक्रियात्मिके।
तत्र चाद्याह्वया संवित् क्रिया कुण्डलिनी परा॥
ज्ञानशक्त्या विजानाति क्रियया कुरुते जगत्।

क्रिया हि फलदा पुंसां न ज्ञानं स्यात् फलप्रदम् ॥
न ताभ्यां विरहस्तस्य ते च न स्तश्शिवं विना ॥ इति ॥

क्षीरस्य दधिवत् कुण्डलिन्याः परिणामित्वेन समवायः शिवे न घटत इति कृत्वा क्रियाशक्तेः कुण्डलिन्या सह पर्यायनामधेयो न संभवतीति मन्यमानैराचार्यैः [1]चिदनन्या क्रियाशक्तिरिति या मन्त्राणामुत्पत्तिः शिवस्य परिग्रहवर्तिनी क्रियात्मिकेति प्रतिपादिता। न कुण्डलिनीशक्तिः। तदुक्तम्—

मन्त्रयोनिर्महामाया या परिग्रहवर्तिनी ।
शिवस्य शक्तिराक्रान्ता यथा सर्वेऽपि पुद्गलाः ।
सेयं क्रियात्मिका शक्तिरैश्वरी सर्वदोदिता । इति ॥

अयं प्रपञ्चस्त्रिलोचनशिवार्यैरुक्तः—

सोऽयमात्मनि तत्त्वौघमनेकभुवनावलिम् ।
विदधद्विविधानल्पतनुभोगेन्द्रियादिकम् ॥
बिन्दुराख्यायते युक्त्या परिणामी प्रधानवत् ।
परिणामि च यद्वस्तु तदवश्यं जडात्मकम् ॥
यथा क्षीरं जडत्वस्य समवायः कथं शिवे ।
स हि तादात्म्यसंबन्धात् जडेन जडिमावहः ॥
शिवस्यानुपमाखण्डचिद्घनैकस्वरूपिणः ।
यस्त्वेवं मन्यते मोहात् जडधीर्जडमीश्वरम् ॥
न तस्य युक्तिश्शास्त्रं वा नात्मा नास्ति च देवता ।
स वर्जनीयो विद्वद्भिस्सर्वास्तिकबहिष्कृतः ॥ इति ।

अत एवेयं क्रियाशक्तिः शुद्धाध्ववर्तिनां मन्त्रमन्त्रेश्वराणां विज्ञानकेवलानां भोगसद्भावेन मलमायाकर्मरूपा सती वर्तते । कथम् ? अधिकारनिबन्धनमललक्षणेन पशुत्वेन व्यवस्थिता पशुषु वर्तते । नानाविधशुद्धभोगभुवनेषु पशून् प्रेरयति । अतः कर्मकार्यमियमेव करोति। शुद्धाध्ववासिनां तारतम्यभोगवैचित्र्यनिबन्धनं मलपरिपाकाख्यं कर्म विवक्षितम् न तु धर्माधर्मस्वरूपम्, तस्य दुःखसहितसुखहेतुत्वेनात्रासंभवात् सुखैकहेतुभूतं धर्माधर्म-

1. ख. क. not found.

विलक्षणमन्यदेव कर्माङ्गीकर्तव्यम् । तच्च कल्पनालाघवात् मलपरिपाकाख्यमेवेति वक्तुं युक्तम् । मायेति शुद्धाध्वनि श्रूयमाणस्य शुद्धदेहेन्द्रियादेः शुद्धोपादानभूतो बिन्दुरेव साध्यते। तमिमं बिन्दुं परमेश्वरः साक्षात् स्वसमवेतया चिच्छक्त्या क्षोभयति । सा च चिच्छक्तिरेकापि त्रिविधोपाधिभेदेन लयभोगाधिकारकरणमित्युच्यते। औपाधिकभेदया तया शिवो लयभोगाधिकारवानिति त्रिविध उच्यते। यथाक्रमं शिवस्सदाशिवोऽधीशश्चेतिसंज्ञश्च भवति। त्रिप्रकार एव शिवस्य व्यापारः, अधिकारो भोगो लयश्चेति । तत्राधिक्रियते शिवेनेत्यधिकारः सृष्टिस्थित्यात्मको व्यापारः। भोगस्तु भुज्यते पाल्यत इति वा संहारोत्तरभाविजगदुपादानादिपालनात्मको व्यापारः। आत्मनां यथानुगुणभोगभोजनदानं वा तिरोभाव इत्यर्थः। लयस्तु लयनं सृष्टोपसंहारलक्षणो व्यापारः। स च द्विविधः। पुनरुत्पत्त्यात्मकोऽपुनरुत्पत्त्यात्मकश्चेति । तत्र पुनः पुनरुत्पत्त्यात्मकस्तु कार्यस्योपादानकारणे शक्तिशेषता। अपुनरुत्पत्त्यात्मकस्तु शक्तिपातविनाशितप्रसवधर्माणां कार्यकरणादिबन्धानां शक्तेरुपसंहारेण लयो मोक्षलक्षणः। संहारस्वरूपानुग्रह इति यावत्। यद्वा बिन्दौ क्षोभयोग्यतामापन्ने सति क्षोभायोद्युक्तमात्रेण देवस्य भोगः। यदा बिन्दुरुद्योगदशामतिक्रम्य कार्यात्मना परिणमते तदा देवस्याधिकारः तत्कार्यस्य हेतुभूतत्वात्। यदा बिन्दुर्भोगाधिकारदशां विधूय सकलस्वकार्यजालं गर्भीकृत्य वर्तते तदा शिवस्य लयः, तन्निमित्तत्वात्। यद्वा अतिक्रान्तबिन्दुकः केवलचिद्रूपः शिव एव लयसंज्ञां लभते। अयमेवाभिप्रायः 'लयभोगाधिकाराणां व्यापारो बिन्दुगर्भितः' इत्युक्तः। तेन बिन्दुना सह चिच्छक्तिरुपचारात् शिवेन वापि लयभोगाधिकारिणी भवति। शिवः शक्तिं विहाय न प्रवर्तत इति नियमात् तया सह कर्तृकरणलक्षणसम्बन्धात् शिवोऽपि लयभोगाधिकारवान् व्यपदिश्यते। यथा दाहक्रियामधिकृत्य प्रज्वलितो वह्निः तत्प्रयोक्ता देवदत्तश्च दाहक इत्युच्यते तद्वत् शिवो लयादिसंज्ञां लभत इत्यर्थः। एवमेव त्रिलोचनशिवैरुक्तम्—

तत्र क्षुब्धे भवेद्भोगः बिन्दावानन्दरूपिणि ।
क्षुब्धेऽधिकारो देवस्य लयोऽतिक्रान्तबिन्दुकः ॥

एकैव खलु चिच्छक्तिश्शिवस्य समवायिनी ।
त्रिविधोपाधिसंभेदाल्लयभोगाधिकारिणी ॥
तथैतयाभिसम्बन्धादेको देवस्त्रिधा भवेत् ।
शिवस्सदाशिवोऽधीशो लयभोगाधिकारवान् ॥ इति ॥

वामादिशक्त्यात्मिका सैव पराशक्तिः कृत्यं करोतीत्युक्तम् । एतेन वामादिशक्तीनां पृथिव्याद्यष्टमूर्त्याकारेण शुद्धाध्वविषये सा पृथिव्यादिकार्यं करोतीति द्योतितं भवति । तद्यथा—वामा पृथिवीमयी ज्येष्ठा जलरूपिणी । रौद्र्यग्न्याकारा । काळी वायव्याकारा । कलविकरण्याकाशरूपिणी । चन्द्राकारा बलविकरणी । अर्काकारा बलप्रमथनी । आत्माकारा सर्वभूतदमनी । मनोन्मनी पराशक्तिरूपा । एताभिः शक्तिभिः पृथिव्यादिकार्यं कुर्वतीत्यर्थः । तथा चोक्तम्—

क्ष्मादिमूर्तितदीशानां वामाद्याश्शक्तयो मताः ।
वामशब्देन सौन्दर्यमुक्तं पञ्चगुणान्वितम् ।
संपूर्णगुणवत्त्वेन जलादीनामपेक्षया ।
जलादीनां चतुस्त्रिद्व्येकगुणत्वादपूर्णता ॥
वामात्र पार्थिवीतत्त्वभूता वामात्मिका क्रिया ।
सृष्टिः प्रवर्तते वामा सा शर्वः क्षितिमूर्तिपः ।
स एव वामदेवस्तच्छक्तिर्वामेति गीयते ।
ज्येष्ठा जलमयी तत्र स्थित्युपादानरूपिणी ।
भवस्तदीशस्तज्ज्येष्ठः ज्येष्ठा तच्छक्तिरीरिता ॥
अग्नेश्च रुद्ररूपत्वाद्रौद्र्याग्नेयी तदीश्वरः ।
स वै पशुपती रुद्रः रौद्री तच्छक्तिरिष्यते ॥
प्राणस्य कालरूपत्वात् काळी शक्तिस्तु वायवी ।
वायुमूर्तिप ईशानः स काल इति विश्रुतः ॥
काळी तच्छक्तिराकाशमयी कलविकरणी ।
कला अवयवास्तेषां शून्या विकरणी यतः ॥

व्योम्नोऽवयवशून्यत्वात् सा तद्विकरणी यथा ।
विगतक्षेपणं तेन खगभावस्तु स स्मृतः ॥
भीमो गगनमूर्तीशः बलविकरण ईरितः ।
तच्छक्तिः कलविकरणी चान्द्री च बलपूर्विका ॥
विकरणी च बलः शक्तिकरणं वै विशेषतः ।
सुधांशोरोषधीशत्वान्महादेवस्तदीश्वरः ॥
स वै बलविकरणस्तदीशी बलपूर्विका ।
विकरण्यर्कमयी शक्तिर्बलप्रमथनी यतः ॥
अर्कस्य चण्डरश्मित्वादुद्रो[1] वा अर्कमूर्तिपः ।
स वै बलप्रमथनः पाशद्रावक ईश्वरः ॥
बलप्रमथनी तस्य सर्वभूतदमन्यथ ।
आत्मीयपुण्यपापौघभोगेन दमयत्यतः ॥
आत्मा वै सर्वभूतानि यजमानस्तु स स्मृतः ।
सा सर्वभूतदमनी शक्तिरेवं प्रकीर्तिता ॥
शैवी मनोन्मनी शक्तिस्समवैति पशून् यतः ।
परं निर्व्यासकरणं शिवत्वाय नयत्यणुम् ।
मनोन्मनीति सा ज्ञेया तदन्तस्थः परश्शिवः ॥ इति ॥

अस्मिन् शुद्धाध्वनि वर्तिनः साक्षात्परमेश्वरानुग्रहयोग्या विज्ञानकेवलाः पक्वापक्वमलभेदेन द्विविधा भवन्ति । तत्र पक्वमला अनन्तादयोऽष्टौ । अपक्वमलास्तु सप्तकोटिमहामन्त्रा विद्यानामधेयाः । एतान् परमेश्वरः शुद्धाध्वशुद्धतनुकरणभुवनादिसम्बन्धेन सिसृक्ष्यतया शुद्धभोगप्रदानेन स्थापनीयतया तद्विघटनेन सञ्जिहीर्षतया सर्वथा तदुन्मूलनेनानुग्राह्यतया करणभूतया चिच्छक्त्या युक्तः पञ्चकृत्यपरो भवतीत्यर्थः । एवं शुद्धाध्वविषयभूतकृत्यं दर्शयित्वा, अशुद्धाध्वविषये कथंभूता कृत्यं करोतीत्याह—**सकलेति** । कलाभिः कर्मादिभिः षोडशकलाभिः सहिताः सकलाः । कर्मबुद्धित्रयेन्द्रियमनोऽहङ्कारविद्यावाक्छक्तयः[2] षोडश कलाः । पुण्यापुण्यभेदेन कर्म द्विविधम् ।

1. ख. दुग्रो वा   2. क. कृत्यशक्तयः ख. शक्तयः

राजसतामससात्विकभेदेन बुद्धिस्त्रिविधा । तथा मनोऽहङ्कारौ । ज्ञानकर्मभेदेन इन्द्रियं द्विविधम् । विद्यावाक्छक्तिभिः सह षोडश कलासङ्ख्या । उक्तं च कालोत्तरभेदे—

करणस्थेन भेदेन स्वचित्यापि चतुर्दश ।
वाक्च्छक्तिभेदौ द्वौ चेति पुंस्कलाः षोडश स्मृताः ॥ इति ॥

अथवा कर्मबुद्धिमनोऽहङ्काराश्चत्वारः, इन्द्रियाणि दश । विद्यावाक्च्छक्ती द्वे । एवं षोडश कलाः । पुर्यष्टकदेहयुतेति यावत् । अनेन मिश्राध्ववासिनां पुर्यष्टकदेहयुक्तानां कृत्यं करोतीत्यर्थः । पुर्यष्टकं नाम प्रतिपुरुषं नियमेन सृष्टिकालादारभ्य महाप्रळयान्तं मोक्षान्तं वा विद्यते ।

पृथिवीतत्त्वमारभ्य सकलान्तं त्रिंशत्तत्त्वात्मको सिद्धो साधारणरूपसूक्ष्मदेहः । तथोक्तं तत्त्वसङ्ग्रहे—

'वसुधाद्यस्तत्त्वगणः प्रतिपुंनियतः कलान्तोऽयम्' । इति

षोषशकलामध्ये स्थितेन पुंशब्देन पुंसो भोगक्रियान्तरङ्गाणि कलाकालनियतिविद्यारागप्रकृतिगुणाख्यानि षट्तत्त्वानि उच्यन्ते । बुद्धिकर्मशब्दाभ्यां तदध्यवसिततया ग्राह्याण्याकाशादीनि पञ्चभूतानि तत्कारणानि शब्दादीनि पञ्चतन्मात्राण्युच्यन्ते ।

तथोक्तं भोजदेवेन—

प्रळयाकलेषु येषां पक्वे मलकर्मणी व्रजन्त्यन्ये ।
पुर्यष्टकदेहयुता योनिषु निखिलासु कर्मवशात् ॥ इति ॥

अत्र योनिशब्देन भुवनान्युच्यन्ते । न तु मातृयोनिस्थानानि । अन्य**कर्तृनिहिता** अन्ये च ते कर्तारश्च अन्यकर्तारः तेषु अन्यकर्तृषु अनन्तेश्वरश्रीकण्ठविष्णुब्रह्मादिषु निहिता स्थिता सती **अशुद्धे वर्त्मनि** अशुद्धाध्वविषये पञ्चकृत्यं करोति । शुद्धाध्वविषये पतिसमवेता अशुद्धाध्वविषये अनन्तादिद्वारेण स्थिता चिच्छक्तिरेव पञ्चकृत्यं करोतीत्यर्थः ॥ ४ ॥

इत्थं पतिपदार्थभेदमुक्त्वा, इदानीं पशुपदार्थभेदं वक्तुमुपक्रमते—देहान्य इति ।

देहान्यः समलः पशुस्सहजचिन्नैकः प्रबोधाकलः
सेशश्च प्रळयाकलः कृतिमली रुक्कर्ममायी विभुः ।

सूक्ष्माङ्गी सकलोऽल्पवित् स्वकृतभुक्कर्ता च नित्योऽप्रभुः
देही भुक्तकृतिः क्रमेण सुचिराच्छर्वेण मुक्तो भवेत् ॥ ५ ॥

देहादिभ्योऽन्यो देहान्यः देहेन्दियादिव्यतिरिक्तः । सहजचित् स्वाभाविकचैतन्यस्वरूपः । 'चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा' इत्युक्तत्वात् । **समलः** अनादिमलबद्धः । मलशक्त्या निरुद्धचित्स्वरूप इत्यर्थः । तथा चोक्तम् ।

शिवत्वमात्मनः शुद्धं विद्यमानमपि स्फुटम् ।
न चात्मलाभं लभते मलात्तदवरोधकात् ॥ इति ॥

अत एव **पशुः** यथा पत्या पश्वादयो रज्जुभिर्बध्यन्ते तथा शिवेन मलादिपाशैर्बध्यते इति पशुसंज्ञको जात इत्यर्थः । उक्तं च—

पशुः पशुत्वसंयोगात् न मुक्तः पशुरुच्यते । इति ।

नैकः एको न भवतीति नैकः अनेकप्रकारः । **सेशः** ईश्वरेण भोगादौ प्रेरितः । उक्तं च—

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेच्छुभं वाशुभमेव वा ॥ इति ॥

पारम्पर्यप्रेरकत्वद्योतनार्थं चकारः । विज्ञानाकलेषु[1] साक्षात् ईश्वर एव प्रेरकः । प्रलयाकलादावनन्तादिद्वारेण प्रेरकत्वम् । **विभुः** व्यापकः । अल्पविदल्पं किञ्चिद्वृत्ति जानातीति अल्पवित् । स्वस्मिन् विद्यमानसर्वज्ञत्वादिज्ञानाभावात् किञ्चिज्ज्ञत्वं सिद्धम् । तथा किरणे—

अनादिमलब[2]द्धत्वात् किञ्चिज्ज्ञोऽणुर्मयोदितः ।
अनादिमलमुक्तत्वात् सर्वज्ञोऽसौ शिवस्ततः ॥ इति ॥

स्वकृतभुक् स्वेन कृतं कर्मफलं भुङ्क्त इति स्वकृतभुक् । कर्ता च कर्मकर्ता च । चकारः पारतन्त्र्यसूचनार्थं कृतः । पारतन्त्र्येण कर्मकर्ता । कर्मफलभोक्तेति यावत् । आत्मनः अस्वातन्त्र्यात् कर्मणः जडभावेन योजकापेक्षत्वादिति भावः ।

---

1. केवले   2. संबन्धात्

तथा पराख्ये—

पशुत्वरुद्धचिच्छक्तेः स्वातन्त्र्यं न पशोरतः।
कर्म चिद्रहितं तस्माद्योजकं तदपेक्षते॥
योजकः स महेशानः स्वेच्छया बलवान् यतः॥ इति।

तथा महाभारते वासुदेवं प्रति सुयोधनवचनम्—

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः॥
केनापि देवेन हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि॥ इति॥

केचन मनोबुद्ध्यादेरेव कर्मफलभोक्तृत्वं वदन्ति। तदयुक्तम् बुद्धीन्द्रियाणां भोक्तृत्वं न संभवति जन्मान्तरसम्बन्धाभावात्। **नित्यः** नाशरहितः। **अप्रभुः** स्वदेहयोजनादावसमर्थः। 'कर्मणा देहसंयोगो विभोरपि महेश्वरात्' इत्युक्तत्वात्। इत्थमात्मनां लक्षणान्युक्त्वा प्रबोधाकल इत्यादिना आत्मनां त्रिविधावस्थां दर्शयति—**प्रबोधाकल इति**। प्रबोधो विज्ञानं तेनाकलयते बध्यत इति प्रबोधाकलः। केवलमलमात्रयुक्तः। विज्ञानाकल इत्यर्थः। विज्ञानाकलत्वं नाम विज्ञानयोगसंन्यासादिना मायाकर्मभ्यां निर्मुक्तत्वम्। सहजमलशक्त्या तिरोहितशिवत्वाभिव्यक्तित्वं विज्ञानकैवल्यम्। तथा मृगेन्द्रे—

मायातीताणवोऽपि स्युः सहजाशुद्धिसंयुताः।
यावन्नो वीक्षते शम्भुः अध्वातीतो निरञ्जनः॥ इति।

प्रबोधाकल इति जातावेकवचनं तस्यानेकत्वात्। आत्मनां मायाशुद्धविद्ययोर्मध्ये विज्ञानाकलनामतः प्राणिनो नैके सन्ति॥ तथोक्तम्—

आत्मानो बहवः सन्ति चिद्रूपा मलदूषिताः।
मायाकर्ममलोपेता कलाद्यवनिगोचरे॥
कर्माशुद्धियुतश्चान्यो मायायां प्रळयाकलः॥
मायोर्ध्वं शुद्धविद्याधो मलमात्रावृतोऽपरः।
विज्ञानाकल इत्यास्ते स्थितिरेषा समीरिता॥ इति।

एवं प्रळयाकलसकलयोरपि असंख्यातत्त्वं द्रष्टव्यम्। **कृतिमली** क्रियत इति कृतिः कर्म, कृतिश्च मलश्च कृतिमलौ, तौ अस्य स्त इति कृतिमली।

कर्ममलाभ्यां संयुक्तः प्रळयाकलनामधेयः इत्यर्थः। प्रळयेन कलादितत्त्वानां उपसंहारेऽपि मायातत्त्वे आकलयते बध्यत इति प्रळयाकलः। **सूक्ष्माङ्गी** सूक्ष्मदेहः पुर्यष्टकदेहस्वरूपं तदस्यास्तीति सूक्ष्माङ्गी। प्रळयाकलविषयमेतत्। सकलानां तु व्यक्तात्मकं सूक्ष्मस्थूलशरीरत्वम्। पुर्यष्टकं नाम पञ्चमहाभूतमेकं। पञ्चतन्मात्रं द्वितीयं। ज्ञानेन्द्रियं तृतीयं। कर्मेन्द्रियं चतुर्थं। मनोबुध्यहङ्काराः पञ्चमम्। गुणत्रयं षष्ठम्। प्रकृतिस्सप्तमम। कलापञ्चकमष्टमम्। **रुक्कर्ममायी** रुक्शब्देन मल उच्यते। मलस्य आणवपशुत्वाज्ञानावृतिमूलमृत्युरुक्मूर्च्छाञ्जननीहाराविद्यापापक्षयाद्याः पर्यायाः। रुक् च कर्म च माया च रुक्कर्ममायाः। ता अस्य सन्तीति रुक्कर्ममायी। **सकलः** मायाकर्ममलैः संयुक्तः सकलनामधेयः। मायाशब्देन मायायाः साक्षात् बन्धकत्वाभावेन मायाकार्यभूतानि कलादीनि तत्त्वान्युच्यन्ते। अत एव साकल्येन सकलादिना बध्यत इति सकलः। तथोक्तं वरुणशिवेन—

माया कलादिपृथ्व्यन्ता यद्वा तत्त्वसंहतिः। इति॥

देही स्वकर्मानुगुणोत्पादितसूक्ष्मदेहेन स्थूलदेहेन च युक्तः। **भुक्तकृतिः** भुक्ता कृतिः कर्म येनेति भुक्तकृतिः 'विज्ञानयोगसंन्यासैर्भोगाद्वा कर्मणः क्षयः' इत्युक्तत्वात्। **क्रमेण** यथाक्रममपक्वमलतारतम्यतः सकलानां प्रळयाकलपदप्राप्तिः, तदनन्तरं विज्ञानाकलपदप्राप्तिः, तदनन्तरं रुद्राणां मन्त्राणां मन्त्रेश्वराणां शिवस्य वा पदप्राप्तिः। तथा चोक्तं मृगेन्द्रे—

रुद्रमन्त्रपतीशानपदभाजो भवन्ति ते।
स्थितौ याननुगृह्णाति गुरुमास्थाय चिद्वतः॥ इति॥

प्रळयाकलविज्ञानाकलानां मध्ये मलपरिपाकतः केषाञ्चित् सायुज्यपदप्राप्तिः, केषाञ्चित् स्वाधिकारपदप्राप्तिः। उक्तं च—

केवलद्वयमध्ये तु परिपक्वविवक्षया।
शक्त्या या क्रियते दीक्षा शिवेनैव कृपात्मना॥
सायुज्यं कस्यचिज्ज्ञेयं स्वाधिकारः परात्मनः॥ इति।

सायुज्यमित्यत्र शिवेन समता । क्रमशब्दः परिपक्वतारतम्यतो विहित इति द्रष्टव्यः । यदात्यन्तपरिपाकस्तदैव शिवपदप्राप्तिर्द्रष्टव्यः । **सुचिराद्बहुकालेन** । मलपरिपाकस्तु बहुकालेन साध्यत इति मन्तव्यः । यदा परिपाकस्तदैव मोक्ष इति विवेकः । **शर्वेण** परमशिवेन मुक्तः मोक्षं प्रापितो भवेत् । अत्र विज्ञानाकलप्रळयाकलसकलाः पक्वापक्वमलभेदेन प्रत्येकं द्विप्रकाराः ।

द्विविधज्ञानाकलानां मध्ये पक्वमला द्विप्रकाराः। अत्यन्तं परिपक्वमलाः अनन्तादयोऽष्टौ ईश्वरतत्त्वनिवासिनः । अनन्ताद्यपेक्षया अपक्वमलाः सप्तकोटिमहामन्त्राः शुद्धविद्यातत्त्वनिवासिनः । एतेषां पतिपदार्थेऽन्तर्भावः पक्वमलत्वात् । एतान् साक्षात् परमेश्वरोऽधिकारमलेन बन्धयित्वा तदनन्तरं मोक्षप्रदो भवति । एतेभ्योऽन्ये अत्यन्तापक्वमलाः शुद्धविद्यामायातत्त्वान्तराळनिवासिनः विज्ञानाकलनामानोऽसङ्ख्यातास्सन्ति । एतेषां परमेश्वरो मलपक्वतारतम्यतो मन्त्राणां विद्येश्वराणां च पदं स्वपदं वा दत्त्वा तदनन्तरं मोक्षप्रदो भवति ।

द्विविधप्रळयाकलानां पक्वकर्ममला द्विप्रकाराः मायागर्भाधिवासिनो गहनेशादयोऽत्यन्तं पक्वकर्ममलाः । गहनेशाद्यपेक्षयापक्वकर्ममला अष्टादशाधिकशतरुद्राः ब्रह्माण्डाधारकत्वेन बहिःस्थिताः । **तदन्तस्थिताः** कालाग्निरुद्रादयः । एतेषां शतरुद्राणां कालयोगे विद्यमानेऽपि सकलाणुवर्गवत् कलादिसंबन्धराहित्यात् साक्षात् परमेश्वरः कर्ममलपक्वतारतम्यतो विद्येश्वरपदप्राप्त्यनन्तरं मोक्षप्रदो भवति ।

'कलायोगेऽपि नो वश्याः कलानां पशुसङ्घवत् ।' इत्युक्तत्वात् । एतेभ्योऽन्येऽत्यन्तापक्वकर्ममला मिश्राध्ववासिनोऽसङ्ख्याताः सन्ति । तेषामेव मोक्षप्रदः परमेश्वरः ।

सकलास्त्वपरिपक्वकर्ममलमाया ब्रह्माण्डाभ्यन्तरस्थिततत्तद्भुवनवासिनः। एतेषां परिपक्वं तु कर्मसाम्यतश्शक्तिपातानुसारेण । संसारे द्वेषः, मुक्तौ श्रद्धा, शिवे भक्तिः, गुरुशुश्रूषादयो येषां जायन्ते ते परिपक्वाः । अत एव एतच्चिह्नराहित्यमेवापक्वानाम् । परिपक्वानां तु परमेश्वरो गुरुमूर्तिमास्थाय परिपक्वमलादितारतम्यतो मन्त्रेश्वरादिपदं दत्वा मोक्षप्रदो भवति ॥ ५ ॥

अथ मलादिपाशपदार्थभेदमाह—**नीहार इति** ।

नीहारोऽनादिरेको मनुजसहभवस्ताम्रगा काळिकेव
स्वाधीकारान्तनाशिप्रतिपुरुषदृगावारिकानेकशक्तिः ।
पाश्यश्शोध्यश्च बोध्यस्स तु भवति यतो भोक्तृता पारतन्त्र्यं
कर्मादेर्योग एतत्कृतिमनुकलिता रोधयित्रीशशक्तिः ॥ ६ ॥

नीहारो मलः मलपर्यायनामधेयेषूक्तत्वात् । तथोक्तं मृगेन्द्रे—

पशुत्वपशुनीहारमृत्युमूर्च्छामलाञ्जनैः ।
अविद्यावृतिरुग्लानिपापमूलक्षयादिभिः ॥ इति ॥

अनादिः स्वाभाविकः । कारणान्तरस्याभावात् अनादित्वं सिद्धम् । कार्ममायीयबन्धनवदागन्तुकं न भवतीत्यर्थः । अत एवैको भवतीत्यर्थः । न त्वनेकः जडभावे सत्यपि नित्यत्वात्। अन्यथानेकत्वात् घटादिवदनित्यं स्यात् । **मनुजसहभवः** मनुजानामात्मनां सहभवः सहोत्पन्नः । अत्र सहभवशब्देन आत्मा यदा जातस्तदा मलो जातः इति नाशङ्कनीयम् । आत्मनः परमार्थतो जन्माभावात् । सहभवशब्देनात्र तेन आत्मनानादिसिद्धेनान्तरभूतो मलो वस्तुत्वेन कथ्यते चक्षुषः तमःपटलादिवत् । वस्तुभूतमलस्यावस्तुत्वे शशविषाणादिवदभावत्वप्रसङ्गात् । सर्वेषां मलनिवृत्तिहेतुभूतानां दीक्षाज्ञानादीनामानर्थक्यप्रसङ्गात् । अनादित्वादीन् दृष्टान्तेन द्रढीकरोति—**ताम्रगा काळिकेवेति** । (यथा) ताम्रे विद्यमाना काळिका अनादिरेका सहजा तद्वत् मलस्याप्यनादित्वादि सिद्धम् । ताम्रस्य मलिनत्वादिसिद्धौ कारणाभावादनादिभावत्वादिसिद्धिः । तथोक्तं किरणे—

अनादिमलसंबन्धान् मलिनत्वमणौ स्थितम् ।
अनादिमलमुक्तत्वान्निर्मलत्त्वं शिवे स्थितम् ॥
ईदृग्रूपं स्थितं ताभ्यां शुद्धाशुद्धं यथार्थतः ॥
विशुद्धः स्फटिकः कस्मात् कस्मात्ताम्रं सकालिकम् ।
यथास्मिन् न निमित्तं हि तावानेव शिवात्मनोः ॥ इति ।

ताम्रगाकाळिकादृष्टान्तेन यथा ताम्रस्यावारिका कालिका रसशक्त्या विद्धा निवृत्ता भवति तथा आत्मावारको मलश्शिवशक्त्या निवृत्तो भवतीत्यर्थः।

यथा तण्डुलस्य तुषाद्यङ्कुरोत्पत्तौ निमित्तं तथा मलोऽप्यात्मनश्शरीराद्युत्पत्तौ निमित्तम्। आत्मा व्यापकः तदाच्छादकत्वात्। स मलोऽत्यन्तं तद्व्यापकः। अत एव नित्यभूतः मलात्मनोरनाद्यावारकत्वलक्षणसम्बन्धसद्भावात्कदाचिदपि विश्लेषो न संघटते इति स्वाभाविकादेवानिर्मोक्षप्रसङ्गो जात इति विशङ्क्याह— **स्वाधिकारान्तनाशिप्रतिपुरुषदृगावारिकानेकशक्तिरिति।** स्वस्याधिकारः स्वाधिकारः। मलाधिकार इत्यर्थः। आत्मचैतन्याच्छादकत्वरूपोऽधिकारः। तस्य अन्ते अवसाने मलस्य द्रव्यत्वाच्चक्षुषः पटलादेरिव पाकस्संभवतीति। परिपाकावस्थायामिति यावत्। तस्मिन् नाशो यस्य स स्वाधिकारान्तनाशी मलस्य एकरूपत्वाद्बहूनां आत्मनां मध्ये एकात्मनः परिपाकावस्थायां शिवशक्त्या निवर्त्यमानो मलः सर्वात्मभ्यो निवर्त्येत इति कृत्वैकात्मनो मोक्षप्रसङ्गे सर्वात्मनां मोक्षप्रसङ्गो जात इत्याशङ्क्याह—**प्रतिपुरुषदृगावारिकानेकशक्तिरिति।** प्रतिपुरुषाणां प्रत्यात्मनां दृगावारिकाः ज्ञानाच्छादिकाः अनेकशक्तयः बहुळसामर्थ्यानि यस्य स तथोक्तः। नित्यस्य व्यापकस्य मलस्यानित्याः प्रतिपुरुषस्था ज्ञानाच्छादकाः अनेकाश्शक्तयोऽत्रान्वेष्टव्याः। अन्यथा एकत्वे सति एकस्मादात्मनोऽपसृते मले सर्वेषां तुल्यकालं मोक्षः स्यात्। यतो मोक्षो यौगपद्येन न संभवति तस्मात्कारणात् मलस्य शक्तिबहुत्वमभ्युपगन्तव्यम्। व्यापकस्य मलस्य नित्यत्वाभ्युपगमात्। यथा अग्नेः दाहिका शक्तिः स्तम्भनादिमन्त्रेणाशु निरुध्यते तद्वत् ईश्वरानुग्राहकभूतया शक्त्या मलशक्तिर्निरुध्यत इति कृत्वोपचारेण मलः पुरुषाद्विश्लिष्ट इति कथ्यत इत्यर्थः।

तथोक्तं किरणे—

विभोरपि मलस्यास्य तच्छक्तेः क्रियते वधः।
उपायाच्छक्तिसंरोधः कथञ्चित् क्रियते मले॥
यथाग्नेर्दाहिका शक्तिर्मन्त्रेणाशु निरुध्यते।
तद्वत् तच्छक्तिसंरोधात् विश्लिष्ट इति कथ्यते॥ इति॥

शिवशक्त्यापि स्वाभाविकमलपरिपाकावस्थायामेव मलशक्तिः निवर्त्यते। यथा तण्डुलाच्छादकः तुषादिः परिपाकावस्थायामेव निवर्त्यते, अन्यथा न निवर्त्यते तद्वदित्यर्थः। यथा तण्डुलस्यापरिपाकावस्थायां मुसलादिघातेन

तण्डुलस्यापि क्षयः तथा मलस्यापरिपाकावस्थायां निवर्त्यमाने सत्यात्मनोऽपि विकारित्त्वप्रसङ्ग इति नाशङ्कनीयम्। तथोक्तं किरणे—

सहजा काळिका[1] ताम्रे तत्क्षयान्न च तत्क्षयः।
यद्वत् ताम्रे क्षयस्तद्वत्पुरुषस्य मलक्षयः॥ इति।

ताम्रगाकाळिकायाः परिपाकावस्था रससंयोगकाल एव जायत इति मन्तव्यम्। अत एव परिपाकावस्थायां मलशक्तिक्षयः स्पष्टीकृतः। तथोक्तं मृगेन्द्रे—

तदेकं सर्वभूतानामनादि निबिडं महत्।
प्रत्यात्मस्थस्वकालान्तापायिशक्तिसमूहवत्॥ इति।

अथात्मनो मलसद्भावेन पाश्यादिवृत्तिभेदमाह—**(पाश्य इति)। यतो** मलसद्भावात्, स तु पशुः **पाश्यः** पाशादनपेतः पाश्यः। मलादिना प्रेर्य इत्यर्थः। अत एव **शोध्यः** शोधनभूतषडध्वरूपया दीक्षया शोधयितुं योग्यः। आत्मनो मानसाद्यन्तःकरणविरहेऽपि मलावृतत्वात् शोध्य इत्यर्थः। शोध्यत्वादनन्तरं बोध्यः। शास्त्रात्मना करणेन सर्वज्ञत्वादियुक्तशिवज्ञानेन बोधयितुं योग्यः। सहजसर्वदोषविनाशेऽपि आत्मनः सचि(च्चि)न्मात्रेणविद्यमानत्वात् सर्वज्ञत्वादिगुणनाशाभावात् बोध्य इत्यर्थः। भवतीति सर्वत्र संबन्धः। यतो मलात् स पशुः पाश्यो भवति, शोध्यश्च भवति, क्रमात् पाश्यादिवृत्तीनां मलनिवृत्तौ निवृत्तिस्सिद्धा। तथा चोक्तं [2]किरणे—

तत्स्वभावात्पशुः पाश्यः शोध्यो बोध्यो मतस्त्विह।
पाश्यादिवृत्तयो यास्तु तस्य भेदाः व्यवस्थिताः॥
मले सति भवन्त्येता भोक्तृत्वे च न केवलम्॥ इति।

कर्मादिसम्बन्धेऽप्यात्मनो मलसद्भावादेव भोक्तृत्वं पारतन्त्र्यं च संभवतीत्याह—**कर्मादेरिति।** यतो मलसद्भावादेव कर्मादेः। आदिशब्देन माया गृह्यते। मायाकर्मणोर्योगे संबन्धे सत्यपि भोक्तृता पारतन्त्र्यं चेति। भोक्तृतापारतन्त्र्यं भवतीति संबन्धः। ननु आत्मनः कर्मणैव भोक्तृत्वं विद्यते। भोगोऽपि रागादिहेतुः कुतो मलेन संबन्धः। अत्रायं परिहारः—

1. कालिमेति तत्त्वप्रकाशे दृश्यते। 2. क. कारणे.

यथा लोके पुरुषस्य चौर्यं दृष्ट्वा अयं पुरुषः चौर्ययुक्त इति निगळादिना बध्यते तथा आत्मापि मलयुक्त इति रागादिना बध्यते। अन्यथा कुतो रागादिसंबन्धः। अत एव मलस्य साक्षान्निमित्तत्वं भोक्तृतायां प्रोक्तम्। पारम्पर्येण मायाबन्धः देहोत्पत्तिहेतुः। कर्मबन्धः सुखदुःखात्मकभोगहेतुः। तथा चोक्तं किरणे——

चौर्यं हि बीजमावेक्ष्य यथा निगळबन्धनम्।
तथा पशुत्वमालोक्य रागतत्त्वं प्रवर्तते ॥

पशुत्वेन हि भोक्तृत्वं मायाबन्धः तनुस्थितम्।
सुखदुःखात्मको भोगः कर्मणा संस्थितः पशोः ॥

नान्यथास्य विनिर्दिष्टं भोगभोक्तृत्वबन्धनम् ॥ इति।

मलादेवात्मनः कर्मादिभोजने पारतन्त्र्यं सिद्धम्। मलशक्तयः किम् आत्मानं स्वातन्त्र्येण बन्धयन्त्यपसरन्ति वेति (आशङ्क्य) तथा न भवतीत्याह——**एतत्कृतिमिति**। एतस्य मलस्य कृतिं कार्यं बन्धनापसरणभूतं **अनुकलिता** अनुकरणभूता। न स्वयमेव बन्धयित्री अपसरणयित्रीति भावः। रोधयतीति **रोधयित्री** रोधनभूता **ईशशक्तिः** शिवशक्तिः। अस्तीति शेषः। अत्रापि शिवशक्तिः स्वयं कर्त्री न भवति शिवस्यैव कर्तृत्वात्। अत एव ईशशक्तिरित्युक्तम्। शक्तिः करणं शिवः कर्तेति प्रसिद्धम्। इयमेव शिवशक्तिः यदा प्रसन्ना भवति तदानुग्राहिकेत्युच्यते। तथा चोक्तं मृगेन्द्रे—

तासां माहेश्वरी शक्तिस्सर्वानुग्राहिका शिवा।
धर्मानुवर्तनादेव पाश इत्युपचर्यते ॥
परिणामयति ताश्च रोधान्तं कार्कचित्त्विषा।
यदोन्मीलनमाधत्ते तदानुग्राहिकोच्यते ॥ इति ॥

तासां मलशक्तीनाम्। तत्र मलप्रकरणे उक्तत्वात्। मध्ये इत्यध्याहार्यम्। ताः मलशक्तीः, कः ईश्वरः, स एवार्कः तस्य चित्त्विषा ज्ञानतेजसा। एतेन तिरोधानशक्तिरेवोपचारेण पाशस्वरूपेति यावत् ॥ ६ ॥

इत्थं विज्ञानाकलात्मविषयमलरोधशक्त्याख्यपाशद्वयमुक्त्वा इदानीं प्रळयाकल सकलात्मविषयभूतं कर्मपाशलक्षणमाह——**देहाद्यैरिति**।

देहाद्यैर्योगहेतुर्विविधमपि च नुश्चित्रभोगप्रसूति-
र्नाशोत्पत्त्याप्यनादि प्रतिनरनियतं सूक्ष्मभावाददृष्टम्।
वाग्धीकायार्थसाध्यं फलजनकधरं कर्म धर्मादि भोग्यं
स्वापे मायाप्तपाकं स्थितिमतिसहितं भोगदं स्यात् कलान्तम्॥७॥

आदिशब्देन इन्द्रियार्थौ गृह्येते। तेनायमर्थः संपन्नः। देहेन स्थूलसूक्ष्मरूपशरीरेण, इन्द्रियैः मानसादिज्ञानेन्द्रियकर्मेन्द्रियैः अर्थैः इन्द्रियार्थभूतशब्दादिविषयैः, **योगहेतुः** योगस्य चिदात्मनां देहेन्द्रियार्थसम्बन्धस्य हेतुः कारणभूतः। चिदात्मनां देहादिसंबन्धः प्रत्यक्षेण दृश्यते। अत एव देहसम्बन्धः कुतो भवति। कर्मणैवेति प्रसाध्य देहादिसंबन्धे कर्मैव कारणमित्यनुमीयते। अन्यथा देहादिसंबन्धो न भवेदित्यर्थः। इत्थं कारणमुक्त्वा तद्विशेषं दर्शयितुमाह——**विविधमित्यादिना**। **विविधं** देहेन्द्रियार्थैः आत्मनां संबन्धेषु नानाप्रकारभूतम्; प्राणिनां नानाविधानि शरीराणि इन्द्रियाणि विषयाश्च दृश्यन्ते। तत्र शरीराणि तावद्देवासुरकिन्नरगन्धर्वनरपिशाचपश्वादितिर्यग्देहाः। नरेषु ब्राह्मणक्षत्रियवैश्यशूद्रादि। इन्द्रियाणि तावत् गजानां परावृत्तजिह्वत्वं, सर्पाणां चक्षुःश्रवणत्वं, उलूकानां दिवान्धत्वं, मार्जाराणां रात्रावतिप्रकाशकत्वं, नराणां रात्रौ किञ्चित्प्रकाशकत्वम्। तथोक्तं कामिके——

यथा विलक्षणं चक्षुः क्षपायां नृबिडालयोः। इति।

अन्यत्रापि——

दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ इति ॥

विषयास्तावद्यथा——चातकानां मेघपटलनिपतज्जलकणोपजीवित्वम्। हंसमधुकराणां कमलकिञ्जल्करसास्वादकत्वम्। पश्वादीनां तृणाद्याहारता। देवानाममृतान्नता। नराणां व्रीह्याद्यन्नता। **अपि च** किञ्चेत्यर्थः। **नुरिति** जातौ षष्ठ्येकवचनम्। नृशब्देनात्मानो गृह्यन्ते। तेषां **चित्रभोगप्रसूतिः** नानाविधभोगोत्पत्तिस्थानभूतं यथा देवानां नानाविधभोगकारणस्वर्गादिस्थानम्। मनुष्याणां भूलोकादिस्थानम्। तत्रापि केषाञ्चिन्नरपतित्वम्। केषाञ्चित् द्रव्यपतित्वम्। केषाञ्चित् दरिद्रत्वम्। **नाशोत्पत्त्यापि**।

सहितमिति शेषः। पूर्वोक्तदेहेन्द्रियादिनाशजननाभ्यां सहितम्। अपिशब्देन चित्रभोगादीनां यदाकदाचिदपि नाशोत्पत्तिमत्त्वं द्योतितम्। अत एव **प्रतिनरनियतम्** प्रतिनराणां प्रतिपुरुषाणां नियतं नियमेन कर्मानुकूलजात्यायुर्भोगादियुक्तम्। तत्र तत्तद्भुवनवासिनां तत्तद्भुवनतारतम्यतो नानाप्रकारान्नानारूपान् प्रत्यात्मनियतान् जननानन्तरभाविनश्च देहेन्द्रियार्थान् प्रदातुं समर्थमित्यर्थः। **अनादि** मलपाशवत् स्वाभाविकम्।

ननु कर्म भोगकरणनिमित्तमित्युक्तम्। भोगस्तु सुखदुःखादिरूपः, तन्निबन्धनं कर्म। तस्मादेव देहोत्पत्तौ सत्यां तदनन्तरं कर्मार्जनं भवति। अत एव प्रथमसृष्टिकाले शरीरादिसम्बन्धः कुतश्चित् कारणात् इष्यते। कर्मणा देहादिसम्बन्धो नेष्यते। तस्मात्कारणादेव कर्मणोऽनादित्वप्रसङ्गो न युक्त इति विचारः। अत्रायं परिहारः। प्रथमसृष्टिकालेऽप्यात्मनां नानाविधदेहसम्बन्धवत्त्वात् अनादित्वम्। अन्यथा नानाविधदेहसम्बन्धः कुतः समायातः। तथोक्तं किरणे—

यदेतत्कर्म देवेश प्रोक्तं भोगनिबन्धनम्।
कर्मार्जनतनौ सत्यां सृष्टिकाले तनुः कुतः॥

यथानादिर्मलस्तस्य कर्माप्येवमनादिकम्।
यद्यनादि न संसिद्धं वैचित्र्यं केन हेतुना॥ इति॥

किरणवृत्तौ भगवता रामकण्ठेन 'पुरुषाणां हि सर्वथा शरीरभोगवैचित्र्यान्यथानुपपत्त्या कर्मणः सत्वम्। प्रथमसृष्टिकालेऽपि पशुपक्षिमृगसरीसृपस्थावरमनुष्यादिवैचित्र्यश्रुतेः महाप्रळयेऽपि कर्मसिद्धितः प्रवाहानादिः कर्मशरीरप्रबन्धः सिध्यती'ति व्याख्यातम्। अत एव बीजाङ्कुरन्यायवशात् कर्मणोऽनादित्वं सिद्धमेव। क्रियत इति **कर्म** व्यापारजन्यत्वात्। तदात्मनि संस्काररूपेणास्ति। **सूक्ष्मभावात्** सूक्ष्मरूपत्वाददृष्टमित्युच्यते।
उक्तञ्च मृगेन्द्रे—

कर्म व्यापारजन्यत्वाददृष्टं सूक्ष्मभावतः। इति।

यथा लोके पुरुषस्य भूखननमात्रेण निधिप्राप्तिः। वृक्षमूलोपसर्पणमात्रेण उपरि शाखानिपतनेन आत्महानिः। धर्माधर्मरूपेणोत्पन्नमेतत्फलद्वयम्। तस्मात्

अदृष्टमित्युच्यते। अत एव **अदृष्टम्** अदृष्टस्वरूपम्। **वाग्धीकायार्थसाध्यं,** वाक् च धीश्च कायश्च अर्थश्च तैस्साधितुं योग्यम्। धीशब्देन मनोबुद्धी गृह्येते। अर्थशब्देन धनधान्यादयः। शिवविषयस्तोत्रपठनादिकं वाग्रूपम्। शिवध्यानं मनोरूपम्। शिवयजनादिकं कायरूपम्। शिवधामादिनिर्माणमर्थरूपम् धनेन क्रियमाणत्वात्। एतैस्साधनैः साध्यमित्यर्थः। **फलजनकधरं** फलानां जनकं च धारकं च **भोग्यं** च आत्मनां कर्मफलभोगायैव देहेन्द्रियभुवनादीनाञ्च जनकम्। नियतकालमात्रेणैव तेषां धारकम्। फलप्रदानद्वारेण भोग्यञ्च। तदुक्तं मृगेन्द्रे—

जनकं धारकं भोग्यमाध्यात्मादित्रिसाधनम्। इति।

धर्मादि धर्माधर्मस्वरूपम्। आदिशब्देन सहकारित्वं गृह्यते। अचेतनस्येशाद्यपेक्षत्वादिति भावः। तथोक्तं मृगेन्द्रे—

ईशाविद्याद्यपेक्षत्वात्सहकारि तदुच्यते। इति।

कर्म कर्मनामधेयः पाशः **स्वापे** सर्वभूतसंहारकाले **मायाप्तपाकं** मायया प्राप्तपरिणामम्। **स्थितिमतिसहितं** स्थितिबुद्ध्या युक्तम्। मायायां संस्काररूपतया वर्तत इत्यर्थः। मायायां संस्काररूपेण विद्यमानत्वादेव भुक्त्यनन्तरं क्षीयत इति मन्तव्यम्। तथोक्तं मृगेन्द्रे—

मायायां वर्तते चान्ते नाभुक्तं क्षयमेति च। इति। अन्यत्रापि—

अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि॥ इति॥

कर्मसाम्यकाले हि शिवत्वव्यक्तिः। तथोक्तं किरणे—

समे कर्मणि सञ्जाते कालान्तरवशात्ततः।
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा।
शिवत्वव्यक्तिः सम्पूर्णा संसारी न पुनस्सदा॥ इति॥

कलान्तं भोगदं स्यात् पृथ्वीतत्त्वमारभ्य कलातत्त्वपर्यन्तं तन्निवासिनामात्मनां सुखदुःखादिभोगप्रदं स्यात्॥ ७॥

अथ सकलात्मविषयभूतमायापाशलक्षणमाह—**मायाख्यमिति।**

मायाख्यं चित्तशक्त्या परिगतमकलं कष्टवर्त्मैकबीजं
नित्यं कर्मान्तरोधि स्वकृतिनिवसनं तत्कृतेर्व्यापकं च।

कार्याचित्त्वप्रकाशादचिदशिवकरं मोहकं स्वापकाले
सर्वात्मावासमेवं परमपि च सितं कारणं बोधकं तत् ॥ ८ ॥

मायाख्यं मायानामधेयम्। **चित्रशक्त्या** अनेकसामर्थ्येन **परिगतम्** समवेतं **अकलं** सूक्ष्मरूपम्। **कष्टवर्त्मैकबीजम्** कष्टवर्त्मनः अशुद्धाध्वनः, कलादितत्त्वस्थितभुवनस्य भुवनजशरीरस्य चोभयात्मनः सर्वस्य जगतः एकबीजं मुख्योपादानकारणम्, उपादानकारणं विना जगदुत्पत्त्यभावात्। एकपदेन मायाख्यं एकमेवेति प्रतिपादितम्। लोके घटपटादिवत्कारणजन्यं अनेकमचेतनमुत्पत्तिमत्त्वेन सहितं दृष्टम् इदं मायाख्यमचेतनमपि कारणजन्योत्पत्तिमत्त्वाभावेन स्थितम्। तस्मादेकम्। अचेतनस्यानेकत्वाभ्युपगमेनानित्यत्वं सिद्धमित्येकमेवेति भावः। ननु मायाख्यस्यानेकत्वमङ्गीक्रियताम् किमेकात्मकत्वोपादानेन। यथा लोके उपादानभूतेभ्यो बहुभ्यस्तन्तुभ्यः पटस्यैकस्योत्पत्तिर्दृष्टा तथा सर्वजगन्निर्माणमनेकस्मात्कारणात्क्रियताम्। अत्रायं परिहारः— तत्र पटेऽपि उपादानकारणं तन्त्वात्मकमेकमेव। एकस्मादेव कार्पासाख्यद्रव्यादुत्पन्नत्वात्। एकस्मादेव मायाख्यात् जगदुत्पत्तिस्सिद्धा। चित्रशक्तिमत्वादेव चित्रभुवनादिरचना सिद्धा। तथोक्तं मृगेन्द्रे—

पटस्तन्तुगणाद् दृष्टस्सर्वमेकमनेकतः।
तदप्यनेकमेकस्मादेव बीजात्प्रजायते ॥ इति ॥

नित्यं महासंहारेऽपि शिववदात्मवन्मायाया अवस्थानात्; यद्वक्ष्यति 'शिष्यन्ते पशवः स शक्तिरमलश्शम्भुश्च मायाद्वयम्' इति। यद्यनित्या माया तर्हि जगदुत्पत्तिर्न स्यात्। महासंहारे मायाया नाशश्चेत्तर्हि पुनस्सर्गारम्भकाले कस्मादुपादानात् जगदुत्पद्येत। तस्मान्मायाया नित्यत्वम्। ननु उपादानाभावेन जगदभाव इति मायाया नित्यत्वं नाङ्गीकार्यम्। सृष्टेः कर्तेश्वरः सर्गादौ स्वसामर्थ्यादेवोपादानं सृजतीति नैतद्युक्तम्। उपादानकारणेऽपि उपादानं विना नोत्पत्तिरिति उपादानान्तरं द्रष्टव्यम्। तस्याप्यनित्यत्वेऽन्यदित्यनवस्थापातः स्यात्। अत एव मायाया नित्यत्वम्। संहारकाले शक्तिरूपेण स्थितत्वात्। **कर्मान्तरोधि** कर्मान्तं कर्मणामधिकारान्तं रुणद्धि बध्नातीति कर्मान्तरोधि। कर्मणः फलदातृत्वमेवाधिकारः। यथा

मृदाद्युपादानस्य सहकारिभूतचक्राद्यपेक्षकत्वं तद्वत् मायाया उपादानत्वेन सहकारिभूतकर्माद्यपेक्षकत्वं सिद्धम्। तथा मृगेन्द्रे —

तदेकमशिवं बीजं जगतश्चित्रशक्तिमत्।
सहकार्यधिकारान्तसंरोधि व्याप्यनश्वरम् ॥ इति ॥

स्वकृतिनिवसनं स्वकृतौ स्वकार्ये निवसतीति स्वकृतिनिवसनम्। मायायाः कार्यं तावत् द्विविधम् बाह्यमाभ्यन्तरञ्चेति। तत्र सृष्टिकाले कलादितत्त्वस्थितभुवनादिव्यक्तिरूपेण विद्यमानं बाह्यम्। आभ्यन्तरं संहारकाले मायागर्भे सूक्ष्माकारेण विद्यमानम्। एवं द्विविधकार्येण वर्तत इत्यर्थः। उक्तं च मृगेन्द्रे—

तदाधाराणि कार्याणि शक्तिरूपाणि संहृतौ।
विकृतौ व्यक्तिरूपाणि व्याप्रियन्तेऽर्थसिद्धयः। इति ॥

तत्कृतेः स्वकार्यस्य **व्यापकश्च**। व्यापकत्वाभावे समस्तभुवनादिरूपेण समन्तात्स्थितनानाविधकार्यस्यानुत्पत्तिः स्यात्। अतो मायाया व्यापकत्वमवश्यमङ्गीकर्तव्यम्। चैतन्यस्यात्मनः सकाशादेव चितामचितामाविर्भावतिरोभावाविति विहितं पक्षं निषेधयितुं मायायाः चैतन्याभाव एवेत्याह—**कार्येति**। **कार्याचित्त्वप्रकाशात्** कार्येषु कलादिकार्येष्वचित्त्वप्रकाशात्। तनुकरणभुवनादिरूपेण अचेतनत्वप्रकाशनात् **अचित्** अचेतनमेव। यथा लोके मृदाद्यचेतनोपादानेन अचेतनभूतघटादिकार्यं दृष्टं तद्वत् मायाकार्यभूतभुवनाद्यचेतनत्वदर्शनेन भुवनाद्युपादानभूतमायायाश्च अचैतन्यं सिद्धमेव। उक्तञ्च मृगेन्द्रे मायालक्षणपटले—

तदचेतनमेव स्यात् कार्यस्याचित्त्वदर्शनात्। इति ॥

ननु चैतन्यादचैतन्यं जायेत। तत्र तन्नियामकः कः। तर्हि अतत्स्वभावात् तत्स्वभावोत्पत्तिस्तत्स्वभावादतत्स्वभावोत्पत्तिरिति सर्वः सर्वस्मादुत्पद्येत। कारणाभावादेव वह्निज्ञापकधूमज्ञानेन जलानुमानं कथं न क्रियते। अत एव अन्यलिङ्गादन्यज्ञानं कदाचिदपि न संभवतीति चैतन्यादचैतन्यस्योत्पत्तिः न सिद्धा। उक्तञ्च—

येषां चिद्धर्मकाद्धेतोरचिदप्युपजायते।
तेषां धूमेन लिङ्गेन जलं किं नानुमीयते ॥ इति ॥

अशिवकरं शिवज्ञानव्यतिरिक्तत्वादेवाज्ञानकरम्। अत एव **मोहकञ्च** ननु माया स्वतो बन्धकत्वाभावात् कलादिद्वारेण बन्धयित्री च ज्ञानक्रियाप्रकाशिका चेत्युक्तम्। तत् कथं मोहिका। सत्यम्। मायोत्पन्नस्य ज्ञानादेः किञ्चिज्ज्ञत्वादेवानात्मादौ आत्मादिभावनाजनकत्वेन मोहकरमित्यर्थः। यथा महान्धकारयुक्तो दीपः प्रकाशमानोऽपि नीलोत्पलादौ रक्तोत्पलादिविपरीतज्ञानप्रकाशकत्वादेवान्धकारयुक्तो दीपो मोहकः प्रोक्तः तथा मायोत्पन्नज्ञानं मोहकमेवेति सिद्धम्। **स्वापकाले** संहारकाले। **सर्वात्मावासः** सर्वात्मनां सकलप्रलयाकलविज्ञानाकलानां स्थित्युपायस्थानम्।

इत्थं मायालक्षणमुक्त्वा बिन्द्वाख्याया महामायाया लक्षणमाह—**एवमित्यादिना। एवं** पूर्वोक्तप्रकारस्वरूपं। **परं** बिन्द्वाख्यम्। **अपि चेति** मायालक्षणवत् बिन्द्वाख्यस्य विशेषलक्षणमस्तीति द्योतितम्। तद्विशेषलक्षणमाह—**सितं** शुद्धरूपं **कारणं** शुद्धाध्वोपादानकारणम्। **बोधकं** समस्तविषयज्ञानादीनां प्रकाशकत्वात्। शब्दोत्पादनद्वारेण शिवादिशुद्धवस्तुदर्शनेन बोधकस्वरूपम्। मायावन्न मोहकम् तदिति सर्वागमेष्वनेन प्रकारेण प्रसिद्धमित्यर्थः। इदं बिन्द्वाख्यं मायालक्षणवत् चित्रशक्त्या युक्तम्। अकलं नित्यं मलाधिकारान्तरोधि बाह्याभ्यन्तरकार्यद्वययुक्तम्। अत्र तु बाह्यकार्यं शक्त्यादिशुद्धविद्यान्ततत्त्वस्थितभुवनादिरूपम्। आभ्यन्तरकार्यं तु संहारे बिन्द्वात्मकशिवतत्त्वे सूक्ष्मरूपेण भुवनाद्यवस्थानम्। स्वपरिणतिरूपाभिः शान्त्यतीतादिपञ्चकलाभिः शुद्धाशुद्धरूपसर्वजगतो व्यापकं कार्याचित्त्वप्रकाशात् अचित्स्वरूपम्। स्वापकाले मन्त्राणां मन्त्रेश्वराणां अनन्तादीनामावासस्थानमिति सर्वं समूहनीयम्॥ ८॥

इत्थं मलादिपाशबद्धविज्ञानाकलादीनामात्मनां मन्त्रणां मन्त्रेश्वराणां च भोगमोक्षार्थं परशिवसृष्टशिवादिषट्त्रिंशत्तत्त्वमस्तीत्याह—**उद्योगादिति।**

उद्योगाच्छक्तितत्त्वं प्रसरति च विभोस्तत्कलाढ्यं सिसृक्षो-
र्बिन्दोः प्राग्दृक्क्रियाभ्यां सदृशमधिकृताद्यत्सदेशाख्यतत्त्वम्।
आधिक्येनेशतत्त्वं मनुपतिसहितं तत्क्रियाशक्तियोगात्
ज्ज्ञानाख्याशक्तियोगान्मनुनिवहमुखैः शुद्धविद्याख्यतत्त्वम्॥९॥

यदा बिन्दुर्भोगाधिकारदशां विधूय सकलस्वकार्यजालं स्वस्मिन् गर्भीकृत्य वर्तते, तदातिक्रान्तबिन्दुकः केवलचिद्रूपशिव एव लयस्वरूपां शिवतत्वसंज्ञां लभते तदा समवेतचिच्छक्तिरपि उदासीनस्वरूपा भवति शिवस्य कार्यासक्तत्वाभावात्। बिन्दोरचेतनत्वादेव तदधिष्ठानभूतैकशिवसमवायिनी शक्तिः लयसंज्ञां लभते। तयाभिसंबन्धादेको देवो लयसंज्ञको भवति। यदा देवः कार्याधिकृतो भवति तदा शक्तिः कार्याधिकृता भवति। यदा सृष्ट्यादिकर्म कर्तुमिच्छा भवति तदा सृष्ट्यादिकर्मकारिणी शिवशक्तिरेवोपादानबिन्द्वधिष्ठानभूता सती स्वकार्यं करोतीति सिसृक्षोर्विभोरित्युक्तम्। तथोक्तं तत्त्वप्रकाशे—

अस्मिन्निलीय निखिला इच्छाद्याश्शक्तयस्स्वकं कृत्यं।
कुर्वन्ति तेन तदिदं सर्वानुग्राहकं प्राहुः॥ इति।

सिसृक्षोः स्रष्टुमिच्छोर्विभोः परमेश्वरस्यो**द्योगात्** व्यापाराद्**बिन्दोः** शिवतत्त्वसंज्ञाभूतप्रथमोपादानभूतात्। तथोक्तं पौष्करे—

उपसंहृतकार्यात्मा यदा बिन्दुर्व्यवस्थितः।
तदा लयाह्वयं तत्त्वं शिवतत्त्वं तदेव हि॥ इति॥

प्राक् प्रथमतः **कलाढ्यं** कलया शान्तिकलया आढ्यं व्याप्तं भुवनैश्च समृद्धम्। उक्तञ्च—

कलावस्थानि तत्त्वानि तत्त्वस्थो भुवनव्रजः। इति।

तत् प्रसिद्धं **शक्तितत्त्वं** शक्त्याख्यतत्त्वं **प्रसरति** जायते। प्रथमोपादानभूताद्बिन्दोः परिणामात् शक्तितत्त्वं जातमित्यर्थः। चशब्देन शान्तिकलामस्तकस्थं शिवतत्त्वसंज्ञं शान्त्यतीतभुवनमुच्यते। उक्तञ्च—

प्रकृतित्वादयं बिन्दुः क्षोभ्यः तेनाखिलात्मना।
तत्र यः क्षुब्धभागोऽस्य शान्त्यतीतकला तु सा॥
शान्त्यादिभुवनात्मा यः परिणामस्तु बैन्दवः।
शिवतत्त्वं तदेवोक्तं .... ॥ इति॥

शक्तितत्त्वव्यवधानेन सदाशिवादितत्त्वमाह—**दृक्क्रियाभ्यामित्यादिना।** दृक्क्रियाभ्यां ज्ञानक्रियाभ्यां सदृशं साम्य**मधिकृतात्** स्रष्टृत्वेनाधिकारं

प्रासात् परमेश्वराद्यदुपादानतयोक्तस्य बिन्दोः ज्ञानक्रियासाम्यरूपं द्वितीयं परिणामित्त्वम् । तत्सदेशाख्यतत्त्वं सदाशिवनामधेयं तत्त्वं जातमित्यर्थः । अत्र सदाशिवादितत्त्वं द्विप्रकारं स्रष्टृरूपं सृज्यरूपं चेति । प्रथमतः स्वयमेव सदाशिवादितत्त्वसंज्ञामनुभूयमानत्वेन स्थितौ शक्तिशिवावेव तदा स्रष्टृरूपमित्युच्यते । सृज्यरूपं तु षट्त्रिंशत्तत्त्वमध्यविहितभुवनादियुक्ततात्त्विकरूपम् । तथाहि——तत्र स्रष्टृरूपं सृज्यमानसदाशिवादितत्त्वविषयव्यापारभेदोपाधिभेदितशिवावस्थात्मकभोगाधिकाररूपं सदाशिवादितत्त्वम् । तथा मतङ्गे——

लयभोगाधिकाराख्यत्रितत्त्वोक्तनिबन्धनः ।
पदार्थः पतिनामासौ प्रथमः परिकीर्तितः ॥ इति ॥

अस्यापि स्रष्टृरूपस्य सदाशिवादितत्त्वस्योपादानापेक्षा नास्ति । शक्तिव्यापारभेदोपाधिकल्पितभेदत्वेन परमार्थतो भेदाभावात् । तदुक्तं तत्त्वप्रकाशे—

तत्त्वं वस्तुत एकं शिवसंज्ञं चित्रशक्तिशतखचितम् ।
शक्तिव्याप्रतिभेदादस्यैते कल्पिता भेदाः ॥ इति ॥

सृज्यरूपसदाशिवादितत्त्वेषु योजितानामणूनां भोगभूमितापन्नं स्रष्टृप्रतियोगिरूपं कर्म विद्यते । तत्रैव ह्युपादानापेक्षा । तत्रौपाधिकसदाशिवाद्यवस्थात्रयविशिष्टः शिवः कर्ता । तच्छक्तिरेव करणम् । ततो विभक्ता बिन्दुशक्तिरेवोपादानम् । अयमभिप्रायः——सदाशिवादितत्त्वतात्त्विकविषयसिसृक्षाविशिष्टस्य भगवतः तन्निर्माणार्थं व्यापारो भवति । स च ज्ञानक्रियाशक्त्योः समविभागरूपः । तद्व्यापारभेदोपाधितः स परमेश्वरो भोगतत्त्वं सदाशिवादितत्त्वमिति च व्यपदिश्यते । उक्तञ्च——

ज्ञानक्रियाख्यशक्त्योरपकर्षोत्कर्षयोरभावेन ।
यः प्रसरस्तं प्राहुः सदाशिवाख्यं बुधास्तत्त्वम् ॥ इति ॥

अनन्तरं तद्व्यापारभेदोपाधिभेदतो भोगसंज्ञकः परमेश्वरः सदाशिवतत्त्वतात्त्विकानि बिन्दुशक्त्या करोति । तच्च करणं ज्ञानक्रियोन्मेषलक्षणव्यापारमात्रात् भवति । क्रियाशक्तियोगात् क्रियाशक्तिसम्बन्धविशिष्टात् परमेश्वरात् मनुपतिसहितं अनन्तेश्वरादिभिरुपेतं तदीशतत्त्वमीश्वराख्यं तत्त्वमा-

धिक्येन क्रियाशक्त्युत्कर्षेण सादाख्याधस्तनप्रसरेण जातम् । अत्रापि यदा सृष्ट्यादिकर्मणि क्रियोद्रिक्ता भवति तदा तद्व्यापारोपाधिविशिष्टः शिव एवाधिकारतत्त्वमीश्वरतत्त्वमिति च व्यपदिश्यते ॥ तदुक्तम्—

न्यग्भवति यत्र शक्तिः ज्ञानाख्योद्रिक्ततां क्रिया भजते ।
ईश्वरतत्त्वं तदिह प्रोक्तं सर्वार्थकर्तृ सदा ॥ इति ॥

पुनस्तद्व्यापारोपाधिकोऽधिकारसंज्ञकः परमेश्वरः ईश्वरतत्त्वतात्त्विकानि बिन्दुशक्त्या करोति । तच्च करणं क्रियाशक्त्युन्मेषलक्षणव्यापारादेव भवति । सृष्टस्यास्य सदाशिवादितत्त्वतात्त्विकस्य तद्वर्तिनोऽणुसङ्घातस्य च स्थित्यादिव्यापारेण पालनं करोतीत्याह—**क्रियाशक्तियोगादिति** । तच्च पालनमुद्रिक्तज्ञानं ज्ञानाख्यशक्तियोगात्, ज्ञानशक्तिसंबन्धविशिष्टात् परमेश्वरात् **मनुनिवहदुखैः** सप्तकोटिमहामन्त्रप्रमुखैः सहितं **शुद्धविद्याख्यतत्त्वं** जातम् । अत्राप्यर्थसिद्धो हि निष्पन्नकार्यस्य तद्रक्षणादौ ज्ञानोत्कर्षः तद्व्यापारोपाधिकशिवः स्थूलाधिकारतत्त्वं विद्यातत्त्वमिति व्यपदिश्यते । उक्तं च——

न्यग्भवति कर्तृशक्तिर्ज्ञानाख्योद्रेकमश्नुते यत्र ।
तत्तत्त्वं विद्याख्यम् (प्रकाशकं ज्ञानरूपत्वात्) ॥ इति ॥

पुनरुद्रिक्तज्ञानव्यापारोपाधिकस्थूलाधिकारसंज्ञकः शिवः विद्यातत्त्वतात्त्विकानि बिन्दुशक्त्या करोतीत्यर्थः । इत्थं स्रष्टृरूपस्य औपाधिकभोगाधिकारात्मकस्य शिवावस्थाभेदस्य सदाशिवादितत्त्वस्य भुवनाद्याश्रयत्वाभावात् । अत एव सृज्यमानेषु पारमार्थिकेषु सदाशिवादिसंज्ञितेषु भोगभूमिषु तत्त्वेषु वर्तमानानां विज्ञानकेवलानां मध्ये अनुगृहीतानां विद्याविद्येश्वराणां विचित्रभुवनादीनि स्वभावसुन्दरीरामाः अपरिम्लानान् भोगान् करणाङ्गानि च परमेश्वरः स्वसमवेतया ज्ञानक्रियाशक्त्या विदधाति । तदुक्तं शिवागमे—

तत्त्वेषु तेषु विज्ञानकेवलानां महात्मनाम् ।
भुवनानि विचित्राणि स्वभावललिताः प्रियाः ॥
भोगानप्यपरिम्लानान् अङ्गानि करणानि च ।
विदधाति शिवश्शक्तेरनन्यायाः क्रियात्मनः ॥ इति ॥ ९ ॥

इत्थं शुद्धानि पञ्चतत्त्वान्युक्त्वा अशुद्धानि मायाकलादितत्त्वान्याह——**मायात इति** ॥

मायातोऽनन्तयोगात् प्रसरति च कला कालतत्त्वं नियत्या
विद्या रागः कलातः प्रकृतिसखमितो रुद्रयुग् गौणमस्मात् ।
बुद्धिश्चातोऽप्याहङ्कृत् त्रिविधगुणयुता धीन्द्रियैर्मानसं प्राक्
कर्माक्षाण्येव मात्राः स्वगुणगतभिदाः पञ्चभूतानि ताभ्यः ॥१०॥

मायातः अशुद्धतत्त्वोपादानकारणभूतात् मायातत्त्वात् **अनन्तयोगा**-दशुद्धतत्त्वकर्तृत्वेन विहितानन्तेश्वरस्य संबन्धात् । अनन्तनाथो ह्यात्मनां कर्माणि प्रलये पक्वानि बुद्ध्वा, स्वशक्त्यधिष्ठिताभिः अनन्तशक्तिभिः मायां क्षोभितां च कृत्वा कलादितत्त्वप्रसवाभिमुखीं करोति । तथोक्तम्—

वामादिशक्तिभिर्युक्तः शिवेच्छाविधिचोदितः ।
विद्याराजाधिराजेशो मायां विक्षोभ्य मन्त्रराट् ॥
कलामुत्पादयामास............ । इति ।

एवं मायां च विक्षोभ्य तदधिष्ठानेनैव प्रळयाकलसकलात्मनां भिन्नानि सूक्ष्मस्थूलशरीराणि भुवनादीनि च सृजति । **कला** कलातत्त्वम् । **कालतत्त्वं नियत्या** नियत्याख्यतत्त्वेन सह **प्रसरति** जायते । एतत्त्रितयतत्त्वं मायात उत्पन्नमित्यर्थः । तथा मृगेन्द्रे—

तदनुग्राहकं तत्त्वं कलाख्यं तैजसं हरः ।
मायां विक्षोभ्य कुरुते प्रवृत्त्यङ्गं परं हि तत् ॥ इति ॥

तथा तत्त्वप्रकाशे—

नानाविधशक्तिमयी सा जनयति कालतत्त्वमेवादौ ।
नियतिः नियमनरूपा मायातः साप्यनन्तरं भवति ॥ इति ॥

कलातः कलातत्त्वात् **विद्या रागः** विद्यातत्त्वं रागतत्त्वञ्च जातम् । अनन्तेश्वरः कलां च स्वशक्त्या क्षोभ्य प्रसवाभिमुखीं कृत्वा विद्यातत्त्वं रागतत्त्वं चाजीजनत् । तथा चोक्तम्—

तदर्थं क्षोभयित्वेशः कलामेवाजनि प्रभाम् ।
तत्त्वं विद्याख्यमसृजत् करणं परमात्मनः ॥ इति ॥

अन्यत्रापि—

कलातत्त्वाद्रागविद्ये द्वे तत्त्वे संबभूवतुः । इति ।

इत्थं मायोत्पन्नस्य पञ्चतत्त्वस्य जननानन्तरं गौणादितत्त्वानामुपादान-कारणभूतं प्रकृतितत्त्वं कलातत्त्वाज्जातमित्याह—**प्रकृतीति । इतः** कला-तत्त्वात् प्रकृतितत्त्वं जातम् । तथा मृगेन्द्रे—

ततः प्राधानिकं तत्त्वं कलातत्त्वादजीजनत् ।
सप्तग्रन्थिनिदानस्य यत्तद् गौणस्य कारणम् ॥ इति ।

सप्तग्रन्थिनिदानस्येति (प्रतीकमादाय) भगवता नारायणकण्ठेन यत् प्रधानं महदहङ्कारयोस्तन्मात्रपञ्चकस्येत्येवं सप्तानां ग्रन्थीनां कार्ययोनीनामिति व्याख्यातम् । मायोत्पन्नं प्रकृत्यादितत्त्वस्यापूरकं भौवनाध्वनि रुद्रसंश्रयं पुरुषाख्यतत्त्वमस्तीत्याह—**प्रकृतिसखमिति ।** प्रकृतिश्च तत् सखा च प्रकृतिसखमिति कृत्वा प्रकृतितत्त्वस्य सहायभूतपुरुषाख्यतत्त्वेन कार्यसहितस्य प्रकृतितत्त्वस्येष्टत्वात् ; प्रकृतिपुरुषाविति प्रसिद्धेश्च । अत एव प्रकृतिसख-मित्युक्तम् । **रुद्रयुक्** रुद्रैस्सहितं पुरुषतत्त्वं मायोत्पन्नम् । तथा मृगेन्द्रे—

पुंस्तत्त्वं तत एवाभूत् पुंप्रत्ययनिबन्धनम् ।
आपूरकं प्रधानादेः भौवने रुद्रसंश्रयम् ॥ इति ।

तत एव मायातत्त्वादित्यर्थः ।

ननु पुरुषस्य चेतनत्वादेव शिववदचैतन्यरूपेषु तत्त्वेष्वध्वतया गणनं न संभवति । अत एव तत्त्वमध्ये अध्वतया पाठो न युक्त इति तत्कथम् प्रकृतिसखं रुद्रयुगित्युक्तम् । सत्यम् । कलादिपञ्चतत्त्वेन बद्धात्मा भोक्तृत्वेन पुरुषतत्त्वनिर्देशं याति । परमार्थतस्तस्याध्वत्वं भुवनाधारत्वञ्च न विद्यते । अत एव तद्भुवनानां रागतत्त्वे स्थितिरित्युक्तम् आगमेषु । तथोक्तम्—

वामदेवोऽथ भीमश्चाप्युग्रश्च भवसंज्ञकः ।
शर्वेशानैकवीरौ च प्रचण्डश्चेश्वरः पुमान् ॥
उमाभर्ता ह्यजोऽनन्त एकश्चैव शिवस्ततः ।
रागतत्त्वे स्थिता ह्येते रुद्रास्तीव्रबलोत्कटाः ॥
तत्रैव पुरुषो ज्ञेयो प्रधानगृहपालकः ॥ इति ।

अत एव पुरुषतत्त्वस्य निर्वाणदीक्षायां प्रकृतितत्त्वशुद्ध्यनन्तरं पुंस्तत्त्व-मलशुद्ध्यर्थं प्रकृतेरुपरि रागतत्त्वादधःपाठ इति कश्चिदपि दोषो नास्ति ।

अस्मात् प्रकृतितत्त्वाद् गौणं सत्त्वरजस्तमोरूपं गुणतत्त्वं जातम्। तथा तत्त्वप्रकाशे—

अव्यक्ताद्गुणतत्त्वं प्रख्याव्यापारनियमरूपमिह ।
सत्त्वरजस्तमोऽपि सुखदुःखमोह इत्यपि च ॥ इति ।

अतस्त्रिविधरूपाद् गुणतत्त्वाद् बुद्धिश्च सत्वरजस्तमोरूपबुद्धितत्त्वं जातम्। उक्तं च—

भवति गुणत्रयतो धीर्विषयाध्यवसायरूपिणी चेह ।
सापि त्रिविधा गुणतः प्राक्तनकर्मानुसारेण ॥ इति ।

अतः बुद्धितत्त्वात् त्रिविधगुणयुता सत्वरजस्तमस्स्वरूपैर्गुणैर्युक्ता। सत्वादिगुणानां यथाक्रमं तैजसवैकारिकभूतादिकनामभिः संयुक्ता । **अहंकृत्** अहङ्कारतत्त्वं जातम्। उक्तं च—

सात्विकराजसतामसभेदेन स जायते पुनस्त्रिविधः ।
स च तैजसवैकारिकभूतादिकनामभिः समुच्छ्वसिति ॥ इति ।

प्राक् प्रथमं। प्राक्छब्दः तैजसादिद्योतकः। अत एव तैजसाहङ्कारात् मानसं मनस्तत्त्वं **धीन्द्रियैः** बुद्धीन्द्रियैस्सह जातम्। राजसाहङ्कारात् **कर्माक्षाणि** कर्मेन्द्रियाणि जातानि। भूताद्यहङ्कारात् **तन्मात्रा** जाताः। तथा मृगेन्द्रे—

श्रोत्रं त्वक्चक्षुषी जिह्वा नासा च मनसा सह ।
प्रकाशान्वयतस्सत्त्वाः तैजसाश्च ससात्त्विकाः ॥
वाक्पाणी च भगः पायुः पादौ चेति रजोद्भवाः । (इति ।

मात्राः मात्राशब्देन शब्दादयो गृह्यन्ते। **स्वगुणगतभिदाः** स्वेषां शब्दादीनां गुणाः। यथा पृथिव्यां कटकटादिशब्दरूपः, स्पर्शश्चाशीतोष्णरूपः, शुक्लरक्तकृष्णादिनानेकविधं रूपं, मधुरतिक्तादिरूपेण रसोऽपि षड्विधः, गन्धस्तु सुरभ्यसुरभिरूपेण द्विविधः। एतान् स्वगुणान् गताः पृथिव्यादयः। तान् भिन्दन्ति भिन्नत्वेन वर्तन्त इति स्वगुणगतभिदाः हलन्तात् टापमिच्छन्ति केचिदित्याकारान्ताः[1] ।

(अनुवर्तते)

---

1 भिदादित्वादङि अकारान्तत्वप्रयुक्तटापि भिदेति क्षमावद्रूपम्।

மீனாட்சியம்மன் கிளிப்பாடல்

ஆதியும் அந்தமும் அற்றவன் வீற்றிடும்
சோதியாம் தில்லையின் தொன்மையைப் பாடி
சோதியில் தோன்றிய சுத்த வெளியுடன்
வாயுவும் பிறவுமாய் வந்தஐம் பூதமும்
ஆதியாய்த் தோன்றிய பேதமும் கூறி,
நேயமாம் சமய நின்மலத் தாலும்
ஆயநற் புனல்பல ஆடுவ தாலும்
ஆயன் குருபதம் ஆய்வத னாலும்
காயமும் காமமும் கன்ம வினைகளும்
தூயன வாகும் துறைதனை விளக்கி
வேதமும் போதமும் வேண்டுநற் கல்வியும்
ஊழ்வினை தன்னை ஒழித்திடா தெனவும்
நல்வினை தீவினை நன்குணர்ந் தாய்ந்து
நல்லன ஏற்று நடத்தலே கல்வி
அல்லன விரும்பல் அல்லார்க் கொல்லும்
எனப்பல இயம்புமிந் நூலா சிரியர்
மதுரை வாழ்ந்த மீனாட்சி என்னும்
அம்மை என்பது அறிவோம் நூலினுள்
சொற்பொருள் எளிமை தோன்றினும் பணியின்
நற்பெருங் கடனென நன்காய்ந் தளிக்குதும்.

முத்தம்மாள் கௌரிநாதன், எம்.ஏ., பி.டி.

Vol XVII No. 2

Bulletin of The Government Oriental Manuscripts Library, Madras.

EDITED
BY
R. K. PARTHASARATHI, M.A., L.T.,
DIP. in FRENCH AND GERMAN,
Curator, Government Oriental Manuscripts Library, Madras.

© Government of Madras, 1965

1965

Price Rs. 2

॥ श्रीः ॥

॥ त्रिलोचनशिवाचार्य कृता सिद्धान्तसारावलिः ॥

o

॥ अनन्तशम्भुकृत-व्याख्यासहिता ॥

o

Edited by
Sri R. K. Parthasarathi, M.A., L.T.,
and
Sri T. H. Viswanathan, Siromani.

(*Continued from Page* 68 *of Volume XVII No. 1*)

शब्दादीनां सूक्ष्मरूपाः तन्मात्राः पृथिव्यादिस्थितस्वगुणसमूहात् भिन्नत्वेन वर्तन्त इत्यर्थः। एताः तन्मात्रास्तामसाहङ्काराज्जाताः। तथा मृगेन्द्रे—

शब्दः स्पर्शः च रूपं च रसो गन्धश्च पञ्चमः।
गुणा विशिष्टास्तन्मात्रास्तन्मात्रपदयोजिताः॥
प्रकाशकर्मकृद्वर्गवैलक्षण्यात् तमोभवाः॥

ताभ्यः सूक्ष्मरूपाभ्यः कारणरूपाभ्यः शब्दादितन्मात्राभ्यः यथाक्रमं पञ्चभूतानि आकाशवाय्वग्निजलभूमयोऽपि स्थूलरूपा जाताः॥ १० ॥

इत्थं षट्त्रिंशत्तत्त्वोत्पत्तिं प्रदर्श्य तत्र स्थितानन्तादीन् वक्तुमाह—ज्ञानादिति।

ज्ञानात् केवलिषु स्थितेषु परतो ग्रन्थेश्च कांश्चित् पतीन्
मन्त्राणां मलपाकयोगसदृशान् मन्त्राञ् छिवोऽन्यान् गुरून्।
कृत्वा शुद्धपथेऽशुचौ लयकलान् सूक्ष्माङ्ककानीश्वरो
रुद्रांश्चापि विधाय देहपुरगान् शिष्टान् विधत्ते भवे॥ ११ ॥

शिवः शिवशब्देनात्र सृष्ट्यादिपञ्चकृत्यव्यापारवशात् [1]पञ्चब्रह्मसंबन्धिनीभिरष्टत्रिंशत्कलाभिरुपेतः सदाशिवतत्त्वे स्थितः सदाशिवभट्टारक उच्यते। उक्तं च—

---

1. ङ. ग. ब्रह्मपञ्चक

तद्वपुःपञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः ।
ईशतत्पुरुषाघोरवामाजैर्मस्तकादिकम् ॥
सदाशिवे पवित्राङ्गः सकलादिपरिच्छदः ।
देवस्सदाशिव.......................इति ।

ननु सदाशिवतत्त्वोपरि स्थिते शक्तितत्त्वे शक्तिमतां वर इति सूक्ष्मनादरूपे शिवतत्त्वेऽध्वनि पतिरिति पतिभिन्नत्वं शास्त्रेषु श्रूयते, कथं सदाशिवतत्त्वस्थितः शिवभट्टारक इति । अत्रायं परिहारः । कृत्यभेदोपचारेण शक्तिभेदवत् पतिभेदः, परमार्थतो भेदाभावात् । शिवभट्टारक एक एव शक्तिशिवतत्त्वाधिपतिर्नान्यः कश्चिदिति । उक्तं च—

किं तु यः पतिभेदोऽस्मिन् स शास्त्रे शक्तिभेदवत् ।
कृत्यभेदोपचारेण तद्भेदस्थानभेदजः ॥ इति ॥

ज्ञानात् केवलिषु विज्ञानात् प्रक्षीणकर्मसु मायीयबन्धयुक्तानेकविज्ञानाकलात्मसु **ग्रन्थेः** मायातत्त्वात्परतः उपरि **स्थितेषु** विद्यमानेषु सत्सु । मायाशुद्धविद्यान्तराले विज्ञानाकलानां स्थितिः 'मायोर्ध्वं शुद्धविद्याधो मलमात्रावृतोऽपरः' इत्युक्तत्वात् । परमेश्वरो विज्ञानाकलानां मध्ये मलपरिपाकतारतम्यतोऽनन्ताद्यष्ट विद्येश्वरानीश्वरतत्त्वनिवासिनश्च करोतीत्याह—**मलपाकयोगसदृशान्** । मलपाकयोगेन मलपरिपक्वतारतम्यसंबन्धेन सदृशानात्मनः किञ्चिदूनसमानरूपान् **मन्त्राणां** सप्तकोटिमहामन्त्राणां **कांश्चित् पतीन**नन्तेश्वरादीन् वामादिशक्तियुक्तान् अधिकारमलांशसहितान् शुद्धाध्वभूतेश्वरतत्त्वे प्रेरकप्रेर्यभावेन स्थितान् करोति । तदुक्तं मृगेन्द्रे—

तत्रादौ केवलाणूनां योग्यानां कुरुतेऽष्टकम् ।
वामादिशक्तिभिर्युक्तं सप्तकोटिपरिच्छदम् ॥
तेषामनन्तस्सूक्ष्मश्च तथा चैव शिवोत्तमः ।
एकनेत्रैकरुद्रौ च त्रिमूर्तिश्चामितद्युतिः ॥
श्रीकण्ठश्च शिखण्डी च राजराजेश्वरेश्वराः ।
सर्वज्ञत्वादियोगेऽपि नियोज्यत्वं मलांशतः ॥
परस्परं विशिष्यन्ते मात्राश्चैवमधःस्थिताः । इति ॥

तद्वृत्तौ भगवता नारायणकण्ठेन 'राजानो लोकेशाः इन्द्रादयः, तेषां राजानः शतरुद्राः, तदीश्वराणां मण्डलिप्रभृतीनामप्येते ईश्वराः प्रभवो विद्येश्वराः' इति व्याख्यातम् । अधस्स्थितान् प्रति ऊर्ध्वस्थितानां विशिष्टत्वमिति परस्परं विशिष्यन्त इत्युक्तम् । उक्तं च—

यो हि यस्माद् गुणोत्कृष्टः स तस्मादूर्ध्वमिष्यते । इति ।

मन्त्रान् सप्तकोटिमहामन्त्रान् परस्परं विशिष्टान् करोति । उक्तं च—

सप्तकोटिप्रसङ्ख्यातान् मन्त्रांश्च परमेऽध्वनि । इति ।

तेषां मध्येऽन्यान् सार्धत्रिकोटिकान् गुरून् मलपरिपाकतारतम्यतो पक्वमलत्वेन श्रेष्ठान् **शुद्धपथे** शुद्धाध्वनि **कृत्वा** सृष्ट्वेत्यर्थः । मन्त्राणां सृष्टिकाले महामायासंबन्धिनि शुद्धाध्वनि सृष्ट्यभावात् शुद्धविद्याभुवनस्थितान् कृत्वा अधिकारान्ते गुरुमूर्त्यधिष्ठानमनपेक्ष्यैव स्वयमेव परमेश्वरःताननुगृह्णाति । उक्तं च तत्त्वसंग्रहे—

जगति कृते तत्रार्धं मन्त्राणां शिवसमाहृतान् पुंसः ।
अनुगृह्णाति विना देशिकमूर्तिं प्रयुक्तमीशेन ॥ इति ॥

अन्यत् सार्धत्रिकोटिकमखिलमायीयेऽध्वनि अधिकारसहितं कृत्वा संहारकाले गुरुमूर्तिमधिष्ठाय परमेश्वरः अनुगृह्णाति । उक्तं च—

प्रयोक्तृदेहसापेक्षं तदर्थमखिलेऽध्वनि ।
कृत्वाधिकारं स्थित्यन्ते शिवं विशति सेश्वरम् । इति ।

सेश्वरमिति मन्त्रेश्वरैश्शतरुद्रादिभिस्सहितमित्यर्थः । **अशुचौ** अशुद्धाध्वनि ईश्वरः अनन्तेश्वरः अशुद्धाध्वनि अनन्तेश्वरस्य कर्तृत्वात् । **लयकलान्** प्रलयाकलान् **सूक्ष्माङ्गकान्** कलाद्यारब्धसूक्ष्मशरीरयुक्तान् रुद्रानष्टादशाभ्यधिकशतरुद्रान् **विधाय** सृष्ट्वेत्यर्थः । एतान् ब्रह्माण्डरक्षकत्वेन मन्त्रेश्वरान् करोतीत्यर्थः । उक्तं च—

ततोऽनन्ताद्यभिव्यक्तः पतीनां ग्रन्थितत्त्वतः ।
कलाद्यारब्धदेहानां करोत्यष्टादशं शतम् ॥ इति ॥

देहपुरगान् पुर्यष्टकदेहयुक्तान् **शिष्टान्** पूर्वोक्तेभ्यो विशेषितान्। ब्रह्मविष्णिवन्द्रादीन् **भवे** कर्मबंधनयुक्तसंसारे **विधत्ते** भुवनाधिपतित्वेनाण्डमध्ये सृजतीत्यर्थः। तथा मृगेन्द्रे —

तानप्याविश्य भगवान् साञ्जनान् भुवनाधिपान्।
येभ्यस्सर्वमिदं येषां शक्तिः कर्मनिबन्धना ॥ इति ॥

तद्वृत्तौ नारायणकण्ठेन 'तानपि मण्डलिप्रभृतीनधिष्ठाय परमेश्वरोऽन्यान् ब्रह्मप्रभृतीन्' इति व्याख्यातम्। तद्दीपिकायामघोरशिवाचार्येण ब्रह्मप्रभृतिरित्यत्र विष्ण्वादय इति। श्लोकोऽप्युक्तः—

अन्ये प्राधानिका मन्त्रा ब्रह्मविष्ण्वादयोऽपराः।
साञ्जनास्तेऽण्डमध्यस्था.................. ॥ इति ॥ ११ ॥

शिवसमवेतक्रियाशक्तिरेवोपादानभूतकुण्डलिनीशक्त्युत्पन्नं समस्तं जगद्धरतीत्याह—सूक्ष्मेति।

सूक्ष्मस्थूलनिनादबिन्दुलिपिगैश्शक्त्यादिकार्यैर्जग-
न्मायीयं निजनादगा च कुटिला धत्ते कलाभिर्जनान्।
क्षिप्त्वा साप्वृतिचिद्धतां प्रकटयत्येकप्रदेशे मलं
शम्भोस्सा तु नियोगशक्तिकलिता प्राक्तृशक्तिं कला ॥१२॥

सूक्ष्मस्थूलनिनादबिन्दुलिपिगैः निनादो ध्वनिरूपः। अङ्गुष्ठाग्राभ्यां स्वस्य श्रोत्रे पिहिते कृत्वा यं ध्वनिं शृणोति स नादः। उक्तं च—

अङ्गुष्ठाभ्यां छादयित्वा साधकः श्रवणावुभौ।
ततश्शृणोति तन्नादमम्बुदप्रतिमस्वनम् ॥ इति ॥

स्वरवर्णनिवृत्त्यादिकलानामुत्पत्तिलयस्थानं बिन्दुः। उक्तं च—

यस्मात्प्रवर्तते सृष्टिः स्वरवर्णकलात्मिका।
यस्मिंश्च लीयते भूयस्तस्माद्बिन्दुरिति स्मृतः ॥ इति ॥

लिपिरक्षरम्। सूक्ष्मस्थूलरूपेण प्रत्येकं द्विप्रकारा नादबिन्दुलिपयः, तान् गच्छन्तीति तथोक्तैः। नादबिन्दुलिपिस्वरूपैरित्यर्थः। **शक्त्यादिकार्यैः** शक्तिशब्देनात्र महामायाख्या कुण्डलिनीशक्तिरुच्यते। तस्याः आदिकार्यैः

प्रथमभूतनादादिकार्यैः। शक्तेर्ध्वनिरूपो नादः प्रथमः क्षोभः। नादादुत्पन्नो बिन्दुश्चान्तस्सञ्जल्पात्मको द्वितीयः क्षोभः। बिन्दोरुत्पन्नो वर्णात्मकः तृतीयः क्षोभः। उक्तं च—

शक्तेर्नादो भवेद्बिन्दुरक्षरं मातृका ततः। इति।

तथा रत्नत्रये—

तच्च शब्दानुवेधेन शब्दराशिरभूदसौ।
शब्दराशिश्च बिन्दूत्थो बिन्दुर्नादादसावपि ॥
बिन्दोरनाहतादेषः कारणं शुद्धवर्त्मनाम् ॥ इति ॥

अत्र शुद्धाध्वनि सूक्ष्मनादादिकं कार्यम्। अशुद्धाध्वनि स्थूलनादादिकं कार्यमिति विवेकः। 'यदा कुण्डलिनीशक्तिर्मायाकर्मानुसारिणी। नादरूपादिकं कार्यं तस्याः........।' इत्युक्तत्वात्। अत्र नादबिन्दुवर्णाख्यानि परबिन्दुशक्तेः प्रथमकार्याणि। तत्र कार्यबिन्दोः स्थूलसूक्ष्मे द्वे अवस्थे। यथाक्रमं व्यापारभेदेन मध्यमा वैखरीति सूक्ष्मा पश्यन्तीति। तदुक्तम्—

स बिन्दुः परनादाख्यो नादबिन्द्वर्णकारणम्।
चतस्रो वृत्तयस्तस्य याभिर्व्याप्तास्त्रिधाणवः ॥
वैखरी मध्यमाभिख्या पश्यन्ती सूक्ष्मसंज्ञिता।
तत्रार्णसंज्ञा वैखरी तु........ ॥ इति ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठःशिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ इति च ॥

वर्णोत्पत्तिस्थानेषु वायौ निरुद्धे सति या कृतवर्णपरिग्रहा पश्चादतिशयेन वायोरूर्ध्वप्रसर एव बहिःप्रसरनिबन्धना परं प्रत्युच्चार्यमाणघटादेः श्रोत्रग्राह्या वाचिका वाक् सा वैखरी तत्पूर्वायाः मध्यमाया अतिस्थौल्यावस्थास्थिता। उक्तं च रत्नत्रये—

तत्र सा वैखरी श्रोत्रग्राह्या यार्थस्य वाचिका।
स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा।
प्रयोक्तॄणामियं प्रायः प्राणवृत्तिनिबन्धना। इति ॥

कार्यबिन्दोर्मध्यस्थौल्यावस्था मध्यमा या बुद्धया केवलं गम्यमाना। अतोऽन्तर्गतोच्चारणरूपा। अत एव श्रोत्रपथमनुपयन्ती क्रमवर्णात्मिका ईषदूर्ध्व-प्राणप्रसरमतिक्रम्य वर्तमाना सा मध्यमाह्वया पश्यन्त्याः कार्यम्। उक्तं च—

केवलं बुद्धयुपादानक्रमवर्णानुपातिनी।
अन्तस्संजल्परूपा तु न श्रोत्रमुपसर्पति॥
प्राणवृत्तिमतिक्रम्य वर्तते मध्यमाह्वया॥ इति॥

कार्यबिन्दोः प्रथमावस्था पश्यन्ती। सा च मयूराण्डरसगतपादपक्षादि-वच्छब्दगतवर्णानामविभागेन सर्वतः पौर्वापर्यविधुरा। अत एव सकलविशेषण-परिस्फुरणाभावात् अनिश्चीयमानार्थविषया वाणी स्वयं प्रकाशते। सा पश्यन्ती सूक्ष्माया विकृतिः। तदुक्तम्—

अविभागेन वर्णानां सर्वतः संहृतिक्रमा।
स्वयंप्रकाशा पश्यन्ती मायूराण्डरसोपमा॥ इति॥

नादसंज्ञा सूक्ष्मा सकलविशेषणविधुरमर्थस्य स्वरूपमेवान्तः प्रकाशिका या वाणी चिरस्थायिनी सा सूक्ष्माख्या। यदुक्तम्—

स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी। इति।

इयमेव शुद्धाध्ववासिनां परमो बन्धः। य इमां विवेकेन प्रत्यक्षीकुर्वन्ति ते प्रयोज्यलक्षणं सृष्ट्यादिकर्तृत्वं विहाय शिवतुल्या भवन्ति। तदुक्तं रत्नत्रये—

यस्यां दृष्टस्वरूपायामधिकारो निवर्तते। इति।

किञ्च सैव प्रलयाकलानामपि सूक्ष्मशरीरानुप्रवेशेन षोडशकलासु गणनीया सती तानेव मोक्षपर्यन्तं न मुञ्चति। योनिभ्यो न योन्यन्तरं प्रापयति। षोडशकलास्तु कर्मेन्द्रियपञ्चकं ज्ञानेन्द्रियपञ्चकं मनोऽहङ्कारबुद्धि-विद्याश्चतुर्दश। वाकूच्छक्तिभ्यां सह षोडश कलाः पुंसां करणानि।
उक्तं च—

करणस्थेन भेदेन स्वचित्यापि चतुर्दश।
वाकूच्छक्तिभेदौ द्वौ चेति पुंस्कलाः षोडश स्मृताः॥ इति॥

अत एवासु कलासु शक्त्यपरपर्याया सूक्ष्माख्या षोडशी कला परमो बन्धः। तदुक्तम्—

पुरुषे षोडशकले तामाहुरमृताह्वयाम्॥ इति॥

एवं जङ्गमात्मकजगद्विषयं नादादिकार्यं प्रदर्शितम्। स्थावरात्मक-जगद्विषयं नादादिकार्यं प्रदर्श्यते। 'नादेनाधिष्ठितं सर्वं जगत् स्थावरजङ्गमम्' इत्युक्तत्वात्। अत्र महामायाशक्तेर्नाद उत्पन्न इति भुवनात्मकः प्रथमः प्रसरः। अत एव नादकलाभुवनानि इन्धिकादीनि शिवतत्त्वान्तर्गतानीत्युच्यन्ते। अत्र नादकला इन्धिकाद्याः पञ्च-इन्धिका दीपिका रोचिका मोचिका ऊर्ध्वगा चेति। बिन्दुशब्देनात्र बिन्दुजनिता निवृत्तिः प्रतिष्ठा विद्या शान्तिरिति बिन्दुकलाभुवनचतुष्टयमुच्यते। एतासां शक्तितत्त्वेऽन्तर्भावः। नादकला-भुवनानामुपादानभूतपरबिन्दोश्शक्तिरूपेणावस्थानात्मकसद्भाववादेन सूक्ष्मता-भुवनात्मकव्यक्तिरूपेण स्थूलताशक्तितत्त्वान्तर्भावेन स्थितानां निवृत्त्यादि-भुवनानां सूक्ष्मता। आत्मनां देहेन्द्रियविषयभोगसाधनत्वात् पृथिव्यादिभूत-संज्ञानां निवृत्त्यादिकलानां स्थूलता। एवं शक्त्यादिकार्यैर्मायीयं महामायादि त्रिविधं मायास्वरूपं जगत्स्थावरजङ्गमात्मकम्। 'माया माया च माया च माया वै त्रिविधा स्मृता' इत्युक्तत्वात्। अथवा शक्त्यादिकार्यैरित्यत्र शक्तिशब्देन शक्ति-तत्त्वमुच्यते। आदिशब्देन सदाशिवादि तत्त्वमुच्यते। सूक्ष्मस्थूलनिनाद-बिन्दुलिपिगैः यथाक्रमं शक्तितत्त्वे सूक्ष्मनादबिन्दुः, सदाशिवतत्त्वे स्थूलनाद-बिन्दुः, ईश्वरतत्त्वे सूक्ष्मलिपिसंयुक्ता अनन्तेश्वरादयः, विद्यातत्त्वे स्थूललिपिसंयुक्ताः सप्तकोटिमहामन्त्राः वैखरीरूपाः कामिकाद्यष्टाविंशति तन्त्रसमूहा विद्यन्ते।
उक्तं च—

नादो बिन्दुश्च सकलः सादाख्यं तत्त्वमाश्रितौ कथितौ।
विद्येशाः पुनरीशे मन्त्रा विद्याश्च विद्याख्ये॥ इति॥

एवं मायीयं समस्तं जगत् कुटिला **निजनादगा** स्वाभाविकनादस्वरूपा कुटिला कन्दोत्थिता अङ्कुराकारत्वेन स्थितत्वात् कुटिलरूपा कुण्डलिनी शक्तिः। चकारात् शिवसमवेतक्रियाशक्त्यधिष्ठिता चेति गृह्यते। अन्यथा जडरूपायाः कुण्डलिन्या आधारत्वाभावात्। 'सा च कुण्डलिनी शम्भोः शक्तिः शुद्धा जडात्मिका' इत्युक्तत्वात्। तथा कालोत्तरे—

चन्द्राग्निरविसंयुक्ता ह्याद्या कुण्डलिनी तु या।
हृत्प्रदेशे तु सा ज्ञेया अङ्कुराकारवत्स्थिता॥ इति।

अस्या ह्यशुद्धानां जगदङ्कुराणां आधारतया, शुद्धानां चोपादानतया समस्तजगदधिष्ठानात् तदाधारत्वोपवर्णनमुपपन्नम्। सेयमाधारशक्तिः शिवशक्त्या अधिष्ठिता कुटिलेति विस्तरेणागमेषु प्रतिपादिता। तथा चोक्तम्—

ब्रह्माण्डस्य दले शक्तिर्जगदाधाररूपिणी।
शैवी या च क्रियाशक्तिर्विश्वविक्षोभकारिणी॥

सा विजृम्भति सत्त्वेषु सर्वतत्त्वेषु नित्यशः।
सर्वबीजेषु सा शक्तिरङ्कुरप्रभवा स्थिता॥

सा तु ब्रह्माण्डमावर्त्य निर्गता क्षीरसागरात्।
पुनरण्डं समुद्भिद्य कन्दादङ्कुरवत्स्थिता॥

असत्त्वमादितः कृत्वा यावद्दर्वान्तमुद्गता।
असत्वं सेचकं ज्ञेयं अग्निरुच्छूनकारणम्॥

समीरः प्रेरकस्तस्य वृत्त्यर्थं व्योम कल्पितम्।
तन्मात्राण्यङ्कुराभानि सुषिराणीन्द्रियाणि च॥

अहङ्कृत्सर्वमध्यस्थमोजस्कं वृद्धिकारणम्।
एवं संवर्धते नित्यमङ्कुरः सर्वकारणम्॥ इति॥

एवंभूता कुण्डलिनीशक्तिः कलाभिः निवृत्त्यादिपञ्चकलाभिः सह समस्तं जगद्धत्ते आधारा भवति तथा जनाननन्तेश्वरादीन् धत्ते तेषां शरीरादीनां उपत्पत्तिहेतुभूतत्वात्। उक्तं च—

मन्त्रयोनिः परा या तु नित्या कुण्डलिनी जडा।
उपादानं शरीराणां विद्याविद्येश्वरात्मनाम्॥

मायोपरि महामाया सर्वकारणकारणम्।
माया माया च माया च माया वै त्रिविधा स्मृता॥
ईश्वरश्चैव सादाख्यः कुटिला चाध्वधारिणी॥ इति॥

तस्मात् मायोर्ध्वं शुद्धाध्वनि शक्तौ भोगः। तस्य भोक्तारो विद्येश्वरादिभुवनवर्तिनो मन्त्रमन्त्रेश्वरादयः। तत्साधनदेहेन्द्रियविषयाकारपरिणताः कलाः। ततः तासामप्युपादानं कुण्डलिनीशक्तिरिति। कथमभिमतफलमन्तरेण कलोत्पत्तिरिति चेत्, विद्याविद्येश्वरादीनामधिकारमलसं‹त्त्यर्थं कलानामुत्पत्तिर्नो चेत्

तेषामनुग्रहादिविषयानधिकारः। यथा महदाद्युपादानं प्रधानं रागादिकारणं माया तथा निवृत्त्यादिकलाहेतुः कुण्डलिनीति सिद्धा। सहजमलतिरस्कृतज्ञानानामनेकभवकर्मवल्लिपरिकुण्ठितानां मायाशक्त्युन्मुखीकृतसर्गाणामात्मनां मलावृतत्त्वेन सुखदुःखानुवेदनं नास्तीत्याशङ्क्य मलावरणस्य किञ्चिन्निवर्तकेन केनापि भवितव्यमिति कर्मफलसंबन्धभोग्यभोक्तृत्वलक्षणकर्तृत्वस्वरूपस्य कलातत्त्वस्य सिद्धिरस्तीत्याह—**क्षिप्त्वेति**। **शम्भोरनन्तेश्वरस्य** अशुद्धाध्वविषये अनन्तेश्वरस्य कर्तृत्त्वात्। शुद्धाध्वविषये शम्भोरिति शिवस्य। शुद्धाध्वनि सूक्ष्मभूतकलारागादीनां विद्यमानत्वात् तत्र कलादितत्त्वानां शिवः कर्ता। 'शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः' इत्युक्तत्वात्। ननु अचेतनत्वात् कलायाः कर्तृत्वस्य चेतनधर्मत्वात् कथमात्मनः कर्तृशक्त्युत्पादनभूता कलेत्याह—**नियोगशक्तिकलिता**। शिवेच्छात्मकतिरोधानशक्त्यधिष्ठिता। अत एव कर्तृशक्तिमुत्पादयतीत्यर्थः। सा तु कला कलयति किंचित् कर्तृत्वमभिव्यनक्तीति प्रसिद्धा भूतकला **सावृतिचिद्धृतां** मलावरणयुक्तचैतन्यात्मनां मलमनादिभूतम**ेकप्रदेशे** एकस्मिन् स्थले **क्षिप्त्वा** निवार्य यथा सर्वत्र आच्छादकभूते महान्धकारे प्रदीपः एकदेशान्धकारनिवारणेन विषयजातं प्रकाशयति तद्वत् कला सर्वत्राच्छादकभूतमलैकदेशे मलं निवार्य प्रकाशं करोतीत्यर्थः। तदुक्तं मृगेन्द्रे—

तेन प्रदीपकल्पेन तदाच्छिन्नचितेरणोः।
प्रकाशयत्येकदेशं विदार्य तिमिरं घनम्॥ इति॥

प्राक्कर्तृशक्तिं प्राक् पूर्वं आत्मनि विद्यमानां कर्तृशक्तिं स्वतन्त्रभूतज्ञानक्रियारूपां स्वशक्तिं प्रकटयति किञ्चित्प्रकाशयति। पूर्वमेवात्मनि विद्यमानां मलावच्छन्नां कर्तृशक्तिं प्रकाशयितुमनन्तेश्वरः मायां प्रसवाभिमुखीं कृत्वा कर्तृशक्त्यनुग्राहकं कलाख्यं तत्त्वमसृजत्। तथोक्तं मृगेन्द्रे—

कर्तृशक्तिरणोर्नित्या विभ्वी चेश्वरशक्तिवत्।
तमश्छन्नतयार्थेषु नाभाति निरनुग्रहा॥

तदनुग्राहकं तत्त्वं कलाख्यं तैजसं हरः।
मायां विक्षोभ्य कुरुते प्रवृत्त्यङ्गं परं हि तत्॥ इति॥ १२॥

कर्तृशक्त्युपादानभूतायाः कलायाः विषयज्ञानप्रकाशने करणभूतं विद्यातत्त्वमस्तीत्याह—**ज्ञानमिति** ।

ज्ञानं चात्मगतं प्रकाश्य मनुजान् प्राक् कर्तृशक्त्यन्वितान्
विद्याक्षेशगताक्षगोचरधियं सङ्ग्राहयत्यान्तरी ।
बौद्धाद्वैषयिकात्परश्च गुणतो रागः प्रवृत्ते नृणां
भोगे व्यक्तदशां स्पृहां जनयति ज्ञाताखिलार्थेष्विह ॥१३॥

ननु कलैवैकप्रदेशे मलविदारणेन ज्ञानप्रकाशिकेत्युक्त्वा, कथं विद्या साध्यते इति चेदेवम् । कलायाः ज्ञानप्रकाशकत्वे सिद्धे सत्यपि साधकतमं विना विषयजातं प्रकटयितुं न समर्थेति विद्याङ्गीरणीयेत्यर्थः । विद्यते विषयजातं ज्ञायते अनयेति विद्या **प्राक्कर्तृशक्त्यन्वितान्** पूर्वमेव विद्यमानकर्तृशक्त्या सहितान् मनुजान् बद्धात्मनः प्रत्यात्मगतमलावच्छन्नत्वेन आत्मन्यन्तर्गतं विद्यमानमपि अविद्यमानवत्तिष्ठमानमित्यर्थः । ज्ञानं विषयपरिज्ञानसमर्थनरूपं प्रकाश्य व्यक्तीभूतं कृत्वा स्वकर्मद्वारा ज्ञानशक्तेर्विषयग्रहणाक्षमतालक्षणमलावरणं निवार्य विषयजातं प्रकाशयतीत्यर्थः । तथा तत्त्वप्रकाशे—

आवरणं भित्त्वैषा ज्ञानाख्यायाः स्वकर्मणा शक्तेः ।
दर्शयति विषयजातं करणं सेहात्मनः परमम् ॥ इति ॥

नन्वात्मनो बोधव्यक्त्याश्रयत्वात् बुद्धिर्बोधसंज्ञयोच्यते । ततश्च विषयग्रहणे बुद्ध्यादीन्येव करणानि सन्ति । कुतस्तद्व्यतिरिक्ता विद्या साध्यत इत्याशङ्क्य विद्या तावदात्मनो ज्ञानशक्तिव्यञ्जिका । मनस्संयुक्तेन्द्रियाणां बाह्यविषयान् प्रकाशयन्ती बुद्धिरिति विद्याबुद्ध्योर्भिन्नविषयत्वेन बुद्धेर्भिन्नविद्यासिद्धिरस्तीत्याह—**अक्षेश इति** ॥ तथोक्तम्—

बुद्धिर्बोधनिमित्तं चेत् विद्या तद्व्यतिरिच्यते । इति ।

अक्षेशगताक्षगोचरधियं अक्षाणामिन्द्रियाणामीशो मनस्तद्गतानां मनस्सम्बन्धसहितानां । मनसा सन्निकृष्टानामित्यर्थः । अक्षाणां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां गोचराणि बाह्यविषयवस्तूनि तेषां धियं मनस्संयोगयुक्तेन्द्रियविषयाणां ग्राहिकां बुद्धिं **सङ्ग्राहयतीति** । ग्राहिका भवतीति शेषः । तथा मृगेन्द्रे—

विद्याव्यक्ताणुचिच्छक्तिर्नुन्नाक्षेशाक्षगोचरान् ।
स्वीकृत्य पुंप्रयुक्तस्य करणस्येतिकर्मताम् ॥
मतिस्तेनेतरा विद्या........... ॥ इति ।

अत्रायमभिप्रायः । यथा चक्षुरादिकरणं रूपादिग्राहकं । तस्यावधातरि मनसि व्यञ्जकत्वेन स्थिते सति व्यञ्जकान्तरेण बुद्ध्याख्येन किं प्रयोजनम् ? मनोऽधिष्ठितेन्द्रियैरेव तत्तत्कार्यसिद्धेः सत्यपि बाह्यविषयग्राहिका बुद्धिरस्तीति सिद्धा । तथा तद्वत् बुद्धिग्राहिका विद्यास्तीति संबन्धः । एवंभूतविद्यातत्त्वे विद्यमाने व्यर्थीभूतबुद्ध्यादिना किं प्रयोजनमित्याह—**आन्तरीति** । आन्तरी आत्मनो ज्ञानप्रकाशने अन्तरङ्गभूता विद्या बहिरङ्गभूता बुद्ध्यादिः । तथा तत्त्वप्रकाशे—

बुद्धिर्यदास्य भोग्या सुखादिरूपा तदा भवेत्करणम् ।
विद्येयं करणं स्यात् विषयग्रहणे पुनर्बुद्धिः ॥ इति ॥

तद्व्याख्याने भगवता अघोरशिवाचार्येण ग्राह्यतापन्नमात्मानं बुद्धिः करणत्वेन ग्राहयितुं न क्षमा । ततः तद्ग्रहणे विद्या करणमिति विद्यासिद्धिरिति व्याख्यातम् । विद्याप्रकटीकृतज्ञानशक्त्या दृष्टार्थानामप्यात्मनां भोग्येषु विषयेषु अभिलाषाभावेन प्रवृत्तिर्नास्तीति तदभिलाषजनकं रागतत्त्वमस्तीत्याह—**बौद्धादिति** । **बौद्धात्** गुणतः **वैषयिकात् गुणतश्च परः** अन्यभूतः रागः । रागश्चावैराग्यात् बुद्धिसम्बन्धगुणाज्जात इति केषाञ्चिदाशयः ।

अथवा स्रक्चन्दनवनितादिविषयसंबद्धगुणाज्जात इति अपरेषामाशयः । तन्निरासार्थं बौद्धाद्वैषयिकाच्च गुणतः पर इत्युक्तम् । अवैराग्यलक्षणबुद्धिधर्मात्मको राग इत्यङ्गीक्रियमाणं चेत्तर्हि बुद्धिर्विषयाकारा सुखादिरूपा समासतो भोग्येत्युक्तत्वात् । विषयाकारतया परिणताया बुद्धेर्भोग्यरूपत्वात् भोग्याभिलाषजनने सामर्थ्यं नास्ति । तस्मादभिलाषहेतुना भोक्तृगतेन भोक्तॄणां भोजनक्रियोत्पादकेन रागेणान्येन भाव्यमिति बुद्धिगुणादन्यो रागस्सिद्धः । यदि विषयगुण एव रागश्चेत् तर्हि बाह्यविषयस्रक्चन्दनवनितादिसन्निधिमात्रादेव सर्वेषां सरागता प्राप्तेति न कश्चित् वीतरागो भवेदिति वीतरागाभावदोषः प्रसज्यत इति भोक्तृगतो रागोऽभिलाषजनको विषयगुणादन्य इति सिद्धम् । भोग्यविशेषरूपः स्रगादिर्न रागः । ननु मायाया मोहकस्वरूपो रागोऽस्तु,

किमन्येन रागेण। अत्रोच्यते। मायायास्साक्षान्न मोहकत्वम्। किन्तु कार्यद्वारेणेत्यदोषः। इहास्मिन् शैवसिद्धान्ते एवंभूतो रागः विषयेष्वासक्त्युत्पादनसमर्थः। **प्रवृत्ते** सुख्यहं दुःख्यहं इति सुखदुःखादिरूपेण प्रवर्तमाने भोगे भोग्यानुरक्तवेदनात्मके। तदुक्तम्—

भोगोऽस्य वेदना पुंसः सुखदुःखादिलक्षणा ॥ इति ॥

व्यक्तदृशां विद्यया प्रकटीकृतज्ञानानां **नृणां** मलबद्धात्मनां तेषामेव हि रागो रञ्जकः न निर्मलात्मनां विद्येश्वराणां **ज्ञाताखिलार्थेषु** दृष्टसमस्तस्रक्चन्दनादिबाह्यवस्तुषु **स्पृहामिच्छाविशेषं** जनयति उत्पादयतीति रागतत्त्वस्य व्यापारः। तथा मृगेन्द्रे——

तदभिव्यक्तदृक्छक्तिर्दृष्टार्थोऽप्यपिपासितः।
नैति तज्जनकं रागं तस्मादेवासृजत्प्रभुः॥

स तेन रञ्जितो भोग्यं मलीमसमपि स्पृहन्।
आदत्ते न च भुञ्जानो विरागमधिगच्छति॥ इति ॥ १३ ॥

आत्मनां कललवबुद्बुदादिबाल्ययौवनादिकं शरीरकरणं कालवशादेव जायत इति कलाविद्यारागेभ्यः पूर्वमेव विद्यमानं कालतत्त्वमस्तीत्याह—**काल इति।**

कालो भूतभवद्विभाविविकृतो जातः पुरात्रेशितुः
शक्त्या क्षिप्रचिरादिबोधकलनात् पुंसः क्षिपत्यादितः।
भुक्तौ स्वार्जितकर्मणां नियतिरप्याज्ञेव राज्ञां नृणां
कृष्यादेश्च नियामिकाख्यबलतश्शम्भोर्नियन्त्री स्थिता॥१४॥

अत्र पारमेश्वरे तन्त्रे **पुरा जातः** कलादितत्त्वेभ्यः पूर्वमेव विद्यमानः। ननु कालस्य कलादिभ्यः पूर्वत्वं चेत्तर्हि मायानन्तरमेवोच्यताम्। किमर्थं रागतत्त्वानन्तरम्। अत्रायमर्थः। आत्मनां हि कालानवच्छिन्नत्वात् प्रागुक्तकलादिकञ्चुकत्रयजनितसंवेदनानामेव कालेन कलनं कल्पितमिति ज्ञापनार्थं रागानन्तरं कालस्य पाठो युक्तः। तथा तत्त्वप्रकाशे——

नानाविधशक्तिमयी सा जनयति कालतत्त्वमेवादौ। इति।

तद्व्याख्याने भगवताघोरशिवाचार्येण 'ननु श्रीमन्मतङ्गादौ कलाविद्यारागेभ्योऽनन्तरमस्य पाठः श्रूयते। सत्यम्। तदुक्तस्यैव तत्र प्रवृत्तिक्रमो दर्शितः।

अत्र तु सृष्टिक्रम इत्यविरोधः' इति व्याख्यातम्। **ईशितुः परमेश्वरस्य शक्त्या**धिष्ठितः अचेतनस्य कालस्य चेतनाधिष्ठानं विना व्यापाराभावात्। कालो नित्य इति केषांचिन्मतम्। तन्मतनिरासार्थमाह—**भूतभवद्विभाविविकृतः** भूत इति गतकालः। भवदिति वर्तमानकालः। विभावीति भविष्यत्कालः। एवं भूतादित्रिविधरूपेण विकृतः परिणामीकृतः। कालस्याचेतनत्वे सति भूतादिरूपेण त्रिविधत्वादनेकत्वे सति घटादिवदनित्यत्त्वं सिद्धमिति भावः। **कालः** पूर्वोक्तप्रकारेण कर्तृभूतः। कालस्य किं कार्यमित्याह—**क्षिप्रचिरादिबोधकलनात्** क्षिप्रं शीघ्रकालः, मुहूर्तं तिष्ठति प्रहरं तिष्ठतीत्यादि। चिरं बहुकालः। एकदिनमास्ते द्विदिनमास्ते इत्यादि। आदिशब्देन संवत्सरादिकालः। एतेषां बोधस्य ज्ञानस्य कलनात् संख्यानात्। संख्यानं नाम त्रुटिलवादिकालेन कललबुद्बुदादि बाल्ययौवनादिकम्। तस्मिन् कर्तव्ये तदनुसङ्गतिरात्मनः देहसंबन्धो भवति। **पुंसः** मलबद्धात्मनः। **क्षिपति** आक्षिपति। वशीकरोतीत्यर्थः। उक्तं च—

त्रुट्यादिप्रत्ययस्यार्थः कालो मायासमुद्भवः। इति।

आत्मनां पूर्वार्जितकर्मफलवशात् यस्मिन् वयसि यस्मिन् काले यस्मिन् देशे यत्सुखदुःखादिकं भोक्तव्यं तत्रैव न न्यूनं नाधिकं भोजयतीति नियतिरिति तत्त्वमस्तीत्याह——**भुक्ताविति**। **आदितः** पूर्वस्मिन् काले **स्वार्जितकर्मणां** स्वैः आत्मीयैः आर्जितकर्मणां कृतधर्माधर्मस्वरूपाणां भुक्तौ सुखदुःखफलभोजने नियत्यभावे अन्योपार्जितान्यपि कर्माण्यन्ये भुञ्जीरन्निति उपमापूर्वकमाह—**राज्ञां** नृपतीनां **आज्ञेव नृणां** मनुष्याणां **कृष्यादेः** कृष्यादिकर्मणोत्पन्नफलस्य। **नियामिकाख्यबलतः** नियमननामधेयसामर्थ्यात्। सर्वजनवशीकरणाज्ञेव नियामिका। राजनियमाभावे कृष्यादिकर्मजनितफलानि शत्रवोऽपहरन्तीति भावः। यथा राज्ञामाज्ञा तत्तत्कर्मजनितफलानि तत्तत्कर्तृसम्बन्धकानि करोति तथा शम्भोर्नियन्त्री नियमनरूपा नियतिशक्तिः स्थिता। कर्मणो नियामकत्वं नास्तीति सूचनार्थमपिशब्दः तस्य फलजननमात्रेण चरितार्थत्वात्। ननु कर्मणः फलजनकत्वं नियामकत्वमप्यस्तु। एवं तर्हि फलजननार्थं यथा स्वस्वकार्येषु प्रवर्तमानैर्देहेन्द्रियादिभिस्सह कर्म पुरुषार्थसाधकं भवति तथा स्वकार्यनिष्पादकं नियतितत्त्वसापेक्षं कर्म नियामकं भवेत् इति न दोषः। अन्यथा सर्वतत्त्वानामभावप्रसङ्गात्॥ तदुक्तं मृगेन्द्रे——

अथ देहादिसापेक्षं तत्पुमर्थप्रसाधकम् ।
ततो नियतिसापेक्षमस्तु कर्म नियामकम् ॥ इति ॥ १४ ॥

अनन्तनाथक्षोभितमायोत्पन्नकलादिपञ्चतत्त्वोपबृंहितस्याणोः पुंस्त्वमलयोगात्पुरुषतत्त्वमिति व्यपदिश्यत इत्याह—**आत्मेति** ।

आत्मा पञ्चभिरेभिरत्र कलितो भोक्तृत्वयुक्तो यदा
तत्त्वं नो पुरुषत्वमेति गणनात्पुंस्त्वाद्विशुद्ध्यै मलात् ।
भोक्तृत्वं प्रथमं प्रवृत्तिविषयं पूर्वैर्गतस्यात्मनो
भोगार्थं प्रकृतिर्गुणादिविकृतेस्तत्साधनस्याश्रयाः ॥ १५ ॥

अत्र शैवसिद्धान्ते । **एभिः पञ्चभिः** पूर्वोक्तकलाविद्यारागकालनियतिभिः **यदा** यस्मिन् काले **कलितः** बन्धितः । अनन्तनाथेनेति शेषः । अत एव **भोक्तृत्वयुक्तः** भोक्तृभावसहितः **आत्मा पुंस्त्वात् मलात्** पुंस्त्वं नाम कलादिनियत्यन्ततत्त्वपञ्चकेन संयुक्तत्वमेव । तस्मान्मलात् **विशुद्ध्यै** दीक्षायां शोधनार्थं **गणनात्** इदं तत्त्वमध्ये पञ्चविंशतिसंख्याने एकं तत्त्वमिति संख्यानकरणात् । **पुरुषत्वं** पुरुषतत्त्वाख्य**मेति** प्राप्नोति । आत्मनः परमार्थतस्तत्त्वाभावज्ञापनार्थं निषेधवाची नो इति शब्दः कृतः ।

अत एव पुरुषतत्त्वस्य भुवनाधारत्वं नोपपद्यते । पुरुषतत्त्वमिति पठितानां भुवनानां रागतत्त्वे स्थितिः । अत्र श्लोके यदाशब्दप्रयोगसामर्थ्यात् यदा कलादिना बद्धः तदैवात्मनः पुंस्त्वमिति निर्देशः, बन्धनकालात्पूर्वकाले तु पुंस्त्वं नास्तीति ज्ञापितम् । अत एव सकलस्यैव पुंस्त्वं नान्ययोः विज्ञानाकलप्रलयाकलयोरिति ज्ञापितम् । तदुक्तम्—

पुंस्तत्त्वं तत एवाभूत् पुंप्रत्ययनिबन्धनम् । इति ।

एतच्छ्लोकव्याख्यानावसरे भगवता नारायणकण्ठेन पुंप्रत्ययनिबन्धनमिति पुंप्रतीतिहेतुः । अनेन मायागर्भस्थेभ्यः अधिकारिरुद्राणुभ्यः तद्भुवननिवासिभ्यश्च वैलक्षण्यमुक्तं तेषां पुंप्रत्ययायोगादिति व्याख्यातम् । पूर्वोक्तप्रकारेण कलादिना बद्धत्वात् भोक्तृत्वं प्राप्तस्यात्मनः भोगार्थं प्रकृत्यादितत्त्वमस्तीत्याह—**भोक्तृत्वमिति** । **पूर्वैः** कलादिपञ्चतत्त्वैः **गतस्यात्मनः प्रथमं** पूर्वं **प्रवृत्तिविषयं** प्रवर्तनविषयं **भोक्तृत्वं** भवतीति शेषः । कलादिबन्धनादेवात्मनः प्रथमं भोक्तृत्वे प्रवृत्तिर्जायत इत्यर्थः । भोक्तृत्वे प्रवृत्त-

स्यात्मनः भोगार्थं सुखादिभोगनिमित्तं प्रकृतिः **तत्साधनस्य** भोगसाधनस्य गुणादिविकृतेः गुणतत्त्वादिकार्यस्याश्रया कारणभूता प्रकृतिः प्रकृतिजन्यगुणबुद्ध्यादितत्त्वसमूहात् सुखादिकं जानातीत्यर्थः । तथा किरणे—

तस्याशुद्धस्य संबन्धं समायाति शिवात्कला ।
तयोद्दलितसामर्थ्यो विद्याख्यापितगोचरः ॥
रागोऽपि रञ्जकत्वेन प्रधानं च गुणात्मना ।
बुद्ध्यादिकरणानीकसंबन्धाद् बुध्यते पशुः ॥
ततो नियतिसंश्लेषात् स्वार्जितेऽपि नियम्यते ।
कालोऽपि कालसंख्याने भवेत्तदनुषङ्गतः ॥ इति ॥ १५ ॥

प्रकृतितत्त्वस्य कार्यमाह—**सत्त्वादेरिति** ।

सत्त्वादेर्लघुताप्रकाशनमथोपष्टम्भकं व्यावृति-
गौरव्या नियमश्च वृत्तय इदं गौणं विमिश्रं पशौ ।
बुद्धिस्सा पुरुषस्य खादिकरणैः सङ्ग्राहिका भोग्यका
भास्वत्खाध्यवसायिका च विषये सप्रत्यया भावगा ॥ १६ ॥

सत्त्वादेः सत्वरजस्तमोगुणानां **लघुताप्रकाशनं** लघुतया सूक्ष्माकारतया प्रकाशनं व्यक्तीकरणम् । यथा काञ्चने कटकमकुटाद्याभरणात्मिका क्रियाशक्तिरूपतया स्थिता तथा शक्त्यात्मना स्थितं प्रकृतितत्त्वं स्वकार्यस्य गुणस्य जनकं भवतीत्यर्थः ।

सत्त्वादिगुणा एव प्रकृतिरिति येषां मतं तन्मतनिरासार्थं शङ्कावाची अथशब्दः कृतः इत्यवगन्तव्यः । तथा हि गुणानामचैतन्ये सति अनेकत्वात् घटादीनामिवाविभागावस्थात्मना सकारणेन भवितव्यमिति सत्त्वादिगुणाद्भिन्ना प्रकृतिरिति सिद्धा । यथा पृथिवीभागानां घटादिकार्याणां पृथिव्यात्मकाधारेऽवश्यमविभागो भवतीति तद्वत् सत्त्वादीनामपि गुणभागानां कस्मिंश्चिदाधारेऽविभोगोऽवश्यं भवति इति प्रकृतितत्त्वमेवाधारत्वेन स्थितमित्याह—**उपष्टम्भकमिति** । सत्त्वादेरपि आधारतया स्थितगुणतत्त्वकार्यमाह—**व्यावृतिरिति** । आवृतिरावरणम् । विगतं आवरणं व्यावृतिः प्रकाशः सत्वस्य वृत्तिः । **गौरव्या** गुरुताव्यापारः रजसो वृत्तिः । व्यापारस्य गुरुत्वमिति गौणप्रयोगेण व्यापारार्थवाचिनि गौरव्या इत्युक्ता । मम व्यापारो महाभाररूपेण वर्तत इति लोकवा-

र्तया प्रसिद्धः **नियमः** नियम्यते उपरम्यत इति नियमः सङ्कोचः तमसो वृत्तिः। चकारोऽनुक्तस्थैर्यादिसमुच्चयार्थकः। अत एव प्रकाशव्यापारनियमात्मकास्तिस्रो वृत्तयः सत्त्वादीनां यथाक्रमं प्राधान्येनोक्ताः। अन्या अपि प्रवृत्तयस्सन्ति। तदुक्तं श्रीमन्मतङ्गे—

स्थैर्यं धैर्यं धृतिर्दाक्ष्यमार्जवं लघुता तथा।
संतोषो मार्दवं शौचं व्यवसायः क्षमा स्मृतिः॥
सौहित्यपरता क्षान्तिः दया दानं घृणा सदा।
औत्सुक्यं चेति सत्त्वस्य वृत्तयः समुदाहृताः॥
क्रौर्यं शौर्यं मदोत्साहौ संकल्पः साभिमानता।
दार्ढ्यं च निर्दयत्वं च भेदो दम्भश्च वृत्तयः॥
राजसाः प्रतिपत्तव्यास्तन्त्रेऽस्मिन् पारमेश्वरे।
अरतिर्मन्दता दैन्यं पैशुन्यं गुरुता सदा॥
निद्राधिक्यं मदालस्ये निरोधो मुग्धता च या।
तमसो वृत्तयः ख्याताः सिद्धास्सर्वेषु जन्तुषु॥ इति।

इदं गौणं गुणतत्त्वं **पशौ** बद्धात्मनि **त्रिमिश्रं** सहितं सत्त्वादिगुणतत्त्वं सूक्ष्मदेहद्वारेणात्मनि व्यापकत्वेन स्थितम्। अनुक्तसमुच्चयार्थकचकारादिदं गौणं सुखदुःखमोहत्वेन युक्तमित्यवगन्तव्यम्। तथा तत्त्वप्रकाशे—

अव्यक्ताद् गुणतत्त्वं प्रख्याव्यापारनियमरूपमिह।
सत्त्वं रजस्तमोऽपि च सुखदुःखमोह इत्यपि च॥ इति।

बुद्धितत्त्वकार्यमाह—**बुद्धिरिति**। तच्छब्दप्रयोगाद्यच्छब्दप्रयोगोऽत्र द्रष्टव्यः। या बुद्धिः **पुरुषस्य** कलादिना बद्धात्मनः **खादिकरणैः** खादयः आकाशादयः करणानि ज्ञानेन्द्रियकर्मेन्द्रियाणि एतैस्साधनैः सहिता[सा] बुद्धिः **सङ्ग्राहिका** सम्यग्विषयज्ञानसंपादनसमर्था। अयमभिप्रायः। आत्मा बुद्ध्या संयुज्यते। बुद्धिरिन्द्रियैः। इन्द्रियाण्यर्थैः सह। ज्ञानस्योत्पत्तिः। एवमात्मा बुद्ध्यादिसहितः विषयं गृह्णातीत्यर्थः। अत एवात्मनो बुद्धिः विषयज्ञानसंग्राहिकेत्युच्यते। **भोग्यका** ननु विषयाणामेव भोग्यत्वेन कथमात्मनः बुद्धिः भोग्येत्युच्यते। विषयेषु प्रतिबिम्बिताकारतया बुद्धेर्भोग्यत्वमिति भोग्यकेत्युक्तम्।

विषये द्रव्ये **भास्वत्त्वाध्यवसायिका** भास्वन्ति निर्दोषत्वात् प्रकाशमानानि खानि चक्षुरादीन्द्रियाणि तैश्चक्षुरादिसाधनैरध्यवसायिका। इदं रजतमेव न शुक्तिरिति निश्चयात्मकाध्यवसायेन बुद्धिः सिद्धा। चकारोऽनुक्तसत्त्वादिगुणसमुच्चयार्थः। तेन सत्त्वरजस्तमोरूपा। तदुक्तं तत्त्वप्रकाशे—

भवति गुणत्रयतो धीर्विषयाध्यवसायरूपिणी चेह।
सापि त्रिविधा गुणतः प्राक्तनकर्मानुसारेण॥ इति॥

भावगा अष्टविधभावस्वरूपा धर्मज्ञानवैराग्यैश्वर्याख्याः बुद्धिगुणाः सात्त्विकस्य भावा उच्यन्ते। अधर्माज्ञानानैश्वर्यास्तामसा भावाः। अवैराग्यं राजसभावः। एवमष्टविधः। बुद्धौ वासनात्मकतया स्थिता धर्मादयो भावाः। आत्मनो लिङ्गं भावयन्ति प्रकाशयन्तीति भावाः 'भावयन्ति यतो लिङ्गं तेन भावा इति स्मृताः' इत्युक्तत्वात्।

सप्रत्यया धर्माद्युत्पन्नसिद्ध्यादिपञ्चाशत्प्रत्ययैस्सहिता। धर्मादय एव प्रकर्षावस्थां प्राप्ताः स्थूलेन रूपेण भोग्यदशां प्रतिपन्नाः प्रत्यया इत्यर्थः। तदुक्तम्— प्रत्याययन्ति क्षेत्रज्ञं प्रत्ययास्तेन ते स्मृताः। इति।

सिद्धयोऽष्टौ। तुष्टयो नव। शक्तयोऽष्टाविंशतिः। बुद्धिविपर्ययभेदाः पञ्च। एवं पञ्चाशत् प्रत्ययाः। एतेषां नामधेयानि लक्षणानि च मातङ्गपारमेश्वरादेरेवावधेयानि। इत्थंभूता सा बुद्धिः। तथा मृगेन्द्रे—

बुद्धितत्त्वं ततो नानाभावप्रत्ययलक्षणम्।
परं तदात्मनो भोग्यं वक्ष्यमाणार्थसंस्कृतम्॥ इति॥ १६

अहङ्कारतत्त्वस्य संरम्भगर्वजीवनाख्यत्रिविधकार्यमाह—**चेष्टन्त इति**।

चेष्टन्ते मरुतः शरीरनिलयाः पुंसां यतो ग्राहके
संरम्भाद्व्यवसायमेव कुरुते सत्त्वादिकाहंकृतिः।
अक्षाणां विषयप्रवृत्तिकरणं सञ्चारि शीघ्रं सदा
सङ्कल्पं कुरुतेऽवधानजनकं त्विच्छास्वरूपं मनः॥ १७॥

ग्राहके अहं ग्राहक इति प्रतीत्यध्यवसायात्मके। अनेन गर्वो ज्ञापितः। ग्राह्यपरामर्शात्मनोऽपि बुद्धिकार्याद्विलक्षणस्याहमिति ग्राहकपरामर्शस्य यत्कारणं

सोऽहङ्कारो गर्व इत्यर्थः। पटमहं जानामीत्यादिः। इत्थंरूपग्राहके विद्यमानात् **संरम्भात्** संरम्भो नामाहङ्कारिकः प्रयत्नात्मकः। तदुक्तं–'संरम्भोऽहंकृतेर्वृत्तिः' इति। स च संरम्भः घटादिज्ञानशक्त्याश्रयभूतबोधाध्यवसायवत् क्रियाशक्त्याश्रयभूतो भवति। अत एव **संरम्भाद्व्यवसायं** व्यापारमेव इत्युक्तम्। व्यापारस्य प्रयत्नपूर्वकत्त्वादिति भावः। **कुरुते** करोति। अयमेव संरम्भः प्राणादिरूपस्यान्तरस्य वायोः प्रवृत्तिनिमित्तत्वाज्जीवनरूपमित्याह– **यत इत्यादिना**। 'प्रेरणाकर्षणे वायोः प्रयत्नेन विना कुतः।' इत्युक्तत्वात्। **यतः** प्रयत्नात्मकसंरम्भात् **पुंसा**मात्मनां **शरीरनिलयाः** देहान्तर्विद्यमाना **मरुतः** प्राणापानव्यानोदानसमानाख्याः पञ्च वायवः **चेष्टन्ते** स्वं स्वं व्यापारं विदधति। प्राणादिपञ्चवायूनां प्राणादिरूपेण पृथङ्नामानि भिन्नव्यापार–वशादेवोक्तानि, न पारमार्थिकानि वायुरूपत्वेनाविशेषात्। तथा मृगेन्द्रे—

प्राणापानादयस्ते तु भिन्ना वृत्तेर्न वस्तुतः। इति।

के पुनः प्राणादिव्यापाराः। उच्यन्ते। अत्र प्राणस्य प्राधान्येन चतुर्विधव्यापराः देहस्थस्य वायोर्देहाद्धाद्द्वादशान्तं यावदूर्ध्वापनयनमेको व्यापारः। जीवनमेकः। लोके प्राणे विद्यमाने सति शरीरं जीवतीत्युच्यते। विमर्शात्मकतर्के विचार्यमाणायाः बुद्धेः प्रेरणकरणमेकः। बलकरणमेक इति चतुर्विधः। तथा मृगेन्द्रे—

वृत्तिप्रणयनं नाम यत्तज्जीवनमुच्यते।
यत्तदूहं मतिः पुंसां भ्रमत्यन्धेव मार्गती॥
तत्कुर्वन्नुच्यते प्राणः प्राणो वा प्राणयोगतः॥ इति।

अपानव्यापारस्तु भुक्तपीतान्नजलस्य जाठराग्निना क्रियमाणविपाकावस्थानन्तरं जातविण्मूत्ररेतसां अधःप्रापणकरणम्। तदुक्तम्–

तथापनयनं भुक्तपीतविण्मूत्ररेतसाम्।
कुर्वन्नपानशब्देन गीयते तत्त्वदर्शिभिः॥ इति।

समानव्यापारस्तु भुक्तपीतान्नपानरसस्य शरीरे सर्वत्र साम्येन समर्पणम्। तदुक्तम्—

समन्ततोऽन्नपानस्य समत्वेन समर्पणम्।
कुर्वन् समान इत्युक्तः………॥ इति।

व्यानव्यापारस्तु अन्नपानादिवैषम्यद्वारेण व्याधिप्रकोपनकरणे देहस्य कार्श्यादिकरणम्। तथा श्रीमत्कालोत्तरे—

व्यानो विनमयत्यङ्गं व्यानो व्याधिप्रकोपनः।
प्रीतेर्विनाशकरणो व्यापनाद्व्यान उच्यते॥ इति॥

उदानव्यापारस्तु वक्तुः पुरुषस्य विवक्षाप्रयत्नपूर्वकेण देहान्तराकाशस्य गुणरूपध्वनिं वक्त्रादिस्थानेषु विभज्य वागिन्द्रियेण सह वर्णतापादकरणम्। उक्तं च मृगेन्द्रे—

विवक्षायत्नपूर्वेण कोष्ठव्योमगुणध्वनेः।
वागिन्द्रियसहायेन क्रियते येन वर्णता॥
स उदानश्शरीरेऽस्मिन्…. ………॥ इति॥

तथान्यत्रापि—

आकाशवायुप्रभवश्शरीरात् समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यस्स शब्दः॥इति॥

तथा कालोत्तरे—

स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनः।
उद्वेजयति मर्माणि चोदानो नाम मारुतः॥ इति॥

सत्त्वादिका सत्त्वरजस्तमोगुणरूपा। आदिशब्देन तैजसवैकृतभौतादिक इति त्रिविधरूपा गृह्यन्ते। **अहङ्कृतिः** पूर्वोक्तगर्वादित्रिविधकार्येण अहङ्कारस्य सिद्धिः। मनसः कार्यमाह—**अक्षाणामिति**। अक्षाणां भोक्तुरात्मनो भोगसाधनानां बाह्येन्द्रियदशकानां **विषयप्रवृत्तिकरणम्** विषयेषु शब्दादिषु प्रवृत्तेः प्रवर्तनरूपव्यापारस्य करणं साधकतमम्। आत्मेन्द्रियार्थसन्निकर्षे सत्यपि आत्मनो मनोऽधिष्ठानं विना बाह्येन्द्रियाणि विषयेषु न प्रवर्तन्त इत्यर्थः। यत्र वस्तुनि स्वादुसुरभिसुरूपसुस्पर्शशब्दवति आस्वाद्यमाने सत्यपि तत्र वस्तुनि मनसः तत्तद्विषयग्राहकेन्द्रियैः सह शीघ्रकारित्वादेव कमलपत्रशतभेदवत् अलक्ष्यसूक्ष्मकर्मभिः युगपत् पञ्चज्ञानोत्पादनमस्तीत्याह—**शीघ्रमाशुसञ्चारि** विषयेषु सञ्चरणशीलम्। तथा मृगेन्द्रे —

देवप्रवर्तकं शीघ्रचारि सङ्कल्पधर्मि च॥ इति।

यदा मनसः तत्तदिन्द्रियेषु समकालमेव शीघ्रेण सञ्चारित्वमस्ति तदा तत्

दिन्द्रियविषयज्ञानमस्ति। यदा शीघ्रेण सञ्चारित्वं नास्ति तदैकेन्द्रियज्ञानमेव नान्यत्। यथा रूपानुभवकाले स्पर्शानुभवो न भवति, रसानुभवो वा।

ज्ञानं तदक्षयोगात् तत्क्रमयोगितया क्रमात्।
तथाप्याभाति युगपन्नाशुसञ्चरणादृते॥ इत्युक्तत्वात्।

एवमिच्छास्वरूपं मनः सदा सर्वदा **अवधानजनकं** अवधानमेकाग्रता तज्जनकमुत्पादकम्। **सङ्कल्पं** मानसं कर्म **कुरुते** उत्पादयति मनसोऽवधानजनक-सङ्कल्पव्यापारकत्वात्। एतन्मनो बुद्ध्यहङ्काराभ्यां भिन्नम्। तौ बुद्ध्यहङ्कारौ। क्रियारूपत्वेनाप्रत्ययरूपत्वात् ग्राह्यग्राहकप्रत्यययोर्हेतुः। तन्मन इति मन-स्सिद्धिः। तच्च मन आन्तरात्मकमानसकर्मणा बाह्येन्द्रियाधिष्ठानव्यापारेण च द्विधाधिकारीत्युक्तम्। श्रीमन्मतङ्गे—

द्विधाधिकारि तच्चित्तं भोक्तुर्भोगोपपादकम्।
बहिष्करणभावेन स्वोचितेन यतस्सदा॥
इन्द्रियाणां तु सामर्थ्यं सङ्कल्पेनात्मवर्तिना।
करोत्यन्तस्थितं भूयस्तेनान्तःकरणं मनः॥ इति॥

बुद्ध्यहङ्कारावपि अन्तरिन्द्रिये। तथोक्तं तत्त्वसङ्ग्रहे—

अन्तःकरणं त्रिविधं चित्ताहङ्कारबुद्धिनिर्वाच्यम्। इति॥ १७॥

अथ बाह्येन्द्रियदशकस्य व्यापारं वक्तुकामः पूर्वं तावत् ज्ञानेन्द्रिय-पञ्चकस्य व्यापारमाह—**श्रोत्राद्यमिति**।

श्रोत्राद्यं विग्रहाङ्गं स्वविषयनिनदस्पर्शरूपादिबोधान्
चित्तार्धं कर्तृभावानुसरणबलतः पञ्चकं नुः करोति।
वागाद्यं देहसंस्थं स्वविषयवचनादानपूर्वं स्वकृत्यं
चित्तात्तं पूर्वकर्मव्यतिकरवशतः पञ्चकं नुर्विधत्ते॥ १८॥

विग्रहाङ्गं विग्रहस्य प्रधानशरीरस्य अङ्गमवयवभूतं **चित्तार्धं** मनसा समृद्धम्। मनस्संयुक्तमित्यर्थः। **पञ्चकं** पञ्चविधं **श्रोत्राद्यं** श्रोत्रत्वक्चक्षुर्जिह्वानासा-ख्यम्। न च कर्णकोटरादेः शब्दादिग्राहकत्वम्। अपि तु तत्स्थानस्य कर्तृभूत-स्येन्द्रियस्य शक्तिरित्याह—**कर्तृभावानुसरणबलतः**। कर्तुः ध्वन्यादिग्रहणे कर्तृभूतस्येन्द्रियस्य भावस्य सन्मात्रेण विद्यमानस्य अनुसरणबलतः अनुगमनसा-

मर्थ्यात्। इन्द्रियशक्त्यभावे ध्वन्यादिग्रहणाभावो बधिरादौ दृष्टः। **स्व-विषयनिनदस्पर्शरूपादिबोधान्** स्वेषां श्रोत्रादीनां विषयाः यथाक्रमेण ग्राह्यभूताः। निनदो ध्वनिः। स्पर्शः शीतस्पर्शादिः, रूपं प्रकाशादि, आदिशब्देन रसगन्धौ गृह्येते। एतेषां बोधान् ग्रहणज्ञानानि **नुः** आत्मनः **करोति** विषयज्ञानमुत्पादयति। यथाक्रमेण श्रोत्रादीनां शब्दादिग्रहणेषु व्यापारित्वात्। तदन्यरूपादिग्रहणाभावादेषां तत्तद्विषयकव्यापाराः सिद्धाः। तथा तत्त्वप्रकाशे—

शब्दादीनां ग्रहणं व्यापाराः कीर्तिताः क्रमेणैषाम्॥ इति।

कर्मेन्द्रियव्यापारमाह—**वागाद्यमिति**॥ **देहसंस्थं** शरीरे विद्यमानं **चित्तात्तं** मनसा संयुक्तं **पञ्चकं** पञ्चविधं **वागाद्यं** वाक्पादपाणिपायूपस्थाख्यं **पूर्वकर्मव्यतिकरवशतः** पूर्वजन्मन्यार्जितपुण्यपापव्यत्यासवशतः। यथा मूक-पङ्ग्वादौ पापकर्मवशात् वचनगमनाभावो दृष्टः। **स्वविषयवचनादानपूर्वं** स्वेषां वागादीनां यथाक्रमेण विषयाः ग्राह्यभूताः वचनादानगमनोत्सर्गानन्दाः। वचनम् आभाषणम्। आदानं स्वीकरणम्। पूर्वशब्देन गमनादियुक्तं **स्वकृत्यं** स्वस्वविषयव्यापारं। **नुः** आत्मनः। **विधत्ते** संपादयति। स्वकृत्यमित्यत्र पुनरपि स्वशब्दकरणं वागादीनां कर्मेन्द्रियाभावपक्षनिरसनार्थं कृतमित्यवगन्त-व्यम्। अन्यथा स्वविषयवचनादानेत्यत्र स्वशब्दकरणात् पुनरपि स्वशब्द-करणमनर्थकं स्यात्। सर्वत्र वागादिना करणेन क्रियमाणा क्रिया दृश्यते यतस्ततः कर्मेन्द्रियमिति सिद्धम्। एवं चेत् भ्रूलतास्फुरणकम्पादीनां क्रियात्वात् करणान्तराणि कल्पनीयानीत्यनन्तकर्मेन्द्रियप्रसङ्गः संभवति। तन्न। ज्ञान-कर्मेन्द्रियाणां विप्रकृष्टसन्निकृष्टव्यापारत्वात् त्वगिन्द्रियवत् सर्वशरीरव्यापक-त्वेनाभ्युपगमात्। हस्तादेरेव भ्रूकम्पादीनां व्यापारः तत्तदिन्द्रियशक्तीनां तत्र तत्र स्थाने विशेषाधिष्ठानादित्यर्थः। [तथोक्तम् 'विप्रकृष्टं बुद्धि[ज्ञ]देवानां सन्निकृष्टं क्रियात्मनाम्'। इति॥ १८॥

शब्दस्पर्शरूपरसगन्धात्मनां आकाशादेः कारणभूतानां प्रत्येकं सूक्ष्म-भूतशब्दैकगुणयुक्तं शब्दतन्मात्रमिति, सूक्ष्मशब्दस्पर्शगुणयुक्तं स्पर्शतन्मात्र-मिति, सूक्ष्मशब्दस्पर्शरूपगुणयुक्तं रूपतन्मात्रमिति, सूक्ष्मशब्दस्पर्शरूपरस-युक्तं रसतन्मात्रमिति, सूक्ष्मशब्दस्पर्शरूपरसगन्धगुणयुक्तं गन्धतन्मात्रमिति क्रमेण

एकाद्युत्तरगुणयुक्तसूक्ष्मरूपाणि पञ्चतन्मात्राणि पञ्चभूतकारणतया सिद्धानि सन्तीत्याह—**तन्मात्रमिति** ॥

तन्मात्रं ह्यविशिष्टमेव तु गुणैश्शब्दादिकैकाधिकैः
युक्तं तद्रवपूर्वनामकथितं भूताश्रयं पञ्चधा ।
भूतान्यत्र धरा तु पञ्चगुणयुक्तोयादि चैकैकशो
हीनं तैर्धरणग्रहाख्यपचनव्यूहावकाशाः क्रियाः ॥ १९ ॥

शब्दादिकैकाधिकैः शब्दादिकाः स्पर्शरूपरसगन्धाः तैरेकैकाधिकैः एकोत्तरवृद्ध्यादियुक्तैः । एकद्वित्रिचतुःपञ्चकयुक्तैरित्यर्थः । **गुणैश्शब्दस्य** यथा घटपटादिः, स्पर्शस्य शीतोष्णादिः, रूपस्य शुक्लादिः, रसस्य मधुरादिः षड्विधः, गन्धस्य सुरभ्यसुरभी, एवंविधगुणैर्युक्तं सहितम् । हिशब्दः तथापीत्यर्थे वर्तते तथापि सूक्ष्मभूतगुणैर्युक्तमिति । **गुणैः** शब्दादिगुणैरविशिष्टमेव अविशेषितमेव । बीजस्थितवृक्षरूपवत् अनभिव्यक्तगुणयुक्तमित्यर्थः । विशेषार्थद्योतकेन **तुशब्देन** पूर्वोक्तश्रोत्रादीन्द्रियाणां शब्दादीनि तन्मात्राणि स्थूलसूक्ष्मरूपत्वेन आधारतया स्थितानीत्युक्तं भवति । तथा मतङ्गे—

तन्मात्राणीह घटवन्महाभूतानि लेपवत् । इति ।

पञ्चधा पञ्चप्रकारं **तन्मात्रं** शब्दतन्मात्रमित्यादिना सिद्धमित्यर्थः । शब्दादितन्मात्राणां रवादिनामानि सन्तीत्याह—**तत्** शब्दादितन्मात्रं **रवपूर्वनामकथितं** रवपूर्वनामधेयैः कथितं प्रोक्तम् । यथा शब्दस्य रवध्वनिनिनादानि नामानि, स्पर्शस्य शीतोष्णादिः, रूपस्य शुक्लकृष्णरक्तादिः, रसस्य मधुरतिक्तकषायादिः, गन्धस्य सुरभ्यसुरभ्यादिः । एतेन सूक्ष्मरूपनामधेयकरणेन किं जातमित्याह—**भूताश्रयं** आकाशादिभूतेषु यथाक्रममधिष्ठातृतया स्थितं **पञ्चधा भूतानि** आकाशवाय्वग्निजलभूमयः । एतेषां कति गुणाः को व्यापार इत्याह—**अत्र** । खादिभूतमध्ये **धरा** भूमिः **पञ्चगुणयुक्** गन्धरसरूपस्पर्शशब्दाख्यैः पञ्चगुणैः सहिता । **तोयादि** जलाग्निवाय्वाकाशं च **एकैकशः** यथाक्रममेकैकगुणेन **हीनं** विरहितं रसरूपस्पर्शशब्दगुणयुक्तं जलम् । रूपस्पर्शशब्दगुणयुक्तो वह्निः । स्पर्शशब्दगुणयुक्तो वायुः । शब्दैकगुणयुक्तमाकाशम् । एतेनाकाशं एकमेव शब्दगुणं वाय्वादिषु शब्दगुणो नास्तीति प्रत्यक्षापलापिनो निरस्ताः ॥

तथाहि आकाशे प्रतिश्रुच्छब्दः श्रूयते । शकशकशब्दो वायौ कम्पनज्ञापकः । धमधमशब्दोऽग्नौ प्रज्वलनं सूचयति । छलछलशब्दोऽम्भसि प्रवाहं सूचयति । घटघटशब्दः पृथिव्यां कठिनत्वं सूचयति । वाय्वादीनां शब्दाः परस्परभूताहतिवशादुत्पन्नाः । व्योम्नि तत्तच्छब्दसमानवर्णाः प्रतिशब्दाः श्रूयन्ते । तथा मृगेन्द्रे—

व्योमप्रभञ्जनाग्न्यम्बुभूमयो भूतपञ्चकम् ।
शब्दादेकोत्तरगुणमवकाशादिवृत्तिमत् ।
धूननज्वलनप्लावखरत्वावेदिनो गुणाः ।
शब्दा वाय्वादिषु व्योम्नि सवर्णप्रतिशब्दजाः ॥ इति ॥

पृथिव्यां पञ्चगुणाः यथा—घटघटादिरूपः शब्दः, स्पर्शश्चानुष्णाशीतः, शुक्लरक्तकृष्णादि रूपं, कट्वाम्ललवणतिक्तमधुरकषायरूपो रसः, सुरभ्यसुरभिरूपो गन्धः । अम्भसि चतुर्गुणाः यथा—छलछलादिः शब्दः, शीतरूपः स्पर्शः, शुक्लं रूपम्, मधुरो रसः । वह्नौ त्रिगुणाः यथा—धमधमादिः शब्दः, उष्णरूपः स्पर्शः । प्रकाशमानं रूपम् । वायौ द्वौ गुणौ यथा—अशीतानुष्णः स्पर्शः, शकशकादिः शब्दः । आकाशे शब्दैकगुणो यथा—शब्दः प्रतिध्वनिरेव ।

उक्तं च मृगेन्द्रे—

इति पञ्चसु शब्दोऽयं स्पर्शो भूतचतुष्टये ।
अशीतोष्णौ महीवाय्वोः शीतोष्णौ वारितेजसोः ॥
भास्वदग्नौ जले शुक्लं क्षितौ शुक्लाद्यनेकधा ।
रूपं त्रिषु रसोऽम्भस्सु मधुरष्षड्विधः क्षितौ ।
गन्धः क्षितावसुरभिस्सुरभिश्च मतो बुधैः ॥ इति ॥

धरणग्रहाख्यपचनव्यूहावकाशाः क्रियाः व्यापाराः । ते पृथिव्यादिभिः यथाक्रमेण संभवन्तीति शेषः । धरणं कठिनत्वात् धारणं भूमेर्व्यापारः । ग्रहः सङ्ग्रहो द्रवत्वात् समूहीकरणं पिण्डीकरणं जलस्य व्यापारः । पचनम् उष्णत्वात् पाकीकरणं वह्नेर्व्यापारः । व्यूहः कम्पनात् अवयवघटनं वायोर्व्यापारः । अवकाशः निष्कलत्वात् सुषिररूपतया इतरभूतानामास्पदस्य दानमाकाशस्य व्यापारः । उक्तं च—

व्यूहोऽवकाशदानं च पक्तिसङ्ग्रहधारणाः ।
वायुव्योमहुताशाम्बुधरणीनां च वृत्तयः ॥ इति ॥ १९ ॥

एवं सदाशिवादिक्षित्यन्ततत्त्वान्युक्त्वा, तेषां शुद्ध इत्यशुद्ध इति शुद्धाशुद्ध इति त्रिविधत्वमस्तीत्याह—ऊर्ध्व इति ।

ऊर्ध्वोऽध्वा सकलोऽपि बोधकतया शुद्धोऽधरो ग्रन्थितो
मोहाढ्यादशुचिर्विपर्ययहतेश्शुद्धोऽपि पुंस्त्वात्परः ।
तत्त्वान्येव सहायभूतभुवनेशानैर्युतान्यात्मनां
तिष्ठन्त्याविलयादमूनि च बहिर्भोगप्रदायीन्यलम् ॥ २० ॥

ऊर्ध्वोऽध्वा मायातत्त्वादुपरि वर्तमानः **सकलोऽपि** समस्त एवाध्वा शुद्धविद्यादि शिवान्तं पञ्चतत्त्वं **बोधकतया** तत्र स्थितानामात्मनां सर्वज्ञत्व-सर्वकर्तृत्वादि ज्ञानोत्पादकतया **शुद्धः** । शुद्धतत्त्वात्मनां भोगसाधनार्थं परमशिवेन साक्षात् क्षोभितस्य बिन्दोरुपादानत्वात् । अत एव विज्ञान-केवलाः अतिक्रान्तकलादिबन्धाः प्रध्वंसीकृतकर्मपाशाः पक्वमलादनन्तेशाद-यश्चाधिकारमलावशेषतः अप्राप्तशिवतेजस्कास्सन्तो विद्यन्ते । उक्तं च—

तेनोपोद्बलितास्सर्वे शुद्धाध्वभुवनेश्वराः ॥ इति ।

ग्रन्थितः मायातत्त्वात् **अधरः** अधोभागे स्थितः कलादिक्षित्यन्त-तत्त्वस्वरूपोऽध्वा **मोहाढ्यात्** मोहो नाम अनित्याशुचिदुःखानात्मसु नित्यशुचि-सुखात्मज्ञानप्रवृत्तिहेतुः । तस्य मायोत्पन्नाज्ञानस्याढ्यात् आधिक्यात् **अशुचिः** अशुद्धः । **पुंस्त्वात्** पुरुषतत्त्वात् **परः** उपरि वर्तमानः रागादिकलान्ततत्त्वस्व-रूपोऽध्वा **विपर्ययहतेः** विपर्ययस्य पूर्वोक्तमोहस्य हतेः हानितः कलो-द्बलितसामर्थ्यात् विपर्ययस्य किञ्चिद्धानितः । किञ्चिज्ज्ञत्वकिञ्चि-त्कर्तृत्वात् शुद्धः । अपिशब्दात् अशुद्धः शुद्धाशुद्ध इत्यर्थः । अशुद्धत्वं तु सूक्ष्मदेहद्वारेण संधातॄणामात्मनां सुखदुःखमोहजनकतया विज्ञेयम् । प्रकृत्या-दिक्षित्यन्तानां तु सत्त्वादिगुणेनात्यन्तं सुखदुःखमोहजनकतया चाशुद्धत्वमेव । एवं सृष्टानि तत्त्वानि महासंहारपर्यन्तं तिष्ठन्तीत्याह—**तत्त्वानीति** । **सहायभूत-भुवनेशानैः** सहायभूतानि भोगार्थं साधनानि यानि भुवनानि तत्तत्तत्त्वस्थित-भुवनानि **ईशानाः** ये तत्तद्भुवनाधिपतयः तैः **युतानि** सहितानि **आत्मनां** विज्ञानाकलादीनामलमत्यन्तं **बहिर्भोगप्रदायीनि** । बहिश्शब्देनान्तरभोगो

बहिर्भोग इति भोगस्य द्वैविध्यं सूचितम् । साक्षाच्छिवस्य भोगप्रदाने कर्तृत्वात् शुद्धतत्त्वोद्भूतभोग आभ्यन्तरभोगः, अनन्तादिद्वारेण कर्तृत्वात् अशुद्धतत्त्वोद्भूत-भोगो बहिर्भोगः । आभ्यन्तरभोगभोक्तॄणां भोगावसाने मोक्षः । उक्तं च—

अधिकारपदारूढो मलस्तेषां निरोधकः ।
तेन शुद्धाध्वभोगस्य पाके स्यात्तन्मलक्षयः ।
अधिकारमले क्षीणे मोक्षः स्यादव्ययः परः ॥ इति ॥

बहिर्भोगभोक्तॄणामाभ्यन्तरभोगादनन्तरं मोक्षः । तथा पञ्चावरणस्तवे भगवता अघोरशिवाचार्येण प्रोक्तम्—

ये चात्र शुद्धभुवनोद्भवभोगकामास्त्वामर्चयन्ति विविधैर्यजनप्रकारैः ।
तेभ्यः प्रदाय परमेश्वरसाधकेभ्यो भोगान् ददासि तदनन्तरमेव मोक्षम्॥ ॥ इति ॥

अमूनि तत्त्वानि क्षित्यादिशिवान्तानि **आविलयात्** महाप्रलयपर्यन्तं **तिष्ठन्ति** विद्यन्ते । अत एव वास्तवत्वात् तत्त्वानीत्युच्यन्ते । तथा तत्त्वप्रकाशे—

आप्रलयं यत्तिष्ठति सर्वेषां भोगदायि भूतानाम् ।
तत्तत्त्वमिति प्रोक्तं न शरीरघटादि तत्त्वमतः ॥ इति ॥ २० ॥

पृथिव्यादितत्त्वानां योजनप्रमाणान्याह—**क्ष्मातत्त्वमिति** ।

क्ष्मातत्त्वं शतकोटियोजनमपः प्रारभ्य गौणान्तकम्
पङ्क्त्या तद्गुणनात्तथा प्रकृतितो मायावसानं शतात् ।
साहस्राच्च सदाशिवावधि ततश्शक्त्यन्तकं लक्षतः
स्यादूर्ध्वं स शिवोऽप्यमेयविभवो बिन्दोरधिष्ठायकः ॥ २१ ॥

पृथिवीतत्त्वं शतकोटियोजनम् । **अपः** अप्तत्त्वात् **प्रारभ्य** अप्तत्त्वं पूर्वी-कृत्येत्यर्थः । **गौणान्तकं** गुणतत्त्वपर्यन्तं **पङ्क्त्या** दशसंख्यया **तद्गुणनात्** तस्य पृथिवीतत्त्वप्रमाणभूतशतकोटियोजनस्य गुणनात् वर्धनात् अप्तत्त्वादि-गुणतत्त्वपर्यन्तयोजनप्रमाणं भवति । तद्यथा—पृथिवीतत्त्वप्रमाणभूतशतकोटि-योजनमेकस्थानं कृत्वा एकस्थानभूतशतकोटियोजनं दशसंख्यया वृद्धीकृतं चेत् द्वितीयस्थानभूतमप्तत्त्वप्रमाणं दश भवति । एवमेवोत्तरत्रापि गुणीकृतं चेत् वह्न्यादि तृतीयादिशतस्थानं भवति । तद्यथा पृथिवीतत्त्वाद्दशगुणं

अप्तत्वं तद्दशस्थानम् । सहस्रकोटियोजनप्रमाणमित्यर्थः । **एवमुत्तरत्रापि** संख्या कर्तव्या । जलतत्त्वादग्नितत्त्वं दशगुणम्, तच्छतस्थानम् । अग्नेर्दशगुणो वायुः, तत्सहस्रस्थानम् । वायोर्दशगुणमाकाशम्, तद्दशसहस्रस्थानम् । व्योम्नो दशगुणोऽहङ्कारः, तल्लक्षस्थानम् । गर्वाद्दशगुणो बुद्धिः, तद्दशलक्षस्थानम् । बुद्धेर्दशगुणं गुणतत्त्वम्, तत् कोटिस्थानम् । एवं शतकोटिरेकादिस्थानसंख्या जाता । गुणतत्त्वपर्यन्तं प्रकृत्यादितत्त्वप्रमाणमाह—**तथेति ।** यथा शतकोटियोजनप्रमाणभूतपृथिवीतत्त्वमारभ्य गुणतत्त्वपर्यन्तं दशसंख्यया वृद्धीकृतं तथा प्रकृतितः प्रकृतितत्त्वमारभ्य मायावसानं मायातत्त्वपर्यन्तं शतात् शतसंख्यया वृद्धिः कार्या । शतसंख्यया वृद्धीकरणात् जातस्थानं यथा—गुणतत्त्वात् शतगुणा प्रकृतिः, तत्पद्मस्थानम् । प्रकृतेः शतगुणो रागः, तन्निखर्वस्थानम् । रागाच्छतगुणा नियतिः, तन्महासरोजस्थानम् । नियतेः शतगुणा विद्या, तन्महाशङ्खस्थानम् । विद्यायाः शतगुणा कला, तन्महासमुद्रस्थानम् । कलायाः शतगुणः कालः, तत्तु परार्धस्थानम् । एवमेकादिपरार्धस्थानपर्यन्तं गणना कार्या । **सदाशिवावधि** मायातत्त्वादूर्ध्वं सदाशिवतत्त्वपर्यन्तं **साहस्रात्** सहस्रसंख्यया वृद्धिं कुर्यात् । सहस्रसंख्यया वृद्धीकृतं मायातत्त्वप्रमाणं शुद्धविद्यातत्त्वस्य प्रमाणमित्यर्थः । शुद्धविद्याप्रमाणे सहस्रेण वृद्धीकृते ईश्वरतत्त्वप्रमाणम् । तत्प्रमाणे सहस्रेण वृद्धीकृते सदाशिवतत्त्वप्रमाणम् । ततः सदाशिवतत्त्वादूर्ध्वं **शक्त्यन्तकं** शक्तितत्त्वपर्यन्तं **लक्षतः** लक्षप्रमाणेन वृद्धीकृते सदाशिवतत्त्वे शक्तितत्त्वस्य योजनप्रमाणम् । **ऊर्ध्वं** शक्तितत्त्वादुपरि विद्यमानोर्ध्वप्रदेशे व्यापकत्वेन स्थित्वा **अमेयविभवः** अपरिच्छेद्यसामर्थ्यः । इयत्संख्यावानिति संख्याभिः प्रमाणीकर्तुमशक्य इत्यर्थः । **स शिवः बिन्दोरपि** अधिष्ठायकः अधिष्ठानस्थानभूतः । उक्तं च—

बिन्दुशक्त्या शिवेनैषा नान्येन व्याप्यते शिवः । इति ।

तथा मतङ्गे योजनाप्रमाणम्—

भूमेर्दशगुणं तोयं तोयादग्निस्ततोऽनिलः ।
अनिलाच्चायमाकाशश्शास्त्रेऽस्मिन् पारमेश्वरे ॥
आकाशाच्चाप्यहङ्कारः तस्माच्च परतो महान् ।
महतः परतो ज्ञेयं गुणानां त्रितयं मुने ॥

गुणत्रयात्प्रधानाख्यं तत्त्वं शतगुणोत्तरम् ।
शतोत्तरगुणानि स्युः शेषाण्युक्तानि शासने ॥
मायान्तानि तु तत्त्वानि तेभ्यस्तूर्ध्वं सहस्रधा ।
यावत्सदाशिवं तत्त्वं तत्परं लक्षधा स्थितम् ॥
चतुष्कं शक्तिपर्यन्तं ततोऽमेयः परश्शिवः ॥ इति ॥ २१ ॥

प्रतिपुरुषं सूक्ष्मदेहात्मना भुवनात्मना च मायाकार्याणि अनेकानि सन्तीत्याह—**स्रोतांसीति ।**

स्रोतांसि प्रतिपुंसि सूक्ष्मतनुगैस्तत्त्वैर्यदानेकधा
मायाजान्यखिलात्मभोग्यभुवनाद्याधारतत्त्वैस्तदा ।
स्थित्यै तांश्च नरान्नियोजयति तैर्नो लक्षितोऽधिष्ठितैः
स्वार्थाप्त्यै तनुदेवभावभुवनैः भोगे शिवस्साधनैः ॥ २२ ॥

प्रतिपुंसः पुंस इति जात्येकवचनात् प्रत्यात्मानां **सूक्ष्मतनुगैः** सूक्ष्मदेहस्वरूपैः **तत्त्वैः** कलादिक्षित्यन्तैः । **मायाजानि** मायाजातानि तानि **स्रोतांसि** स्थानानि **अनेकधा** अनेकप्रकाराण्यात्मनां निवासस्थानानि स्थूलसूक्ष्मशरीराणीत्यर्थः । सकलात्मनां सूक्ष्मस्थूलदेहत्वेन द्विरूपत्वात् । **अखिलात्मभोग्यभुवनाद्याधारतत्त्वैः** अखिलानां समस्तानामात्मनां भोग्यानि तत्तद्भुवनपतित्वेन तत्तद्भुवननिवासित्वेन च भोक्तुं योग्यानि । भुवनपतित्वं कालाग्निरुद्रादीनामिति ज्ञेयम् । तन्निवासकत्वं तत्परिवाराणां भुवनाद्यानां कालाग्निरुद्रभुवनादीनामाधारतत्त्वैः तत्तद्भुवनाधिष्ठानभूतकलादिक्षित्यन्तैः मायाजातानि स्रोतांस्यनेकप्रकाराणि सकलात्मविषयाणि सकलानां प्रलयाकलानामव्यक्तशरीराणि अव्यक्तभुवनानि मायागर्भाण्यनेकानि सन्ति । सकलानां विज्ञानाकलानां महामायोत्पन्नानि शरीराणि भुवनानि च सन्ति । **यदा** यस्मिन् काले स्वेन सृष्टानि तात्त्विकभुवनानि शरीरकारणभूतकलादिक्षित्यन्ततत्त्वानि विद्यन्ते **तदा** तस्मिन् काले शिवो ह्यात्मनां देहादिसंबन्धं नियोज्य सृष्ट्यादिपञ्चकृत्यं करोतीत्याह—**स्थित्यै इति ।** अधिष्ठितैः शिवेनाधिष्ठितैः । तत्प्रेर्यैरित्यर्थः । **तैरात्मभिर्नो लक्षितः** अप्रत्यक्षभूतशिवः । आत्मनि प्रेरके शिवे विद्यमानेऽपि मलावच्छन्नत्वात् अदृष्ट इत्यर्थः । **स्वार्थाप्त्यै** आत्मनां स्वकार्यप्रयोजनप्राप्त्यै **भोगे** सुखदुःखात्मके **साधनैः** साधकोपायभूतैः **तनुदेवभावभुवनैः** तनवः

शरीराणि देवः देवनात् द्योतनात् बाह्यार्थप्रकाशनात् इन्द्रियाणि, भावाः धर्मादयोऽष्टौ, भुवनानि कालाग्न्यादिलोकाः एतैः **स्थित्यै** स्थितिं कर्तुं **तान्** नरान् मलबद्धात्मनः **नियोजयति** संबन्धयति। अनेन देहादिकरणेन शिवस्य सृष्टिरुक्ता भवति। भुवनानामुत्पादनमात्मनां भुवनसम्बन्धशरीरोत्पादनं च सृष्टिः। सा सृष्टिः द्विविधा। साक्षाच्छिवेनोपादानभूतबिन्दुना च भुवनोत्पादनं तद्भुवनवासिनामनन्तादीनां बैन्दवशरीरकरणं च। अनन्तादीनां मायोत्पन्नभुवनकरणं तन्निवासिनामात्मनां सूक्ष्मतात्त्विकेन भौवनशरीरकरणं चेति ॥ २२ ॥

तिरोभावादिकृत्यमाह—**पाशेति**।

पाशानुग्रहणाद्यथानुगुणतो भोग्यस्य संभोजनं
पुंसां तद्बलदानतो भगवतः कृत्यं च संरक्षणम्।
लीयन्ते परिणामतस्तु समये तत्त्वानि वैलोम्यतो
मायायां परतोऽपि तानि च महामायात्मनीशाज्ञया ॥ २३ ॥

पाशानुग्रहणात् पाशानां मलादीनामनुग्रहणात् अस्यायं पाशः अस्यायं पाशः इति संबन्धीकरणात्। यथा विज्ञानाकलानां मलमात्रं प्रलयाकलानां मलकर्मणी सकलानां मलमायाकर्माणि **यथानुगुणतः** तत्तत्पाशानुगुणात् अनुकूलतः **भोग्यस्य** भोक्तुं योग्यस्य वस्तुनः **संभोजनम्** आत्मनां भोगदानं तिरोभावानुग्रहकृत्यं पाशानुग्रहणतारतम्यात् आत्मनां स्वरूपज्ञानं तारतम्यादाच्छादयित्वा तदनुगुणभोगभोजनदानं तिरोभावानुग्रह इत्यर्थः 'शिवो ब्रह्मादिदेहेषु किञ्चिज्ज्ञस्तारतम्यतः' इत्युक्तत्वात्। **पुंसा**मात्मनां **तद्बलदानतः** तस्मिन् भोग्यवस्तुविषयभोगसंभोजने बलदानतः यथा भोग्यवस्तुसंपादनं तथा स्थिरीकरणसामर्थ्यप्रदानतः **भगवत**श्शिवस्य यत्कृत्यं तत्**संरक्षणं** स्थितिकृत्यम्। ईश्वरशक्त्या निरुद्धस्य समस्तस्य जगतः स्वस्वविषये नियोगस्थापनं स्थितिरित्यर्थः। संहारकृत्यमाह—**लीयन्त इति** ॥ **समये** महासंहार इति अवान्तसंहार इति द्विरूपे संहारकाले। **तत्त्वानि** सृष्टिक्रमेणोत्पन्नशिवादितत्त्वानि **वैलोम्यतः** पृथिव्यादितत्त्वक्रमेण **परिणामतः** प्रकृतेरवस्थान्तरस्वरूपात्। अत्र पृथिव्यादिपञ्चकं परिणामः, गन्धादिपञ्चकं यथाक्रमेण पृथिव्यादेः प्रकृतिः। गन्धादिपञ्चकं कर्मेन्द्रियपञ्चकं ज्ञानेन्द्रियपञ्चकं परिणामः।

भौतादिकवैकारिकतैजससंज्ञकोऽहङ्कारः यथाक्रमेण गन्धादिपञ्चकस्य प्रकृतिः। अहङ्कारः परिणामः, तस्य बुद्धिः प्रकृतिः। बुद्धिः परिणामः, तस्याः गुणः प्रकृतिः। गुणः परिणामः, तस्याव्यक्तं प्रकृतिः। अव्यक्तं रागश्च विद्या च परिणामः, तेषां कलातत्त्वं प्रकृतिः। पुंस्तत्त्वं कालो नियतिः कला च परिणामः, तेषां माया प्रकृतिः। एवं प्रकृतिविकृती विज्ञातव्ये। **मायायां** मायातत्त्वे लीयन्ते। यस्मादेव यस्य जननं तस्यैव तत्रान्तर्भावेन लयं गच्छति। **परतोऽपि** मायोर्ध्वं **तानि च** शुद्धविद्यादितत्त्वानि। शुद्धविद्या ईश्वरे। ईश्वरः सदाशिवे। सदाशिवश्शक्तौ। शक्तिश्शान्तिकलामस्तकस्थशान्त्यतीतभुवनस्वरूपे शिवतत्त्वे। शिवः महामायात्मनि स्वोपादानभूतबिन्दौ। **ईशाज्ञया** शिवाज्ञया। यथाक्रमेण **लीयन्ते**। मायाधोऽनन्तेश्वराज्ञया लीयन्ते। तथोक्तमघोरशिवाचार्यैः—

गन्धे भूस्सलिलं रसे हुतवहो रूपे मरुत् स्पर्शने
शब्दे स्यात् खमहङ्कृतौ पुनरिमास्तन्मात्रिकास्तामसे।
कर्माक्षाणि च राजसे सहमनोबुद्धीन्द्रियैस्सात्त्विके
बुद्धौ तच्च गुणेषु सा गुणगणोऽव्यक्ते लयं गच्छति ॥
तद्रागविद्ये च कलां प्रयान्ति पुंस्त्वं च कालो नियतिः कला च।
मायां सुविद्येशमसौ सदेशं स शक्तिमेषा शिवमेष बिन्दुम् ॥ इति ॥
॥ २३ ॥

प्रकृत्यवसानमवान्तरसंहारकाल इति मायावसानं महासंहारकाल इति संहारकालसंख्यानमाह—**दैवेष्विति**।

दैवेष्वर्कसहस्रवर्षकयुगाब्धीनां सहस्रेष्वधो
यातेष्वेव लयस्त्रिलोकविषयस्तस्यैव सर्गेष्वपि।
प्राप्तेष्वत्र परार्धतां च विलयोऽव्यक्तान्तमस्मात्पुनः
सर्गेष्वस्य गुणादिकस्य च तथा ग्रन्थौ च बिन्दौ लयः ॥ २४ ॥

दैवेषु देवसंबद्धसंवत्सरेषु मनुष्याणां षष्ट्यधिकशतत्रयदिनमानमेकः संवत्सरः। तादृशसंवत्सरमानं देवानामेकं दिनम्। एषां षष्ट्यधिकशतत्रयमानं देवानामेकं वर्षम्। एवंसंख्यातदेववर्षमध्ये **अर्कसहस्रवर्षकयुगाब्धीनामर्क**सहस्रवर्षकाणां द्वादशसहस्रवर्षप्रमाणानां युगाब्धीनां कृतत्रेताद्वापरकलियुगचतुष्टयानाम्। अत्रायमर्थः—चतुर्युगप्रमाणं देवद्वादशसहस्रवर्षयुक्तम्। तत्र कृतयुगं देव-

चतुस्सहस्रवर्षप्रमाणम् । तस्य सन्ध्याकालः शताष्टकवर्षप्रमाणम् । सन्ध्याकाल-वर्षयुक्तकृतयुगप्रमाणं शताष्टाधिकदेवचतुस्सहस्रवर्षम् । त्रेतायुगं देवत्रिसहस्र-वर्षम् । तस्य सन्ध्यांशः षट्छतम् । सन्ध्यांशयुक्तत्रेताप्रमाणं षट्च्छताधिक-त्रिसहस्रवर्षम् । द्वापरः देवद्विसहस्रवर्षः । तस्य सन्ध्यांशस्तु चतुश्शतम् । सन्ध्यांशयुक्तद्वापरप्रमाणं चतुश्शताधिकद्विसहस्रवर्षकम् । कलिः देवसहस्रैकवर्षः । तस्य सन्धयांशस्तु द्विशतम् । सन्ध्यांशयुक्तकलिप्रमाणं द्विशताधिकसहस्रैक-वर्षम् । एवं सन्ध्यांशयुक्तदेवद्वादशसहस्रवर्षप्रमाणं चतुर्युगम् । उक्तं च—

> चत्वार्यब्दसहस्राणि वैबुधानि कृतं युगम् ।
> अष्टौ शतानि यावन्ति सन्ध्यांशस्तावदेव हि ॥
> एकैकशस्ततोऽन्यानि त्रेताद्यानि युगानि तु ।
> सन्ध्यासन्ध्यांशयुक्तानि...... ॥ इति ॥

तथा सूतसंहितायाम्——

> दिव्यैर्द्वादशसाहस्रैर्वर्षैः प्रोक्तं चतुर्युगम् ।
> कृतं तत्र युगं विप्राः सहस्राणां चतुष्टयम् ।
> तस्य सन्ध्या च सन्ध्यांशः प्रोक्तश्चाष्टशताधिकः ।
> त्रिभिर्वर्षसहस्रैस्तु त्रेता दिव्यैः प्रकीर्तिता ॥
> कृतार्धं द्वापरः प्रोक्तः तदर्धं कलिरुच्यते ।
> क्रमात्सन्ध्या च सन्ध्यांशः तुरीयांशविवर्जितः ॥ इति ॥

एवंविधप्रमाणयुक्तस्य चतुर्युगस्य मनुष्यसंवत्सरसंख्यया प्रमाणं प्रदर्श्यते । दिव्यैक-सहस्रवर्षमानं मनुष्यसंख्यया वर्षाणां त्रिलक्षम् षष्टिसहस्रयुतम् । एवं मनुष्य-संख्यया कृतयुगप्रमाणं वर्षाणां सप्तदशलक्षमष्टाविंशतिसहस्रयुतम् । त्रेतायुगप्रमाणं वर्षाणां द्वादशलक्षं षण्णवतिसहस्रयुतम् । द्वापरप्रमाणं वर्षाणामष्टलक्षं चतुष्षष्टि-सहस्रवर्षयुतम् । कलियुगप्रमाणं वर्षाणां चतुर्लक्षं द्वात्रिंशत्सहस्रवर्षयुतम् । एवं चतुर्युगानां प्रमाणं मनुष्यसंख्यया वर्षाणां त्रिचत्वारिंशल्लक्षं विंशतिसहस्र-युतम् । एवंसंख्यातचतुर्युगानां सहस्रेषु गतेषु सत्सु **त्रिलोकविषयः** त्रिलोकस्थितजनविषयो लयः संहारः प्रोक्तः । तस्यैव लोकत्रयेषु सृज्यभूतजनस्य **सर्गेष्वपि** सृष्टिष्वपि । चतुर्युगानां सहस्रेष्वतीतेषु सृष्टिकालः । अत्र कनकाण्ड-

मध्यस्थितब्रह्मणः चतुर्युगसहस्रपर्यन्तं दिवाकालः । तावत्कालपर्यन्तं रात्रिः । तस्य दिवाकाले लोकत्रयजनस्य सृष्टौ सत्यां दिवाकालपर्यन्तं स्थितिकालः ब्रह्मणो जाग्रदवस्थाकालत्वात् । तस्य रात्रौ लोकत्रयजनस्य संहारकालः ब्रह्मणो निद्रावस्थाकालत्वात् । उक्तं च—

> स्वव्यापारनियुक्तानामिन्द्राणामायुरुच्यते ।
> एकैकस्य भवेदायुर्युगानामेकसंप्तति: ॥
> तैश्चतुर्दशभि[1]श्शक्रैर्दिनं कमलजन्मनः ।
> लोकत्रयस्थितिरियं समासेन तु तावती ॥
> एतावती तु रात्रिः स्यात् यस्यां लोकत्रयं मुने ।
> क्षयं याति तमःप्राप्ते तदवस्थमहर्मुखे ॥
> ब्रह्माप्युत्थाय शयनादाविष्टकरुणात्मना ।
> रुद्रशक्तिबलाद् भूयो निर्मिणोति जगत्सदा ॥ इति ॥

अवान्तरसंहारकालसंख्यां वक्तुं ब्रह्मणो दिनमानमुक्त्वा प्रकृतितत्त्वाव-सानभूतां व्यस्तजगत्संहारकालसंख्यामाह—अत्र ब्रह्मसंबन्धिसंवत्सरेषु ब्रह्मणो दिनं षष्ट्यधिकशतत्रयं चेत् ब्रह्मसंवत्सरः । **परार्धतां** उत्तरत्र वर्ण्यमाणपरार्ध-संख्यां प्राप्तेषु गतेषु सत्सु **अव्यक्तान्तं** प्रकृतितत्त्वावसानं **विलयः** संहारः प्रोक्तः । तथा मृगेन्द्रे—

> चतुर्युगसहस्रान्तमहर्हैमाण्डजन्मनः ।
> निशा तावत्यहोरात्रमानेनाब्दपरार्धके ॥
> विलयोऽव्यक्तपर्यन्तं प्रकृत्यादि विचार्यते ।

अस्मात् कारणभूतप्रकृतितत्त्वात् **पुनरस्य** गुणादिकस्य गुणतत्त्वादि-पृथिव्यन्तस्य **सर्गेषु** सृष्टिषु तथा परार्धकालसंख्यापर्यन्तं संहारकालप्रमाणम् । तदनन्तरं सृष्टिकाल इत्यर्थः । महासंहारकालसंख्यामाह—**ग्रन्थौ च** माया-तत्त्वे **बिन्दौ** सर्वोपादानकारणभूते **लयः** संहारः । तथा प्रकृत्यादीनां स्थितिः परार्धसंख्यया । संहारस्तु परार्धसंख्ययेति द्विपरार्धप्रमाणं सृष्टिसंहारकालः । तावति प्रकृत्यादिसृष्टिसंहारपरिवर्तने परार्धसंख्यां गते प्रकृत्यादिक्रमेण मायायां लयः । शुद्धविद्यादिक्रमेण बिन्दौ लयः । तदुक्तं मृगेन्द्रे—

---

1. क. द्वादशभिः

एवं गुणादिसर्गाणां परार्धे लयकारणम् ।
कला लेढि कलां माया स्वाधिकारपराङ्मुखी ।
तन्निवृत्तौ निवर्तन्ते देवास्तदधिकारिणः ॥
सर्गस्थित्यादिको यस्मात् अधिकारस्तदाश्रयः ।
एवं मन्त्रेशमुख्येषु विशत्स्वभिमतं पदम् ॥
विद्यामत्ति सदातत्वं तद्बिन्दुर्बैन्दवध्वनिः ।
नादमत्ति परा शक्तिः शक्तिमीष्टे स्वयं हरः ॥ इति ॥ २४ ॥

एकादिपरार्धपर्यन्तमेकविंशतिसंख्यास्थानमाह—**एकमिति** ।

एकं पङ्क्तिशतं सहस्रमयुतं लक्षं प्रपूर्वायुतं
कोटिश्चार्बुदकं च पद्मकमधो खर्वं निखर्वं तथा ।
बृन्दं चैव महासरोजमपरश्शङ्खस्समुद्रोऽन्तिमो
मध्यश्चैव परार्धसंज्ञकमिमां संख्यां विदुः पण्डिताः ॥ २५ ॥

एकं एकस्थानं **पङ्क्तिर्**दशसंख्यावाचिनी। दशोत्तरगुणनेन सर्वं गुणनीयमिति द्वितीयस्थानं पङ्क्तिशब्देनोक्तम्। तद्दशगुणं चेच्छतं तृतीयस्थानम् । तद्दशगुणं चेत् **सहस्रं** चतुर्थस्थानम् । **अयुतं** दशसहस्रसङ्ख्याकं पञ्चमस्थानम् । तद्दशगुणं चेल्लक्षं शतसहस्रसंख्याकं षष्ठस्थानम् । प्रपूर्वायुतं प्रशब्दपूर्वायुतम् **प्रयुतं** दशलक्षं सप्तमस्थानम् । तद्दशगुणञ्चेत् **कोटिः** शतलक्षसंख्याकमष्टमस्थानम् । तद्दशगुणम**र्बुदकं** दशकोटिसंख्याकं नवमस्थानम् । तद्दशगुणं **पद्मकं** शतकोटिसंख्याकं दशमं स्थानम् । तद्दशगुणं **खर्वं** सहस्रकोटिसङ्ख्याकमेकादशस्थानम् । तद्दशगुणं **निखर्वं** द्वादशस्थानम् । तद्दशगुणं **बृन्दं** त्रयोदशस्थानम् । तद्दशगुणं **महासरोजं** चतुर्दशस्थानम्। तत्रापरः शङ्ख इति शङ्खो महाशङ्ख इत्यर्थः । महासरोजं दशगुणं चेत् **शङ्खः** पञ्चदशस्थानम् । तद्दशगुणं **महाशङ्खः** षोडशस्थानम् । तद्दशगुणं **समुद्रः** सप्तदशस्थानम् । तद्दशगुणं **अतिमहासमुद्रः** अष्टादशस्थानम् । तद्दशगुणो **मध्य** एकोनविंशतिस्थानम् । तद्दशगुणं **परार्धसंज्ञकं** विंशतिस्थानम् । **पण्डिताः** शिवागमशास्त्रज्ञाः **इमामेवं संख्यां विदुः** वदन्ति ॥ २५ ॥

कालाग्निरुद्रप्रभृतिशतरुद्रादयो भुवनेश्वराः प्रलयकाले किंरूपमाश्रित्य तिष्ठन्तीत्याह—**संहार इति** ।

संहारे भुवनेश्वरा हरिरथो ब्रह्मा च तत्प्रापिणो
विज्ञानाकलतां प्रयान्ति पुरतः काले तदात्वेऽपि ये ।
रुक्पाके स्वपदेच्छया विरहिताश्शर्वस्य तेऽनुग्रहा-
न्मुक्ताः स्युः स्वपदं दधत्यपि परे तत्तत्परं ते परे ॥ २६ ॥

संहारे मध्यप्रलये महाप्रलये च **भुवनेश्वराः** शतरुद्रादयः **हरिः** विष्णुः **ब्रह्मा** चतुर्मुखः **तत्प्रापिणः** संहारं गच्छन्तः **विज्ञानाकलतां** विज्ञानाकलात्मप्राप्तितां **प्रयान्ति** गच्छन्ति । एतेन महासंहारकालस्सूचितः विज्ञानाकलप्राप्तेर्मायान्तत्वात् । मायापर्यन्तं संहारो महासंहारः इत्युक्तत्वाच्च । प्रकृतितत्त्वपर्यन्तमध्यप्रलये तु भुवनेश्वराः शक्तिरूपतया प्रकृतिस्थक्षित्यादिकलान्ततत्त्वारब्धसूक्ष्मदेहास्सन्तः स्वशक्त्या स्वभुवनस्थिताणून् तत्राधिष्ठाय तिष्ठन्ति । शतरुद्रादयस्तु अनुपसंहृतास्तथाधिष्ठाय तिष्ठन्ति । तथा मृगेन्द्रे—

तदा रुद्रशतं वीरश्रीकण्ठौ च प्रधानपाः ।
शक्त्याक्रम्य जगत्सूक्ष्मं सूक्ष्मदेहांश्च चिद्रतः ॥
प्रकृतिस्थाशयान् कालं यावत्स्वापान्तमासत ॥ इति ॥

पुनरवान्तरसर्गप्रारम्भकाले चानन्तादिरुद्रप्रेरितास्सन्तः तत्तद्भुवनाधिकारं प्रकुर्वन्ति । उक्तंच—

शिवेष्टमन्त्रप्रभृति मण्डलाधिपतीरिताः ।
काले जगत्समुत्पाद्य स्वाधिकारं प्रकुर्वते ॥ इति ॥

महासंहारे तु शक्तिरूपतया मायायां विद्यमानजगत्सु अतिसूक्ष्मशरीरतया संयुक्ताः तदधिकारिणः प्रकृत्यादिभुवनस्थितभुवनेश्वराश्च विरतव्यापारास्सन्तः विज्ञानाकलतां प्राप्नुवन्ति । तेषां मध्ये येषां महासंहारकाले मलपरिपाकः ते मुक्ता भवन्तीत्याह—**तदात्वे काले** महासंहारस्वरूपकाले **पुरतः संहारकाला**पूर्वमेव ये भुवनेश्वराः **रुक्पाके** मलपरिपाके सति स्वपदेच्छया विरहितास्सन्तः । **ते शर्वस्य** परमेश्वरस्य **अनुग्रहात्** परमोक्षप्रदानात् **मुक्ताः स्युः** मुक्ता भवन्ति । परेऽपि मलपरिपाकाभावात् स्वपदेच्छया युक्ताः स्वपदं मायायां शक्तिरूपतया अवस्थितं स्वं स्वं स्थानं **दधति** धारयन्ति । **परे ते** शुद्धाध्वन्यधिकृता अनन्तादयः तत्तत्परम्परया कैवल्यभूतं शिवस्वरूपं दधति । अनेनानुग्रहकृत्यं शिवस्य सूचितं भवति। ॥ २६ ॥

आत्मनां प्रयोजनार्थमेव महासंहारं शिवः करोतीत्याह—**विश्रान्त्या इति।**

विश्रान्त्यै भविनां च खिन्नमनसां पाकाय कर्मावले-
र्मायावाग्बलसंभवाय कुरुते शम्भुर्महासंहृतिम्।
शिष्यन्ते पशवस्सशक्तिरमलश्शम्भुश्च मायाद्वयं
सृष्ट्याद्यं दयया ततश्च कुरुते भोगाय पुंसां पुनः ॥ २७ ॥

भविनां संसारिणां भवाध्वभ्रमणश्रान्तानाम्, अत एव **खिन्नमनसां** दुःखितमनसामात्मनां **विश्रान्त्यै** संहारे मरणजननाभावात् सुखेन स्थीयमानत्वेन विश्रमार्थम्। संसारजातग्लानिपरिहारार्थमित्यर्थः। किं च कर्मावलेरनेकजन्मार्जितकर्मसमूहस्य पाकाय पचनार्थम्। संहारे भोगाभावात् कर्मजनितफलपरिणामायेत्यर्थः। किं च **मायावाग्बलसंभवाय** मायावाचोरनवरतं तनुकरणभुवनाद्यनेककार्यजननसंतत्या पाचितशक्त्योरशुद्धशुद्धाध्वोपादानभूतयोर्मायाबिन्द्वोर्बलसंभवाय पुनस्सर्गकरणसामर्थ्योत्पादनाय **शम्भुः** सर्वजनहितरतः परमेश्वरः **महासंहृतिं** महासंहारं **कुरुते** करोति। अवान्तरसंहारस्तु अनन्तादिनेत्यर्थः। तथा तत्त्वप्रकाशे—

संसारे खिन्नानां निखिलानां प्राणिनां प्रभुः कृपया।
कुरुते महार्थसंहृतिमेतेषामेव विश्रान्त्यै॥ इति ॥

महासंहारकाले सर्वेषामभावात् नित्यत्वेन शेषिताः क इत्यत आह—**पशवः** मलसंबन्धात् सर्वे बन्द्धात्मानः **सशक्तिः** समवेतज्ञानक्रियाशक्तिः। **अमलः** अनादिमलरहितः **शम्भुः** शं सुखं प्रेर्यतारूपं भावयतीति शम्भुः परमेश्वरः। चकारेणात्र शिववन्मुक्तात्मानो अनाद्यावारकत्वेन नित्यत्वव्यापित्वयुक्तोऽमलश्च गृह्यन्ते। **मायाद्वयं** मायेति बिन्दुरिति अशुद्धशुद्धजगदुपादानद्वयं **शिष्यन्ते** शेषिता भवन्ति। नित्यत्वेन विद्यन्त इत्यर्थः। **वास**नात्मकत्वेन स्थितकर्मफलभोगाभावे ह्यात्मनां कर्मक्षयाभावेन मुक्तिर्न सङ्घटत इति कृत्वा कर्मफलभोगार्थं पुनः सृष्ट्यादिकृत्यं करोतीत्याह—**ततश्च** संहारानन्तरं **दयया** कृपया **पुंसां** आत्मनां **भोगाय** प्रागार्जितकर्मफलभोगाय **पुनः** पश्चात् सृष्ट्याद्यं सृष्ट्यादिपञ्चकृत्यं **कुरुते** करोति। भोगेन कर्मनाशं विधाय पशून् मोचयितुं पुनरपि सृष्ट्यादि कृत्यं करोतीत्यर्थः।

तदुक्तं श्रीमत्किरणे—

अनेकभविकं कर्म दग्धं बीजमिवाणुभिः।
भविष्यदपि संरुद्धं येनेदं तद्धि भोगतः ॥ इति ॥

संहारे शम्भ्वादीनां नित्यत्वे तत्त्वत्रयवचनम्—

शम्भुः पुरुषो माया नित्यं विभु कर्तृशक्तियुक्तं च।
सुप्तेऽपि विकृतिजाते त्रितयं जागर्ति तत्त्वानाम् ॥ इति ॥ २७ ॥

[1]इति श्रीत्रिलोचनशिवाचार्येण विरचितायां
श्रीमत्सिद्धान्तसारावल्यां
ज्ञानपादः समाप्तः।

इत्थं ज्ञानपादविशिष्टं षड्विंशत्तत्त्वस्वरूपं निरूप्येदानीं क्रियापादमारभमाणः तत्रापि दीक्षास्वरूपं वक्तुकामः दीक्षायाश्च मलपरिपाकजत्वेन शक्तिपातपूर्वकत्वात् प्रथमं तावत् शक्तिपातविचारमाह—**मूल इति।**

मूले कालेन पक्वे पतति नरवरे शक्तिराद्या भवेऽस्मिन्
द्वेषो निश्श्रेयसेच्छा गुरुवरभजनं तद्गतेशोऽस्य हौत्र्या।
पाशान् संच्छिद्य शक्त्या नयति शिवपदं व्यञ्जयंस्तच्छिवत्वं
दीक्षापूतोऽङ्गपाशक्षयकरसमयाचारमेषोऽनुतिष्ठेत् ॥ २८ ॥

मूले अनादिमले **कालेन** केनापि विशिष्टकालेन **पक्के** परिपाकावस्थां गते सति यथा चक्षुःपटलादेः कालेन पाकः संजायते तथा मलस्य द्रव्यत्वात् कालान्तरेण पाकः संभवतीति कालेन पक्व इत्युक्तम्। विशिष्टकालस्तु मलपरिपाकस्य धर्माधर्मात्मनः कर्मणः समविभागरूपः। अत्रायमर्थः। यस्मिन् काले कर्मणः समता भवति स काल एव मलपरिपाकस्य कारणमित्युच्यते। कर्मसमत्वाभावेन कश्चिन्न्यूनः कश्चिदधिको भवतीति वक्तव्यः। न्यूनाधिकत्त्वे सत्यपि द्वयोः कर्मणोः, धर्माधर्मात्मकयोर्मध्ये यः कश्चिद्धर्मात्मकोऽधर्मात्मको वाधिक्याद्बलवत्तरः। स पूर्वं भोगदो भवति। तस्मिन् कर्मणि भोगं दत्त्वा निवृत्ते सति पश्चादितरो भोगदः स्यात् न तुल्यम्। तस्मात समत्वे सति भोगोऽस्य कथं भवति। उक्तं च—

कर्मांशे योऽधिकः पूर्वं भोगदस्त्वितरः पुनः।
समत्वे सति यो भोगः कथं तस्य प्रजायते ॥ इति ॥

1. This is found only in घ and ख.

यदा समत्वे सत्यपि द्वे कर्मणी भोगदे भवतः, तर्हि तदा युगपदेवात्मा स्वर्गनरकफलमनुभवेत् । तथा न [संभवति] । तस्मादाधिक्यैकभोगमिति सिद्धम् । मलपरिपाकादाद्या **शक्तिः** तिरोधानशक्तिः **नरवरे** पुरुषश्रेष्ठे पतति पतिता भवति । ननु शक्तिः पततीत्ययुक्तम् । सर्वत्र व्यापकत्वात् । व्यापकस्य वस्तुनः कस्मात् स्थानात् पतनं संभवतीति शक्तिपातस्य असंभवः प्राप्तः । अत्रायं परिहारः । शब्दानामर्थप्रवृत्तिर्मुख्या गौणी चेति द्विप्रकारा । तस्माच्छक्तिः पततीत्यत्र गौणी शब्दप्रवृत्तिर्न मुख्या । यथा लोके तस्य दृष्टिः अस्यां कामिन्यां पतितेत्युक्ते किं तदा पुरुषाद्विमुच्य सा दृष्टिः कामिन्यां पतिता दृश्यते किं तु दृश्यदर्शकसंबन्धमात्रेण संबद्धा दृष्टिः पतितेत्युपचारेणोच्यते तद्वत् इहाप्यस्मिन् पुंस्यनुग्राह्यानुग्राहकलक्षणसंबन्धेन संबद्धा शक्तिः पतितेत्युपचारेणोक्ता । न तु मुख्यत इत्यदोषः । तथा किरणे—

उपचारेण शब्दानां प्रवृत्तिरिह दृश्यते ।
यथा पुमान् विभुर्नित्यो विनष्टश्शिवतां गतः ॥ इति ॥

अस्यायमर्थः । यथा पुमानात्मा नित्योऽपि देहपातादुपचारेण विनाशं गत इत्युच्यते, यथा विभुर्व्यापकोऽपि व्यक्तशिवत्वोपचारेण शिवतां गत इत्युच्यते, एवं शक्तिपातोऽप्युपचारतः प्रोक्त इति मन्तव्यः । अथ भवतु तावदौपचारिकोऽयं शक्तिपातः । तथापि अमूर्तोऽयमात्मनः किं कर्तुं शक्नोति । तत्पातानन्तरमात्मा किं करोति । यथा लोके कस्यचिद्वस्तुनो निपातो भयदो भवति । अस्मिन् ग्रामे राजोपद्रवो भविष्यतीत्ययं शब्दनिपात इत्यमूर्तोऽपि तद्ग्रामवासिनां जनानां भयदो दृष्टः । जनाश्च भीताः सन्तः परस्परमालोच्य तस्मात्स्थानात् सहसान्यत्र स्थानान्तरं भयहरणसमर्थं यान्ति तद्वत् शक्तिनिपातो ह्यमूर्तोऽपि प्राणिनां संसारभयप्रदो भवति यतश्शक्तिपातात्पूर्वं संसारभोग एव परमं सुखम् । ततश्शक्तिपातादीषदुन्मीलितज्ञानचक्षुः संसारस्य निस्सारतामालोच्य स्वस्थानादाचार्यं भवभयहरणदक्षं प्राप्नोति । उक्तं च—

निपातो भयदो यद्वत् वस्तुनः सहसा भवेत् ।
तस्मादन्यत्र यात्येव तदात्मा देशिकं प्रति ॥ इति ॥

इममेवार्थं मनसि निधाय अस्य शक्तिपातस्संजात इति कथं गम्यत इति शक्तिपातचिह्नमाह—अत्रायं शक्तिपातस्तु सशरीरस्य सकलात्मनो विषयः

विज्ञानाकलप्रलयाकलयोरशरीरिणो शक्तिपातस्य दुर्विज्ञेयत्वात् । अयमेवार्थः गुरुवरभजनं तद्गतेश इत्युक्तत्वात् ज्ञापितः । सकलस्य साधारत्वात् विज्ञानाकलप्रलयाकलयोः निराधारत्वादिति भावः । **अस्मिन् भवे** वर्तमाने संसारे **द्वेषः** तत्त्यागेच्छा **निश्रेयसेच्छा** मोक्षेच्छा **गुरुवरभजनं** गुरुवराणां गुरुश्रेष्ठानां आपरमेश्वरादविच्छिन्नसंप्रदायज्ञानवतामाचार्याणामित्यर्थः । भजनं शुश्रूषणादिना सेवनं । अयमभिप्रायः । अस्मिन् काले कोऽहं किमिदं दुःखपञ्जरमिति संचिन्त्य मुमुक्षोः सकलस्य पुरुषस्य यथावस्थात् सांसारिकज्ञानान्मुक्त्युत्कण्ठादिलिङ्गं यत्स्वरूपं विज्ञानं भवति तत्स्वरूपज्ञानार्थं यदा गुरुवरभजनं च जायते तदा सा शक्तिः पतितेत्युच्यते । उक्तं च—

येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये ।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ ।
भक्तिश्च शिवभक्तेषु श्रद्धा तच्छासके विधौ ॥
अनेनानुमितिश्शिष्टहेतोः स्थूलधियामपि ।
ईषदर्थनिवृत्ते तु रोधकत्वे तमःपतेः ॥
भवन्त्येतानि लिङ्गानि किञ्चिच्छिष्टे च देहिनाम् ।
यदा स्वरूपविज्ञानं पतितेति तदोच्यते ॥ इति ॥

गुरुवरलक्षणमागमेषूक्तं । यथा—

विद्यापादार्थकुशलः क्रियापादगतक्रमः ।
योगपादकृताभ्यासश्चर्यापादानुवर्तकः ॥
शिवशास्त्रपरो नित्यं शिवपूजाग्नितत्परः ॥ इति ॥

तद्गतेशः तस्मिन् गुरुवरे गतः अधिष्ठानरूपत्वेन स्थित ईशः परमेश्वरः शिवादन्यस्य पाशविश्लेषणसामर्थ्याभावात् । आचार्यमात्रमधिकरणमधिष्ठाय शिव एव पाशविमोचक इत्यर्थः । उक्तं च—

आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः ।
भगवाननुगृह्णाति स एव सकलानपि ॥ इति ॥

अत एव गुरुवरः शिवस्वरूप इति सिद्धः । उक्तं च—

यो गुरुस्स शिवः प्रोक्तः यश्शिवस्स गुरुस्स्मृतः ।
गुरुर्वा शिव एवाथ विद्याकारेण संस्थितः ॥

यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः ।
शिवविद्यागुरूणां च पूजया सदृशं फलम् ॥
सर्वदेवात्मकश्चासौ सर्वमन्त्रमयो गुरुः ।
तस्मात्सर्वप्रकारेण तस्याज्ञां शिरसा वहेत् ॥ इति ॥

अस्य स्वरूपज्ञानार्थं गुरुसमीपं गतस्य शिष्यस्य **पाशान्** मलमाया-कर्माणि **हौत्र्या** कुण्डमण्डलपूर्विकया मान्त्रिकया दीक्षया **शक्त्या** पाशसूत्र-ग्रन्थिच्छेदया कर्तरीस्वरूपया ज्ञानशक्त्या **संच्छिद्य** छेदनं कृत्वा ।
उक्तं च—

कर्तरी ज्ञानशक्तिः स्यात् यथा पाशान् छिनत्त्यसौ ।
स कला परमा सूक्ष्मा मन्त्राणां बोधिनी परा ॥
कर्तरी कर्तृरूपेण ज्ञातव्या देशिकोत्तमैः ॥ इति ॥

तच्छिवत्वं शिवस्वरूपं **व्यञ्जयन्** सम्यक् प्रदर्शयन् सन् **शिवपदं** सामान्यवाचिना शिवशब्देनात्रमन्दादिशक्तिपातानुसारेण रुद्राणां मन्त्रेशानां विद्येशानां शिवस्य वा पदं स्थानं **नयति** प्रापयति ॥ उक्तं च—

रुद्रमन्त्रपतीशानपदभाजो भवन्ति ते ।
स्थितौ याननुगृह्णाति गुरुमास्थाय चिद्गतः ॥ इति ॥

दीक्षापूतः दीक्षया पवित्रीकृतः **एषः** समयिपुत्रः साधकनाम्नोक्तः शिष्यः **अङ्गपाशक्षयकरसमयाचारम्** अङ्गं नित्यनैमित्तिकाङ्गभूतं, पाश-क्षयकरं मलादिपाशानां नाशकं समयाचारं स्वसिद्धान्तविहिताचारम**नुतिष्ठेत्** अनुष्ठीयमानत्वेन पालयेत् । सबीजदीक्षितानां तु समयाचारलोपे त्वकृतप्राय-श्चित्तानां पिशाचपदप्राप्तेर्विद्यमानत्वात् । उक्तं च—

समयाचारलोपेन यान्ति शैवाः पिशाचताम् । इति ।

समयाचारस्त्वागमेषूक्तो यथा—

समयीपुत्रकाद्यानां साधकस्य विशेषतः ।
नित्यं क्रमेण कथितं यावज्जीवं शिवाज्ञया ॥
स्नानं पूजा जपो ध्यानं होमश्चैव तु पञ्चमः ।
इति नित्यं सदा कुर्यान्नित्याङ्गं प्रोच्यते पुनः ॥

---

1. क. नियतमानसैः

अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ।
पञ्चदश्यां दिनध्वंसे सङ्क्रान्तौ विषुवायने ॥
मासवृद्धौ दिनाधिक्ये षडशीतिमुखेष्वपि ।
रवीन्दुग्रहणे चैव द्विगुणार्चाजपादिकम् ॥
चातुर्मास्येऽपि तद्व्रतस्यात् व्रतं नक्तं हविष्यभुक् ।
अष्टम्यां च चतुर्दश्यां न भोक्तव्यं कदाचन ॥
इति नित्याङ्गमेवोक्तं नैमित्तिकमथोच्यते ।
दीक्षा चैव प्रतिष्ठा च ज्ञेयं नैमित्तिकं द्विधा ॥
नित्यं नैमित्तिकं काम्यमाचार्यस्योदितं त्रयम् ।
गुरुणापि त्रयं कार्यं व्याख्यानं देशिकेन तु ॥
नित्यं काम्यं साधकस्य स्वशास्त्रोक्तं षडानन ।
समयीपुत्रकाभ्यां तु नित्यमेव प्रकीर्तितम् ॥
स्वशास्त्रोक्तं प्रकर्तव्यं परशास्त्रं न कारयेत् ।
न निन्देत्कारणं देवं न शास्त्रं तेन भाषितम् ॥
न गुरुं साधकं चैव लिङ्गच्छायां न लङ्घयेत् ।
नाद्यान्न लङ्घेन्निर्माल्यं न दद्याच्छिवदीक्षिते ॥
शिवाग्निगुरुपूजा च कर्तव्या जीवितावधि ।
न शून्यमस्तकं लिङ्गं दृष्ट्वा यायात्कदाचन ॥
इत्यादि समयाचारः पालनीयश्शिवार्थिभिः ॥ इति ॥ २८ ॥

एवं शिवदीक्षाभिषिक्तः समयाचारपालको देहान्ते शिवपदं प्राप्नो-तीत्याह—**स्वाम्नायेति** ।

स्वाम्नायज्ञानसिद्धाचरणमविकलं चाचरन् विप्लुतौ त-
न्निष्कृत्याढ्यो मृतोऽन्ते शिवनिहितमनास्त्वन्त्ययागाच्छिवत्वम् ।
लब्ध्वा व्याप्त्याप्तविश्वः परमशिवसमोऽनीशिता तेन शक्तो
नैजाह्लादैकपूर्णो निखिलपरिवृतश्शङ्करप्रीतिरास्ते ॥ २९ ॥

स्वाम्नायज्ञानसिद्धाचरणं स्वाम्नायः स्वसिद्धान्तः कामिकादितन्त्रं, तस्य ज्ञानेन धर्मोपदेशकत्वादयं धर्म इति सिद्धान्तविहितज्ञानेन सिद्धमिदमिति

निश्चितमाचरणमनुष्ठानं नित्यनैमित्तिकादिकं **अविकलं** सकामाकामभेदेन सञ्जातलोपरहितं यथा भवति तथा **आचरन्** अनुष्ठीयमानतया कुर्वन्। चकारो वेदादिविहितानुष्ठानसूचनार्थः। तदनुष्ठानस्य चागमेषूक्तत्त्वात्। तथा कामिके —

श्रुतिस्मृत्यादिसंसिद्धमनुष्ठानं तु यद्भवेत्।
आवश्यके वा शौचे वा स्नाने वाचमनेऽपि वा ॥
सन्ध्याया वन्दने वापि तर्पणे होमकर्मणि।
वेदाध्ययनसंस्कारे सोमयागादिकेऽपि वा ॥
गर्भाधानादिके वापि दहने श्राद्धकर्मणि।
अष्टकाकरणे वापि नित्यनैमित्तिकेऽपि वा ॥
वेदाध्ययनकादौ च द्विजानां विहितं तु यत्।
तत्सर्वं चैव कर्तव्यं न वावश्यं तु शैवकम् ॥
कर्तव्यं चेदनुष्ठेयं शैवकर्माविरोधि यत्।
विरुद्धं चेत्परित्याज्यं न तु शैवं परित्यजेत्।
सङ्ग्राह्यं वैदिकं सर्वं शैववाक्याविरोधि यत् ॥ इति ॥

तथा मोहशूरोत्तरे—

श्रुतिस्मृतिपुराणाद्या आगमा धर्मदेशिकाः।
सामान्यं च विशेषं च शैवं वैशेषिकं वचः ॥ इति ॥

इदं श्रौतानुष्ठानं शैवानुष्ठानं च लोकधर्मिण्या दीक्षितानामेव प्रोक्तं न तु शिवधर्मिण्या दीक्षितानाम्। तेषां शैवानुष्ठानमेवावश्यकं त्यक्तलौकिकवैदिकाचाराः शिवधर्मिणीत्युक्तत्वात्। ‘शिवधर्मिण्यणोःमूलं शिवधर्मफलाश्रयः’ इति वचनाच्च।

वैदिकीं च पुरा कृत्वा ततश्शैवीं समाचरेत्। इति लोकधर्मिविषयवचनम्।

इतरस्तु विरागात्मा लौकिकार्थपराङ्मुखः।
कुर्याद् ब्राह्मीं न वा कुर्याच्छैवीमेव नियोगतः ॥

इति शिवधर्मिविषयवचनम्। श्रौतसन्ध्यानुष्ठाने तु कामाचारतो वैकल्पिकं वचनम्, न मुख्यतः।

भौतिको नैष्ठिकस्तद्वत् ब्राह्मीं कुर्यात् पुरा न वा।
शैवी तु नियमेनैव सेव्या पतनमन्यथा[1] ॥ इत्युक्तत्वात्।

विप्लुतौ सकामाकामभेदेन समयाचारलोपे सति। अत्र सकामः स्वेच्छालोपः। दैवादिना परवशत्वादकामः। उक्तं च—

दैवाद्रोगात्तथा मोहाद्राजचोरभयादिभिः।
एभिर्दोषैरकामत्वं शेषैर्ज्ञेया तु कामिता ॥

इदं कर्मैवमनुष्ठीयमानमिति श्रौतानुष्ठानं शैवानुष्ठं च लोकधर्मिण्या दीक्षितानामेव प्रोक्तम्। न तु शिवधर्मिणीदीक्षितानां वैदिकानुष्ठानम्। तेषां शास्त्रादिज्ञानराहित्यं मोहशब्दार्थः। **तन्निष्कृत्या** तस्य आचारलोपस्य निष्कृत्यापूर्णात्मकविधानस्यास्य लोपस्येदं प्रायश्चित्तमिति शास्त्रोक्तानुष्ठानेनेत्यर्थः। **आढ्यः** समृद्धः प्रायश्चित्तसंयुक्त इत्यर्थः। तथोक्तम्—

प्रायश्चित्तं प्रकर्तव्यं शास्त्रोक्तं गुरुभाषितम्।
अन्यथा निष्फला दीक्षा कर्मकाण्डं च तस्य हि ॥ इति ॥

अन्ते प्राणावसानकाले **शिवनिहितमनाः** प्रथमश्लोकोक्तवत् हृदयादिस्थानतो ब्रह्मादिकारणेश्वरत्यागक्रमेण मूलाधारान्वितनादस्वरूपप्रासादमन्त्रोच्चारेण आत्मानं योगसामर्थ्यात् नयेत्। ब्रह्मरन्ध्रभेदनरहितश्चेत् ब्रह्मरन्ध्रभेदभावनया द्वादशान्तस्थपरशिवेन सह ऐक्यभावनया च शिवे निश्चलत्वेन स्थितमनाः **मृतो** गतप्राणः। तथा त्रिशतिकालोत्तरे—

आसनं पद्मकं बद्ध्वा यथासुखमथापि वा।
मूर्ध्नि चित्तं समाधाय मनसोच्चारयेद्धरम् ॥
शनैश्शनैः समाकृष्य ब्राह्मनाड्यां व्यवस्थितम्।
रुद्रशक्त्याग्रतो ध्यायेत् कुण्डल्यग्रेऽरुणप्रभम् ॥
यावन्तं घटिकामार्गं ततो हिक्कां च कारयेत्।
संपूर्य प्रक्षिपेत्स्कन्दवायुं श्रोत्रे व्यवस्थितम् ॥
निष्पीड्योर्ध्वं तु कुर्वीत यावत्तत्स्वस्तिकं गतम्।
सदाशिवं तु तस्योर्ध्वं बिन्दुनादं तथोपरि ॥
बिन्दुनादं परित्यज्य ततश्शक्तिमनुव्रजेत्।
शक्तिं त्यक्त्वा व्रजेदन्तः शिवं परमकारणम् ॥

1. क. नियतमानसैः

यत्र गत्वा न जायेत प्रतिज्ञा ननु पुत्रक ।
इति संक्षेपतः प्रोक्ता चोत्क्रान्तिस्तव सुव्रत ॥ इति ॥

एवं शक्तस्य प्राणावसानकालध्यानव्यापारः । अशक्तस्यैतत्सर्वं तमुद्दिश्य देशिकादिना कार्यम् । तथा कामिके—

पठेदुत्क्रान्तिसमये कर्णोपान्तेऽणुसंहिताम् ।
विशेषाच्छिवमन्त्रं च मन्त्रं पञ्चाक्षरं तु वा ॥
एतत्सर्वं विधेयं स्यात् देशिकेनेतरेण वा ॥ इति ॥

अन्त्ययागाद् गतासोर्देहस्य विधीयमानसंस्कारोऽन्त्ययागः अन्त्येष्टिः, तस्मादन्त्ययागाच्छिवत्वं **लब्ध्वा** प्राप्य, ननु अन्त्ययागाच्छिवत्वमिति नोपपन्नम् पूर्वमेव दीक्षाकाले पाशच्छेदेन शिवत्वप्राप्तेर्विद्यमानत्वात् । अत्रायं परिहारः । दीक्षोत्तरकालमज्ञानोत्पन्नसमयाचारलोपयुक्तस्याज्ञानादेवाकृतप्रायश्चित्तस्य दीक्षितस्य शुद्ध्यर्थं अन्त्येष्टिः कार्येति मनसि निधायोक्तम् । अत एवागमेषु नित्यादि सम्यगनुष्ठातॄणां तत्त्वशुद्धिसहितामन्त्येष्टिं विहाय केवलशिवाग्निना अन्त्येष्टिः कार्या । समयाचारलोपयुक्तानां तु तत्त्वशुद्धियुतान्त्येष्टिः कार्येत्युक्तम् । तथा कामिके—

आचार्याः साधका वा स्युः पुत्रकास्समयस्थिताः ।
गतासवो यदा तेषां कार्यान्त्येष्टिस्तु दीक्षितैः ॥
आचार्याद्यास्त्रयश्चैते यद्याचारविवर्जिताः ।
प्रायश्चित्तमकुर्वाणा मृताश्चान्त्येष्टिकर्मणा ॥
तत्त्वशुद्ध्यादि नित्यादिकर्म सम्यगनुष्ठितम् ।
परिहृत्य निषिद्धं च यैस्तेषामप्रमादिनाम् ।
तत्त्वशुद्धिं विहायैव केवलान्त्येष्टिरुच्यते ॥ इति ॥

शिवत्वप्राप्त्यनन्तरं मुक्तात्मनो लक्षणमाह—**व्याप्त्या** व्यापकत्वेन **आप्तविश्वः** किञ्चिज्ज्ञत्वादिराहित्येन सर्वज्ञत्वादि प्राप्य प्राप्तविश्वविषयकज्ञानः । अनेन सर्वज्ञत्वादयो गुणा द्योतिता भवन्ति । सर्वज्ञता तृप्तता अनादिबोधता स्वतन्त्रता नित्यमलुप्तशक्तिता अनन्तशक्तिता निरामयात्मता विशुद्धदेहता इति । अत एव **परमशिवसमः** परमशिवसमानरूपः । एतेने-

तरदर्शनज्ञानमनतिनिर्मलमिति द्योतितं भवति पशुदृग्भिरुदीरितत्वात् पाशसम्बन्धेन तेषां परमशिवसमानत्वाभावात् । उक्तं च——

अन्यतन्त्रेषु ये मुक्ताः सिद्धान्ते पशवो मताः । इति ।

सर्वज्ञपरमशिवप्रणीताप्तवाक्यागमज्ञानमेव निश्रेयसहेतुः । उक्तं च रौरवे——

पशूनां भुक्तिमुक्त्यर्थमाप्तः पशुपतिश्शिवः ।
यदाप्तवाक्यमकरोदाप्तवाक्यं तदागमः ॥ इति ॥

तथा च वायुपुराणे उपमन्युकृष्णसंवादे——

शिवागमोक्तं यज्ज्ञानं तदेव ज्ञानमुत्तमम् ।
श्रीकण्ठेन शिवेनोक्तः शिवायैष शिवागमः ॥
शिवाश्रितानां कारुण्याच्छ्रेयसामेष साधनम् ॥ इति ॥

एवं मुक्तात्मनां शिवस्य च समानत्वे सति शिवस्य को विशेष इत्याह——**तेन** शिवसमानत्वेन **शक्तः** पञ्चकृत्यकरणे समर्थोऽपि **अनीशिता** सृष्टिस्थितिसंहारतिरोभावानुग्रहानीष्टे शास्तीति ईशिता स न भवतीति अनीशिता ।

जगत्सृष्टिस्थितिध्वंसतिरोभावविमुक्तयः ।
कृत्यं सकारकफलं ज्ञेयमस्यै तदेव हि ॥ इति वचनात् ।

मुक्तानामपि तत्प्रसादत एव स्वरूपलाभादिकत्वाच्छिवस्य चानादिमुक्तत्वादित्यभिप्रायः । **नैजाह्लादैकपूर्णः** स्वाभाविकानन्दमुख्यपरिपूर्णः **निखिलपरिवृतः** समस्तमुक्तात्मभिः परिवृतः । तैस्सहित इति यावत् । अनेन परमशिवसमानतया मुक्तात्मानो बहवो विद्यन्त इत्युक्तम् । **शङ्करप्रीति-**शिवसमानसन्तोषः । **आस्ते** तिष्ठति । अनेन पुनरावर्तनादिकं नास्तीति द्योतितम् ।

तथा मृगेन्द्रे——

शैवे सिद्धो भाति मूर्ध्नीतरेषां
मुक्तः सृष्टौ पुंवरोऽभ्येति नाथः ।
विश्वानर्थान् स्वेन विष्टभ्य धाम्ना
सर्वेशानोऽनीशितः सर्वदास्ते ॥ इति ॥ २९ ॥

पूर्वं तावत् तीव्रमलपाके सति तीव्रशक्तिपातेनासद्योनिर्वाणदीक्षां सकलविषयाननुभुक्त्वेदानीं विज्ञानाकलप्रलयाकलसकलानां तीव्रतरे मलपरिपाके तीव्रतरशक्तिपातेन सद्यश्शिवत्वं सद्योनिर्वाणदीक्षयाह—अत्यर्थमिति ।

अत्यर्थं तीव्रपाके रुजि च भवमहाक्लेशदैर्घ्यार्दितस्सन्
शम्भोर्मुक्तिः कदेति स्वतनुविधरणे निस्पृहोऽन्यो विचिन्वन् ।
मां कोऽस्मादत्र शक्तः शिवपदमतुलं योक्तुमित्याकलय्य
प्राप्यैनं छिन्नपाशस्स्वतनुविरहतो याति सद्यश्शिवत्वम् ॥३०॥

रुजि मले **अत्यर्थं** अत्यन्तं **तीव्रपाके** तीव्रतरे पाके सति। चकारः तीव्रतरशक्तिपातसूचनार्थः । ननु सकलप्रलयाकलयोः कर्मसमत्वे सति शक्तिपातः संभवति। विज्ञानाकलस्य कर्माभावात् स शक्तिपातः कथं भवति । यदुक्तम् विज्ञानाकलस्य कर्म नास्तीति तन्मायीयकारणमेव कर्म तस्य नास्तीत्युक्तम्। न तु सर्वथा कर्मणः क्षयः। तस्मात् कस्यचित् कर्मणः फलमेव तस्य विज्ञानाकलावस्थाकारणम्। तदपि पूर्वमेव सकलावस्थायामुपार्जितमिति सूक्ष्मशरीरत्वाद् दुर्लक्ष्यं कर्मसमानत्वं शक्तिपातकारणमस्तीत्यवगन्तव्यम्। अन्यथा विज्ञानाकलस्य शक्तिपाताभावात् दीक्षाभावः। दीक्षाभावान्मोक्षाभावः। दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि । इत्युक्तत्वात्, 'शक्तिपाताद्भवेद्दीक्षा' इत्युक्तत्वाच्च ।

भवमहाक्लेशदैर्घ्यार्दितस्सन् भवस्संसारः [1]तस्य महाक्लेशो महारोगः तस्य दैर्घ्येण अर्दितः दुःखितः अत एव **शम्भोः** महेश्वरात् **कदा** कस्मिन् काले **मुक्तिः** भविष्यतीति **विचिन्वन्** विचारयन् अत एव **स्वतनुविधरणे** स्वदेहधारणेऽपि **निस्पृहः** इच्छारहितः **अन्यः** त्रिविधात्मकमध्ये यः कश्चन **अत्र** भुवनेषु **अस्मात्** संसारात् **कः** पुरुषः मामेवं संसारदुःखितम् **अतुलं** साम्यरहितं **शिवपदं** शिवस्थानं **योक्तुं** योजयितुं **शक्तः** समर्थः **इत्याकलय्य** विचार्य **एनं** संसारोद्धारणक्षमं शम्भुं **प्राप्य** गत्वा **छिन्नपाशः** छेदितसमस्तपाशस्सन् **स्वतनुविरहतः** पाशच्छेदानन्तरमेव स्वदेहत्यागात् तत्क्षणमेव **शिवत्वं याति** गच्छति ।

1· ख. स एव.

अत्र तीव्रतरशक्तिपातेन उत्पन्नं सद्यश्शिवत्वं विज्ञानाकलप्रलयाकलानां मुख्यतयोक्तमित्यवगन्तव्यम्। संकलानां तु सामान्यतः। विज्ञानाकलप्रलयाकलानां शरीरप्रारब्धकर्मकार्यभोगाभावात् तीव्रतरा शक्तिः पतति। तस्मात् तत्क्षणमेव तेषां शुद्धात्मस्वरूपसर्वज्ञत्वादिलक्षणं शिवत्वं द्योतितं भवति। सकलानां तु प्रारब्धकर्मभोगात् कर्मसाम्यकालतारतम्यविवक्षानुसारेण केषाञ्चिन्मन्दा मन्दतरा वा शक्तिः पतति। केषाञ्चित् तीव्रा तीव्रतरा वा शक्तिः पतति इत्यर्थः।

इत्थं शक्तिपातस्य नानाप्रकारत्वात् सकलानां तु सद्यश्शिवत्वं सामान्यमेव। तथा श्रीमता वरुणशिवेन—

आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः।
भगवाननुगृह्णाति स एव सकलानपि ॥ इत्युक्तत्वात् ॥ ३० ॥

इदानीं सकलानामपि शक्तिपातभेदेन समयादिदीक्षाविधानात् रुद्रादिपदं भवतीत्याह—**मन्दाद्यैरिति ।**

मन्दाद्यैः केऽपि पक्वे तमसि च समयां संस्कृतिं तद्विशिष्टां
लब्ध्वा लिङ्गार्चनाद्यैः निपतिततनवो रौद्रमैशं पदं च ।
लौकिक्या योजिता ये पतिसुयजनतः प्रेत्य भुक्त्वैव लोके
वैराग्याद्दीक्षितास्ते भुवनजगुरुभिर्यान्ति साक्षाच्छिवत्वम् ॥ ३१

तमसि मले **मन्दाद्यैः** मन्दमन्दतरतीव्रतीव्रतरैः **पक्वे** पाके सति मन्दादिशक्तिपातो भवति। मन्दादिशक्तिपातानां चिह्नानि यथा—तीव्रतरशक्तिपातस्य दीक्षासमाप्त्यनन्तरमेव देहपातः चिह्नम्। तीव्रशक्तिपातस्य दीक्षानन्तरं मूर्च्छा। मन्दशक्तिपातस्य दीक्षानन्तरं शरीरकम्पनम्। मन्दतरशक्तिपातस्य दीक्षानन्तरं रोमाञ्चः। उक्तं च—

चतुर्धा शक्तिपातेन तुल्यमेव फलं प्रति।
यथा तीव्रतरस्तीव्रो मन्दो मन्दतरोऽपि च ॥
सद्योमुक्त्या मूर्च्छया वा कम्पाद्रोमाञ्चतस्तथा ॥ इति ॥

एवं मन्दादिशक्तिपातं ज्ञात्वा दीक्षाभेदः कार्यः। मन्दतरस्य समयदीक्षा कर्तव्या। मन्दस्य विशिष्टदीक्षा, तीव्रस्यासद्योनिर्वाणदीक्षा, तीव्रतरस्य सद्योनिर्वाणदीक्षा चेति।

मन्दमन्दतरोद्देशात् कर्तव्या गुरुणा बहिः ।
शक्तिपातानुसारेण शिष्योऽनुग्रहमर्हति ॥
तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः ।
यदा तु निर्वृतिस्सद्यः सैव तीव्रतरा मता ।
तीव्रा तु जीवतोऽन्या च पुंसः पाशविशोधिका ॥ इत्युक्तत्वात् ।

ननु दीक्षानन्तरं देहपातादिचिह्नानि ज्ञेयानि । दीक्षायाः पूर्वं कथं ज्ञेयानीत्युक्ते गुरुणा स्वसामर्थ्यज्ञानेन शिष्यबाह्यक्रियया च ज्ञानेन ज्ञातव्यानि ; अन्यथा गुरोर्दोषोत्पत्तिः । शिष्यस्य सिद्ध्यादेर्हानिर्भवति । उक्तं च—

यत्र शक्तिर्न पतिता तत्र सिद्धिर्न जायते ।
न विद्या न शिवाचारो न मुक्तिर्न च सिद्धयः ॥
तस्माल्लिङ्गानि संवीक्ष्य शक्तिपातस्य भूयशः ।
ज्ञानेन क्रियया वाऽथ गुरुश्शिष्यं विशोधयेत् ॥
योऽन्यत्र कुरुते मोहात् स विनश्यति दुर्मतिः ।
तस्मात्सर्वप्रकारेण गुरुः शिष्यान् परीक्षयेत् ॥
उत्तमांश्चाधमे कृत्वा नीचानुत्तमकर्मसु ।
आक्रुष्टास्ताडिता वापि ये विषादान्न यान्त्यपि ।
ते योग्याः संयताश्शुद्धाः शिवसंस्कारकर्मणि ॥ इति ॥

केऽपि सकलमध्ये मन्दतरा मन्दाश्च यथाक्रमं गुरोस्सकाशात् **समयां** समयाख्यां **संस्कृतिं** दीक्षां **तद्विशिष्टां** समयसंस्कारे किञ्चिद्विशेषयुक्तां दीक्षां **लब्ध्वा** प्राप्य । ये मन्दतराः तेषां समयमात्रमेव । ये मन्दास्तेषां समयसंस्कारं पूर्वं कृत्वा, पश्चात् विशेषसंस्कारं कार्यमिति सूचनार्थं तद्विशिष्टामित्यत्र तच्छब्दः कृतः । **लिङ्गार्चनाद्यै**र्नित्यमात्राधिकारित्वात् नित्यकर्मत्वेन विहितशिवपूजा स्नानसन्ध्यावन्दनजपनित्याग्निकार्यादिभि**र्निपतिततनवः** यावज्जीवं शिवार्चनादिकं कृत्वा त्यक्तशरीराः समयिनो विशिष्टसमयिनश्च यथाक्रमं **रौद्रं** रुद्रसंबद्धं **ऐशं** ईश्वरसंबद्धं च **पदं** स्थानं प्राप्नुवन्तीति शेषः । तथोक्तं वरुणशिवेन—

यत्र रौद्रपदे योगो योगो यत्रैश्वरे पदे ।
शिखाच्छेदो न यत्रास्ति दीक्षा सा समयी द्विधा ॥ इति ॥

कामिके— शिखाच्छेदविहीनस्य नित्यकर्मणि योग्यता। इति ।

ये तीव्रशक्तिपातयुक्ताः सकलाः पूर्वं समयविशेषसंस्काराभ्यां संस्कृताः **पश्चाल्लौकिक्या** लोकधर्मिण्या निर्वाणदीक्षया **योजिताः** प्रापितास्सन्तः यावज्जीवं **पतिसुयजनतः** पत्युः परमेश्वरस्य सुयजनतः सम्यक् पूजादिकरणतः **प्रेत्य** प्राणान् त्यक्त्वा लोके शुद्धभुवने भोगान् भुक्त्वा ते शुद्धभुवनस्थिताः **भुवनजगुरुभिः** भुवनाधिपैः वैराग्यात् भोगेच्छाराहित्यात् दीक्षितास्सन्तः **साक्षात्** प्रत्यक्षं **शिवत्वं** यान्ति गच्छन्ति । उक्तं च—

दीक्षापूता गणपतिगुरोर्मण्डले जन्मवन्तः
सिद्धा मन्त्रैस्तरुणदिनकृन्मण्डलोद्भासिदेहाः ।
भुक्त्वा भोगान् सुचिरममरस्त्रीनिकायैरुपेताः
स्रस्तोत्कण्ठाः परशिवपदैश्वर्यभाजो भवन्ति ॥ इति ॥ ३१ ॥

सम्यग्दीक्षायुक्तो निर्विघ्नेन समयाद्यनुष्ठानवान् शिवपदं याति । कामेन कर्मानुष्ठानलोपवानकृतप्रायश्चित्तः पिशाचत्वप्राप्त्यनन्तरं शिवपदं याति । दीक्षावैकल्ययुक्तानां शिवपदं कदाचिन्न संभवतीत्याह— **नानावैकल्येति ।**

नानावैकल्यहीनां शिवपदविषयां प्राप्य दीक्षां तदूर्ध्वं
चर्यामीशस्य भक्त्या भुवि चरति च यो याति तद्विप्लुतिश्चेत् ।
अन्ते क्रव्यादताप्त्या शतविततसमो भुक्तितोऽन्ते शिवत्वं
दीक्षावैकल्ययुक्तास्समयनिपतितास्सन्दिहाना न यान्ति ॥३२॥

यः पुरुषः **भुवि** भूम्यां **नानावैकल्यहीनां** नानावैकल्यशब्देन दीक्षाङ्गान्यूनत्वमुच्यते । तच्च मन्दतरशक्तिपातस्य पुरुषस्य निर्वाणदीक्षाविधानं तत्तन्मन्त्रक्रियाकलापादिलोपश्च । एवं नानावैकल्यरहिताम् अत एव **शिवपदविषयां** शिवपदप्रापिकां **दीक्षां प्राप्य** गत्वा, **तदूर्ध्वं** दीक्षोत्तरकाल**मीशस्य** परमेश्वरस्य **भक्त्या** पूजादिकरणस्थिरबुद्ध्या **चर्यां** समयविहितनित्यनैमित्तिकाद्यनुष्ठानाचरणं **चरति** करोति स पुरुषः **याति** गच्छति । शिवत्वमिति शेषः । **तद्विप्लुतिः** समयाद्यनुष्ठानत्यागः । बुद्धिपूर्वकृतस्य समयाचारत्यागस्याकृतप्रायश्चित्तस्य अन्त्येष्टिकर्मणापि शुद्धिर्नास्तीति ज्ञापनार्थं चेदिति शब्दः कृत इत्यवगन्तव्यः । बुद्ध्याकृतस्य समयादित्यागस्याकृतप्रायश्चित्तस्यान्त्येष्ट्या शुद्धिश्चेत् प्रायश्चित्तशास्त्रस्यानर्थक्यप्रसङ्गात् । समयो-

लङ्घनेन पिशाचत्वमिति विहितवाक्यस्य विरोधाच्च। अत एव समयलङ्घनेन पिशाचत्वप्राप्तिरस्तीत्याह—**अन्ते** प्राणत्यागकाले **क्रव्यादताप्त्या** पिशाचत्वप्राप्त्या **शतविततसमः** शतं संख्या तया विस्तृतवत्सरस्सन् शतसंवत्सरपर्यन्तं पिशाचपदं भवतीत्यर्थः। उक्तं च—

समयोल्लङ्घनात्प्रोक्तं क्रव्यादत्वं शतं समाः। इति।

भुक्तितः भोजनात् **अन्ते** अवसाने **शिवत्वं** याति **दीक्षावैकल्ययुक्ता** दीक्षाया वैकल्यमङ्गप्रत्यङ्गलोपः तेन सहिताः। न च सर्वथा दीक्षाहीना इत्यर्थः वैकल्यमात्रयुक्तत्वात्। अत एव वैकल्यदीक्षायुक्तानामपि समयाचारानुष्ठानेन शिवपदमस्तीत्यवगन्तव्यम्। समयानुष्ठानेन वैकल्यपरिहारात्। उक्तं च—

दीक्षाज्ञानविहीना ये लिङ्गाराधनतत्पराः।
तेऽपि यान्ति हरस्थानं सर्वैश्वर्यसुखावहम्॥

नाधो यान्ति पुनर्देवि संसारे दुःखसागरे।
शिवं यान्ति ततश्चोर्ध्वं श्रीकण्ठेन निरीक्षिताः॥ इति॥

समयनिपतिताः समयाचाराद् भ्रष्टाः **सन्दिहानाः** सत्कर्मानुष्ठाने क्रियमाणे सति अनुष्ठीयमानकर्मसंस्कारजनितफलमस्ति नास्ति वेति केन दृष्टमिति ये सन्देहं कुर्वन्ति ते सन्दिहानाः। कर्मफलसन्देहेनानुष्ठानकरणे निश्चायकबुद्धिरहिता इत्यर्थः। ये दीक्षावैकल्यसमयाचारलोपसन्देहैर्युक्ताः ते **शिवत्वं न यान्ति** न गच्छन्ति। संसारेष्वेव वर्तन्त इत्यर्थः॥ ३२॥

—: * :—

नत्वा तु वेदवननाथमधीशमात्म-
मन्त्रासिनात्ममलपाशविदारदक्षम्।
सिद्धान्तसारपरमावलिनामधेय-
ग्रन्थक्रियाचरणवृत्तिमिमां प्रवक्ष्ये॥

(अनुवर्तते)

॥ श्रीः ॥

VṚTTAGAJENDRAMOKṢAM

Edited by

Sri R. K. Parthasarathi, M. A., L. T.,

and

Sri M. P. Mukundan, Siromani.

——— o ———

The work entitled "VṚTTAGAJENDRAMOKṢAM" deals with the story of Indradyumna, a Pandya King and Hūhū, a Gandharva, who were cursed by Sages Agastya and Devalaka to become an elephant and a crocodile respectively and who attained 'Mokṣa' by the grace of God Viṣṇu. This story, as we all know so very well, is found in Chapters 2-4 in the 8th Skandha of the famous S'rīmadbhāgavatamahāpurāṇam. The one hundred and seventy five verses in which this gripping story of a highly spiritual significance is told, serve to exemplify very nearly one hundred and seventy metres dealt with in the 'Chandaśśāstra'. Hence, the appropriateness of the title "VṚTTAGAJENDRAMOKṢAM" which may very well be called a "Śāstrakāvya". While the work shows the poet's deep knowledge of Sanskrit Prosody and Grammar, it also reveals his excellent poetic talents. Though there is a vast multitude of metres in Sanskrit, this work presents only the most frequently employed ones.

"वृत्तरत्नाकरप्रोक्तवृत्तलक्ष्यतया क्रमात्।
गजेन्द्रमोक्षसंदब्धो वासुदेवेन सादरम्॥"

From the above stanza, it is clear that the author of 'Vṛttagajendramokṣam' is one Vasudeva and he has composed it as an illustration of the 'Vṛttaratnākara' of Kedārabhaṭṭa, who might have flourished in the 13th century A. D. This stanza, being the colophon of a Palm-leaf Manuscript preserved in the Maharaja's Palace Library, Trivandrum under No. 1738 (vide 'Descriptive Catalogue of Sanskrit Manuscripts' in H. H. The Maharaja's Palace Library, Trivandrum Vol. VIII) is quoted by both Mahakavi Ullur S. Parameswara Iyer and Sri Vadakkumkur Raja Raja Varma Raja in the context of identifying this author, Vasudeva. Strangely enough, this stanza is not found in the manuscript of this Library, on which the present publication is based.

Sri Vadakkumkur, in his "History of Sanskrit Literature in Kerala Vol. I", has established that the authors of "VṚTTA-

احمال ذلت نوکری بر خود گوارا نساخته بطور خوشباشان بلند
اقبال ہمراہ برادر خود در تمامی اعزہ و اقارب و سایر اہل اسلام
باعزاز و احترام مالاکلام زندگانی می نمودند و ہموارہ با دو سہ
کس تا ہفتہ عشرہ در صحراے لق و دق بوادی مہیب و
مخوف کہ احدے از بنی نوع بشر را درانجا امکان مرور و
عبور نباشد متوقف شدہ بصید شیران و درندگان صحرا
می پرداختند۔ چنانچہ بکرات و مرات از پنجہ ہاے شیر و
خروس مجروح شدہ باز آتش غضب در نہادت والا مستولی
شدہ پیوستہ بشکار سباع تفنن اوقات بعمل می آوردند
و بر تختۂ صحرا مشق جہانگیری و جہانکشائی می نمودند تا وقتیکہ۔

INDIAN INSTITUTE
OXFORD

ناممکل

Vol. XVIII

No. 1

Bulletin of The Government Oriental Manuscripts Library Madras

EDITED

By

R. K. PARTHASARATHI, M.A., L.T.,
DIP. in FRENCH AND GERMAN,
Curator, Government Oriental Manuscripts Library, Madras.

© Government of Madras

1968

Price Rs. 2.

॥ श्रीः ॥

॥ त्रिलोचनशिवाचार्यकृता सिद्धान्तसारावलिः ॥

———:o:———

॥ अनन्तशम्भुकृतव्याख्यासहिता ॥

———:o:———

Edited by

Sri R. K. Parthasarathi, M. A., L. T.,

and

Sri T. H. Viswanathan, Siromani.

(*Continued from Page 48 of Volume XVII - No.* 2)

—: o :—

॥ क्रियापादः ॥

नत्वा तु वेदवननाथमधीशमात्म-
मन्त्रासिनात्ममलपाशविदारदक्षम् ।
सिद्धान्तसारपरमावलिनामधेय-
ग्रन्थक्रियाचरणवृत्तिमिमां प्रवक्ष्ये ॥

तत्र तावदाचार्यः पूर्वं विद्यापादे ह्यनादिमलमुक्तत्वात् सर्वोत्कर्षं कर्तृकारकं पतिपदार्थं तत्कर्मकारकं पशुपदार्थं तदुभयोः प्रवृत्तिनिमित्तं पाशपदार्थं तद्विषयपञ्चकृत्यं तत्फलं च सुविस्तरं विचार्य पुनराद्यश्लोके यस्य प्रसादेनेत्यादिना सूचितक्रियापादोच्यमानकारकपदार्थं विचार्यमाणः इदानीं दीक्षावैकल्ययुक्ता इत्यत्र सूचितदीक्षायाः प्रथमाङ्गभूतं प्रासादमन्त्रविचारं श्लोकानां सप्तभिराचरन् तत्र नवकलाप्रासादमन्त्रोद्धारं द्वादशकलाषोडशकलाप्रासादमन्त्रयोरुद्देशं चैकेन श्लोकेनाह—श्रीमदिति ।

श्रीमत्स्कन्दषट्छ्लोकी ।

श्रीमत्स्कन्दगुरोश्शिवेन कथितः प्रासादमन्त्रो यथा
प्राणो मेधकया क्षमोपरि विषं चेतो यदर्धाब्जकम् ।
दण्डः स्यात्परतस्तु शक्तिरपरा ज्ञेयोन्मनान्तः शिवो
वाच्यश्शक्तिकलस्तथा शशिकलोऽप्येवं विवस्वत्कलः ॥ २२ ॥

श्रीमदिति क्रियापादस्याविघ्नसमाप्त्यर्थं विवक्षितम् । अन्यथा स्कन्दस्य स्वपदेनैव सर्वोत्कर्षप्रसिद्धेः । स एव गुरुः सप्तगुरूणां मध्ये पठितत्वात् । यदुक्तम्—

सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम् ।
गुहं विष्णुं च धातारं सदा सप्त गुरून् स्मरेत् ॥ इति ॥

गुरोरित्युक्तेर्गुरूणामेव प्रासादमन्त्रोपयोग इति मन्तव्यः । शिवेनेति अनन्तब्रह्माण्डान्तर्वर्तिश्रीकण्ठाम्बिकाणुपक्षाविच्छिन्नपरम्पराकसदाशिवशम्भुपक्षविवक्षयोक्तम् । अथवा साक्षात्परमशिवानुगृहीतत्वेन सर्वज्ञतादिसंपद्युक्तत्वात् शिव इति गुणमस्तकवासिश्रीकण्ठनाथः प्रोक्तः, तत्रैव कार्तिकेयान्तरस्याप्यवस्थितेरुक्तत्वात् । यदुक्तं श्रीमत्पौष्करे—

अकृतश्च कृतश्चैव भैरवं ब्राह्ममेव च ।
वैष्णवश्चैव कौमारमौमं श्रीकण्ठमेव च ॥
भुवनानि गुणेष्वष्टौ .... । इति ।

प्रासादमन्त्रस्याविच्छिन्नसंप्रदायज्ञापनार्थमेव एतद्विशेषणम् । यथा शिवेनोक्तं तथा वक्ष्यामीत्यर्थः । प्रासाद इति शिवाभिव्यक्तिभूमित्वात् प्रासाद इव प्रासादः तथापि निरुक्तिरप्युक्ता । यथा—

प्राशब्दस्स्याच्छिवज्ञानं साशब्दाद् गतिरुच्यते ।
दशब्दो मत्स्वरूपं स्यात् प्रासादमभिधीयते ।
ज्ञानेन मुक्तिदं यस्मात् तस्मात्प्रासाद उच्यते ॥

प्राणः हकारः । तथा मन्त्रनिघण्टौ—

गगनकुटिलशून्यं व्योममायाशिवान्तं
नभसचलकुलीलक्ष्मीपञ्चमप्राणघोषाः । ?
हकार .... । इति ।

मेधा औकारः । तदुक्तं तत्र—

औकारो दर्शनान्तं च चोल्कामुख्या परस्तथा ।
अन्वाहार्यश्वरो मेधा हृषीकेशो जनार्दनः ॥ इति ॥

क्षमा ऊकारः । तथा तत्र—

ऊकारो वामकर्णं च दीर्घघोणा रसः क्षमा ।
नारायणस्तथापीशो भूतान्तमिति केचन ॥ इति ॥

विषं मकारः । तथा तत्र—

मकारश्चक्षुर्दीप्तात्मा विश्वभागमरेश्वरः ।
महाकालो महामाया गलमुण्डी विषं विदुः ॥ इति ॥

चेतः बिन्दुः । तथा चोक्तं तत्र—

अक्रूरश्च क्रियामुख्यं पद्मनाभस्त्रिपञ्चमः ।
चेतना सुमना मूर्ध्नि कथ्यते कविभिस्तथा ॥
बिन्दुरेव च .... । इति ।

अर्धाब्जमर्धचन्द्रः । 'अब्जो जैवातृकस्सोमः' इत्यमरः । दण्डो नादः । दण्डाकारत्वात् दण्ड इत्युपचर्यते । यदुक्तम्—इन्दुवृत्तहलाकृतिरिति । शक्तिरिति सर्ववाक्कारणभूता बिन्दोः कार्या शक्तिकला । यदुक्तं श्रीमन्मृगेन्द्रे—

शक्तेर्नादो भवेद्बिन्दुरक्षरं मातृका ततः ॥ इति ॥

अत एव अपरेति विशेषिता । उन्मना उन्मनाकला । एवं शक्तिकल इति शक्तेर्नवात्मकत्वात् नवसंख्या लक्ष्यते । कलेति अंशः प्रोच्यते । अन्त इत्येतदन्तर्मन्त्र उच्चार्यमाणे सति तद्वाच्यभूतशिवो नवकलाप्रसादमन्त्ररूपो भवतीत्यर्थः । तन्मन्त्रस्तु हकार ऊकार औकारो मकारो बिन्दुरर्धचन्द्रो नादशक्तिरुन्मना इति नव । तदुक्तम्—

सान्तं मेधा च षष्ठं च भान्तं बिन्द्वर्धचन्द्रके ।
नादस्तदूर्ध्वगा शक्तिरुन्मना नवधा शिवः ॥ इति ॥

एवं शिवो द्वादशकलाप्रासादमन्त्रः । एवं षोडशकलाप्रासादमन्त्रश्च । तौ मन्त्रौ वक्ष्ये इत्यर्थः ॥ ३३ ॥

उद्दिष्टक्रमेण द्वादशकलाषोडशकलाप्रासादमन्त्रयोरुद्धारविधिमाह—**शून्य इति ।**

शून्ये चण्डांशुघोणे पशुरपि च ततो लम्बनार्धाब्जरोधि-
र्दण्डो दण्डान्तशक्तिर्ह्युपरि च समना चोन्मना व्यापिकान्या ।
अर्कांशे व्यापिकान्ते वियदपि च घनानन्तसंज्ञाप्यनाथा
प्रासादेनाश्रिता प्रागिव च तु समना षोडशांशे तथान्या ॥ ३४ ॥

शून्यं हकारः । तदुक्तम्—

नादो गुह्यं परं जीवो देहीभूतं च पञ्चमम् ।
सान्ततत्त्वान्तभूतान्तं शिवार्णं शून्यमव्ययम् ।
एतान् पर्यायनामानि हकारस्य विजानते ॥

चण्डांशुरादित्य इत्यर्थः । 'सूरसूर्यार्यमादित्यः' इत्यमरः । अनेन अकाराक्षर उच्यते । तथा निघण्टुः ।

अकारो विष्णुरादित्यो वासुदेवो महाबलः ।
श्रीकण्ठोदरकादिस्तद् ब्राह्मी पूर्णोदराकृतिः ॥ इति ॥

तत्र लक्षणया औकार उच्यते । **घोण** उकारः । दीर्घघोणस्य ऊकारत्वात् ह्रस्वमपि घोणतयोक्तम् । तत्रापि ऊकार एव तु **पशु**मलस्तद्वाचकत्वान्मकार उच्यते । **लम्बना** बिन्दुः अमृतस्वरूपत्वात् तथा प्रोक्ता । **अर्धाब्ज**मर्धचन्द्रः । **रोधिः** निरोधिः **दण्डो** नादः । **दण्डान्तो** नादान्तः । **शक्तिः** वामपार्श्वबिन्दुयुक्तसीराकृतिः । **उपरि समना चोन्मना अन्या व्यापिके**ति तयोरधो व्यापिका समना उन्मना चेत्यर्थः । **अर्कांशे** द्वादशकलाप्रासादे एवंभूता कला । तद्युक्ते मन्त्रे शिवोऽभिव्यक्तो भवतीत्यर्थः । हौकार उकारो मकारो बिन्दुरर्धचन्द्रः निरोधिः नादः नादान्तः, शक्तिर्व्यापिनी, समना, उन्मना, इति द्वादशकलाः । तथोक्तम्—

अकारश्च उकारश्च मकारो बिन्दुरेव च ।
अर्धचन्द्रनिरोधी च नादो नादान्त एव च ॥
शक्तिश्च व्यापिनी चैव समना चोन्मना तथा ।
समनान्तं पाशजालमुन्मन्यन्ते परशिवः ॥ इति ॥

अथ षोडशकलाप्रासाद उच्यते । षोडशांशे प्रासादे व्यापिकान्ते वियद्घना व्योमरूपा, अनन्तसंज्ञा, अनाथा, अनाश्रिता इति चतुष्कला । ततस्समना अन्या

प्रागिव इति । हौकारः ऊकारः मकारः बिन्दुः अर्धचन्द्रः निरोधिः नादः नादान्तः शक्तिः व्यापिनी व्योमरूपा अनन्ता अनाथा अनाश्रिता समना उन्मना इत्यर्थः । तदुक्तं सिद्धान्तरहस्ये

समनाव्यापिकान्तस्थे व्योमाद्यानन्तसंज्ञके ।
अनाथानाश्रिता चैवं ज्ञेयो ह्यष्टकलशिवः ॥ इति ॥

एतदुक्तं भवति—श्रीमत्स्कन्दगुरोश्शिवेन कथित इत्युक्तत्वात् श्रीमत् सार्धत्रिशतिकालोत्तरे स्कन्दाय श्रीकण्ठनाथेन उक्तप्रकारमेवोच्यत इति । यथा प्रासादमन्त्रः तत्रोक्तः

षष्ठं त्रयोदशान्तं च पञ्चमे विनियोजयेत् ।
शिवं तं तु विजानीयात् पञ्चमूर्तिस्सदाशिवः ॥ इति ॥

तत्सूत्रस्य वृत्तिश्च श्रीरामकण्ठाचार्येण कृता यथा पञ्चदीर्घमात्रायुक्तात् पञ्चमं यत् सान्तं बीजं तस्मिन् औकारयुक्ते षष्ठमूकारं नियोजयेत् । त्रयश्च दश च येषां स्वराणां ते त्रयोदश । ऽयन्तं दशान्तमित्यर्थः । तत्र ऽयन्तमिति शिखारूपं दशान्ते चानुस्वारं पूर्ववाक्येन प्राप्तं चात्र नियोजयेत् । न चात्र युगपत् मात्राचतुष्टयस्य हकारस्योच्चारणं न संभवतीति चोदनीयं तत्संभवस्यानुभवसिद्धत्वात् । तस्मिन्नेकप्रयत्नतः समुच्चार्यमाणे निरन्तराव्यवहितहकारौकार ऊकारबिन्दुप्लुतमात्रोपलक्षिते अकाररूपशिखामात्रासमसंवेद्यन एव कूटाक्षरवन्नत्रात्मवदिति । ततस्तु नवकलाप्रासादमन्त्रः स एव हौ ऊं मं द्वादशकलाप्रासादमन्त्रस्तु हौ ऊं षोडशकलाप्रासादमन्त्रस्य तद्वदेव । ननु शून्ये चण्डांशुघोण इत्यादिना द्वादशकला एवोक्ताः । तद्युक्तत्वाद् द्वादशकलाप्रासादमन्त्र इत्युक्तम् । तदसत्, शून्येन हकारेण सह त्रयोदशकलास्सन्तीति । सत्यम् । यथा आकाशं विना वायोस्सञ्चरणं न संभवति, तद्वद्धल्मात्रस्य हकारस्य अकारकलां विनोच्चारायोगात् तस्याकारकलायामेवान्तर्भाव इति द्वादशकलात्वं सिध्यत्येवेत्यदोषः । तदुक्तम्—

अकारश्च हकारश्च द्वावेतावेकसंस्थितौ ।
विभक्तिर्नैव विद्येत मारुताम्बरयोरिव ॥ इति ॥

तदुक्तमाचार्यैः—

मूलात्कुण्डलिनीनिवासभवनात्पद्मान्मराळस्वनो
हल्मात्रक्षणरोहदङ्कुरनिभो नाभ्यन्तमास्ते शिवः ॥ इति ॥

यद्येवमकारादिकलाः प्रणवस्यैव युक्ताः न तु प्रासादस्य तदुद्धारे किमर्थमुच्यन्ते । सत्यम् । सर्ववर्णानामकारमात्रायां संभवस्योक्तत्वात् । मेधाख्यौकारस्याप्यत्रास्तित्वमुक्तमन्यत्र द्वादशकलाप्रासादादौ मेधाकलायुक्तत्वेन प्रोक्तत्वादित्यविरोधः ॥ ३४ ॥

अथ कलानां मात्राक्रमं शून्यषट्कं चैकेन श्लोकेनाह—**त्रिद्व्येकेति** ।

त्रिद्व्येकार्धतदर्धतद्दलकलाद्वन्द्वाग्निवेदाध्वभिः
सर्पाक्षीन्दुकवर्त्मबाणयुगलैर्मात्रामनोमात्रया ।
उक्तेऽर्कांशगते त्रिकत्रिविरहाच्छून्यं त्रयं चान्तरे
चैकैकात्परतः त्रिशून्यमिति षट्छून्यं विदुः पण्डिताः ॥ ३५ ॥

उक्ते पूर्वं प्रतिपादिते **अर्कांशगते** द्वादशकलाप्रासादे क्रमात् कलानामेव मात्राः **त्रिः** हौकारस्य तिस्र एव मात्राः । **द्विः** उकारस्य द्वे मात्रे । **एकः** मकारस्य एका मात्रा । ननु व्यञ्जनं त्वर्धमात्रकमित्युक्तत्वात् कथमेकमात्रा । सत्यम् । तस्यापि प्लुतत्वस्य कैश्चिदाचार्यैरुक्तत्वात् । तस्य प्लुतोच्चारणादेकमात्रत्वं युक्तमेवेत्यविरोधः । **अर्धः** बिन्दोरर्धमात्रा । **तदर्धः** अर्धचन्द्रस्य पादमात्रा, **तद्दलमिति** निरोधेः पादार्धम् । एकमात्राया अष्टमांशमात्रेत्यर्थः । **कलेति** नादस्य षोडशांशः पूर्ववत् । **द्वन्द्वाग्निरिति** द्वन्द्वं द्वयं अग्निः त्रयम् । तदुक्तक्रमेणैकस्थानदशस्थानसङ्ख्यया द्वात्रिंशांशमित्यर्थः । नादान्तस्य एकमात्रा । द्वात्रिंशांशमात्रेति यावत् । **वेदाध्वभिरिति** । वेदाश्चत्वारः, अध्वानः षट् पूर्ववत् । चतुष्षष्टिसङ्ख्यांशमित्यर्थः । शक्तेरेकमात्रायाश्चतुष्षष्ट्यंशमात्रेति यावत् । **सर्पाक्षीन्दुकेति** सर्पाः अष्टनागाः, अक्षि द्वयं, इन्दुः एकः । तदुक्तक्रमेण एकदशशतस्थानत्वात् अष्टाविंशत्यधिकशतांशमित्यर्थः । व्यापिन्या एकमात्राया अष्टाविंशत्यधिकशतांशमात्रेति यावत् । **वर्त्मबाणयुगलैः इति** । वर्त्म षट् अध्वा, बाणाः कामबाणाः पञ्च, युगं द्वयं । पूर्ववत् षट्पञ्चाशदधिकद्विशतांशमित्यर्थः । समनाया एकमात्रायाः षट्पञ्चाशदधिकद्विशतांशमात्रेति यावत् । **मनोमात्रयेति** उन्मनायाः अव्यपदेशमात्रेति यावत् । शून्यषट्कमपि द्वादशकलाप्रसाद एव क्रमेणोच्यते—**त्रिकत्रिविरहात् शून्यं त्रयं चान्तर इति** । त्रिकत्रिविरहात् हौकारऊकारमकारत्रयाणां विरहात् त्यागात् एकं शून्यम् । बिन्द्वर्धचन्द्रनिरोधिकाख्यत्रयत्यागात् द्वितीयं शून्यम् । नादनादान्तशक्तित्रयत्यागात्

तृतीयं शून्यम् । एकैकात्परतस्त्रिशून्यमिति व्यापिन्या ऊर्ध्वमेकं शून्यम् । समनाया ऊर्ध्वं द्वितीयं शून्यम् । उन्मनाया ऊर्ध्वं तृतीयं शून्यमिति । शून्यं नाम सार्धत्रिशतिकालोत्तरादौ यदुक्तम्—

हंसहंसेति यो ब्रूयाद्धंसो नाम[1] सदाशिवः इत्यादिसूत्रैः प्राणगमागमस्य हकारेण प्राणवृत्त्यात्मना सकारेण चापानवृत्तिरूपेणान्वयप्रवृत्त्या यो नादो हंसरूपेण दृश्यते स एव नादरूपो हंसः वर्णान्तररूपेण परिणमते । यदाहुः—

आकाशवायुप्रभवश्शरीरात्समुच्चरन् वक्त्रमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यस्स शब्दः ॥ इति ॥

ततस्तु य एव हंसस्यादिमध्यान्तस्य वर्णत्रयस्य वर्णान्तरपरिणत्या भावस्तदेव शून्यषट्कं बिन्द्वादिशक्त्यन्तैः प्रथमहंसः आदिमध्यान्तशून्यरूपः । तत्र हकारः औकार ऊकारमकाररूपेण परिणमते । तद्रूपेणाभावोऽत्र प्रथमशून्यम् । अकारो बिन्द्वर्धचन्द्रनिरोधिरूपतया परिणमते तदा मध्यशून्यम् । यदा सकारो नादनादान्तशक्तिरूपेण परिणमते तदा अन्तशून्यम् । यदुक्तम्—ऊर्ध्वशून्यमधश्शून्यं मध्यशून्यं तृतीयकम् । इति । एतत्सकलप्रासादशून्यं, यतो मूलाधारादारभ्य ब्रह्मरन्ध्रावध्येतदक्षरपरिणामस्य वक्ष्यमाणत्वात् । तदुक्तं श्रीमद्द्विशतिकालोत्तरे—

देहस्थस्सकलो ज्ञेयो निष्कलो देहवर्जितः । इति ।

अत एव द्वितीयो हंसरूपः व्यापिनीसमनोन्मनीरूपेण परिणमतोऽस्य वर्णत्रयस्याभावो यत्तदूर्ध्वशून्यत्रयम् । यदुक्तम्—

तदूर्ध्वव्यापिनीशून्यं समनायां तु पञ्चमम् ।
उन्मनायां तथा षष्ठं षडेते शून्यकं मतम् ॥ इति ॥

त्रिषट्छून्यं विदुः पण्डिताः इति । एतत्षट्छून्यज्ञानाभावयुक्ता ये ते शिष्ययोजनादावपण्डिता एव । ते यदा प्रासादशून्यादिं विदित्वा प्रासादप्लुतोच्चारणनादशिखावृत्त्या द्वादशान्ते संस्थिताः सर्वतोऽनवच्छिन्नसंविदो भवन्ति, तदा निष्कलशिवसमानधर्माः पाशच्छेदादि कर्तुं पण्डिताः समर्था भवन्ति इत्यर्थः । तदुक्तं श्रीमत्त्रिशतिकालोत्तरे—

---

1. ग. देवः

प्रासादाब्जशिखान्तस्थो यस्तु दीक्षां करोति हि ।
आचार्यस्सह शिष्यैः स शिवसायुज्यतां व्रजेत् ॥ इति ॥

अत एव ज्ञायते । आध्यात्मिकहंसस्वरूपपरिणतिरेव मन्त्रः । ततस्तत्र शून्यषट्कमिति उक्तत्वात्तदेकीभूतजीवस्यापि तदुपाधिरस्ति । तदधिष्ठायकशिवस्यापि तदुपाधिरस्तीति कृत्वा तत्तत्समस्तोपाधिशून्ये सप्तमे शिष्ययोजन समाधिरपि कार्यम् इति । तदुक्तम्—

षट्छून्यानि तु संत्यज्य सप्तमे तु लयं कुरु ॥ इति ॥
मेधादिकार्काख्यकलासु मध्यात् त्रिकत्रिकाणां विरहात् त्रिशून्यम् ।
एकैकहानेरुपरि त्रिशून्यं शून्यात्परं योजय धाम शैवम् ॥ इति च ॥

ननु शून्यं वस्त्वभावो हि । सत्यम् । द्विविधं शून्यम्—अत्यन्तशून्यम्, उपलम्भकाभावात शून्यमिति । अत्रोपलम्भकाभावात् शून्यमेवोक्तमित्यदोषः । तदुक्तम्—

तच्छून्यं तु परं सूक्ष्मं सर्वावस्थाविवर्जितम् ।
अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते ॥
अभावस्तु तदुद्दिष्टो यत्र भावः क्षयं गतः ।
सत्तामात्रं परं शुद्धं तत्पदं किमपि स्थितम् ॥ इति ॥ ३५ ॥

अथ द्वादशकलाप्रासादकलानां प्रस्तारविधिमाह—**घोष इति** ।

घोषो मेधा क्षमाख्यो विषमथ च ततश्चेतना चन्द्रखण्डं
त्र्यश्रं दृग्वृत्तसीरोऽरुणकिरणहलस्सेन्दुसीरा क्रमेण ।

अथोत्तरार्धं शार्दूलविक्रीडितम्—

वृत्तार्कत्रिशिखा द्विबिम्बकलिता रेखा द्विगुञ्जोन्मना
साकारं मनसा स्मरेदपि कलाः प्रत्येकमर्के शिवे ॥

घोषश्शिवबीजो हकारः, **मेधा** औकारः, **क्षमाख्यः** ऊकारः, **विषं** मकारः । **अथ च ततः चेतना** बिन्दुः ० । **चन्द्रखण्ड**मर्धचन्द्रः ‿ । **त्र्यश्रं** त्रिकोणं △, निरोधिः **दृग्वृत्तसीरः** दृक् चन्द्रः अत्रेः नेत्रजत्वात् । वामपार्श्वबिन्दुः वृत्तम् । सीरो हलः दृक्वृत्ताभ्यां युक्तसीराकृतिः यस्य स सदृग्वृत्तसीरः इत्यनेन नाद उच्यते । दक्षिणवामपार्श्वयोर्बिन्दुयुक्तसीराकृतिरित्यर्थः । अरुणकिरण आदित्यः ।

अनेन दक्षिणपार्श्वबिन्दुरुच्यते । तद्युक्तहलाकृतिर्यस्य सो**ऽरुणकिरणहलः** नादान्तः ∸ । **सेन्दुसीरा** वामपार्श्वबिन्दुयुक्तसीराकृतिर्यस्यास्सा सेन्दुसीरा शक्तिकला ∸ । **वृत्तार्कत्रिशिखा** वृत्तार्क इति दक्षिणपार्श्वबिन्दुरुच्यते । तद्युक्तत्रिशिखं त्रिशूलं तद्वदाकृतिर्यस्याः सा वृत्तार्कत्रिशिखा व्यापिनी कला ψ० **द्विबिम्बकलिता रेखा** दक्षिणवामबिन्दुयुक्ता द्विरेखाकृतिर्यस्यास्सा समना कला ०।।० द्विगुञ्जोन्मना । अत्र च बिम्बकलितत्वमनुभवति । द्विबिम्बकलिता द्विगुञ्जाकृतिरुन्मना कला ०ᔕ ᔕ० । **एवंक्रमेण अर्के शिवे** द्वादशकलाप्रासादे प्रत्येकं हकारादिकलायाः प्रस्तारः । **साकारं** तदुक्ताकारसहितं यथा भवति तथा मनसा स्मरेत् । उक्तप्रस्तारक्रमेण कलानामाकृतयस्स्मार्या इत्यर्थः । तदुक्तं पूजास्तवे —

आदिपञ्चममृत्युभूषणचन्द्रखण्डगुणाश्रदृ-
ग्भानुगध्वनिसीरभास्करसेन्दुवृत्तहलाकृतिः ।
स्वांशुमत्त्रिशिखद्विबिम्बगतद्विगुञ्जग उन्मनाः
पातु वस्सकलोऽपरस्सकलाकलस्त्वकलश्शिवः ॥ इति ॥ ३६ ॥

[1]अथ कलानामध्यात्मस्थानं चात्राधिदेवतास्तत्त्वव्याप्तिं चैकेन श्लोकेनाह—**वस्तेरिति** ।

वस्तेर्नादोऽथ नाभेस्त्रिपदमजगृहे हृत्कजे क्वाकृतान्तं
विष्णुः कण्ठे कलान्तं रसमपि च पशुः तालुनि ग्रन्थिरुद्रौ ।
विघेशौ बिन्द्वनन्तौ भ्रुवि जलधिकला ब्रह्मरन्ध्रे सदेशः
शक्त्यन्तं व्याप्य तिष्ठत्युपरि युगकलार्काङ्गुलेनाहतेशः[2] ॥ ३७ ॥

वस्तिर्मूलाधारम् । बस्तिर्नाभेरध इत्यमरः । तदारभ्य नाभेरधो नाद इति हकारः । मूलाधारमारभ्य नाभिपर्यन्तं व्याप्य हकाराक्षरस्तिष्ठतीत्यर्थः । अथाजगृहे हृत्कजे त्रिपदं क्वाकृतान्तं व्याप्य तिष्ठतीत्यन्वयः । अस्यार्थः अजगृहे ब्रह्मस्थाने हृत्कजे हृदयपङ्कजे त्रिपदं त्रिमात्रेण चरतीति त्रिपदमौकारः । मेधाकलेत्यर्थः । **क्वाकृतान्तमिति** कोः पृथिव्याः अकृतमव्यक्तं तदन्तं क्वाकृतान्तं मर्यादार्थे आङ्गागादाकृतान्तमिति रूपम् । हृदि मेधाकला पृथिवीमारभ्य प्रधानान्तं तत्त्वानि व्याप्य तिष्ठति । तस्याः ब्रह्मा कारणेश्वर इत्यर्थः । अथ कण्ठे विष्णुरपि

1. घ पुस्तके व्याख्यान्तरं दृश्यते ।
2. युगकलाभान्वङ्गुलेनाहतेशः इति मातृकापाठः ।

रसं च कलान्तं व्याप्य तिष्ठति । अस्याः अर्थः कण्ठस्थाने विष्णुः कारणेश्वरः । रसमूकारः कलान्तं कलातत्त्वपर्यन्तं कण्ठे ऊकारकला प्रधानादूर्ध्वं कलातत्त्वपर्यन्तं व्याप्य तिष्ठति । तस्याः विष्णुः कारणेश्वर इत्यर्थः । **अथ तालुनि ग्रन्थिरुद्रौ पशुः** व्याप्य तिष्ठति । तालुनि तालुस्थाने ग्रन्थिः माया, रुद्रः कारणेश्वरः । पशुः मकारकला तालुस्थाने मकारकला कलातत्त्वादूर्ध्वं मायातत्त्वमेकं व्याप्य तिष्ठति । तस्याः कारणेश्वरो रुद्र इत्यर्थः । **अथ भ्रुवि** भ्रूस्थाने **बिन्द्वनन्तौ विद्येशौ** व्याप्य तिष्ठतः । बिन्दुः बिन्दुकला अनन्तः कारणेशः । विद्या शुद्धविद्यातत्त्वं ईशः ईश्वरतत्त्वं बिन्दुकलानन्तयोर्मध्ये बिन्दुकलाशुद्धविद्येश्वराख्यतत्त्वद्वयं च व्याप्य तिष्ठति । तस्याः कारणेश्वरोऽनन्त इत्यर्थः । **अथ ब्रह्मरन्ध्रे जलधिकला शक्त्यन्तं** व्याप्य तिष्ठति । **सदेशः** ब्रह्मरन्ध्रस्थाने जलधिश्चतुःसंख्यावाची । ततः अर्धचन्द्र-निरोधिनादनादान्तकलाचतुष्टयमुच्यते । शक्त्यन्तमिति सादाख्यतत्त्वं शक्तितत्त्वं चोच्यते । सदेशः कारणेशः भ्रूमध्यादारभ्य ब्रह्मबिलान्ते पादोनत्र्यङ्गुले स्थाने क्रमेणार्धचन्द्रादिचतुष्कलास्तिष्ठन्ति । तासां व्याप्तिः सदाशिवशक्तितत्त्वद्वयमेव । कारणेश्वरः सदाशिव एवेत्यर्थः । शिवतत्त्वस्य शक्तितत्त्व एवान्तर्भावस्योक्तत्वात् ऊर्ध्वं तत्त्वव्याप्तिर्नोक्ता । **तदुपरि युगकला भान्वङ्गुले तिष्ठति ।** अनाहतेशः उपरि ब्रह्मरन्ध्रादुपरि युगकलायुगानां चतुःसंख्यात्वात् चतुष्कला भान्वङ्गुले द्वादशाङ्गुल-स्थाने तत्रैकाङ्गुले शक्तिकला तिष्ठति । **तदूर्ध्वं त्र्यङ्गुले** व्यापिनीकला तिष्ठति, चतुरङ्गुले समनाकला तिष्ठति, तदूर्ध्वं चतुरङ्गुले उन्मनाकला तिष्ठति । तासां कारणेश्वरः अनाहतेश इत्यर्थः ॥ ३७ ॥

[1]तथा तासां क्रमेण कान्तिरुच्यते—**मेधादय इति ।**

मेधादयो वह्निशिखाप्रभार्कचन्द्राभविद्युद्द्युतिदीपभासः ।
अर्धेन्दुभौ दण्डतदन्तरत्नविद्युत्प्रभोर्ध्वं शतभानुभासः ॥ ३८ ॥

मेधादयो बिन्द्वन्ताश्चतस्रः कलाः क्रमेण हौकारकला वह्निशिखाप्रभा । ऊकारकला अर्कचन्द्रप्रभा । मकारकला विद्युत्प्रभा । बिन्दुकला दीपप्रभा । **अर्धेन्दुभौ** क्रमेण अर्धचन्द्रनिरोधी द्वे कले अर्धचन्द्राभे एव । **दण्डतदन्तरत्न-विद्युत्प्रभा** नादः तदन्तो नादान्तः तयोः रत्नविद्युतोः प्रभा । नादस्य रत्नप्रभा नादान्तस्य

1. घ. चन्द्रवज्रवृत्तेन कलानां वर्णान् क्रमेणाहेत्यादि व्याख्यन्तरं दृश्यते ।

विद्युत्प्रभेत्यर्थः । **ऊर्ध्वं शतभानुभासः** नादान्तादूर्ध्वं विद्यमानशक्त्यादिकाश्चतस्रः कलाः । शतसंख्याबृद्धार्ककान्तयः । शक्तिकला शतभानुप्रभा । व्यापिनी सहस्र-भानुप्रभा । समना अयुतसूर्यप्रभा । उन्मना लक्षभानुप्रभेत्यर्थः । इत्थं प्रासादमन्त्रस्य कलाख्यानमात्राशून्याकृतिस्थानाध्वव्याप्तिकारणाभा उक्ता आचार्यादीनां मुक्त्यर्थ-मिति मन्तव्याः । तदुक्तं सिद्धान्तरहस्ये—

मात्राभाकारणाख्यानस्थानशून्याङ्गुलाध्वसु ।
शक्त्याकृत्योः कलाव्याप्तिं ज्ञात्वा को वा न मुच्यते ॥ इति ।

नन्वत्र त्रिविधानां प्रासादमन्त्राणां शिव एव वाच्य इत्युक्तं पूर्वम् । इदानीं ब्रह्मादिकारणा अपि प्रोक्ताः । तत्कथम् । सत्यम् । तेषां सर्वेषां वाचकमन्त्राणां प्रासादावयवभूतनादाक्षरोपादानजातत्वेन तत्र विद्यमानत्वात् तद्वाच्यमन्त्रेष्वपि शम्भुपक्षस्योक्तत्वात् तत्तन्मन्त्राधिष्ठायकत्वेन शिव एव ब्रह्मादिपदवाच्य इत्यविरोधः । तदुक्तं तत्त्वसङ्ग्रहे—

अणुशम्भुशक्तिपक्षा विद्याविद्येश्वरेषु विद्वद्भिः ।
गीता .... ॥ इति ॥

अत एव सर्वे मन्त्राः प्रासादे जाता इति पृथगन्यमन्त्रोद्धारा आचार्येण नोक्ता इति मन्तव्याः । तदुक्तं श्रीमद्द्विशतिकालोत्तरे—

सद्यश्चाष्टकलायुक्तमकाराक्षरसंभवम् ।
विद्यादुकारजं वाममघोरं तु मकारजम् ॥
बिन्दुजः पुरुषो ज्ञेयः ईशानस्तु शिवात्मकः ।
एवं मन्त्रास्तु पञ्चैते स्मृताः प्रासादसंभवाः ॥ इति ॥

ननु प्रणवाक्षराण्येतान्यकारादीनि, न तु प्रासादाक्षराणि, तानि हि हकारादीनि । सत्यम् । अत एवात्र निमित्तत्वेन एतानि निर्दिष्टानि । तथाहि—

अकाराद्यक्षरे सद्योजाताद्युत्पन्ने यज्जातं प्रासादाक्षरं हकाराख्यं तदकाराक्षर-संभवं सद्योजातम् । श्रूयते हि—

अकारश्च हकारश्च द्वावेतावेकसंस्थितौ ।
विभक्तिर्नैव विद्येत मारुताम्बरयोरिव ॥ इति ॥

एवमुकारादिजा वामदेवादयः। अत एव प्रणवकलानन्तरमेवैताः प्रासादकलाः सद्योजाताद्याः क्रमेणैवोत्पन्ना इत्यर्थः। अत एव प्रणवस्य मन्त्रादौ प्रयोग इति प्रणवोद्धारश्चात्र सिद्धम्। हकाराक्षरे मात्राद्वादशसंस्थिते सति पञ्चब्रह्मषडङ्गोद्धारश्चात्र **भवति** हं हिं हुं हें हों हां हीं हूं हैं हौं हः इति।
तदुक्तं तत्रैव—

यवर्गादष्टमं बीजं मात्रैर्द्वादशभिः स्थितम्।
अक्षरान्तरितं कृत्वा स षडङ्गशिवो भवेत्॥ इति।

अष्टविधप्रासादश्च एता एव सिध्यन्ति। सकलप्रासादः हुम् इत्येष एव। निष्कलप्रासादस्तु हौम् इत्येष एव। शून्यप्रासादस्तु हल्मात्रहकार एव। कलाढ्यप्रासादस्तु षोडशकलाप्रासाद एव। खमलङ्कृतप्रासादस्तु शिरोबीजमेव। हीम् इति यावत्। क्षपणप्रासादस्तु हृद्बीजमेव। हां इति यावत्। अन्तस्थप्रासादस्तु अस्त्रबीजमेव। हः इति यावत्। कण्ठोष्ठ्यप्रासादस्तु हसूम् ह्वं इति यावत्। इत्येते अष्टविधप्रासादा अणिमाद्यष्टैश्वर्यविषये क्रमेण योज्याः। अष्टविधप्रत्ययविषये च प्रासादमन्त्रा एव योज्याः। अग्निज्वलने ओं हूं हौं हं ओं नम इत्येष प्रासादमन्त्र एव। अथ तच्छमने ओं हुं हौं हुं ओं नम इत्येष प्रासाद एव। अक्षस्यालभने च तथा ओं हुं हौं हुं ओं नम इत्येष प्रासाद एव। महापातकदाहने, ओं हूं हौं हूं ओं नम इत्येष प्रासाद एव। महापापक्षपणे तु ओं ह्यां ह्यौं ह्यां ओं नम इत्येष एव। विषनाशे तु ओं ह्वीं ह्वौं ह्वीं ओं नम इत्येष एव। निर्बीजकरणे चानग्निज्वलन उक्त एव प्रासादः योज्यः। गृहनाशे तु ओं हुं हौं हुं फण्णमः ओमित्येष एव। ज्वरनाशे तु ओं हुं फट् ओं हूं फट्, ओं हौं फट्, ओं हूं फट् ओं फट् फट् फट् फट् फट् इत्येष एव प्रासादः। तेषामपि सर्वेषां प्रासादानां ओङ्कारमादौ युञ्ज्यात्। ततः प्रासादः ततश्शिवायपदम् ततस्तु नमःपदम् अर्चनाविषये। होमे स्वाहान्त एव। तदन्यत्र विशिष्टविषये तत्तत्कल्पोक्तप्रकारं कुर्यात्। इत्येते अन्यपाशुपतास्त्रादिमन्त्रोद्धारश्च श्रीमद्द्विशतिकालोत्तरादेरेवावधेयाः नात्र ग्रन्थविस्तरभयाल्लिख्यते॥ ३८॥

इत्थं प्रासादलक्षणं सप्रपञ्चं विचार्य, तदुपाङ्गेन सह जपलक्षणं तत्फलं च विचारमुखेन वारुणस्नानविधिमेकेन श्लोकेनाह—**मन्त्रमिति**।

मन्त्रं षट्कलमास्यरन्ध्रमुकुलाद्याधारमैशं क्रमात्
तुर्यं धाम विशन्तमेनमसकृद्यस्य प्रसादाद्धिया।
सिक्ताः सौधरसैः प्रयान्त्यभिमतान्यन्ते यदीयं महः
शम्भोस्तस्य नमश्शिवाय पदयुग्जप्यं सतारं यदा॥ ३९॥

सतारं नमश्शिवायपदयुक् षट्कलमास्यरन्ध्रमुकुलाद्याधारं क्रमात्तुर्यमैशं धाम विशन्तमेनं मन्त्रं यस्य प्रसादात् यदा सौधरसैः सिक्ता ये ते जपेयुर्धिया सकृत् जप्यं ते अन्ते यदीयं महस्तस्य शम्भोर्धाम प्रयान्त्यभिमतान्यपि प्रयान्तीत्यन्वयार्थः। अस्यार्थः—**सतारं** प्रणवसहितम्। तथा मन्त्रनिघण्डुः—

प्रणवं तारकं तारं वेदाद्यं भूतिदं परम्। इति।

नमश्शिवायपदयुक् शिवायपदेन नमःपदेन च युक् सहितं **षट्कलम्**। अत एव प्रणवाद्येतदुपकलाषट्कयुक्तत्वमेवेह षट्कलं पूर्वमेवं नवकलाद्वादशकलाषोडशकलायुक्तस्य प्रोक्तत्वादिति। ओं हौम् ओं शिवाय नम इति यावत्। **आस्यरन्ध्रमुकुलादि** यस्योच्चारणे आस्यरन्ध्रमुकुलादि चादन्तसंस्पर्शनादिप्रयत्नविशेषः तदस्यास्तीति आस्यरन्ध्रमुकुलादि। तदुक्तं श्रीमत्सर्वज्ञानोत्तरे—

आसनं रुचिरं बध्वा ऊर्ध्वकायस्समं शिरः।
न दन्तैः संस्पृशेद्दन्तान् सृक्विणी तु न जिह्वया॥
किञ्चित् कुञ्चितनेत्रस्तु शिवं सम्यक् तदोच्चरेत्॥ इति॥

क्रमा**दाधारं** विशन्तमित्युपलक्षणम्। हकारादिकलाव्याप्तमूलाधारादिस्थानतत्त्वतदधिपतीन् क्रमेण त्यक्त्वा ऊर्ध्वगतमिति। तदुक्तं श्रीमद्वातुले—

बस्तिश्चतुष्कलापत्रकमलस्तेजसां निधिः।
नाडीमूलावृताङ्गा हि कुण्डली हंसनिस्वना॥

तस्मान्नाभ्यन्तमासीनो विश्वरूपस्तटिन्निभः।
नाभेरूर्ध्वं वितस्त्यन्ते हृदयं चतुरङ्गुलम्॥

तदन्ते संस्थिता मेधा ज्वलद्वह्निशिखाप्रभा।
त्रिमात्रा कारणं ब्रह्मा चतुर्विंशतितत्त्वयुक्॥

कण्ठेऽष्टाङ्गुलकेऽधीशो द्विमात्रोऽर्कशशिद्युतिः ।
तत्त्वषट्कयुतो विष्णुस्तालौ तु चतुरङ्गुले ॥

मायातत्त्वं विषं रुद्र एकमात्रस्तटिन्निभः ।
भ्रूमध्ये द्व्यङ्गुले दीपनिभो वृत्तोऽर्धमात्रकः ॥

तत्त्वद्वययुतोऽनन्तो ललाटे पादमात्रकः ।
वृत्तार्धोऽर्धशशिज्योतिर्मात्राष्टांशनिरोधिनी ॥

उक्तप्रभस्ततो दण्डष्षोडशांशो मणिप्रभः ।
द्वात्रिंशांशस्तु दण्डान्तो रन्ध्रे सौदामिनीनिभः ॥

भ्रुवोरूर्ध्वं बिलं यावदङ्गुलैकादशाधिकः ।
वृत्तार्धादिचतुर्णां तु स देशस्तत्त्वयुग्मकः ॥

सूर्यकोटिद्युतिश्चोर्ध्वं नाहताख्यः शिवोऽधिपः ।
चतुष्षष्ट्यंशिका शक्तिर्मूर्धन्येकाङ्गुले स्थिता ॥

ऽयङ्गुले व्यापिनी चाष्टाविंशत्यधिशतांशिका ।
चतुरङ्गुले षड्युक्तपञ्चाशद्द्विशतांशिका ॥

समनोर्ध्वं मनोमात्रा चतुरङ्गुलतोन्मना ।
शक्त्यादीनां वपुश्चोर्ध्वं सहस्रादित्यसन्निभम् ॥

ततः परममात्रस्तु तत्त्वातीतः परशिवः ।
निर्मलादर्शनप्रख्यः शरद्वारिसमप्रभः ॥

गम्योऽनेन क्रमणैव स्वानुभूत्या महात्मभिः ॥ इति ।

ननु श्रीमत्कालोत्तरे—

ब्रह्मणि स्पर्शशब्दौ तु रसं वै केशवे त्यजेत् ।
रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहङ्कारमीश्वरे ॥
मनो बिन्दुशिवे त्यक्त्वा चैभिर्मुक्तश्शिवं व्रजेत् ॥

इत्यादिसूत्रैरुत्क्रान्तिविषय एतान्येव तत्त्वानि त्यक्त्वा शिवे योगः कार्य इत्युक्तम् । एततत्त्वमात्रस्यैव पुर्यष्टकत्वेनोक्तत्वात् । यदुक्तम्—

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चकम् ।
बुद्धिर्मनस्त्वहङ्कारः पुर्यष्टकमुदाहृतम् ॥ इति ॥

सत्यम् । अत एव तत्सूत्रस्य षट्त्रिंशत्तत्त्वात्मकतया श्रीरामकण्ठाचार्येण व्याख्यातम् । तद्यथा—"तत्र भूतानि पञ्चतन्मात्राणि चात्र स्वगुणैरविशेषादनुक्षिप्तानी"ति कार्यवर्गो द्विविधो निर्दिष्टः । ततः पञ्चकमित्यनेनाप्यविशेषात् कर्मेन्द्रियबुद्धीन्द्रियामकश्च करणवर्गो द्विविधः । बुद्धिर्मनश्चाहङ्कार इति एभिश्च स्वपदैरेवान्तःकरणवर्गः, तुशब्दाच्चशब्दस्थानीयाच्चात्र गुणाव्यक्तात्मकः तत्प्रकृतिवर्गः, रागविद्यानियतिकालकलात्मककञ्चुकवर्गः, मायामहामायाख्यश्च परप्रकृतिवर्गो निर्दिष्टः । एवमस्यां पुरि पुरभावेन बाह्यशरीरात्मिकायामष्टकमेतद्वर्गाणामुदाहृतम् । ननु पृथिव्यादिकलान्तत्रिंशत्तत्त्वात्मक एव सूक्ष्मदेहः पुर्यष्टकतया प्रसिद्धः । सत्यम् । अशुद्धभुवनपर्यटनसाधनं अशुद्धमेतत्स्वरूपं तत्स्थं प्रसिद्धम् । यदुक्तं तत्त्वसङ्ग्रहे—

वसुधाद्यस्तत्त्वगणः प्रतिपुंनियतः कलान्तोऽयम् ।
पर्यटति कर्मवशतो भुवनजदेहेष्वयं च सर्वेषु ॥ इति ॥

अत्र तु शुद्धरूपस्य बिन्दुकार्यस्यापि नादद्वारेण सर्वभूतावस्थितत्वेन उक्तस्य परमुक्त्यपेक्षया हेयत्वादुत्क्रान्तिकाले शुद्धाशुद्धस्सकलोऽपि तत्त्ववर्गः संत्याज्यः । तस्य पुर्यष्टकतया निर्देशः । यद्यपि असौ दीक्षया सर्वपाशेभ्यो मोचितः तथापि यावदेतैर्न मुच्येत कथं मुच्येत बन्धनात् । आरब्धकार्यकर्मभोगोऽपराधेनासद्योनिर्वाणदीक्षायामेतेभ्यस्त्वनिर्मोचितत्वात् तदारब्धस्यास्य शरीरस्य स्थितिर्यावद्बन्ध एव । ततश्च तेभ्योऽत्यन्तमोक्षायोत्क्रान्तावेते तत्तत्कलावस्थाने त्याज्या एव । ततश्च श्रीमद्वातुलसूत्रे—

ब्रह्मणः कल्पे प्रकृत्यन्तचतुर्विंशतितत्त्वजातस्य विनाशित्वात् तद्बन्धविनाशार्थं ब्रह्मस्थाने हृदये तेषां त्याग उक्तः । विष्णोः परार्धविनाशे कालान्ततत्त्वक्षयात् तत्षड्बन्धविनाशार्थं विष्णोः स्थाने कण्ठे तेषां त्याग उक्तः । सर्वोपसंहृतात्मकत्वात् मायातत्त्वस्य रुद्रस्थाने तालुनि त्याग उक्तः । शुद्धविद्येश्वरात्मकवैखरीमध्यमयोः सर्वप्रवृत्तिहेतुत्त्वात् तद्धेतुजाग्रदवस्थास्थाने भ्रूमध्ये ईश्वरस्थाने त्याग उक्तः । सदाशिवशक्तितत्त्वद्वयोरपि मूर्ध्नि तत्तत्स्थानत्वात् सदाशिवस्थाने त्याग उक्तः ।

श्रीमत्कालोत्तरसूत्रैस्तु ब्रह्मस्थाने हृदयाकाशे शब्दस्पर्शौ त्यजेत् । आकाशविषयत्वादस्य शब्दस्य वायोश्च । यदाहु :—

आकाशवायुप्रभवश्शरीरात् समुच्चरन् वक्त्रमुपैति नादः । इति ।

केशवस्थाने कण्ठे रसं त्यजेत् रसनेन्द्रियमूलत्वात्तस्य । यदाह पतञ्जलिः ‘ कण्ठकूपेषु पिपासानिवृत्तिः ’ इति । रुद्रस्थाने तालुनि रूपगन्धौ त्यजेत् रूपगन्धेन्द्रियमूलत्वात्तस्य । तेनाप्युक्तम् ‘ तालुनि गन्धसंविद् ’ इति । एवं कार्यवर्गद्वयस्य स्वे स्थाने त्याग उक्तः । नन्वत्र ब्रह्मण्येव त्यजेदित्यादि व्याख्येयम् तादृशस्य शब्दस्पर्शादित्यागस्य ब्रह्मादिदेवतात्मकेन्द्रियविप्लुतिपरिहारार्थस्य निर्बीजदीक्षायां समयाचारशुद्धिविषयत्वादस्य च सर्वपाशत्यागरूपस्योत्क्रान्तिविषयत्वादिति । बुद्ध्यहङ्कारमित्युपलक्षणं करणादिवर्गपञ्चकस्य । तमीश्वरस्थान एव त्यजेत् तस्य मायाकार्याधिकारित्वात् । मन इति ज्ञानोत्पत्तिकारणत्वात् मायोच्यते । बिन्दुश्च शुद्धप्रकृतिः । ततश्च मायामहामायात्मकवर्गः सदाशिवस्थाने ब्रह्मरन्ध्रोर्ध्वं त्यजेत् द्वयोरपि स्वकार्यव्यापित्वात् । तत्कार्यावसायित्वात् तत्स्थानस्येति स सर्वतत्त्वत्याग एव अत्राप्युक्त इत्यविरोधः । आत्मनो बीजवृत्त्या शिवे लीनत्वम् । अस्योक्तत्वात् तदविनाभावयुतस्य मन्त्रस्यापि सर्वतत्त्वव्यतीतत्वमुक्तमित्यवधेयम् । किंच तुर्यं विशन्तमित्युपलक्षणं जाग्रदाद्यवस्थाक्रमत्यागवृत्त्यापि शिवे लीनमित्यस्य । तद्यथा तत्र त्रिमात्रो हौकारः त्वष्टकलो जाग्रदवस्थः तीव्रतरप्रयत्नप्राणनादाभिव्यङ्ग्यः शान्त्याप्यायनादिकर्ता, एकमात्रोऽपि मकारस्त्वष्टकलः सुषुप्त्यवस्थो मन्दप्राणाभिव्यङ्ग्यो वश्याकर्षणादिजनकः, अर्धमात्रो बिन्दुः चतुष्कलस्तुर्यावस्थो मन्दतरप्राणाद्यभिव्यक्तो भूतोन्मादोच्चाटनादिहेतुः, तथा अर्धार्धमात्रस्तुर्यातीतः दशार्धकलो नादाख्यो योगकैवल्याद्युपाय इति । तदुक्तं श्रीमद्द्विशतिकालोत्तरे—

त्रिमात्रस्तु द्विमात्रस्तु एकमात्रस्तथैव च ।
अर्धमात्रो परस्सूक्ष्मः तस्याप्यर्धं परापरम् ॥

किं च अकारादिस्वरात्मकब्रह्मादिकारणपरित्यागक्रमेणापि शिवे लीनमित्युच्यते । **ऐशं क्रमाद्विशन्तमिति** । अयमर्थः । प्रोक्तवत् प्रासादस्य सकलस्योच्चारणात् हृदयादितत्तत्स्थानस्पर्शक्रमात् परशिवे लीनमिति । तदुक्तं तत्रैव—

ब्रह्मणो हृदयं स्थानं कण्ठे विष्णुस्समाश्रितः ।
तालुमध्ये स्थितो रुद्रो ललाटे तु महेश्वरः ।
नासाग्रे तु शिवं विद्यात् तस्यान्ते तु परात्परम् ॥

इत्युक्तप्रकारेण यस्य परमशिवस्य धाम द्वादशान्तस्थितपरमशिवस्वरूपं तदुदन्तन्तमुच्चारयितुः परमशिवसमानशुद्धसंविदुदयप्राप्तिहेतुत्वात् तद्विशन्तमित्युपचारादुच्यते ।

एनं पूर्वोक्तमन्त्रम् । मननत्राणधर्मित्वाच्छिवस्य तद्वाचकस्यापि मन्त्रमित्युपचारादुक्तम् । तदुक्तम्—

मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहः ।
मननत्राणधर्मित्वान्मन्त्र इत्यभिधीयते ॥ इति ॥

एवंभूतं मन्त्रं जपेयुरित्यध्याहारः । किंभूता जपेयुरित्यत्राह—**यस्य प्रसादात्सौधरसैः सिक्ता इति** यस्य शिवस्य प्रसादात् शक्तिपातात् हेतोः दीक्षिताः प्रातरुत्थाय अवश्यकरणादनन्तरं श्रीमन्मृगेन्द्राद्युक्तक्रमेण सर्वं कृत्वा जलानि पराशक्तिक्षोभामृतस्वरूपाणीति विभाव्य तैस्सिक्ता अभिषिक्ताः सन्तः । तदुक्त श्रीमन्मृगेन्द्रे—

अस्त्रेण मृदमादाय जलोपान्ते न्यसेच्छुचौ ।
देशे सद्येन वामेन प्रोक्ष्याघोरेण मन्त्रयेत् ॥

मन्त्रैरालभ्य संवेष्ट्य वर्मणा विभजेत्त्रिधा ।
नरेणैकं ततो जप्त्वा गुह्यास्त्रेण मलापहम् ॥

स्नानमाशिरसः कृत्वा समाचम्योदगाननः ।
प्राङ्मुखो वा भजेत्सन्ध्यां वेदसिद्धां द्विराश्रमी ॥

तच्छेषमपि संपाद्य त्रिधांशमपरं मृदः ।
विभज्य पाणिगं पूर्वयाम्यसौम्यस्थमालभेत् ॥

अस्त्रब्रह्मशिवैर्विघ्नानाद्येनोत्सारयेज्जलात् ।
तदन्तेनामृतीकुर्यात् द्वितीयेनालभेत्तनुम् ॥

स्नायात्तत्त्रिभागेन पाण्योः शौचं पुनः पुनः ।
सेयतासुरपां मध्ये वक्त्रमाधाय चेतसा ॥

जपेदघौघविच्छित्त्यै तारकं दुःखतारकम् ।
आप्लुत्य परिवृत्यान्तर्वासो बध्वाचमेच्छिखाम् ॥ इति ॥

ननु सर्वकरणानां त्यक्तत्वात् केन करणेन जपः कार्य इत्यत्राह—**धिया जप्यमिति** । शिवशक्त्या प्रकटीकृतात्मचिच्छक्त्या जपः कार्य इत्यर्थः । जपस्थानलक्षणादिभेदः श्रीमत्सुप्रभेदादिषु विस्तरेणोक्तः तत एवावधार्यः । **असकृदिति**

क्रियमाणानां कर्मणामानन्त्यात् तत्तत्कर्मावसाने तच्छिद्रव्यपोहनाय सदा जप्य-मित्यर्थः ॥ तन्मन्त्रजपफलमाह—**अन्ते यदीयं महः तस्य शम्भोर्धाम प्रयान्तीति** प्रारब्धदेहावसाने यस्य परमशिवस्य इदं यदीयं महः प्रोक्तनयेन सर्वोत्कर्षं शिवत्वं तस्य शम्भोर्धाम तेजस्समानरूपं प्राप्नुवन्ति । शिवसायुज्यं प्रयान्तीत्यर्थः । किञ्च साधकानां तु तत्तदभिमतमन्त्रमूर्त्याधिष्ठितशुद्धभुवनान्येव प्राप्यस्थानानीत्याह—**अभिमतानि प्रयान्तीति** । तदुक्तं श्रीमत्स्वायम्भुवे—

> यो यत्राभिलषेद्भोगान् स तत्रैव नियोजितः ।
> सिद्धिभाङ्मन्त्रसामर्थ्यात् .... ॥ इति ॥[1]

पूर्वोक्तवद्दीक्षितानां प्रतिदिनं निष्कळप्रासादानुष्ठातॄणां आचार्याणां शुद्धभुवनभोगानन्तरं परशिवस्य तेजोरूपत्वमस्तीत्याह—**मन्त्रमिति** । मन्त्रशब्देनात्र शिवसिद्धान्तेषु मुख्यत्वात् प्रासादमन्त्रो विवक्षितः । प्रासादस्य नादमयत्वात् मन्त्रो नादमयः । नादस्तु परशिवाज्जातः । नादाद्बिन्दुः बिन्दोराद्यस्वरः । तस्मात् सर्वे वर्णा जाता इत्यनुक्रमः । तथा कामिके—

> नादो मन्त्र इति प्रोक्तः स नादो जायते परात् ।
> नादाद्बिन्दुस्समुत्पन्नो बिन्दोराद्यस्वरो भवेत् ॥
>
> तस्मात् स्वरद्वयाद्द्वौ द्वौ तेषां भेदाश्चतुर्दश ।
> स्वराष्षोडश जीवाख्याः कादयो देहवन्मताः ।
> सङ्ख्यया ते चतुस्त्रिंशत् त एव व्यञ्जनानि तु ॥
>
> तैरेव रचितं शास्त्रं परापरविभेदितम् ।
> नवखण्डं तु नादाख्यं पञ्चाशद्बीजगर्भितम् ॥ इति ॥

मन्त्रशब्दो मनुरवबोधने त्रा रक्षण इति द्विधातुजः । मननं परशिव-ध्यानम् । स शिवः स्वध्यानयुक्तानां सर्वप्राणिनां संसारसागरात् त्राणं करोतीति मन्त्रशब्दार्थः । अत एव प्रासादमन्त्रो ध्यातव्यः । उक्तं च—

> मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहः ।
> मननत्राणधर्मत्वान्मन्त्र इत्यभिधीयते ॥ इति ॥

---

1. अस्य श्लोकस्येयं व्याख्या मातृकायां ग. पुस्तके च परं दृश्यते ।

षट्कलं हृदयाद्यङ्गदीर्घस्वरैर्युक्तम् । अनेन निष्कलप्रासादः सूचितो भवति । ईशानादिपञ्चब्रह्माक्षरैः परमेश्वरस्य शरीरत्वात्तद्वाचकस्य प्रासादस्यापि सकलत्वम् । तस्मात् सकलप्रासादो ब्रह्माङ्गाक्षरैः मिश्रीकृत्योद्धार्यः । निष्कलप्रासादोऽङ्गाक्षरै-रेवोद्धार्यः ॥ तथा श्रीकालोत्तरे—

> निष्कळं परमं मन्त्रं शिवं साक्षात्सदाशिवम् ।
> भुक्तिमुक्तिप्रदं पुंसां पञ्चाङ्गसहितं विभुम् ॥ इति ॥

नेत्रमन्त्राराहित्यादेव पञ्चाङ्गत्वं युक्तम् । पञ्चाङ्गसहितत्वमेव प्रासादस्य अत्र कथं षट्कलत्वमिति चोद्यस्य परिहारः । नेत्रप्रासादयोरीकारोपरिस्थितौकारेण-सहितत्वात् नेत्रं मूलमन्त्रेऽन्तर्भावं विधाय पञ्चाङ्गसहितमित्युक्तत्वात् प्रासादस्य षट्कलत्वं युक्तमेव । अत एव मोक्षकाङ्क्षिणां निष्कलप्रासाद एव ध्यातव्यः । 'ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदो भवेत्' इत्युक्तत्वात् । आस्यरन्ध्रमुकुलाद्याधारं आस्यशब्देन ललाटमध्यस्थितबिन्दुस्थानमुच्यते । रन्ध्रं ब्रह्मरन्ध्रम् । मुकुलशब्देन हृदयादितत्तत्स्थानास्थितकमलमुकुलमुच्यते । आदिशब्देन ब्रह्मरन्ध्रोपरिस्थितशक्त्या-दिस्थानमुक्तं भवति । एतेषु स्थानेषु आधारमधिष्ठानमूतं आस्यादिस्थानेषु स्वसाम-र्थ्यानुगुणेन चिन्तनीयमित्यर्थः । **ऐशं** परशिवसम्बन्धि **तुर्यं** द्वादशान्तस्थानगतं **धाम**-परशिवतेजः **क्रमात्** ब्रह्मादिकारणत्यागक्रमेण हृदयादिस्थानगतं **यस्य** परशिवस्य प्रसादात् । **धिया** भावनात्मिकया बुद्ध्या असकृत् बहुवारं विशन्तं परशिवतेजसा सहैकीभूतमित्यर्थः । एवं पूर्वोक्तमन्त्रं भावयेदिति शेषः । अनेन भूतशुद्धिरुक्ता भवति । एवं प्रतिदिनं सौधरसैः ब्रह्मरन्ध्रोपरिस्थितनिष्कलशक्तिक्षोभात् प्रसृता-मृतरसैः **सिक्ताः** सेविताः, अन्तर्बहिरभिषिक्ताः इत्यर्थः । अभिमतानि वाञ्छित-शुद्धभुवनस्थानानि प्रयान्ति गच्छन्ति । **अन्ते** भोगावसाने **यदीयं** परशिवसम्बन्धि **महः**तेजः । प्राप्नुवन्तीति शेषः । तस्य शम्भोर्नमश्शिवायेति सुमनुः शोभनमन्त्रः । **सतां** दीक्षितानां महात्मनां **सतारः** ओङ्कारसहितः । **जप्यः** जप्तुं योग्यः । परमोक्षप्रदानत्वात् शिवमन्त्र एव दीक्षितैर्जप्तुं योग्य इत्यर्थः । 'प्रासादेन तु जप्तेन सर्वे जप्ता न संशयः' इत्यागमात् ।

अथ मन्त्रजपयोग्योक्तिप्रसङ्गेन वारुणस्नानस्योक्तत्वात् अन्यस्नानानां तैजसभौमानिलदिव्यमन्त्रागौरवाणां नैमित्तिकत्वात् तत्तन्निमित्तप्राप्तावसरे श्रीमन्मृगेन्द्रा-

द्युक्तवत् कार्याणीत्यनुक्त्वा मानसस्नानस्य सर्वदा कर्तव्यत्वात् तल्लक्षणं विशेषेणाह—**मूलाणुमिति** ।

मूलाणुं लयनान्तमुच्चरति यः शक्तिं जगत्कारणं
क्षुब्ध्वा तत्प्रसृतामृतौघसरणैः प्राणान्नियम्य स्थितः ।
मध्ये संप्लवनात् स्वदेहमचिरादागत्य नाड्या बहिः
सोऽन्तश्चाप्लवतीह मानसमिदं स्नानं तथाप्यायनम् ॥ ४० ॥[1]

यः प्राणान्नियम्य मूलाणुं लयनान्तमुच्चरति स मध्ये स्थितो जगत्कारणं शक्तिं क्षुब्ध्वा, मध्ये संप्लवनात् प्रसृतामृतौघसरणैः अचिरादागत्य नाड्यन्तर्बहिश्च स्वदेहमाप्लवति इदमिह मानसं स्नानं तथाप्यायनमित्यन्वयः । अस्यार्थः — यो सद्योनिर्वाणदीक्षया दीक्षितः पुत्रकाद्यः प्राणान्नियम्य वक्ष्यमाणक्रमेण कुम्भकप्राणायामं कृत्वा नाडीशोधनं कृत्वा तदनन्तरं मूलाणुं पूर्वोक्तकलाढ्यप्रासादमन्त्रं लयनान्तमुच्चरति स गर्भप्राणायामेन प्रागुक्तप्रकारेण द्वादशान्तं यावदुच्चरति स **मध्ये स्थित इति** । "समनान्तं पाशजालमुन्मन्यन्ते परशिव" इत्युक्तत्वात् । उन्मनैव मध्यं तत्र परशिवस्य विशेषाधिष्ठाने परबिन्दुस्थाने स्थित्वा तन्मध्ये संप्लवनादवतीर्य तत्प्रसृतामृतौघसरणैः सह अचिरात् शीघ्रमागत्य तदधो गच्छन् स्वदेहं सूक्ष्मस्थूलशरीरं सर्वनाड्या प्रविश्यान्तर्बहिश्चाप्लवति सिञ्चति योगीश्वर इत्यागमेषु श्रूयते । तदिदं स्नानं मानसं तत्र मननं मनश्शिवशक्त्या प्रकाशीकृतात्मज्ञानशक्त्या कृतत्वात् मानसं स्नानमिहापि शास्त्रेऽष्टविधप्रत्ययेषु आप्यायनमपि । ज्वरप्लुष्टादिषु तथाप्रकारमेव कार्यमिति लक्षणातिदेशः ॥ दीक्षितानां मानसस्नानविधिमाह—**मूलाणुमिति ।**

मूलं मूलाधारः तत्राणुर्मन्त्रः तं प्रासादं लयनान्तं द्वादशान्तस्थानं लयनान्तमित्युच्यते । अत एव प्रासादस्य मूलाधारमारभ्योच्चारक्रमेण द्वादशान्तपर्यन्तमुच्चाररूपत्वान्मूलाणुरिति नामागमेषु प्रसिद्धम् । हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रान्तं, ब्रह्माच्युतरुद्रेश्वरसदाशिवस्थानमकारादिमातृकाक्रमत्यागेन त्याज्यभूतं ब्रह्मरन्ध्रोपरि शक्त्यादिकलाचतुष्टयस्थानमनाहतशिवाधिष्ठितं तदन्ते उन्मन्यन्तसप्तमस्थानभूतद्वादशान्तं स्थानं परशिवाधिष्ठितम् । एवं लयान्तमूलाणुं यो दीक्षित उच्चरति मूलमन्त्रोच्चारक्रमेण आत्मानं परशिवेनैक्यभूतं भावयतीत्यर्थः । **जगत्कारणं** जगदुपादान-

1. मातृकायां ग. पुस्तके चैव चेयं व्याख्या दृश्यते

कारणभूतां शक्तिं कुटिलां शक्तिं **क्षुब्ध्वा** क्षोभितां कृत्वा संक्षोभणसामर्थ्यमाह—**प्राणान्नियम्य स्थितः** । प्राणायामं कृत्वा स्थित इत्यर्थः ।

तत्प्रसृतामृतौघसरणैः क्षुब्धशक्तिपरिस्रुतामृतसमूहप्रवाहैः । **मध्ये** बहुलामृतसलिलमध्ये **स्वं** देहमचिरात् शीघ्रेण संप्लवनात् । अत एव संप्लवनात्पूर्वं योगाग्निना तद्देहदाहः सूचितो भवति । "दहेद्योगाग्निना देहमापादतलमस्तकम्" इति वचनात् । **नाड्या**—ब्रह्मनाड्या बहिरागत्य सृष्टिक्रमेण संप्लावितदेहे हृदयादिस्थानेषु आत्मानं संस्थाप्येत्यर्थः । **स** एवं प्रतिदिनं भावनायुक्तः **इह** स्थूलदेहे **अन्तराप्लवति** संप्लावयति । **आप्यायनं** देहस्य आप्लवनभूतमिदं मानसस्नानं प्रसिद्धम् । तथा क्रियाक्रमे—मूलमन्त्रं नादान्तमुच्चरन् क्षुब्धशक्तिपरिस्रुतबहुळामृतधाराभिः स्वां तनुमन्तर्बहिरभिषिक्तां भावयेदिति मानसस्नानं सर्वत्र विधेय इति ॥ ४० ॥

अथ स्वदेहं वटतरुरूपभावनया भूतशुद्धिमाह—**स्वं देहमिति** ॥

स्वं देहं भूतबीजं हरिविधिरचितं स्वाङ्कुरं कर्ममूलं
भव्यं कालादिसारं विषयदलगतं खादिशाखोपशाखम् ।
भावाशेषप्रसूनं व्यवसितसुफलं पुंविहङ्गोपभोग्यं
न्यग्रोधं चोर्ध्वमूलं विषयरसमवाकुच्छाखिनं भावयेच्च ॥ ४१ ॥

यथा लोके क्षेत्रनिक्षिप्तस्य बीजस्याङ्कुराद्युत्पत्तिक्रमेण स्थूलाकारं वृक्षस्वरूपं दृश्यते तद्वत् देहस्यापि बीजादिस्वरूपं दर्शयति—**भूतबीजम्** । स्थूलशरीरापेक्षया चेदमुक्तम् । तथा **सिद्धान्तदीपिकायां** जातिकुलाद्यभिमानास्पदमिदं स्थूलदेहं पृथिव्यप्तेजोवाय्वाकाशादीनां समवाय इति सूक्ष्मभूतांशैः संयुक्तमिन्द्रियबीजं योनिक्षेत्रे निक्षिप्तं शरीराकारेण जायत इति प्रसिद्धम् । सूक्ष्मस्थूलशरीराभ्यां आणवमलं बीजं मायाक्षेत्रं मलमायाकारं रूपं शोधयेत् देहपादपमित्युक्तत्वात् । **हरिविधिरचितं** विष्णुब्रह्मभ्यां ब्रह्मणः सृष्टिकर्तृत्वात् । क्षेत्रसृष्टं विष्णोः पालनकर्तृत्वादत्र रक्षितमित्यर्थः । सृष्टिरक्षणाभ्यां बीजमेव अङ्कुराकारेण उत्पद्यमानं कर्ममूलं धर्माधर्ममूलं यथा मूलेन भूम्यन्तः सम्यक् प्रविश्यमानो वृक्षः सुकुमाराकारेण जायते तद्वत् पूर्वजन्मार्जितपुण्यपापानुकूलेन ब्राह्मणादिदेहमिन्द्रियपाटवं नियतायुषं नियतभोगं धरतीति कर्मणो मूलत्वं प्रतिपादितम् । **भव्यम्**

उत्तरकालः भविष्यत्कालादितत्वं **सारं** शाखादि वृक्षस्येति शेषः। आदि-शब्देन रागनिर्यूषं पुरुषबीजं प्रकृत्यादिमहाकार्यं गृह्यते। विषयदलगतं शब्दादि-विषयदलगतं शब्दादिविषयपत्रगतं **खादिशाखोपशाखं** कर्मेन्द्रियज्ञानेन्दियमेव यथाक्रमेण शाखोपशाखं महाशाखाल्पशाखाभिर्युक्तम्। **भावाशेषप्रसूनं** पूर्वोक्त-पञ्चाशद्भाव एव समस्तपुष्पम् **व्यवसितसुफलं**बुद्ध्यध्यवसायसङ्कल्पफलम्। **पुंविहङ्गोपभोग्यं** आत्मपक्षिणोपभोक्तुं योग्यं **विषयरसं** भोग्यवस्तुरसं ऊर्ध्वमूलम-**वाक्छाखिनम्** अधोगतशाखायुक्तं एवंभूतं स्वदेहं न्यग्रोधं भावयेत् वटवृक्षाकारेण ध्यायेत् ॥ ४१ ॥

शरीरदाहाप्लावनादिना शुद्धदेहं विधाय मानसपूजां कुर्यादित्याह—**कुम्भेति**।

कुम्भापूरकरेचकार्धयुगलैर्ह्लामादिमन्त्रान् पठन्
भूम्यादिस्थगुणस्थितिक्रमयुतं पत्राद्ययोगान्वितात्।
शोषाद्दाहकभस्मतद्व्यपनयात् शुद्धोनभोभावनात्
शक्त्याप्लावितमन्त्रविग्रहयुतः पूजां विदध्याद्धृदि ॥ 42 ॥

कुम्भापूरकरेचकार्धयुगलैः अत्र छन्दोभङ्गनिरोधेन कुम्भकशब्दः पूर्वमुद्दिष्टः पूरकाभावे कुम्भकविधानसामर्थ्याभावादिति भावः। क्रमेण पूरककुम्भकरेचकाना-मर्धस्य युगलैः युग्मैः पूरकादीनां पूर्वार्धेनापरार्धेन चेत्यर्थः। पूर्वापरार्धं तु काल-वशात् ज्ञेयम्। पूरकादीनां कालस्तावत् त्रिविधः उत्तममध्यमाधमभेदेन। हस्तेन जानुमण्डलमावृत्य छोटिकात्रयेण युक्ता एका मात्रा। 'जानुमण्डलमावृत्य मात्रा स्याच्छोटिकात्रयात्' इत्युक्तत्वात्। तावतीभिर्द्वादशभिर्मात्राभिः तालाख्यः कालः 'तालो द्वादशभिर्जानुपरिणाहपरिभ्रमैः' इत्युक्तत्वात्। तालैः द्वादशभिः कनिष्ठः प्राणा-यामः, चतुर्विंशत्या मध्यमः, अष्टचत्वारिंशता चोत्तमः। तथा सर्वज्ञानोत्तरे—

तालद्वादशकं ज्ञेयं प्राणायामस्तु कन्यसः।
मध्यमश्चतुर्भिर्विंशत्या श्रेष्ठस्तद्द्विगुणो भवेत् ॥ इति ॥

रेचककुम्भकपूरकसमुदायरूपः प्राणायामः।

ताभिर्द्वादशमात्राभिः पूरकः कुम्भकस्तथा।
रेचकश्चैवमाख्यातः प्राणायामः कनीयसः ॥

इत्युक्तत्वात्। द्वादशमात्राकाल एव प्रत्येकं रेचकपूरककुम्भकानां काल इत्येकः पक्षः। तथा कामिके—

मात्राद्वादशभिर्हीनो द्विगुणैर्मध्यमो मतः।
त्रिगुणैरुत्तमः कालः प्रत्येकं रेचकादिषु ॥ इति ॥

अत एव पूर्वोक्ततालद्वादशप्रमाणकनिष्ठप्राणायामस्य पूरककुम्भकरेचकानां प्रत्येकं तालचतुष्टयप्रमाणम्। चतुर्विंशत्तालप्रमाणमध्यमप्राणायामस्य पूरकादिषु अष्टतालप्रमाणम्। अष्टाचत्वारिंशत्तालप्रमाणश्रेष्ठप्राणायामस्य पूरकादिषु षोडशताल-प्रमाणं जातम्। इत्थं कालक्रमेण कनिष्ठप्राणायामस्य पूरकपूर्वार्धप्रमाणं द्वितालं जातम्। तावदेव अपरार्धप्रमाणम् कुम्भकरेचकयोः एवमेव प्रमाणं योज्यम्। मध्यमश्रेष्ठयोः कालप्रमाणेन पूरककुम्भकरेचकानां पूर्वापरार्धप्रमाणं यथाक्रमेण ज्ञातव्यम्। इत्थं पूर्वोक्तपूरकादीनां पूर्वापरार्धप्रमाणेन **ह्लामादिमन्त्रान् पठन्** अत्र लवरयहकारका यथाक्रमेण पृथिव्यादीनां बीजानि। तथा कारणे—'पृथिव्यादीनि बीजानि लवरयहकारकाः' इति। हृद्बीजयुक्तलकारस्सबिन्दुको निवृ-त्तिकलाबीजम्। शिरश्शिखाकवचशिवबीजैर्यथाक्रमेण युक्तवरयहकाराः प्रतिष्ठा-विद्याशान्तिशान्त्यतीतकलाबीजानि।

निवृत्तिः पृथिवी ज्ञेया प्रतिष्ठा ह्याप उच्यते।
विद्यां तेजो विजानीयात् वायुश्शान्तिः प्रकीर्तितः ॥
शान्त्यतीता भवेद्व्योम ....। इत्युक्तत्वात्।

भूम्यादिस्थगुणस्थितिक्रमयुतं भूम्यादिषु पृथिव्यप्तेजोवाय्वाकाशेषु स्थाः विद्यमानाः गुणाः गन्धरसरूपस्पर्शशब्दाः तेषां स्थितिः पञ्चचतुस्त्रिद्व्येकसंख्यया पृथिव्यादीनां गुणस्थितिः। तस्याः क्रमेण सहितं यथा भवति तथा पठन्। पृथिवी-पञ्चगुणविनाशाय पञ्चवारं मनसा समुच्चरन् इत्यर्थः। ततस्तद्गुणसंख्यया जलादीनां मन्त्रोच्चारणं कार्यम्। **पत्राद्ययोगान्वितात्** पत्रादीनां स्थूलपर्णपुष्पफलानां सूक्ष्म-पर्णादीनां च अयोगः सम्बन्धाभावः तेनान्वितात् युक्तात्। अत्रायमभिप्रायः—पूरकपूर्वार्धेन भूमेः पञ्चकगुणनाशाय निवृत्तिकलाबीजं पञ्चवारं समुच्चरन् स्थूलपत्र-पुष्पफलादिरहितं तद्देहपादपं विचिन्तयेत्। पूरकापरार्धेन जलस्य चतुर्गुणविनाशाय प्रतिष्ठाकलाबीजं चतुर्वारमुच्चरन् सूक्ष्मपत्रपुष्परहितं विचिन्तयेत्। शोषात् शुष्क-

स्वरूपध्यानात् दाहकभस्मतद्द्व्यपनयात् दाहकं दग्धं भस्म भस्मीभूतं तद्द्व्यपनयात् भस्मना वापनयात् दशदिक्षु प्रक्षेपात् विद्याकलाबीजं त्रिवारमुच्चरन् वह्नेस्त्रिगुणनाशाय दक्षपादाङ्गुष्ठोत्थकालाग्निना कुम्भकपूर्वार्धेन शुष्कमपरार्धेन दग्धं विचिन्तयेत् । रेचकपूर्वार्धेन वायोर्द्विगुणनाशाय शान्तिकलाबीजं द्विवारमुच्चरन् भस्मीभूतं दशदिक्षु प्रलीनं कुर्यात् । **शुद्धोनभोभावनात्** शुद्धोनभ इति छान्दसः प्रयोगः । निर्मलाकाशध्यानात् रेचकापरार्धेनाकाशस्यैकगुणनाशाय शान्त्यतीतकलाबीजमेकवारमुच्चरन् शुद्धस्फटिकवन्निर्मलाकाशं ध्यायेत् ।

नन्वाकाशस्यामूर्तत्वेन ध्येयाकारासम्भवात् कथं शुद्धोनभोभावनादित्युक्तम् । अत्रोच्यते । द्यावापृथिव्योः अन्तरालवर्तिनक्षत्राद्याकारेण मूर्तत्वादौपाधिकाकारेण गगनस्य ध्येयस्वरूपत्वात् तन्नक्षत्रादिराहित्येन निर्मलाकारत्वादाकाशस्य ध्येयस्वरूपत्वमस्तीति शुद्धोनभोभावनादित्युक्तम् । तथा निश्वासकारिकायाम्—

निर्गुणं साङ्ज्ञानातीतं ग्रहनक्षत्रवर्जितम् ।
शुद्धस्फटिकसङ्काशं परं व्योम विचिन्तयेत् ॥ इति ॥

शक्त्या परशक्त्या परिस्रुतबहुलामृतधारया द्वादशान्ते शक्तिमण्डलं परिपूर्णचन्द्रसदृशं बहुलामृतमयं विचिन्त्य प्रासादपूर्वकं वौषडन्तशक्त्या रेचकेन सृष्टिमार्गेण परिस्रुतबहुलामृतधाराभिः सकलनाडीमुखं प्रविष्टाभिः सबाह्याभ्यन्तरं सर्वशरीरं आप्लावितं **मन्त्रविग्रहयुतः** मन्त्रैर्मूलब्रह्माङ्गैः षड्विंशत्कलाभिश्च यथास्थिति न्यस्तशरीरः **पूजां** शिवपूजां हृदि हृदयकमले **विदध्यात्** कुर्यात् ॥ ४२ ॥

अष्टत्रिंशत्कलान्यासमन्त्रक्रममाह—ईश इति ।

ईशेनां द्वेह्यास्तुवों हेहिद्रयान्नरे भ्योद्विरभ्यः शर्वभ्योरु-
द्रभ्यो घोरे वेदमोलमलमलममो वामदेवे नमौ च ।
मिमोवेत्रीणिमां वद्वितयमवधिकं सद्यमन्त्रे कलानाम्
पञ्चाब्धिश्चाष्ट विश्वोऽप्यहिरिति च यथासङ्ख्यमष्टाधित्रिंशत् ॥ ४३

अष्टत्रिंशत्कलान्यासो द्विविधः सशक्तिकविशक्तिकभेदात् । ईशानः सर्वविद्यानां शशिन्यै नम इति कृतन्यासस्सशक्तिकः ॥

शशिनी चोर्ध्वमूर्धा स्यात् पूर्वमूर्धाङ्गदा भवेत् इति क्रियाक्रमद्योतिकाया-मुक्तक्रमेण विहितन्यासो विशक्तिकः । **ईशे** ईशानमन्त्रे **नांद्वेनामिति**-षष्ठी बहुवचनम् । तस्य द्वे द्विरूपे । नान्तपर्यन्तं पूर्वमुच्चार्य पश्चात् शशिन्यादि शक्त्युच्चारणं प्रोक्तम् । अयमभिप्रायः—ईशानस्य कलाः शशिन्यादयः पञ्च । तासां पूर्वमीशानस्सर्वविद्यानामिति ईश्वरः सर्वभूतानामिति द्विनान्तपर्यन्तमुच्चारणं कृत्वा, तदनन्तरं शशिन्यादिकला योज्या इति । एवमेवोत्तरत्रापि द्रष्टव्यम् । ह्येति ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मपर्यन्तमुच्चारणं प्रोक्तम् । तदनन्तरमिष्टायै नम इति योज्यम् । अस्तु इति शिवो मे अस्तुपर्यन्तं, वोम् इति सदाशिवोमित्यन्तम्, एवमीशानकलापञ्चकस्य तत्तदक्षरपर्यन्तोच्चारणं ज्ञेयम् । हे इत्येकाक्षरेण तत्पुरुषाय विद्महे इत्यन्तम् । हि इति वामदेवाय धीमहिपर्यन्तम् । द्र इति तन्नोरुद्रान्तं, यादिति प्रचोदयादित्यन्तं, **नरे** तत्पुरुष(मन्त्रे) इति तत्पुरुषकलाचतुष्टयं प्रोक्तम् । भ्यो द्विरिति अघोरेभ्य इत्यन्तं अथ घोरेभ्य इत्यन्तं (च) । र इति । घोरान्तम् भ्य इति घोरतरेभ्य इत्यन्तं, शर्व इति सर्वतश्शर्व (सर्वेभ्यः सर्व) इत्यन्तम् । भ्यो इति सर्वेभ्य इत्यन्तम् । द्र इति नमस्ते अस्तु रुद्र इत्यन्तम् । भ्यो इति रूपेभ्य इत्यन्तम् । अस्त्विति शिवेभ्य इत्यन्तं च संगृह्यते । **घोरे** अघोरमन्त्रे । एवमघोरकलाष्टकं । वेद(मः) चतुर्मकारः, वामदेवाय नमः इति ज्येष्ठाय नम इति रुद्राय नम इति कालाय नम इति चतुर्मकारान्तं गृह्यते । ल इति कलपर्यन्तं, म इति विकरणाय नम इत्यन्तं, ल इति बलपर्यन्तं, म इति विकरणाय नम इत्यन्तं, ल इति बलपर्यन्तं, म इति प्रमथनाय नम इत्यन्तम् । पुनरपि म इति सर्वभूतदमनाय नम इत्यन्तं, **वामदेवे** वामदेवमन्त्रे न इति मनपर्यन्तं, म इति उन्मनाय नम इत्यन्त, इति वामदेवकलास्त्रयोदश । मि इति सद्योजातं प्रपद्यामि इत्यन्तम् । म इति सद्योजाताय वै नम इत्यन्तं, वे त्रीणीति भवे इत्यन्तम्, पुनरपि भवे इत्यन्तं, अनादिभवे इत्यन्तं च गृह्यते । मामिति भजस्व मामित्यन्तम् । व इति द्वितयं भव इति । तत्राप्येकं मवधिकं मान्तं भवाय नम इति । **सद्यमन्त्रे** सद्योजातम् इति मन्त्रे कलाष्टकम् । एवमीशानस्सर्वविद्यानां शशिन्यै नम इति विधीयमानो न्यासः सशक्तिक इत्यर्थः । केवलं शशिन्यै नम इत्यादिको न्यासो विशक्तिकः । कलानां संख्याक्रममाह—**पञ्चाब्धिरिति** । ईशानस्य कलाः पञ्च । अब्धिः तत्पुरुषस्य चतुष्कलाः । अष्ट अघोरकलाः । विश्वे त्रयोदश वामदेवकलाः । अहिः अष्ट सद्योजातकला इति । यथासङ्ख्यमष्टाधिकत्रिंशत् । उक्तं च—

ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कलाः ।
अघोरस्य कलाश्चाष्टौ वामदेवे त्रयोदश ।
सद्योजातकलाश्चाष्टावष्टत्रिंशत्कलाः स्मृताः ॥ इति ॥ ४३ ॥

अष्टत्रिंशत्कलानां स्थानान्याह—**मूर्धान इति** ।

मूर्धानः पञ्चवक्त्राण्यथ हृदयगलौ द्व्यंसनाभिश्च कुक्षिः
पृष्ठोरोगुह्यशिश्नोरुकयुगमपरं जानुयुग्मं च जङ्घे ।
द्विस्फिक्कट्यौ च पार्श्वौ चरणकरयुगं घ्राणमौली च बाहू
स्थानानि स्युः कलानां शिवतनुकरणे त्रिंशतां साष्टकानाम् ॥४४॥

मूर्धानः ऊर्ध्वपूर्वदक्षिणोत्तरपश्चिममस्तकानि **पञ्च** ईशानकलापञ्चकानां स्थानानि । **वक्त्राणि** मुखानि पूर्वदक्षिणोत्तरपश्चिमानि तत्पुरुषकलाचतुष्टयस्थानानि । अथेति प्रश्ने । पुरुषस्य चतुष्कलेत्युक्तत्वात् ऊर्ध्ववक्त्राभाव इति । अत एवाघोरशिवाचार्येण अव्यक्तकलायै नम इति ऊर्ध्ववक्त्र इत्युक्तम् । **हृदयं** कण्ठादधःप्रदेशः । **गळः** कण्ठः, **द्व्यंसौ** दक्षवामबाहुशिरसी, **नाभिः** जठरवर्तिनिम्नस्थानम्, **कुक्षिः** नाभ्यधोवर्तिजठरस्थानं, **पृष्ठं** पश्चिमपृष्ठभागः, **उरः** हृदयादूर्ध्वप्रदेशः । एतान्येव अघोरकलाष्टकस्थानानि । **गुह्यं** गुदः, **शिश्नं** लिङ्गं, **ऊरुकयुगम्** दक्षवामोरुयुग्मं **अपरं जानुयुग्मं** जङ्घोर्ध्वमध्यस्थसन्धिस्थानं दक्षवामजङ्घे जान्वधःप्रदेशौ, दक्षवामकौ द्वौ स्फिचौ द्विस्फिक् पृष्ठपार्श्वप्रदेशो दक्षवामकः, **कट्यौ** सूत्रबन्धनस्थाने, **पार्श्वौ** दक्षवामकक्षाधः कटिपर्यन्तप्रदेशौ । **वामदेवस्य** त्रयोदशकलानां स्थानानि । **चरणे** दक्षवामपादौ, **करयुगं** दक्षवामपाणियुग्मं, **घ्राणं** नासा, **मौळिः** शिरः, **बाहू** दक्षवामभुजदण्डौ, **शिवतनुकरणे** शिवसमानशरीरोत्पादने **साष्टकानां त्रिंशतां कलानां** स्थानानि स्युः भवेयुः उक्ता इत्यर्थः । उक्तञ्च—

ईशानः पञ्चधा मूर्ध्नि वक्त्रे वक्त्रचतुष्टये ।
पञ्चमं प्रणवेनैव ततोऽघोरकलां न्यसेत् ॥
हृदि कण्ठेंऽसयोर्नाभौ कुक्षौ पृष्ठे च वक्षसि ।
गुह्ये लिङ्गे तथोर्वोश्च जानुनोर्जङ्घयोः स्फिचोः ॥
कट्यां च पार्श्वयोश्चाथ वामदेवकलां न्यसेत् ।
पादयोर्हस्तयोर्घ्राणे मस्तके भुजदण्डयोः ॥
सद्योजातकला योज्या .... ॥ इति ॥ ४४ ॥

अन्तर्यजनप्रकारं युग्मेनाह—**हृत्पद्म इति** ।

हृत्पद्मे मनसा विभावितमहामायोपरिस्थासने
ध्येयो दीपशिखाकृतिस्सुकुसुमं भावः क्षमार्घ्यं जलम् ।
लेपो धीरवसायिनी परशिवः प्राणोऽनलो मानसे
पात्रेऽहङ्कृतिरेष एव परमो धूपोऽथ मानात्मकः ॥ ४५ ॥

दीपस्सद्विषयाः सुतृप्तिकरणाः गन्धादयः क्ष्मादिकाः
पानीयादिकदर्पणव्यजनकस्तोत्रादिकावेदनम् ।
नैवेद्यं स्वयमुद्यता समनया सूक्ष्माङ्गहीनो यदा
युक्तः स्यात्स्वयमेव नादमनुना जापस्स नाभ्युत्थितः ॥ ४६ ॥

शिवपूजा द्विप्रकारा बाह्याभ्यन्तरभेदेन । तत्र तावदध्यात्मज्ञानिनामन्तर्यागस्तेषां बाह्यपूजाविषये पुष्पाद्याहरणविषये दोषप्रसङ्गात् । क्रियावतां बाह्यपूजा विहिता । उक्तं च—

यजनं द्विविधं प्रोक्तं बाह्याभ्यन्तरभेदतः ।
अहिंसादिभिरभ्यर्च्यो योगिभिर्न बहिर्भवेत् ॥
द्रव्यहिंसा न कर्तव्या तत्र तत्र यतश्शिवः ।
क्रियावद्भिस्सदाभ्यर्च्यः लिङ्गस्थः कुसुमादिभिः ॥

इति बाह्यपूजावतां पुष्पाद्याहरणे दोषाभावः । उक्तं च—

यथा राजाङ्गभोगार्थमाहर्तुं कुसुमादिकम् ।
उद्यानवनतस्तस्य प्रत्यवायो न विद्यते ॥
तद्वदीश्वरपूजार्थं पुष्पहर्ता न दोषभाक् ।

बाह्यपूजानिरतैरपि मानसभावेनान्तर्यजनं कर्तव्यम् । अन्तर्यागं विना बाह्यपूजा न सिध्यति । तदुक्तम्—

अन्तर्यागं पुरा कृत्वा बाह्ययागमथाचरेत् ॥
ज्योतिर्लिङ्गं हृदिस्थं यत् तदेवाभ्यर्च्यते बहिः ।
यतस्तस्मात्पुरा कार्यं अन्तर्याग इहोच्यते ॥
अकृत्वा मानसं यागं यो बहिर्यागमाचरेत् ।
वृथा परिश्रमस्तस्य शास्त्रस्येति विनिश्चयः ॥ इति ॥

हृत्पद्मे हृदयकमले। स्वाभाविक इति शेषः। लोके तावत्कन्दादुत्थितं कमलं दृश्यते, तद्वत् अत्रापि कन्दादुत्थित इति ज्ञेयम्। तथा चोक्तम्—

कन्दस्थानं मनुष्याणां देहमध्यं नवाङ्गुलम्।
चतुरङ्गुलमुत्सेधमायामश्च तथाविधः॥

अण्डाकृतिवदाकारं भूषितं तत्त्वगादिभिः।
तत्कन्दादुत्थितं ज्ञेयं हृत्सरोजं सकर्णिकम्॥ इति॥

तद्धृदयकमलकर्णिकायां सूर्यसोमानलैस्संयुक्तायामनन्तेशसदाशिवपरशिवाः स्वभावतस्तिष्ठन्ति। तथा निश्वासकारिकायाम्—

कदलीपुष्पसङ्काशं हृदयं सर्वदेहिनाम्।
तस्य मध्ये स्थितं पद्ममष्टपत्रं सकर्णिकम्।
वितस्तिमात्रं हृदयं कमलं चतुरङ्गुलम्॥

अष्टाङ्गुलप्रमाणं तन्नाभेरूर्ध्वं व्यवस्थितम्।
पद्मनालं नवद्वारं समन्तात्कर्णिकान्वितम्॥

अङ्गुष्ठपर्वतुल्यात्र कर्णिका सा सकेसरा।
कर्णिकायां भवेत्सूर्यः तस्य मध्ये तु चन्द्रमाः॥

चन्द्रमध्ये भवेद्वह्निस्तस्य मध्ये महेश्वरः।
सदाशिवो महेशश्च तस्यापि परतश्शिवः॥ इति॥

एवं स्वाभाविकसिद्धहृदयकमले सर्वेषां शिवार्चनमुत्तमोत्तमम्। **मनसा** मानसज्ञानेन **विभावितमहामायोपरिस्थासने** विभावितं भावनया कृतं महामायायाः स्वाभाविकेन विद्यमानकुण्डलिनीशक्तेरुपरिस्थासनमूर्ध्वे विद्यमानसिंहासनं यस्य तस्मिन् हृत्पद्मे वक्ष्यमाणवदाधारशक्त्यादि (कुण्डलिनी)शक्तिपर्यन्तासनध्यानसहित इत्यर्थः। हृदयकमले स्वाभाविकेन स्थिता कुण्डलिनीति सार्धत्रिशत्याम्—

चन्द्राग्निरविसंयुक्ताप्याद्या[1] कुण्डलिनी तु या।
हृत्प्रदेशे तु सा ज्ञेयाप्यङ्कुराकारवत् स्थिता॥ इति॥

1. ख. चाद्या

तत्रासने दीपशिखाकृतिः दीपज्वालासमानः। एतेन नादस्वरूपं द्योतितम्। नादो हंसः सकलप्राणिनां देहमध्यस्थितो हंसः सदाशिवः। 'हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिवः' इति वचनात्। दीपशिखाकारे निश्वासवचनम्—

श्रवणाङ्गुष्ठसंयोगाद्यश्शब्दः संप्रवर्तते।
दीपवह्निशिखातुल्यः सोऽपि तन्नादसंज्ञकम्।
पशोः पाशापनोदाय प्रकाशीकृतमङ्गुनम्॥ इति॥

एवं परशिवो ध्येयः आवाहिन्यादिमुद्राभिरावाहनीयः। **भावो** मानसशुद्धिः **सुकुसुमं** सुपुष्पं, भावशब्देनाहिंसाद्यष्टपुष्पं सूचितम्। उक्तं च—

अहिंसा प्रथमं पुष्पमिन्द्रियाणां तु निग्रहः।
क्षान्तिपुष्पं दयापुष्पं ज्ञानपुष्पं परं मतम्॥
तपःपुष्पं सत्यपुष्पं भावपुष्पं तथाष्टमम्॥ इति॥

क्षमा पुष्पाष्टकमध्योदितक्षान्तिरेवार्घ्यम्। पाद्याचमनयोः क्षमैवेति शेषः। **जलं** स्नानीयोदकं अमृतस्वरूपं क्षुब्धशक्तिपरिस्रुतबहुलामृतस्वरूपेण पयसाभिषेकं कुर्यादित्यर्थः। **अवसायिनी** अध्यवसायरूपा। निश्चयात्मिकेत्यर्थः। **धीः** बुद्धिः **लेपः** विलेपनं कुङ्कुमकर्पूरचन्दनादि **मानसे पात्रे** मनोमयाङ्गाराधारपात्रे **प्राणः** प्राणवायुः **अनलः** अग्निः **अहङ्कृतिः** गर्वः। एष एव परमो धूपः श्रेष्ठधूपविधानम्। तथा चोक्तम्—

अग्निः प्राणो मनः पात्रं गर्वः धूपशिखाकुलः। इति।

यः मानात्मकः चिद् बुद्धिस्वरूपः सर्वार्थप्रकाशकत्वाद्दीपवद् दीपः सद्विषयाः उत्तमभोग्यवस्तुस्वरूपाः सुतृप्तिकरणाः अत्यन्तसंपूर्तेस्साधकतमाः गन्धादयः गन्धरसरूपस्पर्शशब्दाः। गन्धशब्देनात्यन्तपरिमलद्रव्यं सूचितम्। रसेन स्वादुभूतं, रूपेण मनोहरभूतं, स्पर्शेन सूक्ष्मश्लक्ष्णभूतं शब्देनोत्तमध्वनिभूतद्रव्यं सूचितम्। **क्ष्मादिकाः** पृथिव्यप्तेजोवाय्वाकाशानि। एतेन पञ्चोपचाराः सूचिताः। **पानीयादिकदर्पणव्यजनकस्तोत्रादिकावेदनं** पातुं योग्यं पानीयम्। पानीयादिकम् अप्सम्बद्धोपचारः। दर्पणादिकमग्निसम्बद्धोपचारः। व्यजनं वायुचलनार्थकं कृतं तालवृन्तादि, व्यजनादिकं वायुसम्बद्धोपचारः। स्तोत्रादिकमाकाशसंबद्धोपचारः। एतेषां वेदनं समर्पणं। नैवेद्यं पृथिवीसम्बद्धोपचारः। पूर्वोक्तमेतत्सर्वं योगसामर्थ्येन सूक्ष्मशरीरयुक्तस्य प्रत्यक्षेण

दृश्यते । योगसामर्थ्यरहितस्थूलशरीरयुक्तस्य सर्वं मानसभावेन कार्यमित्याह—**यदा** सूक्ष्माङ्गहीनः सूक्ष्मशरीररहितः तदा समनया मनोभावनया युक्तः स्यात् । सूक्ष्मशरीरसहितस्य स्वयमुद्यता स्वयमेवोत्पन्नेन नादमनुना नादात्मकमन्त्रेण स्वयमेव नाभ्युत्थितः मूलाधारादुत्थितः स जापः मन्त्रजल्पनं भवति । स्थूलशरीरसहितस्य मनोभावनया नाभ्युत्थितो जापः कार्यः ॥ ४६ ॥

मानसशिवाग्निकार्यं समाधिं चाह—**वह्नाविति** ।

वह्नावेवमपि प्रपूज्य जुहुयात्पूर्वोक्तयोगेन तत्-
स्थानस्थामिडया स्रुवेण च सुधामन्ते सुषुम्ना स्रुचा ॥
पूर्णान्तं हवनं समाप्य कृतवानीशं क्षमाप्यादरात्
अन्ते भावविवर्जिते परपदे लीनस्समाधिं व्रजेत् ॥ ४७ ॥

पूर्वोक्तयोगेन पूर्वोक्तपरिसिद्धेन संबन्धेन स्वतस्सिद्धनाभिकुण्डे होमस्थानं भावयित्वा तत्संबन्धक्रमेणेत्यर्थः । वह्नौ नाभिकुण्डे विधानोक्तवदावाहितस्वतस्सिद्धशिवाग्नौ एवमपि प्रपूज्य हृदयस्थाने यथा पूजितः तद्वत् शिवपूजनं कृत्वेत्यर्थः । जुहुयात् होमं कुर्यात् । तत्स्थानस्थां बिन्दुस्थाने विद्यमानां सुधाममृतमिडया स्रुवेण इडानाडीं स्रुवाकारेण भावयित्वेत्यर्थः । अष्टोत्तरशतादिसंख्यया पूरकाकृष्टबिन्दुप्रसृतामृताज्येन होमं विधाय अन्ते संख्याहोमान्ते सुषुम्ना स्रुचा सुषुम्नानाडीं स्रुगाकारेण भावयित्वा पूर्णान्तं हवनं पूर्णाहुतिपर्यन्तहोमविधानं समाप्य कृतवान् । पूर्वोक्तवत् हृदये शिवपूजां नाभौ होमविधानं कृतवान् । आदराद् बहुमानादीशं क्षमाप्य अन्तः पूजितदेवाय सर्वं समाप्यान्ते समर्पणावसाने भावविवर्जिते सदाशिवाकारादिस्वरूपभावाकाररहिते, निष्कलस्वरूप इत्यर्थः । **परपदे** द्वादशान्ते लीनः तत्रैवान्तर्भूतः । **समाधिं** मूलाधारादिद्वादशान्तपर्यन्तस्थानेषु एकाकारेण शिवध्यानं समाधिः । तादृशरूपसमाधिं व्रजेत् गच्छेत् । उक्तं च वातुले—

अथ मध्यन्दिनं यावत् समाधिस्थो भवेद्यथा ।
ज्ञानज्योतिर्मयं लिङ्गं शरदिन्दुवदुज्ज्वलम् ॥
भ्रूमध्ये संस्थिते तत्र मनः प्राणं च योजयेत् ।
तल्लीनस्तन्मयो योगी चित्तं शून्यं नयेच्छनैः ॥
नष्टे चित्ते चिदानन्दं स्वयमुद्द्योतते परम् ।
समाधिः कथितो ह्येवमणिमादिगुणालये ॥ इति ॥ ४७ ॥

इत्थमन्तर्यजनादि समाधिध्यानान्तमुक्त्वा इदानीं बाह्यपूजार्थं

स्वमूर्तौ गुरुमूर्तौ वा विद्यापीठेऽनले जले ।
स्थण्डिले स्थिरलिङ्गे वा चले वा कृतसंनिधौ ॥

यजनं श्रेष्ठमेतेभ्यो लिङ्ग एवोक्तलक्षणे ।
तस्मान्नित्यं प्रयत्नेन लिङ्गाराधनमाचरेत् ॥ इति वचनात् लिङ्गमेव

श्रेयस्करमिति लिङ्गाधारतया बाह्यशिवपूजां वर्णयति—**सेशानाहतेति** ।

सेशानाहतधारिकोपरि धराद्याग्रन्थ्यधः पङ्कजं
विद्या चोर्ध्वशिवान्तपद्मखचितं पीठं शिवस्यासनम् ।
सर्वाध्वाधिकभागसंयुतशिवज्ञानाख्यलिङ्गात्मकं
सर्वाध्वाधिकभागनालसहितं पीठं क्रियाशक्तिकम् ॥ ४८ ॥

सेशानाहतधारिकोपरि । सेशा ईश्वरसहिता । शिवाधिष्ठितेत्यर्थः । अनाहता व्यापकरूपा धारिका आधारशक्तिः शिवसमवेतक्रियाशक्तिरेवाधाररूपेत्यर्थः । पूर्वं लिङ्गपीठमध्ये अधोभागे कूर्मशिलायां पूजनीया । तथोक्तम्—

अधः कूर्मशिलासीनां क्षीरोदसितविग्रहाम् ।
मौलौ बीजाङ्कुराकारां वरदामभयप्रदाम् ॥
पाशाङ्कुशधरां शक्तिं क्रियामाधाररूपिणीम् ॥ इति ॥

अथवा—सेशाना ईश्वरसहिता आहता कन्दादङ्कुरवदुत्थिता ।

'पुनरण्डं समुद्भिद्य कन्दादङ्कुरवत् स्थिता' इत्युक्तत्वात् । तस्याः धारिकाशक्तेरुपरि ऊर्ध्वे धराद्या भूतत्त्वादिकालतत्त्वान्ता ग्रन्थ्यधः ग्रन्थेर्मायातत्त्वादधःप्रदेशे । अत्र क्रमः पृथिवीतत्त्वं कन्दरूपं, अप्तत्त्वं सेचकं, अग्नितत्त्वम् उच्छूनावस्थाकारणम्, वायुः प्रेरकरूपः, आकाशं वृत्त्यर्थं, गन्धादिपञ्चतन्मात्राणि अङ्कुराकाराणि, दशेन्द्रियाणि छिद्ररूपाणि । अहङ्कारतत्त्वं वृद्धिकारणम् । बुद्धिगुणप्रकृतिपुरुषान्तचतुस्तत्त्वानि धर्मज्ञानवैराग्यैश्वर्यरूपाणि । सिंहाकाराणि (सिंहासनस्य) पादरूपाणि । रागनियतिविद्याकलान्तानि चत्वारि तत्त्वानि अधर्माज्ञानावैराग्यानैश्वर्यात्मकपादोर्ध्वगतानि गात्ररूपाणि । कालतत्त्वं नालरूपम् । नालदलयोः संयोगस्थानं मायातत्त्वमत्रान्तरे मायातत्त्वमधश्छदमशुद्धविद्यातत्त्वमूर्ध्वच्छदनं शुद्धविद्याम् ऊर्ध्व-

पङ्कजं मायातत्त्वोपरि विकसितरूपकमलं शिवान्तपद्मखचितं शिवतत्त्वावसानकमलव्याप्तमेवंविधं पीठं शिवस्यासनम्। अत्रायं क्रमः—

विद्येश्वराष्टदलैर्युक्तं पञ्चाशद्बीजगर्भितम्।
चतुष्षष्ठिकेसरैर्युक्तं पीतकर्णिकायुक्तम्॥

अत्र पञ्चाशद्बीजमिति अकारादिक्षकारान्तपञ्चाशद्वर्णमेवोक्तम्। चतुष्षष्टिकेसरैर्युक्तमित्यत्र ककारादिमकारान्ताः पञ्च पञ्चवर्गाः, यरलवशषसहाश्च प्रत्येकमकारबिन्दुभ्यां सहिता द्विरुच्चारिता एव केसराणां चतुष्षष्टिरित्युक्ताः। पूर्वादिकेसराग्रेषु मध्ये च नवशक्तिभिर्युक्तम्। पत्राग्रकेसराग्रकर्णिकाग्रवृत्तेषु सूर्यसोमाग्निमण्डलानि। तदधिपतयः ब्रह्मविष्णुरुद्राः, कर्णिकामध्ये शक्तिमण्डलं तदधिपतिरीश्वरः। तदुपरि क्षित्यादि शक्तिमण्डलान्तव्याप्तिकं शिवासनं सञ्चिन्तयेदिति शिवासनविधानं 'शक्त्यादिशक्तिपर्यन्तमासनं परमेष्ठिनः' इत्युक्तत्वात्। **सर्वाध्वाधिकभागसंयुतशिवज्ञानाख्यलिङ्गात्मकं** सर्वाध्वनां षडध्वनां अधिकः श्रेष्ठः भागः ब्रह्मविष्णुरुद्राभिधानत्रिभागः तेन संयुतं शिवज्ञानाख्यलिङ्गात्मकं, ज्ञानशक्तिमयशिवलिङ्गं शिवस्य ज्ञानशक्तिदेहत्वमधिष्ठानमिति प्रसिद्धम्। शिवज्ञानात्मिका शक्तिरेव मूर्त्युपचारेण उपचर्यत इति मातङ्गपारमेश्वरेऽप्युक्तम् 'अथ पत्युरधिष्ठानं स्वशक्ति किरणात्मकम्' इति।

तथा वरुणपद्धत्याम्—

ज्ञानशक्त्यात्मके लिङ्गे क्रियाशक्तेः समर्पणम्।
पीठस्य विधिना योगः प्रतिष्ठा सा च पञ्चधा॥ इति॥

सर्वाध्वाधिकभागनाळसहितं षडध्वना श्रेष्ठरुद्रविष्णुब्रह्मभागयुक्तगोमुखसहितं पीठं लिङ्गाधारभूतं क्रियाशक्तिकं क्रियाशक्तिस्वरूपं पीठं कल्प्यम्। अत्र रुद्रविष्णुब्रह्मभागानां षडध्वयोजनक्रमः प्रदर्श्यते। लिङ्गं त्रिखण्डं परिकल्प्य ऊर्ध्वे रुद्रभागे शान्त्यतीतकला, विष्णुभागे शान्तिकला, ब्रह्मभागे विद्याप्रतिष्ठानिवृत्तिकलाः इति पञ्चकलान्यासः।

शान्त्यतीतकलायां शिवशक्तितत्त्वे द्वे, शान्तिकलायां सदाशिवेश्वरशुद्धविद्या इति त्रितत्त्वानि, विद्यायां मायाकालकलाविद्यानियतिरागपुरुषाख्यसप्ततत्त्वानि। प्रतिष्ठायां प्रकृतिबुद्ध्यहङ्कारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्द-

स्पर्शरूपरसगन्धाकाशमरुत्तेजोजलं चेति त्रयोविंशति तत्त्वानि, निवृत्तौ पार्थिवमेकं तत्त्वम् इति तत्त्वन्यासः।

शान्त्यतीतायामनाश्रितादिनिवृत्त्यन्तपञ्चदशभुवनानि। शान्तिकलायां सदाशिवादिवामान्ताष्टादश भुवनानि। विद्यायां तु अङ्गुष्ठमात्र(त्रादि)वामान्तसप्तविंशतिभुवनानि। प्रतिष्ठायां श्रीकण्ठाद्यमरेशान्तानि षट्पञ्चाशद्भुवनानि। निवृत्तौ भद्रकाल्यादिकालाग्न्यन्तान्यष्टोत्तरशतभुवनानि। एवं पञ्चकलानां चतुर्विंशोत्तरशतद्वयभुवनम्। तथा प्रोक्तमध्वन्यासे—

पुराणि शान्त्यतीतायां भवन्ति दश पञ्च च।
अनाश्रिता तथानाथा चानन्ता व्योमरूपिणी॥

व्यापिनी चोर्ध्वगा चैव मोचिका रोचिका तथा।
दीपिका चेन्धिका चैव शान्त्यतीता च शान्तिका॥

विद्या चैव प्रतिष्ठा च निवृत्तिश्च तथा स्मृता।
कलायां शान्तिकाख्यायामष्टादश पुराणि तु॥

सदाशिवः शिखण्डी च श्रीकण्ठश्च त्रिमूर्तिकः।
एकरुद्रस्तथा चैवमेकनेत्रस्तथा स्मृतः॥

शिवोत्तमस्तथा चैव सूक्ष्मश्चानन्तसंज्ञकः।
मनोन्मनी तदा ज्ञेया सर्वभूतदमन्यपि।
बलप्रमथनी चैव तथा विकरणी भवेत्॥

कलविकरणी चैव काली चैव तथापरा।
रौद्री ज्येष्ठा च वामा च विद्यायां वक्ष्यते क्रमात्॥

तस्यां तु भुवनानां च सप्तविंशतिकं मतम्।
अङ्गुष्ठमात्र ईशान एकेक्षणैकपिङ्गलौ॥

उद्भवश्च भवश्चैव वामदेवो महाद्युतिः।
शिखेदश्चैकवीरश्च पञ्चान्तकश्च शूरकः॥

पिङ्गो ज्योतिश्च संवर्तः क्रोधेशैकशिवौ तथा।
अनन्ताजौ तथा चैवमुमापतिप्रचण्डकौ॥

एकवीरस्तथेशानो भवेशोग्रौ च भीमकः ।
वामश्चैव तथा ज्ञेयः प्रतिष्ठायां तु वक्ष्यते ॥

श्रीकण्ठादीनि तत्रैव षट्पञ्चाशत्पुराणि तु ।
श्रीकण्ठोमौ तथा ज्ञेयौ कौमारं वैष्णवं तथा ।
ब्राह्मं च भैरवं चैव कृतश्चैव तथाकृतम् ॥

ब्राह्मं प्राजेशसंज्ञं च सौम्यश्चैव तथैन्द्रकम् ।
गान्धर्वं च तथा ज्ञेयं यक्षराक्षससंज्ञकम् ॥

पैशाचं च तथा ज्ञेयं स्थलेश्वर इति स्मृतः ।
स्थूलेश्वरश्शङ्कुकर्णो कालञ्जर इति स्मृतः ॥

मण्डलेश्वरमाकोटौ द्विरण्डश्छगलाण्डकः ।
स्थाणुसंज्ञ इति प्रोक्तः स्वर्णाक्षश्च तथापरः ॥

भद्रकर्णश्च गोकर्णो महाकाल इति स्मृतः ।
अविमुक्तो रुद्रकोटिः वस्त्रापदकसंज्ञकः ॥

भीमेश्वरो महेन्द्रश्चाप्यट्टहासस्ततः परः ।
विमलेशस्तथा प्रोक्तः नखलो नाखलस्तथा ॥

कुरुक्षेत्रं गया चैव तथा भैरवसंज्ञकः ।
केदारश्च महाकालो मध्यमेशस्तथा भवेत् ॥

आम्रातकश्च जल्पेशः श्रीशैलश्च तथापरः ।
हरिश्चन्द्रस्तथा प्रोक्तो लकुलीशस्तथा स्मृतः ॥

भारभूतिस्तथा चैव डिण्डिमुण्डी तथैव च ।
ओषधिः पुष्करश्चाथ नैमिशी च तथा भवेत् ॥

प्रभाससंज्ञकश्चाथो अमरेश इति स्मृतः ।
निवृत्त्याख्यकलायां तु पुरामष्टोत्तरं शतम् ॥

भद्रकाली तथा प्रोक्ता वीरभद्रस्तथैव च ।
त्रिलोचनश्च लिप्सुश्च नभश्चैव तथापरः ॥

विवाहश्च तथा प्रोक्तः संवर्तश्च तथैव च ।
त्रिदशेशस्तथा प्रोक्तः त्र्यक्षश्चैव तथा स्मृतः ॥

गाणाध्यक्षो विभुश्चैव शम्भुर्दंष्ट्री च वज्रकः ।
फणीन्द्रोदुम्बरीशश्च ग्रसनो मारुताशनः ॥

क्रोधनानन्तसंज्ञौ च वृषाधारस्तथा स्मृतः ।
वृषो बलिप्रियः प्रोक्तः भूतपालस्तथा भवेत् ॥

ज्येष्ठशर्वौ तथा प्रोक्तौ सुरेशो वेदपारगः ।
ज्ञानभुक् च तथा प्रोक्तः सर्वज्ञश्च तथापरः ॥

ईशविद्याधिपौ ज्ञेयौ प्रकामदप्रसादकौ ।
श्रीधृक् चैव तथा प्रोक्तो रत्नधृक् च तथापरः ॥

लक्ष्मीधृक् च तथा प्रोक्तो जटाधर इति स्मृतः ।
सौमदेहश्च धन्यश्च रूपवांश्च तथा भवेत् ॥

निधीशश्च तथा प्रोक्तो मेघवाहन इत्यपि ।
कपर्दी च तथा प्रोक्तः तथा पञ्चशिखो भवेत ॥

पञ्चान्तकस्तथा प्रोक्तः क्षयान्तक इति स्मृतः ।
तीक्ष्णः सूक्ष्मो वायुवेगो लघुशीघ्रौ प्रकीर्तितौ ।
सुनादो मेघनादश्च जलान्तक इति स्मृतः ॥

दीर्घबाहुरिति प्रोक्तो जयभद्रस्तथापरः ।
श्वेतश्चैव तथा प्रोक्तो महाबल इति स्मृतः ॥

पाशहस्त इति ख्यातः तथा चातिबलो भवेत् ।
बलो दंष्ट्रा च विज्ञेयो तथा लोहितधूम्रकौ ॥

[1]विरूपाक्षोर्ध्वशेफौ च भयानक इति स्मृतः ।
क्रूरदृष्टिस्तथा हन्ता मारणो निर्ऋतिस्तथा ॥

तथा धर्मपतिः प्रोक्तः धर्मश्चापि तथापरः ।
वियोक्ता च तथा प्रोक्तः संयोक्ता च तथापरः ॥

---

1. ख. ऊर्ध्वलिङ्गो विरूपाक्षः ।

कर्तृसञ्ज्ञा विधाता च धाता च हरमृत्युकौ ।
याम्यः क्षयान्तकश्चैव भस्मान्तक इति स्मृतः ॥

बभ्रुश्चैव तथा प्रोक्तो दहनज्वलनौ तथा ।
हरश्च खादकश्चैव पिङ्गलश्च हुताशनः ।
अग्निरुद्रस्तथा चैव त्रिदशाधिपसंज्ञकः ॥

पिनाकी चैव शास्ता च अव्ययश्च विभूतिकः ।
प्रमर्दन इति ख्यातो वज्रदेहस्तथापरः ॥

बुद्धो ह्यजः कपालीशो रौद्रं वैष्णवमित्यपि ।
ब्राह्मं च हाटकश्चैव कूश्माण्डं च तथा भवेत् ।
कालाग्निना सह प्रोक्तं पुरमष्टोत्तरं शतम् ॥

एवं पञ्चकलानां तु भुवनानां[1] शतद्वयम् ।
चतुर्विंशोत्तरं चैतत् स्फुटं प्रोक्तं यथाक्रमम् ॥

अनाश्रितादिभुवनं शिवतत्त्वे व्यवस्थितम् ।
भुवनं शान्त्यतीतादि पञ्चप्रोक्तं च शान्तिके ॥

एकं सादाशिवं प्रोक्तं भुवनं च सदाशिवे ।
शिखण्ड्याद्यष्टभुवनं तत्त्वे त्वीश्वरसंज्ञिके ॥

मनोन्मन्यादिभुवनं शुद्धविद्याख्यके नव ।
अष्टावङ्गुष्ठमात्रादि पुरं मायाख्यके स्मृतम् ॥

शिखेदश्चैकवीरश्च तत्वे कालाख्यके भवेत् ।
पञ्चान्तकश्च शूरश्च कलायां भवति स्फुटम् ॥

पिङ्गश्च ज्योतिरित्येवं तत्त्वे विद्याख्यके [2]मतम् ।
[3]संवर्गश्चैव क्रोधेशः तत्त्वे नियतिके भवेत् ॥

एकशिवादिभुवनं रागे पञ्च व्यवस्थितम् ।
एकवीरादिभुवनं षट्तत्त्वे पुरुषे भवेत् ॥

---

1. क. ध. भुवनानि
2. घ. ख. स्मृतम्
3. घ. क. संवर्तश्चैव

श्रीकण्ठाद्यष्टभुवनं प्रकृतौ च व्यवस्थितम् ।
ब्राह्मादिभुवनं चैव बुद्धावष्टौ भवेत्स्फुटम्[1] ॥

अहङ्काराख्यतत्त्वे च स्थलेश्वर इति स्मृतः ।
मनस्तः प्राणपर्यन्ते षट्के स्थूलेश्वरो भवेत् ।
पञ्चके शङ्कुकर्णस्तु तत्त्वे कर्मेन्द्रियाख्यके ॥

कालञ्जरादिभुवनं छगलं डान्तमेव च ।
शब्दादिगन्धपर्यन्ते पञ्चके च भवेत्स्फुटम् ॥

स्थाणुमारभ्य भुवनमष्टकं व्योम्नि संस्थितम् ।
भीमेश्वरादिभुवनमष्टकं मरुति स्थितम् ॥

भैरवाद्यष्टभुवनं तेजस्तत्त्वे व्यवस्थितम् ।
लकुलीशादिभुवनमष्टकं च जले स्थितम् ।

भद्रकाल्यादिभुवनमष्टोत्तरशतं भवेत् ॥
पृथ्वीतत्वे तथा चैव पुरन्यासः प्रकीर्तितः ।

शान्त्यतीतायामकारादिविसर्गान्ताः षोडशस्वराः । शान्तौ तु कखगाः । विद्यायां घकारादिभकारान्ताः सप्तमातृकाः । प्रतिष्ठायां तु टकारादिहकारान्ताः त्रयोविंशति वर्णाः । क्ष इत्येकमक्षरं निवृत्तिलायामिति वर्णन्यासः ।

पदन्यासस्तु द्विविधः एकाशीतिपदोद्धारचतुर्नवतिपदोद्धारभेदेन । तथाऽध्वन्यासे प्रोक्तम्—

कलायां शान्त्यतीतायामोमित्येकं पदं मतम् ।
व्योमव्यापिनमारभ्य पदान्येकादश स्मृतम्[2] ॥

नित्यं योगिनपर्यन्तं शान्त्याख्यायां भवन्ति हि ।
ध्यानाहारायमारभ्य व्यापिन् व्यापिन् पदान्तकम् ।
विद्याख्यायां कलायां च पदानां विंशतिर्भवेत ॥

---

1. घ. दृभुवम्
2. ग. क. ख. स्फुटम्

प्रतिष्ठायामरूप्यादिपदानामेकविंशतिः ।
महेश्वरपदान्तं च स्फुटं प्रोक्तं यथाक्रमात ।
महादेवपदादीनामष्टाविंशतिसंख्यया ॥

निवृत्तौ तु कलायां च पदानां विततिर्भवेत् ।
इत्थं न्यासक्रमः प्रोक्त एकाशीतिपदस्य च ॥

अथवान्यप्रकारेण पदन्यासो विधीयते ।
चतुर्नवतिसंख्यानां पदानां च यथाक्रमम् ॥

अत्रापि शान्त्यतीतायामोमित्येकं पदं मतम् ।
व्योमव्यापिनमारभ्य ध्यानाहारपदावधि ॥

शान्तौ तु रविसंख्यानि पदानि च भवन्ति हि ।
ओङ्कारपदमारभ्य व्योमिन् व्योमिन् पदान्तकम् ।
एकविंशतिसंख्यानि विद्यायां च पदानि तु ॥

व्यापिन् व्यापिन् समारभ्य शर्वशर्वपदावधि ।
प्रतिष्ठायां तु द्वात्रिंशत् पदानां विततिर्भवेत् ॥

भवभवेति समारभ्य ओङ्कारपदकावधि ।
अष्टविंशतिसंख्यानि निवृत्तौ च पदानि तु ॥

एकाशीतिपदानामप्युद्धारः पूर्वमुच्यते ।
ओमित्येकाक्षरेणैव प्रथमं पदकं स्मृतम् ॥

व्योमव्यापिन इत्येव व्योमरूपाय चैव हि ।
सर्वव्यापिन इत्येवं पञ्चार्णं त्रिपदं मतम् ॥

त्र्यक्षरं च शिवायेति अनन्ताय पदं तथा ।
अनाथाय तथा प्रोक्तं द्विपदं चतुरक्षरम् ॥

अनाश्रिताय पञ्चार्णं ध्रुवाय त्र्यक्षरं मतम् ।
शाश्वताय पदं चापि चतुरक्षरमेव हि ॥

अष्टाक्षरं योगपीठसंस्थितायपदं तथा ।
नित्यं योगिन इत्येवं ध्यानाहाराय चैव हि ॥

द्वे पदे च तथा प्रोक्ते पञ्चाक्षरसमन्विते ।
तथोंनमश्शिवायेति षडक्षरमिति स्मृतम् ॥

सर्वप्रभवे पञ्चार्णं शिवाय त्र्यक्षरं मतम् ।
ईशानमूर्धायपदं षडक्षरमिति स्मृतम् ॥

तत्पुरुषवक्त्रायेति पदं सप्ताक्षरं [1]स्मृतम् ।
अघोरहृदयायेति पदं सप्ताक्षरं भवेत् ॥

वामदेवगुह्यायेति पदं सप्ताक्षरं मतम् ।
सद्योजातमूर्तये च पदं सप्ताक्षरं भवेत् ॥

ओं नमो नम इत्येवं पदं पञ्चाक्षरं भवेत ।
गुह्यातिगुह्यायपदं षडक्षरमिति स्मृतम् ॥

गोप्त्रे चेति पदं चैव द्व्यक्षरं परिकीर्तितम् ।
अनिधनायेति पदं पञ्चाक्षरमिपि स्मृतम् ॥

सर्वयोगाधिकृतायपदमष्टाक्षरं भवेत् ।
सर्वविद्याधिपायेति पदं सप्ताक्षरं स्मृतम् ॥

ज्योतीरूपायेति पदं पञ्चाक्षरमिति स्मृतम् ।
परमेश्वरपरायपदमष्टाक्षरं भवेत् ॥

अचेतनाचेतनायपदमष्टाक्षरं भवेत् ।
व्योमिन् व्योमिन् पदं पश्चात् व्यापिन् व्यापिन् पदं तथा ॥

द्वौ पदौ च परिज्ञेयौ चतुर्णसमन्वितौ ।
अरूपिनरूपिन् पदं प्रथमप्रथमेति च ॥

द्विपदौ च परिज्ञेयौ षडक्षरसमन्वितौ ।
तेजस्तेजः पदं पश्चात् ज्यातिर्ज्योतिःपदं तथा ॥

उभौ पदौ परिज्ञेयौ चतुर्णसमन्वितौ ।
अरूपेति पदं पश्चात् अनग्नीति ततः परम् ॥

1. ख. मतम्

अधूमेति पदं पश्चात् अभस्मेति ततः परम् ।
अनादे च तथा प्रोक्तं त्र्यक्षरेण समन्वितम् ।
निधनेति पदं प्रोक्तं त्र्यक्षरं पञ्चकं पदम् ॥

नानानानापदं पश्चात् धूधूधूधू तथैव च ।
द्विपदं च परिज्ञेयं चतुर्णसमन्वितम् ।
ओं भूश्चेति पदं प्रोक्तं द्व्यक्षरेण समन्वितम् ॥

ओं भुवश्च पदं पश्चात् ओं सुवश्च ततः परम् ।
द्विपदं च परिज्ञेयं त्र्यक्षरेण समन्वितम् ॥

अनिधनपदं पश्चात् चतुर्णसमन्वितम् ।
निधनेति पदं प्रोक्तं त्र्यक्षरेण समन्वितम् ॥

निधनोद्भवेति पदं पञ्चाक्षरसमन्वितम् ।
शिवेति पदकं पश्चात् शर्वेति पदकं तथा ॥

द्विपदं च परिज्ञेयं द्व्यक्षरेण समन्वितम् ।
परमात्मपदं पश्चात् माहेश्वरपदं तथा ॥

महादेवपदं [1]प्रोक्तं त्रिपदं चतुर्णकम् ।
सद्भावेश्वर इत्येवं पदं पञ्चाक्षरं भवेत् ॥

महातेजःपदं प्रोक्तं चतुर्णसमन्वितम् ।
योगाधिपते च पदं पञ्चाक्षरसमन्वितम् ॥

मुञ्चमुञ्चपदं पश्चात् चतुर्णसमन्वितम् ।
प्रथमप्रथमपदं षडक्षरमिति स्मृतम् ॥

शर्वशर्वपदं प्रोक्तं[2] भवभवेति पदं तथा ।
भवोद्भवपदं चापि प्रत्येकं चतुर्णकम् ।
सर्वभूतसुखप्रदपदमष्टाक्षरं भवेत् ॥

सर्वसांनिध्यकरेति पदं सप्ताक्षरं मतम् ।
ब्रह्मविष्णुरुद्रपरपदमष्टाक्षरं भवेत् ॥

1. ख. पश्चात्-   2. घ. क. पश्चात्

अनर्चितानर्चितेति संस्तुतासंस्तुतेति च ।
पूर्वस्थितपूर्वस्थितपदमष्टाक्षरत्रयम् ॥

साक्षिसाक्षिपदं पश्चात् तुरुतुरुपदं तथा ।
द्विपदं च परिज्ञेयं चतुर्णसमन्वितम् ॥

पतङ्गपतङ्गपदं षडक्षरसमन्वितम् ।
पिङ्गपिङ्गपदं पश्चात् ज्ञानज्ञानपदं तथा ॥

शब्दशब्दपदं पश्चात् सूक्ष्मसूक्ष्मपदं तथा ।
चतुष्पदं च विज्ञेयं चतुर्णसमन्वितम् ॥

शिवेति पदकं पश्चात् शर्वेति पदकं तथा ।
द्विपदं च परिज्ञेयं द्व्यक्षरेण समन्वितम् ॥

सर्वदेति पदं पश्चात् त्र्यक्षरेण समन्वितम् ।
ओं नमो नम इत्येव पदं पञ्चाक्षरं मतम् ॥

ओं शिवाय नमोनमः पदमष्टाक्षरं मतम् ।
ओमित्येकाक्षरं चैव पदमन्ते प्रकीर्तितम् ॥

एकाशीतिपदस्यैवमुद्धारः प्रोक्त एव हि ।
चतुर्णवतिसंख्यानामुद्धारः कथ्यतेऽधुना ॥

एकाशीतिपदोद्धारे चतुर्णवतिकं भवेत् ।
ओङ्कारपदमारभ्य ध्यानाहारपदावधि ॥

त्रयोदश पदानि स्युः एकाशीति पदे यथा ।
ध्यानाहारपदादूर्ध्वं ओमित्येकपदं मतम् ॥

द्व्यक्षरेण नमश्चेति तस्मादूर्ध्वं प्रकल्पयेत् ।
त्र्यक्षरेण शिवायेति तस्मादूर्ध्वं प्रकीर्तितम् ॥

सर्वप्रभव आरभ्य सद्योजातपदावधि ।
पदानां सप्तकं प्रोक्तमेकाशीतिपदे यथा ॥

सद्योजातपदादूर्ध्वमोमित्येकं पदं मतम् ।
द्व्यक्षरेण नमश्चेति तस्मादूर्ध्वं प्रकल्पयेत् ॥

तस्मादूर्ध्वं प्रकर्तव्यं नमश्चेति पदं तथा ।
गुह्यातिगुह्यमारभ्य धूर्ध्वेतिपदकावधि ॥

पदानां विंशतिः प्रोक्ता एकाशीतिपदे यथा ।
धूर्ध्वेति पदकादूर्ध्वं ओमित्येकं पदं मतम् ॥

भूरित्येकाक्षरेणैव तस्मादूर्ध्वपदं भवेत् ।
ओमित्येकपदं प्रोक्तं भुवश्चेति ततः पदम् ॥

ओमित्येकपदं प्रोक्तं सुवश्चेति ततः पदम् ।
अनिधनपदाच्चैव सर्वदापदकावधि ॥

द्वात्रिंशत्पदकं प्रोक्तमेकाशीतिपदे यथा ।
सर्वदाचपदादूर्ध्वमोमित्येकं पदं स्मृतम् ॥

द्व्यक्षरेण नमश्चेति शिवाय त्र्यक्षरं ततः ।
ओमित्येकं पदं प्रोक्तं नमश्चेति पदं ततः ॥

नमश्चेति पदं प्रोक्तं शिवायेति पदं ततः ।
ओमित्येकाक्षरेणैवमन्ते च पदकं स्मृतम् ॥

चतुर्नवतिसंख्यस्य चोद्धारः प्रोक्त एव च ।
आगमेषूभयं प्रोक्तं तस्माच्च द्विपदं कृतम् ॥

द्विसंख्यानां पदानां च न्यासः प्रोक्तो यथाक्रमम् ।
द्विसंख्यापदमध्ये च न्यासमेकेन कारयेत् ॥ इति ॥

शान्त्यतीतायां शिवेशानास्त्रमन्त्राः । शान्तिकलायां तत्पुरुषकवचमन्त्रौ । विद्यायां शिखाघोरौ । प्रतिष्ठायां शिरोवामौ । निवृत्तिकलायां सद्योजातहृदयमन्त्रौ । इति षडध्वन्यासक्रमः ॥ ४८ ॥

अतः परमावाहनक्रममाह—स्वाधार इति ।

स्वाधारे गतमानसश्शिवमनोऽशक्त्यात्मको दानतो
मात्रादीप्तकलेश्वरक्रमगतेर्मन्त्रं समुच्चारयन् ।
नीत्वा कान्तकमञ्जलिं परशिवं प्राप्यैकभावं ततो
घण्टानादललाटकं कुसुमगं लक्ष्ये महोऽन्तर्न्यसेत् ॥ ४९ ॥

स्वाधारे मूलाधारे **गतमानसः** प्राप्तमनाः । प्रथमं मूलाधारगतभावनायुक्तमनस्क इत्यर्थः । **शिवमनोऽशक्त्यात्मकः** शिवमनोर्मूलमन्त्रस्य शक्त्यात्मकः सामर्थ्ययुक्तस्वरूपः । प्रासादमन्त्रजपानुष्ठानेनैवावाहनादिकर्मकरणे दक्ष इत्यर्थः । **मात्रादीप्तकलेश्वरक्रमगतेः** मात्राः अकार उकार मकार बिन्दुनादाः । एतेषां स्थानानि यथाक्रमं हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्राणि । आभ्यो मात्राभ्यो दीप्ताः प्रकाशमानाः । तज्जाता इत्यर्थः । कलाश्च —

जया च विजया सौम्या अंशुसंज्ञाधृतिर्मता ।
बन्धनी मोचिनी माया मोहिनी बोधिनी इति ॥

एता हृत्स्था अकारजा दश कलाः ।

शुभा मनोरमा दीप्ता सुदीप्ता हेमकारिका ।
सुधूम्रा पिङ्गला पीता वारुणी शीघ्रगाचला ।
शशाङ्का सुप्रभा केचज्ञानदा मोक्षदापरा ॥

एताष्षोडशकलाः कण्ठस्थाः उकारजाः ।

श्रवणी श्रावणी जल्पकरी च प्राणवर्तिनी ।
सुशब्दा वाहिनी चोर्ध्वमानिनी पावनी तथा ॥

आह्लादिनी प्रवचनी योक्त्री रेतोपवाहिनी ।
पितृमार्गानुगा देवमन्त्रमार्गप्रदर्शिनी ॥

आपूरणी प्राणबद्धा चित्तस्था सुविद्धा धूम्रा ध्रुवा । इति चतुर्विंशति(?) कलाः तालुस्थाः मकारजाः । निवृत्तिप्रतिष्ठाविद्याशान्तयः एता ललाटस्थाः बिन्दुसंभवाश्चतस्रः कलाः । इन्धिका दीपिका रोचिका मोचिका ऊर्ध्वगा व्यापिनी व्योमरूपिणी अनन्ता अनाथा अनाश्रिता इति चैता नादजाः दश कलाः ब्रह्मरन्ध्रस्थाः । एतासां कलानामीश्वराः यथाक्रमेण ब्रह्मविष्णुरुद्रेश्वरसदाशिवाः । एतेषामीश्वराणां क्रमगतेः क्रमत्यागमार्गस्य **दानतः** स्वीकारात् मन्त्रं समुच्चारयन् । आचार्य इति शेषः । **अञ्जलिं** पुष्पाञ्जलिं **कान्तकं** कस्य शिरसः ब्रह्मरन्ध्रस्थानस्येत्यर्थः । तदन्तकमुन्मन्यन्तकं सप्तमस्थानरूपं द्वादशान्तं **नीत्वा** । अत्र आवाहनक्रमसंप्रदायः सूचितः । प्रथमं पुष्पाञ्जलिं मूलाधारे धृत्वा क्रमेण ऊर्ध्वमानयन् हृत्प्रदेशे किञ्चित्कालं स्थित्वा मूलमन्त्रस्य अकारत्यागेन ब्रह्मणः त्यागं कृत्वा कण्ठस्थाने स्थित्वा उकारत्यागेन

विष्णोस्त्यागं कृत्वा तदूर्ध्वं तालुस्थाने स्थित्वा मकारत्यागेन रुद्रत्यागं कृत्वा तदूर्ध्वं भ्रूमध्ये स्थित्वा बिन्दुत्यागेन ईश्वरत्यागं कृत्वा तदूर्ध्वं ब्रह्मरन्ध्रे स्थित्वा नादत्यागेन सदाशिवत्यागं कृत्वा तदूर्ध्वं द्वादशान्ते स्थित्वा परशिवमुन्मन्यन्तस्थपरशिवं सोऽहं-भावनया प्राप्य, एकभावमद्वितीयस्वरूपं संचिन्त्य ततः चिन्तनानन्तरं पुष्पाञ्जलिं अधो गमयन् भ्रूमध्ये किञ्चित्कालं स्थित्वा घण्टानादललाटकं घण्टारववद् ध्मायमानं भ्रूमध्ये समानीयानेन नादरूपेण किञ्चित्सकलत्वं चोक्तमित्यनुसन्धेयम् । ततः कुसुमगं हृत्प्रदेशस्थपुष्पाञ्जलिगतं ध्यात्वा मह इत्थंरूपं तेजः लक्ष्ये लिङ्गप्रतिमादौ अन्त-र्लिङ्गादिहृदयकमलमध्ये न्यसेत् आवाहयेत् ।

तथा श्रीपराख्ये—

एवं शान्तं वपुः कल्प्य तस्मिन् परमकारणम् ।
परमं शाश्वतं नित्यं ज्ञानानन्दसुखात्मकम् ॥

व्यापकं सर्वतत्त्वानां अप्रमेयमनौपमम् ।
वाच्यवाचकताहीनं वाङ्मनोऽतीतगोचरम् ॥

व्यक्तं कुर्याद्विशेषेण निष्कलं सकलात्मनि ।
परावाहनमेतद्धि शिवमन्त्रनियन्त्रणात् ॥ इति ॥

उक्तं च —

बिन्दुनादसमायुक्तं सान्तमन्त्रत्रयान्वितम् ।
निष्कलं परमं बीजं तदुच्चार्योन्मनान्तकम् ॥

मन्त्रमूर्तिं शिवं सृष्ट्वा भ्रूमध्ये मनसा स्मरेत् ।
चन्द्रबिम्बसमप्रख्यं स्मृत्वा पुष्पाञ्जलौ स्थितम् ॥

आवाहिन्या पुनर्नीत्वा स्थापिन्या स्थापयेद्धृदि ॥ इति ॥ ४९ ॥

अथ आवाहनादिदशसंस्कारानाह—आवाहनेति ।

आवाहनस्थापनसन्निधाननिरोधनाकुण्ठनसौधमुद्राः ।
पाद्यं तथा चाचमनार्घ्यपुष्पदानं मता संस्कृतयो दशैव ॥ ५० ॥

अत्र आवाहनमिति । आवाह्यते अनेनेति शिवमन्त्रेण आहियत इति आवाहनम् । ननु अनेन शिवस्य व्यापकाताभावः सर्वत्र सूचितः । व्यापकस्य

वस्तुनः कथमावाहनम् । पूर्वमेव सर्वत्र स्थितत्वादिति भावः । लोके तावदविद्य-मानस्य ह्वानं क्रियते तद्वत् अत्रापि अविद्यमानस्य शिवस्याह्वानं क्रियत इति शिवस्य व्यापकताभावः प्राप्तः । शिवो व्यापकः । अत एवाह्वानमेव न सङ्गत इति चेन्न । सर्वागमेषु आह्वानकर्मणः विद्यमानत्वात् । अत एवाह्वानकर्मणा व्यापकता-भावः प्राप्त इति पूर्वः पक्षः । अयमेवाभिप्रायः— यथा काष्ठे सर्वत्र स्थितस्य अग्नेरेकत्र मथनादिना प्रकाशः क्रियते तद्वदत्रापि सर्वत्र स्थितस्य वस्तुनः प्रकाश एव क्रियत इति व्यापकत्वाभावनिरासः[1] । उक्तं च—

आमूलाग्रस्थितस्याग्नेरभिव्यक्तिर्यथा तरौ ।
तद्वदेकत्र चिद्व्यक्तिर्व्यापकस्य न बाध्यते ॥ इति ॥

अत्र आवाहनमिति मनोव्यापारः । स च निरतिशयश्रद्धाविशेषः । तेन सहाभिधानं मूलमन्त्रवादेन संबोधनमभिमुखीकरणमावाहनम् । उक्तं च—

सर्वत्र व्यापिनं शान्तं देवदेवं सदाशिवम् ।
अभिमुखीकुरुते यच्च तदावाहनमुच्यते ॥ इति ॥

तच्च आवाहनं द्विविधम् । प्रतिष्ठाकाले लिङ्गादौ जीवन्यासरूपेण चित्प्रकाशरूपमावाहनमित्येकम्, प्रत्यहं पूजाकाले अभिमुखीकरणं यदावाहनं तद्द्वि-तीयम् । तदभिमुखीकरणं पञ्चवक्त्रमध्ये ऊर्ध्वस्थितस्य ईशानवक्त्रस्यैव क्रियते ॥ उक्तं च—

यस्यां दिशि भवेद् द्वारं तां प्राचीं परिकल्पयेत् ।
तत्र तत्पुरुषं वक्त्रं चोर्ध्वं चाभिमुखं भवेत् ॥

ऊर्ध्ववक्त्रे तु दातव्यं संमुखं च पराङ्मुखम् । इति ॥

अत्र स्थाप्यत इति स्थापनं, मदनुग्रहार्थं भगवान् कृपानिधिः लिङ्गादावास्त इति श्रद्धया मनोभावः स्थापनम् । भक्त्या निवेशनं तत्र स्थापनं कथितं बुधैः इत्युक्तत्वात् । सन्निधानं पूज्यपूजकयोरनुग्राह्यानुग्राहकलक्षणसम्बन्धः । प्रसादपरम्पराभिमुखीभाव इति यावत् । निरुध्यत इति निरोधनं भगवान् परशिवः सततं मयि अनुग्रहपरो भवेदिति प्रार्थनाविशेषो निरोधनमित्यर्थः ।

---

1. ख. त्वबाधनिरास :

सतां गुणोऽयं प्रार्थनारूपविधानम् इति पक्वमलानामपि शिवत्वव्यक्तिनिरोधनम्। अवकुण्ठनं शिवस्य भक्तेषु प्रत्यक्षेण प्रकाशोऽवकुण्ठनम्। तेषां निरोधनकारणत्वात् शिवस्य हृदयादिस्थानेषु हृदयादिमन्त्राणां विन्यासः कवचेन आवेष्टनमित्येके। सौधमुद्रा धेनुमुद्राः। अनेनामृतीकरणं द्योतितं भवति। उक्तं च—

हृदयं हृदये शुभ्रं पीतं शिरसि तच्छिरः।
शिखायां तु शिखां रक्तां कृष्णं देहे तनुच्छदम्॥

अस्त्रं वह्निसमप्रख्यं अस्त्रसंख्येषु विन्यसेत्।
मूलेनारोप्य देवस्य पुष्पं शिरसि मन्त्रितम्॥

शिवैकवर्णतां ध्यायेदङ्गानामङ्गिना सह।
अमृतीकरणं कुर्यात् मन्त्राणां धेनुमुद्रया॥ इति॥

मुद्रेति आवाहनादिमुद्राः सूचिताः। मुद्राशब्दो द्विधातुजः मुदहर्षे द्रव भीतायां गतौ इति। देवानां मोदनात् असुराणां द्रावणात् मुद्रेत्यर्थः। उक्तं च—

मुदं करोति देवानां द्रावयत्यसुरांस्तथा।
मोदनाद् द्रावणाच्चैव मुद्रेति परिकीर्तिता॥

हस्तावञ्जलिं कृत्वा अनामिकामूलपर्वण्यङ्गुष्ठसंयोजनेनावाहिनी। इयमेवाधोमुखी स्थापनी। संलग्नमुष्ट्युच्छ्रिताङ्गुष्ठौ करौ सन्निधानी। तावेवगर्भाङ्गुष्ठौ निरोधिनी। उभौ मुष्टिं बध्वा तर्जनी(न्यौ) प्रसार्य मण्डलाकारेण चलनादवकुण्ठनमुद्रा। अन्योऽन्यग्रथिताङ्गुलिषु कनिष्ठानामिकयोर्मध्यमतर्जन्योश्च गोस्तनाकारा सौधमुद्रा। पाद्यं पादशौचार्थं जलं सहृदा नमोऽन्तमूलेन पादयोर्देयम्। आचमनं स्वधान्तेन पञ्चमुखेषु देयम्। अर्घ्यं स्वाहान्तेन पञ्चमूर्धसु, पुष्पदानं दूर्वापुष्पाक्षतादिदानं वौषडन्तेन दद्यात्। उक्तं च—

पद्भ्यां निवेदयेत्पाद्यं दक्षहस्तेन संमुखम्।
मुखेष्वाचमनं तद्वत् अर्घ्यं पञ्चसु मूर्धसु॥

दूर्वापुष्पाक्षतानीकं पश्चाल्लोकोपचारतः।
नमस्कारस्वधास्वाहावौषडादियुता हृदा॥
चतुष्टयमिदं तत्र परिपाट्या निवेदयेत्। इति॥

एवं संस्कृतयः संस्काराः दशैव दशसंख्यावाचिनः। उक्तं च—

आवाहनं स्थापनं च सान्निध्यं सन्निरोधनम्।
सकलीकृतिरेकत्वमवकुण्ठनपूर्वकम्॥
पाद्यमाचनं चार्घ्यं पुष्पैः संस्कृत्य शङ्करम्। इति॥

मताः अभिमताः। एवकारेण प्रधानभूता एते दश संस्काराः तदङ्गभूता अन्य इति ज्ञापनं कृतमित्यवगन्तव्यम्॥ ५०॥

शिवस्य क्रियमाणाः सर्वोपचाराः पञ्चोपचारसमुदायेन पञ्चमहाभूतसंज्ञासम्बन्धिन इत्याह—गन्ध इति।

गन्धो मूलफलादिकन्दकुसुमाद्यन्नादिकं पार्थिवं
चाप्यं वारि पयः पटादि दधिकं चाग्नेयमिष्टं मणिः।
दीपाद्याभरणादि मारुतमथो धूपं तथा चामरं
घण्टागीतरवादि नाभसममी पञ्चोपचाराश्शिवे॥ ५१॥

गन्धः श्रीचन्दनं मूलं ह्रीबेरादिकं फलं चूतफलादिकं कन्दं सूरणादिकं कुसुमादि पत्रपुष्पादि अन्नादिकमपूपादिकं नैवेद्यादि एभिः क्रियमाण उपचारः पार्थिवः पृथिवीसंबद्धः, वारि उदकं पयः क्षीरं, पटादि वस्त्रकौशेयादि दधिकमाप्यं वारिसम्बन्धं इष्टं महत्प्रभायुक्तमित्यर्थः। मणिः नवविधरत्नं दीपादि तैलघृतकर्पूरादिकं आभरणादि स्वर्णरजतादिनिर्मितं, आग्नेयं अग्निसम्बन्धं धूपं सर्जरसादि, चामरं चामरव्यजनादि, मारुतं वायुसंबन्धं घण्टागीतरावादि घण्टाध्वनिगानमुरजादिस्तोत्रादिकं, नाभसमाकाशसम्बद्धम्। अनेन प्रकारेण शिवे शिवपूजाविषये पञ्चोपचाराः। तथा चोक्तम्—

पार्थिवं गन्धपुष्पाद्यं कन्दमूलफलादिकम्।
आप्यं वारिपयोवस्त्रदधिगोमूत्रकादिकम्॥

आग्नेयं हेमरत्नादि दीपमाभरणादिकम्।
वायव्यं चामरं धूपं व्यजनं वातकारणम्॥

नाभसं गेयवाद्याद्यं घण्टावेदस्वनादिकम्।
एते पञ्चोपचारास्तु कथिताः शास्त्रवेदिभिः॥ इति॥ ५१॥

अथ जपविधिमाह—**स्वाधारेति** ।

स्वाधारोदितनादतः शिवपथे मेधादिकार्काः कला-
मात्रास्तत्पदसंस्थितांस्तदधिपान्मत्वा लयं तत्परम् ।
कर्षन्नङ्गुलिमध्यतोऽक्षनिकरं चैकैकशो मानसं
जप्त्वोपांशु समर्पयेच्छिवमनु देवे जपं स्वाकृतम् ॥ ५२ ॥

स्वाधारोदितनादतः मूलाधारोत्थितनादात् । तद्वाचकहकारभूता-दित्यर्थः । **शिवपथे** निष्कलशिवं प्रति गमनमार्गे **मेधादिकार्काः** मेधा औकार-तदादिकाः तत्प्रथमाः । अर्काः द्वादशसंख्याः कलाः कला इत्युच्यन्ते । ओकार एकार उकार इकार अकार आकार ईकार ऊकार ऐकार औकार (सानुस्वाराः) विसर्गान्ताः कलाः ता एव मात्रा उच्यन्ते । तत्पदसंस्थितान् ओ ए उ इ अकार-पदेषु स्थितान् तदधिपान् ओकारादिपञ्चवर्णानामधिपान् । अथवा हृत्कण्ठतालु-भ्रूमध्यब्रह्मरन्ध्रस्थानेषु स्थितान् क्रमेण अकार उकार मकार बिन्दु नाद पदेषु स्थितान् एतेषामधिपान् ब्रह्मविष्णुरुद्रेश्वरसदाशिवान् **लयं मत्वा** लयं गता इति विचिन्त्य, तत्परं तस्मात् ब्रह्मरन्ध्रस्थानात् परं ऊर्ध्वं विद्यमानद्वादशान्तस्थपरशिवं मत्वा तद्गतमना भूत्वेत्यर्थः । अक्षनिकरं जपमालायां विद्यमानरुद्राक्षसमूहम् । एतल्लक्षणमागमोक्तं यथा—

शतेनाष्टोत्तरेण स्यादक्षसूत्रं सदोत्तमम् ।
तदर्धं मध्यमं प्रोक्तं तदर्धं कन्यसं मतम् ॥

रुद्राक्षजं महाभूत्यै मुक्तिदं परमं शुभम् ।
एकवक्त्रैस्त्रिवक्त्रैर्वा चतुर्वक्त्रैश्च पञ्चभिः ॥

षड्वक्त्रैर्वाऽथ कर्तव्यं तस्मान्मिश्रैस्तु वर्जयेत् ।
मुखे मुखं प्रकर्तव्यं मूलं मूलेन संस्थितम् ॥

धात्रीफलप्रमाणं यत् श्रेष्ठमेतदुदाहृतम् ।
बदरायाः प्रमाणं वा चणकं मध्यमाधमम् ॥

नवत्रितंतुना प्रोतं कर्तव्यं पूर्ववच्छुभम् ।
नागपाशं तु सावित्री ब्रह्माख्यं वाथ ग्रन्थनम् ॥

ग्रन्थ्यूर्ध्वगं तु मेर्वाख्यं कर्तव्यं नैव लङ्घयेत् ॥ इति ॥

अथवा सप्तविंशतिभिः कार्यम् । उक्तं च —

सप्तविंशतिमिश्राक्षैः पञ्चवक्त्रैर्विशेषतः ।
अक्षसूत्रं प्रकर्तव्यं गोपुच्छवलयाकृति ॥ इति ॥

अङ्गुलिमध्यतः मध्यमाङ्गुलेः एकैकशः एकैकं कर्षन् भुक्तये चेत् सृष्टि-मार्गेण मुक्तये चेदूर्ध्वमार्गेण । उक्तं च—

भुक्तये सृष्टिमार्गेण कर्षयेदक्षसूत्रकम् ।
ऊर्ध्वमार्गेण मुक्त्यर्थं कर्षयेत्तु शनैश्शनैः ॥

मेरुं न लङ्घयेन्मन्त्री लङ्घयन् दोषभाग्भवेत् ।
मेरुहीनाक्षमाला तु कर्तव्या वा प्रयत्नतः ॥ इति ॥

अङ्गुष्ठतर्जनीभ्यां कर्षयेदिति शेषः । उक्तं च —

अङ्गुष्ठतर्जनीभ्यां तु मध्यमायां व्यवस्थितम् ।
मन्त्रमुच्चारयन्नक्षमेकैकं कर्षयेच्छनैः ॥

ततो मेर्ववसाने तु नागेन्द्रपरिवर्तनम् ।
शतमष्टोत्तरं जप्त्वा सहस्रं चार्धमेव च ॥

नासंख्यं न परिभ्रान्तं न विलम्बितमेव वा । इति ॥

मानसं जप्त्वा मनोभावनया जपन्नित्यर्थः । **उपांशु** ओष्ठस्पन्दनमात्रेण आत्मनैव शृण्वन् उपांशु । तदुक्तम्—

मानसं मनसा कार्यं प्राणवृत्तिनिरोधतः ।
ओष्ठस्पन्दनमात्रेण चोपांशुः परिकीर्तितः ॥

परेषां शृण्वतां भाष्यो यश्शब्दजनकस्स्मृतः ।
मानसं सात्त्विकं विद्यात् राजसं च द्वितीयकम् ॥

विस्पष्टस्तामसः प्रोक्तः तामसः क्रूरकर्मणि ॥ इति ॥

एवं शिवमनुं शिवमन्त्रं जप्त्वा स्वाकृतं स्वेन कृतं जपं देवे समर्पयेत् समर्पणं कुर्यात् । समर्पणप्रकारः - जपमालां दक्षकरान्तस्थां कृत्वा षडङ्गेनार्चितं कवचास्त्रसंरक्षितं तद्धस्तं कृत्वा हृत्प्रदेशे निधाय भूमिष्ठदक्षजानुको भूत्वा,

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे येन त्वत्प्रसादात् त्वयि स्थितः ॥

इति पठित्वा शिवाय जपं गृहाण स्वाहेत्यर्घ्याम्बु[1] चुलुकेन सदाशिववरदहस्ते निवेदयेत् इति ॥ ५२ ॥

अग्निकार्यविधानक्रमं युग्मेनाह—नेमीति ।

नेमीनाभिगहास्तवह्निवसतावष्टादशाख्यैर्युते
संस्कारैररणिद्विजादिगृहजं विन्द्वादिवह्न्यैक्यगम् ।
वागीश्यां जनितं शिवाग्निमनघं नाड्या प्रविश्यैव तत्-
स्वान्ते पूर्ववदर्चिते परशिवे निस्सृत्य चोर्ध्वानने ॥ ५३ ॥

वह्न्युर्ध्वास्यसुसंधिते घृततिलैर्हुत्वा तु शक्तिं स्रुचि
न्यस्त्वा च स्रुवशम्भुमात्मनिनदान्मन्त्रं समुच्चारयन् ।
क्षुब्ध्वा शक्त्यमृतं ततः प्रसरतो नाड्या प्रयुक्ताज्यतः
पूर्तिं होमविधेः स्रुचा त्वमृतधीः पूर्णां विदध्याच्छनैः ॥ ५४ ॥

नेमीनाभिगहास्तवह्निवसतौ नेमयो मेखलाः नाभिः कुण्डमध्ये कुण्डार्धप्रमाणेन पद्मवद्विधीयमानोऽन्तःप्रदेशः[2] कुण्डयोनिः । कार्येति शेषः । इत्थं नेमीनाभियुक्तो नेमीनाभिगतः । तथाविधायां हास्तवह्निवसतौ हस्तप्रमाणकुण्डे अष्टादशाख्यैः अष्टादशसंख्यायुक्तैः संस्कारैः कुण्डशुद्ध्यर्थं विधीयमानकर्मविशेषैः युते युक्ते निरीक्षणप्रोक्षणताडनाभ्युक्षणखननावकिरणपूरणसमीकरणसेचनकुट्टनसंमार्जनसमालेपनकलामयकल्पनत्रिसूत्रीवेष्टनकलामयाभ्यर्चनरेखाचतुष्टयवज्रीकरणचतुष्पथान्ता अष्टादशसंस्काराः । ननु अक्षपाट इति एकः संस्कारो विधीयते । तस्मात् कथमष्टादश इति नियमः । केचित्तु कलामयाभ्यर्चनाख्यसंस्कारं कलामयकल्पनाख्यसंस्कारेऽन्तर्भाव

1. घ. स्वाहेति दूर्वाम्बु

2. घ. उन्नतप्रदेशः

कृत्वाक्षपाटेन सहाष्टादश संस्कारान् प्राहुः । अस्मत्संप्रदायज्ञैः पूर्वाचार्यैरक्षपाटाख्यः संस्कारोऽष्टादशसंस्कारमध्ये नाङ्गीकृतः । अनङ्गीकरणप्रकारस्तु पूर्वाचार्यवचनक्रमपाठादेव सिध्यति । तद्यथा सोमशम्भुपद्धत्याम्—

निरीक्षणं च कुण्डस्य प्रोक्षणं ताडनं कुशैः ।
विदध्यादस्त्रमन्त्रेण वर्मणाभ्युक्षणं मतम् ॥

खड्गेन खातुमुद्धारं पूरणं समतामपि ।
कुर्वीत वर्मणा सेकं कुट्टनं च शराणुना ॥

संमार्जनं समालेपं कलारूपप्रकल्पनम् ।
त्रिसूत्रीपरिधानं च वर्मणा ह्यर्चनं हृदा ॥

रेखात्रयमुदक्कुर्यादेकां पूर्वाननामथ ।
कुशेन शिवशस्त्रेण यद्वा तासां विपर्ययः ॥

वज्रीकरणमस्त्रेण हृदा दर्भैश्चतुष्पथम् । इति ॥

अत्र तु कलारूपप्रकल्पनसंस्कारानन्तरं त्रिसूत्रीपरिधानसंस्कारमुक्त्वा तदनन्तरं वर्मणाभ्यर्चनं हृदेति कलाभ्यर्चनसंस्कारो विहितः । अत एव हि कलारूपाभ्यर्चनं पृथक्संस्कार इति ज्ञापितम् । यदा पृथक्संस्कारो न भवति तदा कलारूपप्रकल्पनसंस्कारनन्तरमेव कलाभ्यर्चनं ब्रूयात् । किंच पृथक्संस्कारकत्वाभावे कलारूपप्रकल्पनानन्तरमेव कलाभ्यर्चनं पृथक्संस्कार इति पृथक्संस्कारत्वादेव अक्षपाटसंस्कारोऽष्टादशसंस्कारमध्ये नाङ्गीकृत इति ज्ञापितम् । तथा ज्ञानरत्नावल्यामपि क्रमपाठः—

चक्षुषा सप्रसादेन वीक्ष्य प्रोक्ष्य शिवाणुना ।
आताड्याभ्युक्षयेद्विद्वान् वौषडन्तेन वर्मणा ॥

अस्त्रेण खातमुद्धारं पूरणं समतां हृदा ।
सेचनं कवचेनाथ कुट्टनं हेतिनाचरेत् ॥

संमार्जनं समालेपं कवचेन समाचरेत् ।
न्यस्तव्याश्शान्त्यतीताद्याः मध्यपूर्वादितः कलाः ॥

त्रिसूत्रीपरिधानेन तनुत्राणेन वेष्टयेत् ।
कलामयाय कुण्डाय नमस्संयोज्य चार्चनम् ॥

तिस्रः पूर्वाननाः कार्याः रेखैका चोत्तरानना ।
वज्रीकरणमस्त्रेण वज्राकारकुशैस्त्रिभिः ॥

हृदा चतुष्पथं कार्यं सोमेन्द्राग्रकुशद्वयात् ।
इत्यष्टादश संस्काराः कुण्डे प्रोक्ताः समासतः ॥

अक्षपाटाय कण्ठोर्ध्वे कवचेन कुशान् न्यसेत् ।

अक्षपाटेति तिरस्करिणी शाटी । नन्वाचार्यैरपि अक्षपाटसंस्कारः कथं नाङ्गीकृतः अक्षपाटस्य वागीश्वरीवागीश्वरयोस्तिरस्करिणीशाटयर्थं विहितत्वादक्षपाटसंस्कारोऽष्टादशसंस्कारमध्ये नाङ्गीकृतः । किंतु कलारूपप्रकल्पनकलाभ्यर्चनसंस्कारयोर्भेदो नास्तीति तयोरेकीभावं मत्वा अक्षपाटेन सहाष्टादशसंस्कारोऽङ्गीकृतश्चेत्, तर्हि मण्टपस्याष्टादशसंस्कारे क्रियमाणे तिरस्करिणीशाटयर्थं तत्र मण्टपेऽक्षपाटसंस्कारं कर्तुमशक्यत्वादष्टादशसंस्कारमध्येऽक्षपाटसंस्कारानङ्गीकरणे सिद्धमभिमतम् । कुण्डमध्ये वागीश्वरीवागीश्वरावाहनं कर्तव्यमिति शेषः । **अरणिद्विजादिगृहजं** अरणिः अश्वत्थादिवृक्षविशेषः । द्विजः श्रोत्रियः । आदिशब्देन स्वगृहसूर्यकान्तादिः गृह्यते । एतेभ्य उत्पन्नम् । अरणेः सूर्यकान्तात् द्विजगृहात् स्वगृहाद्वा वह्निं मृत्पात्रे ताम्रपात्रे वा समानीयेति क्रियाक्रमे । सूर्यकान्तादीनामुत्तममध्यमाधमत्वं यथाक्रमेण द्रष्टव्यम् । तथा कारणे—

सूर्यकान्तोद्भवः श्रेष्ठः काष्ठजो मध्यमो भवेत् ।
श्रोत्रियागारजो वह्निः कन्यसस्त्विति कीर्तितः ॥ इति ।

बिन्द्वादिवह्न्यैक्यगं बिन्द्वग्निना नाभ्यग्निना चैकीभावं गतम् । तथा ज्ञानरत्नावल्याम्—

अग्नेर्बीजेन चैतन्यं हृदा संहारमुद्रया ।
आदाय योजयेद्बिन्दौ पूरकेण ततो हृदि ॥

नाभौ वा वह्निना चैक्यं कृत्वा कुम्भकयोगतः ।
रेचकेन बहिर्नीत्वा ज्वलदग्नौ निवेशयेत् ॥ इति ॥

वागीश्यां जनितं वागीश्वरीदेव्यामुत्पन्नम् । अनेनाग्नेर्गर्भाधानादिसंस्काराः सूचिताः । गर्भाधानादिसंस्काराय कुण्डाग्नौ सद्योजातशिवस्मरणपूर्वकं, सद्योजातेनाभ्यर्च्य स्वाहान्तहृदयेन आहुतित्रयं तिलैर्दद्यात् । तथा चोक्तं षट्सहस्रिकायाम्—

योऽग्नौ तु बीजवत् क्षिप्त्वा सद्योजातं शिवं स्मरन् ।
सद्योजातेना(न चा)भ्यर्च्य हृदा त्र्याहुतिके तिलैः ॥ इति ॥

पुंसवनादिष्वपि वामदेवादिशिवस्मरणपूर्वकं पूजनं कार्यमिति षट्सहस्रिकायामुक्तमनुसन्धेयम् । शिखामन्त्रेण वाऽग्नेर्मूर्धादिवक्त्राङ्गारकरणं सीमन्तोन्नयनम् । तथोक्तं मृगेन्द्रवृत्तौ भगवता नारायणकण्ठेन—ततोऽनन्तरं पूजाप्रकरणोक्तवत् अष्टत्रिंशत्कलाभिः तद्वपुर्निष्पाद्यम् । अथवा समुदायत इति ईशानमूर्धतत्पुरुषवक्त्राघोरहृदयवामदेवगुह्यसद्योजातमूर्तित्वेन तद्देहं संपादयेदिति । शिवाग्निं शिवेतिकृतनामधेयाग्निम् । अनेन नामकरणं सूचितम् । उक्तं च—

नामकर्म च कर्तव्यं शिवाग्निरिति नामतः ।
शेषसंस्कारसंसिद्ध्यै पश्चात् पूर्णां प्रदापयेत् ॥ इति ॥

आत्मविद्याशिवतत्त्वैर्वा नामकरणं कार्यम्[1] । उक्तं च—

अथवान्यप्रकारेण शिवाग्निं कारयेदिह ।
आत्मविद्याशिवाख्यैश्च त्रिधा पूर्णां प्रदापयेत् ।
शिवाग्निर्जायते तेन सर्वसंस्कारवर्जितः ॥ इति ॥

अनघं शिवसंबन्धं तेजोमयत्वात् पुण्यस्वरूपम् । अनेन प्रार्थना द्योतिता । उक्तं च—

अग्ने त्वमैश्वरं तेजः पावनं परमं यतः ।
तस्मात्त्वदीयहृत्पद्मे संस्थाप्य तर्पयाम्यहम् ॥ इति ॥

नाड्या प्रविश्य सुषुम्नारूपमध्यमनाड्या अग्नेः विग्रहस्यान्तः प्रवेशं कृत्वा प्रविष्टोऽहमिति स्वात्मानं संस्मरेदित्यर्थः । तत्स्वान्ते तस्याग्नेर्हृदयकमले । पूर्ववत् प्रथमोक्तवत् परशिवे अर्चिते पूजिते सति आधारशक्त्यादिकुटिलाशक्त्यन्तासनोपरि भास्वरां मूर्तिं सङ्कल्प्य तस्यां मूर्तौ शिवमावाहिन्या आवाह्य स्थापिन्यादिभिः संस्कृत्य अष्टत्रिंशत्कलासहितं बहिरेकावरणेन समायुक्तं पञ्चावरणसहितं वा श्रेयोपाधिवशात् सावरणं शिवमरुणवर्णसमोपेतं ध्यात्वा संपूजयेदित्यर्थः । निस्सृत्याग्नेर्विग्रहात्

1. ख. कर्तव्यम्

बहिर्निर्गत्य ऊर्ध्वानने प्रथमं वह्निशिववक्त्रयोः संधानं कृत्वा ऊर्ध्वीकृतेशानादिवक्त्रे। एतेन वक्त्राभिघारवक्त्रसन्धानवक्त्रैकीकरणानि सूचितानि। अभिघारणं नाम तद्वक्त्रे पृथक् पृथक् [1]आहुतिदानम्। संधानं नाम समष्टीकृतोच्चारेण द्वयोः वक्त्रयोरेकाहुतिदानम्। वक्त्रैकीकरणं नाम पञ्चवक्त्राणामेकवारोच्चारेण अग्नितो वायुं गतया निर्ऋतित ईशानं गतयाविच्छिन्नया घृताहुतिधारया तत्तदभिवाञ्छितवक्त्रे शेषवक्त्राणामन्तर्भावं विभावयेत्। तत्तदूर्ध्वीकृतवक्त्रं वृवृतास्यं विभावयेत्। उक्तं च—

वक्त्राणामभिघारोऽग्नेस्सन्धानं च मुखैकता।
सद्येन जुहुयादाज्यं पश्चिमास्ये हविर्भुजः॥

वामेनोदङ्मुखे हुत्वा दक्षास्ये बहुरूपिणा।
पुंसा प्राग्वदने चोर्ध्वमुखे चैशानमन्त्रतः॥

एकैकया घृताहुत्या तिसृभिर्वाऽभिघारणम्।
कथ्यते वक्त्रसन्धानं पञ्चाज्याहुतया यथा॥

जुहुयादजवामाभ्यां स्रुवेणाज्यं तदास्ययोः।
[2]जुहुयाद्वामघोराभ्यां तद्वक्त्रद्वितये घृतम्॥

जुहुयात्पुरुषेशाभ्यां तद्वक्त्रद्वितये घृतम्।
ऐशे च जुहुयादाज्य तद्वक्त्रे शिववाचकम्॥

एका वा वक्त्रसन्धाने तिस्रो वाहुतयो मताः।
कथितं वक्त्रसन्धानं कथ्यते च मुखैकता॥

सद्यादिपञ्चवक्त्रेभ्यो घृतधारां क्षिपेत्तथा।
अग्निकोणमथारभ्य वायुकोणान्तनीतया॥

निर्ऋतेः कोणमारभ्य रुद्रकोणान्तनीतया।
कुर्वीत वदनैकत्वमविच्छिन्नाज्यधारया॥ इति॥

सद्यादिक्रमेणैशान्ये वक्त्रैकीकरणं मुक्तिकर्मणि। तथा कालोत्तरे—

ईशाने मुक्तये होमः पुरुषे चाणिमादिकम्॥ इति॥

---

1. ख. प्रधानाहुति 2. घ. ग. ख. घोरतत्पुरुषाभ्यां तु तद्वक्त्रद्वितये घृतम्।

भुक्तिकर्मणि तु वक्त्राभिघारं सद्यादिक्रमेण कृत्वा वक्त्रसन्धानवक्त्रैकीकरणं तु ईशानादिक्रमेण कार्यम्। तथा कालोत्तरे—

वक्त्राभिघारसन्धाने वक्त्रैक्यं च समाचरेत्।
पश्चिमादीशपर्यन्तं स्वमन्त्राहुतियोगतः॥

वक्त्राभिघारः कथितो वक्त्राणां दीपनं परम्।
शिवमन्त्रेशमन्त्राभ्यां द्वाभ्यामुपरि कल्पयेत्॥

पुरुषाघोरमन्त्राभ्यां वामसद्यद्वयोरपि।
एकैकाहुतिदानेन सन्धानं तत्र कल्पयेत्॥

द्वाभ्यां चैव तु वक्त्राभ्यामाहुत्यैकां प्रदापयेत्।
पञ्चाहुतिप्रयोगेण वक्त्रसन्धानमीरितम्॥ इति॥

अथवा ईशानादिक्रमेण वक्त्राभिघारं कार्यम्। उक्तं च—

वक्त्राभिघारसन्धाने कुर्यात् सद्यादिशंबरैः॥
यद्वेशानादिभिः पश्चात् कर्म ज्ञात्वाननैकताम्॥ इति॥

नित्यकर्मणि तु सद्योजातवक्त्रे शेषवक्त्राणामन्तर्भावं विभाव्य तद्वक्त्रं कुण्डप्रमाणं विभावयेदिति वक्त्रैकीकरणम्। तथा कालोत्तरे—

'नित्यकर्मविधानं तु वक्त्रेऽस्मिन् पश्चिमे हुतम्' इति। तथोक्तं सिद्धान्तशेखरे—

नित्यकर्मणि शिष्याणां संस्कारे समयाह्वये।
सद्योजातमुखेऽन्यानि चान्तर्भूतानि भावयेत्॥ इति॥

पश्चिमे नित्यहोमं शिष्यसंस्कारं समाचरेदिति सोमशम्भौ। तत्पुरुषाघोरवामदेववक्त्राणां सद्यादिक्रमेण वा ईशानादिक्रमेण वा त्रयाणां वक्त्राभिघारसन्धाने विधाय, तत्पुरुषादित्रिवक्त्राणां वक्त्रैकीकरणे तु तत्पुरुषादित्रिवक्त्रमीशानस्थाने संधाय, तदीशानं तत्पुरुषादित्रयाणां स्थाने संदध्यात्। तथा चोक्तम्—

वक्त्राभिघारसंधाने कुर्यात् सद्यादिशम्बरैः।
यद्वेशानादिभिः पश्चात् कर्म ज्ञात्वाननैकताम्॥

ध्यात्वा वक्त्राणि पञ्चाग्नेर्येन यत्कर्म वाञ्छितम् ।
तं मुख्यमूर्ध्वे कुर्वीत तत्स्थाने चोर्ध्वगं मुखम् ॥

अन्तर्भाव्यान्यवक्त्राणि तच्च कुण्डप्रमाणकम् ॥ इति ॥

यद्वेशानवक्त्रेऽन्यवक्त्राणामन्तर्भावं विभाव्य तत्तद्वक्त्रोक्तफलप्रदत्वमीशानवक्त्रे विभावयेत् । अन्यवक्त्राणां मध्ये ईशानवक्त्रस्य सर्वकामफलप्रदत्वेन मुख्यत्वात्, 'एकैव बहुरूपा तु सर्वकामफलप्रदा' इतिवचनात्, बहुरूपाया ईशानजिह्वेऽतिप्रसङ्गाच्च । तथा कामिके—

बहुरूपेशजिह्वा स्याज्जिह्वास्थानं प्रकीर्तितम् । इति । वक्त्रैकीकरणेन कृतोर्ध्ववक्त्रे हिरण्यादिसप्तजिह्वानां जिह्वाभिधारसन्धानैकीकरणानि विधेयानि । उक्तं च—

यादिहान्ता विना रेफं रेफषष्ठस्वरान्विताः ।
एकैकाहुतिदानेन जिह्वादीपनमाचरेत् ॥

द्वाभ्यां द्वाभ्यां तु संधानं कृत्वा मध्ये लयं नयेत् ॥ इति ॥

वह्न्यूर्ध्वास्यसुसन्धिते—वह्निवक्त्रोर्ध्ववक्त्रयोस्सन्धाने कृते सति घृतलैर्हुत्वा घृतस्य अष्टादशसंस्काराः । तथा चोक्तमाचार्यैः—

वीक्षणादिचतस्रश्च वह्नौ तद्भ्रमणं त्रिधा ।
तापनाधिश्रयोद्वासमुत्प्लवं संप्लवं तथा ॥

घृतनीराजनोद्द्योतमन्त्रद्योतनमन्त्रणम् ।
रक्षाकुण्ठनशोध्यश्च घृतेऽष्टादशसंस्कृतिः ॥

कर्तव्या मन्त्रपूताश्च तदा तदमृतं भवेत् ।
ध्यात्वामृतमयं सर्पिस्तेनान्याज्यं च शोधयेत् ॥

हृदा बिन्दुविनिक्षेपात्सुगन्धं गालितं शुभम् ॥ इति ॥

स्रुचि शक्तिं स्रुवे शम्भुं न्यस्य । तथा कामिके—

गृहीत्वा स्रुक्स्रुवावस्त्रेणाभ्युक्ष्य कवचेन च ।
अवकुण्ठ्य प्रताप्याग्नावाभ्राम्य च तदग्रकम् ॥

दर्भाग्रेणैव संस्पृश्याभ्राम्य मध्यं तु मध्यतः ।
पुनराभ्राम्य मूलेन मूलं संस्पृश्य तद्द्वयोः ॥

तत्त्वत्रयं च विन्यस्य स्रुचि शक्तिं च विन्यसेत् ।
स्रुवे शम्भुं समभ्यर्च्य स्वात्मनो दक्षिणे न्यसेत् ॥

दर्भाणामुपरिष्टात्तु पूजयेद्धृदयेन तु । इति ॥

आत्मनिनदात् स्वात्मनादान्तं मन्त्रं समुच्चारयन् **शक्त्यमृतं** शक्तिमण्डलाधिष्ठितामृतं क्षुब्ध्वा ततश्शक्तिमण्डलात्, **नाड्या** सुषुम्नारूपया ब्रह्मनाड्या **प्रसरतः** स्रवमाणात् **प्रयुक्ताज्यतः** स्रुचा स्रुवेण पूर्यमाणघृतात्, **अमृतधीरमृतात्मकबुद्धिः** । आज्येनामृतभावनया होमं कुर्वन्नित्यर्थः । होमविधेः होमविधानस्य **पूर्तिं** पूरणस्वरूपां **पूर्णां** पूर्णाहुतिं स्रुचा **शनैः** अविच्छिन्नात्मकधारयेत्यर्थः । **विदध्यात्** कुर्यात् । अत्र पूर्णाहुतिक्रमः—स्रुवेण स्रुचमाज्येनापूर्योर्ध्ववक्त्रां स्रुचं गृहीत्वा तद्वक्त्रोपर्यधोमुखं स्रुवं निधाय स्रुगग्रे पुष्पमारोप्य शङ्खसंनिभमुद्रायुक्ताभ्यां हस्ताभ्यां स्रुक्स्रुवयोर्मूलं गृहीत्वा, सव्येन तन्मूलोपरिभागं वामेन तन्मूलपश्चाद्भागं संगृह्य समपादः समुत्थाय ऋजुकायस्सन् स्वनाभौ स्रुक्स्रुवयोर्मूलं किञ्चित्तिर्यग्विधाय स्रुगग्रदत्तदृष्टिः वौषडन्तमूलं प्लुतान्तमुच्चरन् स्रुक्स्रुवयोर्मूलं क्रमेण वामस्तनान्तमानयन् घृतधारां बिन्दुस्थानाद्विनिस्सृतामृतधारां संस्मरन् यवप्रमाणधारया अविच्छिन्नधारया समस्तमाज्यं वह्नौ जुहुयादिति पूर्णाहुतिविधिः । उक्तं च —

घृतेन स्रुचमापूर्य निधायाधोमुखं स्रुवम् ।
तदग्रे पुष्पमारोप्य शङ्खसंनिभमुद्रया ॥

हस्ताभ्यां स्रुक्स्रुवौ धृत्वा तन्मूलं नाभिमध्यगम् ॥

कृत्वा चोत्थाय संतिष्ठेदृजुकायस्समाहितः ।
मूलमन्त्रमतिस्पष्टं वौषडन्तं समुच्चरन् ॥

बिन्दोरुद्गीर्णपीयूषैः नासारन्ध्रविनिर्गतैः ।
स्रुचमापूरयन् सर्पिः पूर्णां दद्याच्छिवानले ॥ इति ॥ ५४ ॥

काम्यहोमद्रव्यफलं युग्मेनाह—**स्वर्णेति** ।

स्वर्णाप्त्यै मधुना च गव्यपयसा गोसिद्धये सर्पिषा
लक्ष्म्यै शर्करया जुहोतु यशसे दध्ना तु सर्वर्धये ।

अन्नैरन्नसमृद्धये च सतिलैर्द्रव्याप्तये तण्डुलै-
र्लाजैस्सद्यशसे कुसुम्भकुसुमैः साश्वारिजैर्वाससे ॥ ५५ ॥

पद्मैर्भूपतिमुत्पलैर्नृपवधूस्तन्मन्त्रिणः कैरवै-
रश्वत्थादिसमिद्भिरग्रजमुखान् वर्णान् वधूः पिष्टजैः ।
पुत्तल्यादिभिरन्वहं च वशयेज्जम्भं त्वनावृष्टये
लोणैर्वृष्टिसमृद्धये च जहुयान्मन्त्री पुनर्वेतसैः ॥ ५६ ॥

मधुना माक्षिकघृतेन **स्वर्णाप्त्यै** धनप्राप्त्यर्थं जुहुयात् । जुहोत्विति संबन्धः । **गव्यपयसा** गोक्षीरेण **गोवृद्धये** पशुवृद्ध्यर्थं **सर्पिषा** गोघृतेन **लक्ष्म्यै** पुत्रादिसंपत्-समृद्ध्यर्थं **शर्करया यशसे** कीर्तिसिद्ध्यर्थं **दध्ना सर्वर्धये** समस्तद्रव्यवृद्ध्यर्थं जुहोतु होमं कुर्यात् । **अन्नैः अन्नसमृद्धये सतिलैः** तिलसहितैस्तण्डुलैः **द्रव्याप्तये, लाजैः सद्यशसे** सन्मङ्गलार्थं, **साश्वारिजैः** महिषीघृतसहितैः **कुसुम्भकुसुमैः** कुसुम्भपुष्पैः **वाससे** वस्त्रसिद्ध्यर्थं **पद्मैः** नलिनैः **भूपतिं** राजानं वशयेदिति संबन्धः । **उत्पलैः नृपवधूः** राजस्त्रीः **कैरवैः** श्वेतोत्पलैः **तन्मन्त्रिणः** राज्ञोऽमात्यान् **अश्वत्थादिसमिद्भिः** अश्वत्थपलाशौदुम्बरवटवृक्षोत्पन्नसमिद्भिः **अग्रजमुखान् वर्णान्** ब्राह्मणक्षत्रियवैश्यशूद्रान् वर्णान् **पिष्टजैः पुत्तल्यादिभिः** तण्डुलपिष्टोत्पन्न-तत्तदाकृतिपुत्रिकादिभिः **वधूः** स्त्रीः **अन्वहं** दिवसे दिवसे सिद्धिप्राप्तिपर्यन्तमित्यर्थः । **वशयेत्** वशीकुर्यात् । **जम्भं** जम्बीरफलं वश्यार्थं जुहुयादिति संबन्धः । **लोणैस्स-मुद्रलवणैरनावृष्टये**ऽतिवृष्टिनिवृत्तये जुहुयात् । **मन्त्री** तत्तन्मन्त्रयुक्तः **वृष्ट्यर्थं वेतसैः** नदीतीरोत्पन्नगुल्मैः जुहुयात् होमं कुर्यात् ॥ ५० ॥

दीक्षाभेदं युग्मेनाह—दीक्षेति ।

दीक्षा भौतिकिनैष्ठिकीयमभिधात्वाद्या द्विधा लौकिकी
देहोर्ध्वाष्टगुणर्धिदेष्टभुवने सद्भोगदा साधके ।
अन्या स्याच्छिवधर्मिणीयमभिधाचाद्या सबीजाह्वया
शक्तानामपरा त्वशक्तिविषये निर्बीजिकाख्या तथा ॥ ५७ ॥

पाके तीव्रतरे रुजस्सति नरे सद्यस्तु निर्वाणदा
निर्बीजा परिशोधितस्वसमयाचारेशभक्ते स्थिता ।
विज्ञानप्रलयाकलात्मसु निराधारा शिवेनैव सा
साधारा सकलात्मनां न च तनोर्जातेश्च शैवात्मनः ॥ ५८ ॥

दीक्षाशब्दो द्व्यर्थः । दीकारो दानार्थः । क्षेति क्षयार्थः । शिवत्वप्रदानेन दानं, पाशत्रयस्य नाशकरणेन क्षयः । प्रथमं परमेशमुखोद्गता विद्येश्वरादिक्रमेण देवमुनि-मनुष्यपर्यन्तमध्येतृश्रोतृजनप्रथिताभिप्रेतस्य भुक्तिमुक्त्यात्मकफलस्य साधनं संपादयित्री मलादिपाशानां क्षयं कुर्वती क्रिया दीक्षेत्युच्यते । तथा वरुणशिवेन—

सपाशत्रयविश्लेषं शिवत्वं युज्यते यया ।
क्रिया सा कथ्यते दीक्षा भक्तिवैराग्यलक्षणा ॥ इति ॥

अन्यत्रापि—

दीयते ज्ञानसद्भावं क्षीयते कर्मवासना ।
दानक्षपणयोगाद्धि दीक्षा शुद्धिः कृतात्मनः ॥ इति ॥

दानार्थस्य भुक्तिमुक्तिप्रदत्वेन द्वैविध्यम् । तस्मात्प्रथमं तावत् दीक्षा द्विविधेत्याह इयं दीक्षा **भौतिकीनैष्ठिकी** चेति । **अभिधा** नामधेयसहिता । भूतिर्विचित्रा-भिमतभोगावाप्तिः । प्रथमं तत्संपादयित्री तदनन्तरं मोक्षप्रदा भौतिकी दीक्षा । तथा रुरुसंहितायामुक्तम् —

दीक्षापूता गणपतिगुरोर्मण्डले जन्मवन्तः
सिद्धा मन्त्रैस्तरुणदिनकृन्मण्डलोद्भासिदेहाः ।
भुक्त्वा भोगान् सुचिरममरस्त्रीनिकायैरुपेताः
स्रस्तोत्कण्ठाः परशिवपदैश्वर्यभाजो भवन्ति ॥ इति ॥

निष्ठाकैवल्यं तत्संपादयित्री नैष्ठिकी दीक्षा । निरवधिकतपस्विनो नैष्ठिकाः तेषां संबन्धिनी नैष्ठिकी ग्रहपदविवर्जिता । कतिपयदिनव्रतपालनानन्तरं ग्रहपददायिनी भौतिकी । उक्तं च—

नैष्ठिकी देहपातान्ता भौतिकी व्रतमोक्षदा ॥ इति ॥

तुशब्देन भौतिकनैष्ठिकदीक्षयोरभिधानान्तरमस्तीति द्योतितम् । सापेक्षा भौतिकी निरपेक्षा भौतिकी सापेक्षा नैष्ठिकी निरपेक्षा नैष्ठिकी चेति । समयाद्यनुष्ठानापेक्षा-सहिता सापेक्षा । समयाद्यनुष्ठानरहिता निरपेक्षा । उक्तं च—

शार्वं नयति या धाम समयाद्यनुवर्तकम् ।
विशिष्टात्मगुणप्राया सापेक्षा चोच्यते बुधैः ॥

समयाद्यक्षमं वृद्धमूढबालाबलादिकम् ।
यासौ तदनपेक्षित्वात् निरपेक्षा निगद्यते ॥ इति ॥

तत्र साधकाचार्ययोः सापेक्षा। अन्येषां तु सामर्थ्यासामर्थ्यसंभावनावशाद्यथायोगं क्वचित् सापेक्षा, क्वचिन्निरपेक्षा। तुशब्देन पुनरपि शिवधर्मिण्येव द्विधा मता भौतिकी नैष्ठिकी चेति मतान्तरं द्योतितं भवति। तथा सिद्धान्तशेखरे—

भौतिकी नैष्ठिकी चेति द्विधा स्याच्छिवधर्मिणी ॥ इति ॥

आद्या भौतिकी द्विधा द्विरूपा। तत्र आद्या लौकिकी इति नामधेया लोकधर्मो वैदिकादिः तद्धर्मसहितः शिवधर्मो लोकधर्मः। तत्सहिता लोकधर्मिणी। लोकधर्मिण्याः फलमाह — देहोर्ध्वाष्टगुणर्धिदा देहोर्ध्वं शरीरपातानन्तरम् अष्टगुणर्धिदा अणिमाद्यष्टगुणसमृद्धिदा—

अणिमा महिमा चैव गरिमा लघिमा तथा।
ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमित्यपि ॥

इति गुणाष्टकम्। इष्टभुवने स्वेष्टभुवने सद्भोगदा सम्यग्भोगकरा, साधके साधकविषये लोकशिवधर्मिण्या दीक्षितास्साधका एवेति साधकलक्षणमप्युक्तम् भवति। उक्तं च —

भोगभूमिषु सर्वासु दुष्कृतांशे हते सति।
देहोत्तराणिमाद्यर्थं शिष्टेष्टा लोकधर्मिणि ॥ इति ॥

अन्या द्वितीया शिवधर्मिणीत्यभिधा नामधेययुक्ता यस्यां शिवधर्मिण्यां कृतायां त्यक्तलौकिकवैदिकाचारशिवधर्मानुष्ठानतत्पर एवात्मा भवति सा दीक्षा शिवधर्मिणीत्युच्यते। शिवधर्मफलभोगानन्तरमात्मनः सर्वज्ञतादिधर्माविर्भावो भवतीत्यर्थः। शिवधर्मिण्यणोर्मूलं शिवधर्मफलाश्रयः। इत्युक्तत्वात्। तत्र तावच्छिवधर्मिणी लिङ्गिनां शिखाच्छेदसमायुक्ता। लोकधर्मिणी गृहस्थानां शिखाच्छेदरहिता। उक्तं च—

द्वेधा निर्वाणदीक्षा च लौकिकी शिवधर्मिणी।
गृहिणां लौकिकी ज्ञेया लिङ्गिनां शिवधर्मिणी ॥ इति ॥

शिखाच्छेदो न यत्रास्ति दीक्षा सा लोकधर्मिणी।
शिखाखण्डनसंयुक्ता दीक्षा सा शिवधर्मिणी ॥ इति ॥

तथा अन्यत्रापि—

दीक्षया लोकधर्मिण्या गृहस्थान् दीक्षयेद् गुरुः।
तथा वै शिवधर्मिण्या दीक्षयेच्च तपोधनान् ॥

शिखाच्छेदसयायुक्ता दीक्षा सा शिवधर्मिणी ॥ इति ॥

शिखाच्छेदं विना यत्र ज्ञेया सा लोकधर्मिणी।
शिवधर्मिणमाशोध्य योजयेत्परमे पदे ॥

देहपाते विमोक्षः स्यात् समयाचारपालनात्।
लोकधर्मिणमारोप्य मते भुवनकर्तरि ॥

तद्धर्मापातनं कुर्यात् शिवे वा मुक्तिकाङ्क्षिणम्।
तत्त्वे सादाशिवे भोगो लयस्तत्वे पदे परे ॥ इति च ॥

आद्या भौतिकी सबीजाह्वया सबीजेतिनामधेयसहिता। बीजत्वं नाम दीक्षया विहितफलस्य साधनभूतसमयाद्याचारानुष्ठानापेक्षत्वम्। तत्सहितत्वात् सबीजा। शक्तानां नित्यनैमित्तिकादिसमयानुष्ठानकरणे समर्थानामेव सबीजा कर्तव्येति शेषः। तथा वरुणशिवेन—

विदुषां च समर्थानां सबीजा परिकीर्तिता ॥ इति ॥

अपरा नैष्ठिकी अशक्तविषये समयाद्यनुष्ठानकरणेषु असमर्थबालमूढवृद्धाङ्गनादिविषये निर्बीजिकाख्या निर्बीजनामधेया समयाद्यनुष्ठानकरणाभावेनापि बालादीनां मोक्षप्रदा निर्बीजिकेत्यर्थः।

बालबालिशवृद्धस्त्रीभोगभुग्व्याधितात्मनाम्।
भवेन् निर्बीजिका दीक्षा समयाचारवर्जिता ॥ इत्युक्तत्वात्।

बालिशो मूढः। बालिशो बालको मूढ इति नानार्थः। तथाशब्देन शुद्धाध्वभोगकाङ्क्षिणां बालादीनामपि निरवधिकतपस्विनां मोक्षकाङ्क्षिणामपि निर्बीजा कर्तव्येति सूचिता भवति। उक्तं च—

निर्बीजा त्वसमर्थानां किं तु भोगरतात्मनाम्।
दीक्षां पूर्वोदितां कृत्वा समयादिविशोधिनीम् ॥

लयं कुर्यात् परे तत्त्वे भोगाच्छुद्धाध्वनि स्मरन् ।
तैश्च भक्त्या सदा कार्यं यावज्जीवं शिवार्चनम् ॥

आचार्यस्यार्चनं तद्वत् यथाशक्त्या तपस्विनाम् ॥ इति ॥

मोक्षकाङ्क्षिणामपि तथोक्तम्—

दीक्षाग्निदग्धकर्मासौ मायाविच्छिन्नबन्धनः ।
गतः परां ज्ञाननिष्ठां निर्बीजां स शिवे स्थितः ॥

न तस्य नियमैः कार्यं न वा लिङ्गार्चनेन तु ॥

न तीर्थक्षेत्रगमनैः न च शारीरयन्त्रणैः ॥ इति ॥

अथ सबीजापि द्विधा मता साधिकारनिरधिकारभेदेन । तत्र साधिकारा साधकाचार्ययोः दीक्षा स्थापनादिकर्मसु तत्तत्कर्मकरणाधिकारप्रदा । निरधिकारा तु समयिनां पुत्रकाणां च दीक्षास्थापनादिकर्मसु तत्तत्कर्मकरणानधिकारप्रदा । उक्तं च—

साधिकारा सबीजा सा यया स्यादधिकारिता ।
साधकाचार्ययोर्यस्माद्दीक्षा स्थापनसिद्धिषु ॥

द्वयोरनधिकारित्वात् सा दीक्षाऽनधिकारिणी । इति । असमर्थानां समयाचारवर्जिता या निर्बीजा सा च सद्योनिर्वाणा असद्योनिर्वाणा चेति द्विधेत्याह—रुजो मलस्य पाके परिपक्वे तीव्रतरे अत्यन्ततीव्रे सति ईशभक्ते अत्यन्तविरक्ते नरे मनुष्ये स्थिता विद्यमाना परिशोधितस्वसमयाचारा दीक्षानन्तरं नित्यनैमित्तिकादिषु विधीयमानसमयाचारशोधनयुक्ता निर्बीजा सद्योनिर्वाणा । दीक्षासमाप्त्यनन्तरमेव देहपातं कृत्वा मोक्षप्रापिकेति यावत् । प्रारब्धदेहपातानन्तरं मोक्षप्रदा असद्योनिर्वाणेत्यर्थः । तथा सिद्धान्तशेखरे—

अथ निर्बीजिका दीक्षा द्विधा भिन्ना निगद्यते ।
सद्योनिर्वाणदा त्वाद्या चिरान्निर्वाणदापरा ॥

प्रारब्धसञ्चितागामिकर्मजालं विशोध्यते ।
ययात्यन्तं विरक्तानां सद्योनिर्वाणदा तु सा ॥

प्रारब्धकर्मणां भोगात् यया मुक्तिमनन्तरम् ।
यान्ति बालादयस्सेयं चिरान्निर्वाणदा भवेत् ॥ इति ॥

पुनरपि निराधारसाधारभेदेन दीक्षा द्विधेत्याह—विज्ञालयाकलात्मसु शिवेनैव क्रियमाणा या दीक्षा सा निराधारेत्युच्यते । निरधिकरणं निराधारः साधिकरणं साधारः आधारोऽधिकरणमधिष्ठानं स्थानं आचार्यः, तेन आधारेण विरहितेन परशिवेन । तीव्रशक्त्या या दीक्षा क्रियते सा दीक्षानिराधारेत्यर्थः । सकलात्मनां गुरुमूर्तिमधिष्ठाय शिवेनैव क्रियमाणा या दीक्षा सा दीक्षा साधारा । आचार्यमात्रमधिकरणं । शिव एव सकलात्मनां गुरुमूर्तिमधिष्ठाय दीक्षाकरः शिवादन्यस्य मलादिपाशविश्लेषणे सामर्थ्यासंभवादित्यभिप्रायः । उक्तं च—

सेयं दीक्षा द्विधा भिन्ना साधाराधारवर्जिता ।
आचार्यमन्तरेणैव क्रियते शम्भुनैव या ॥

विज्ञानाकलकस्यापि प्रलयाकलकस्य च ।
तीव्रशक्तिनिपातेन दीक्षा साधारवर्जिता ॥

गुरुमूर्तिं समाश्रित्य मन्दशक्तिनिपातनात् ।
कुरुते सकलस्येशः साधारां तामिमां विदुः ॥ इति ॥

पूर्वोक्तदीक्षाभेदः साधारदीक्षाविषय एव । 'इयं चतुर्विधा दीक्षा साधारा शिवशासना ।' इत्युक्तत्वात् । दीक्षासंस्कारस्तावत् शरीरस्य वा जातेर्वा आत्मनो वेति सन्देहनिरासार्थमाह—न च तनोः । अत्र शैवसिद्धान्ते वैदिकद्विजवच्छरीरस्य दीक्षासंस्कारो न विधीयत इति । जातेश्च ब्राह्मणादेर्न विधीयते । किन्तु शैवात्मनः अनादिमलकुण्ठितस्य आत्मनः शिवत्वप्रतिपादनार्थं दीक्षासंस्कारो विधीयते इति शैवात्मन इति मूलकारेणोक्तम् । वैदिकद्विजत्वं शरीरस्यैव उक्तम् । न चात्मनः । तथा श्रुत्यर्थप्रतिपादकस्मृतिवाक्यम्—

कार्यं शरीरसंस्कारापातनं प्रोक्षणादितिगर्भैः होमैर्जातकर्मचौलमौञ्जीबन्धनैरिति । जडत्वात् देहस्य संस्कारो नाभिमतः । ब्राह्मणादिजातौ संस्कारेण क्रियमाणायां तत्तज्जातौ एकस्मिन् पुरुषे संस्कारेण युक्ते सति तेनोत्पन्नाः पुत्रादयः संस्कृता एव भवन्ति । तथा संस्कृतयो लोके न विहिताः । तस्माज्जातेर्नाभिमतः । तस्मादत्र आत्मनः अनादिमलपरिहरणाय संस्कारोऽभिमतः ॥ न शरीरस्य न जातेश्च । उक्तं च—

न जातेर्न शरीरस्य संस्कारः प्राणिनो मतः ।
यदि जातेस्तदैकस्मिन् दीक्षिते खलु दीक्षणम् ॥

प्राप्तं तेन न जातेस्तु जडत्वान्न तनोर्मतः ।
चिद्रूपेऽनुग्रहं प्राह सर्वानुग्राहकश्शिवः ॥ इति ॥

तथा कालोत्तरे—

न शरीरस्य संस्कारो न जातेर्न च कर्मणः ।
आत्मनः कारयेद्दीक्षामनादिमलकुण्ठिनः ॥
निरोधस्तस्य कर्तव्यो मन्त्रैश्च विषशक्तिवत् ।
दीक्षैव मोक्षदा पुंसां चिदचिद्व्यक्तिकारिणी ॥ इति ॥ ५८ ॥

दीक्षाकालमासनक्षत्रादिनिर्णयमाह—काल इति ॥

काले वार्षिकपौषचैत्ररहिते देवोत्सवे दामने
सङ्क्रान्तौ विषुवेऽयने ग्रहणयोर्दीक्षा पवित्रोत्सवे ।
मैत्रार्कानिलसौम्यपैत्रनिर्ऋतीपूषाख्यशार्ङ्गीश्वरे
जैवं रोहिणिकोत्तरत्रयमथो भौमार्किवारेऽशुभम् ॥ ५९ ॥

वार्षिकपौषचैत्ररहिते काले दीक्षा कर्तव्येति शेषः । बार्षिकश्चैत्रादि-मासद्वन्द्वस्य यथाक्रमं वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिरऋतुत्वेनगणनात् वर्षर्तुः श्रावण-भाद्रपदाविति यावत् । पौषः पुष्यमासः चैत्रश्च दीक्षाकर्मणि निन्दितः । शेषेषु मासेषु दीक्षा कार्या । तथा सिद्धान्तशेखरे—

शरत्काले च वैशाखे दीक्षा श्रेष्ठफलप्रदा ।
फाल्गुने मार्गशीर्षे च ज्येष्ठे दीक्षा च मध्यमा ॥
आषाढे माघमासे च कन्यसा समुदाहृदा ।
निन्दितश्श्रावणश्चैत्रः पुष्यो भाद्रपदस्तथा ॥ इति ॥

शरत्काल इति अश्वयुक्कार्तिकौ मासौ गृह्येते । विहितमासेष्वपि अधिमासगुरु-शुक्रबुधास्तमयादिसंभवे दीक्षा न विहिता ।

दीक्षादिस्थापनं चैव पवित्रादि शतक्रतोः ।
अधिमासे न कुर्वीत यदीच्छेच्छुभमात्मनः ॥
नष्टे चान्द्रौ तथा शुक्रे गुरौ चास्तमयं गते ।
प्रतिष्ठादिशुभारम्भं दूरयात्रां न कारयेत् ॥ इति ॥

(अनुवर्तते)

இரிஷிவிந்தக் குறவஞ்சி

(Vol. XVII—No. 2—பக்கம் 40-ன் தொடர்ச்சி)

விருத்தம்

விடையுவந் தேறுமீசன் விந்தையிற் சிங்கன்முன்னே
பெடைப்புரு வோடுசேவல் பிரிவிலா திருக்கக்கண்டு
நடையுடைச் சிங்கிதன்னை நயந்தனன் காமனெய்த
படையினுன் மெலிந்துவாடிப் பரதவித் தியம்புவானே.

விருத்தம்

பக்கிகா ளும்மைநாடி பாகுகுறக்கண்டு தேன்பால்
முக்கனி யொத்தசொல்லாள் முருந்தெனு மூறற்சிங்கி
புக்கிய விடங்காணுமற் புஷ்பபா ணத்தாலுனந்தேன்
மைக்கண்டன் விந்தையீசன் வரையினிற் காட்டிடீரே.

தரு—சவுராட்டிரம்

பக்கிகளே விந்தைநாட்டில்—உமைப்
பகையேன் சிங்கியைக்கண் காட்டீர்
சிக்குங் கண்ணியைக் குத்தேனே—இனி
சினேகமாயுமை யெண்ணினேனே
கொண்டற் குழற்காட்டுமளியே—அந்தக்
கோதையைக் காட்டிடுலளியே
கண்டத் தொனிக் காட்டுங்குயிலே—நீ
காட்டுவாய் சிங்கிதன் ஞெயிலே
சாயலைக் காட்டிய மயிலே—நீ
சாற்றவள் சொல்லிய பயிலே
வாயிதழ்க் காட்டிந்திர கோபமே—ஒரு
வார்த்தை சொல்லாதென்ன கோபமே
வனமுலை காட்டுஞ் சகோரமே—எழின்
மாதினைக் காட்டுப காரமே
மென்னடை காட்டிய வன்னமே—மட
மெல்லியைக் காட்டுமென் முன்னமே

INDIAN INSTITUTE

Vol. XVIII No. 2

Bulletin of The Government Oriental Manuscripts Library Madras

EDITED

By

R. K. PARTHASARATHI, M.A., L.T.,
DIP. in FRENCH AND GERMAN,
Curator, Government Oriental Manuscripts Library, Madras.

© Government of Madras

1968

|| श्रीः ||

|| त्रिलोचनशिवाचार्यकृता सिद्धान्तसारावलिः ||

|| अनन्तशम्भुकृतव्याख्यासहिता ||

Edited by
Sri R. K. Parthasarathi, M. A., L. T.,
and
Sri T. H. Viswanathan, Siromani.

(*Continued from Page 64 of Volume XVIII No. 1*)

पूर्वोक्तकालादिनियमो बुभुक्षुविषयः; न मुमुक्षोः । तथा सिद्धान्तशेखरे–

विदित्वा चैव कालादिं दीक्षां कुर्याद् बुभुक्षुषु ।
मुमुक्षोः सर्वदा दीक्षाकालादिनियमो न हि ॥ इति ॥

अन्यत्रापि—'ऋतुषट्केऽपि सा कार्या मुक्त्यर्थं कुदिनेष्वपि'। इति । **देवोत्सवे** रथाद्युत्सवे **दामने** दमनारोहणकर्मणि सङ्क्रान्तौ मेषसङ्क्रान्त्यादिद्वादशके । **विषुवे** चैत्रे तुलायां च । विषुवेषु दिवारात्र्योः त्रिंशद्घटिका समानकालः । 'समरात्रिंदिवे काले विषुवद् विषुवं च तत्' । इत्यमरः । 'तुलायां क्रियते भानोः प्रवेशो विषुवं स्मृतम्' इति । **अयने** उत्तरायणे दक्षिणायने च । उत्तरायणं मकरसङ्क्रान्त्युत्तरविंशतिघटिकासमानकालः । दक्षिणायनं कर्कटसङ्क्रान्तौ पूर्वविंशतिघटिकाकालः । 'अयने विंशतिः पूर्वे मकरे विंशतिः परे' इत्युक्तत्वात् । सङ्क्रान्त्या विषुवायनकाले सिद्धेऽपि पृथगुच्चारणं मुख्यकालत्वद्योतनार्थं कृतमित्यवगन्तव्यम् । **ग्रहणयोः** चन्द्रसूर्यग्रहणयोः । सूर्यग्रहणे ग्रसनप्रथमकालः, चन्द्रग्रहणे मोचनकालो ग्राह्यः । तथा कामिके—'ग्रस्यमाने दिवानाथे मुच्यमाने निशाकरे'। इति ।

पवित्रोत्सवे पवित्रारोहणकर्मणि । लिङ्गादिप्रतिष्ठायां दीक्षा कर्तव्या । अत्र देवोत्सवदमनग्रहणादिकालेषु दीक्षाकरणस्योक्तत्वात् निन्दितचैत्रादिमासेषु ग्रहणादिसम्भवे दीक्षा कर्तव्येति सूचिता । तथा सिद्धान्तशेखरे—

निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा ।
विषुवे ह्ययनद्वन्द्वे ह्याषाढ्यां दमनोत्सवे ॥

दीक्षाकार्येषु कालेषु पवित्रे गुरुकर्मणि ।
शुक्लपक्षे शुभा दीक्षा कृष्णेऽप्यापञ्चमीदिनात् ॥ इति ।

मैत्रमनूराधा, अर्को हस्तः, अनिलस्स्वाती, सौम्यो मृगशीर्षं, पैत्रं मघा. निर्ऋतिः मूलं, पूषाख्यं रेवती, शार्ङ्गी श्रवणः, ईश्वरो आर्द्रा, जैवं पुष्यं, रोहिणिका रोहिणी, उत्तरत्रयं उत्तरा उत्तराषाढा उत्तराभाद्रा । दीक्षायामेतान्येव नक्षत्राणि विहितानि । उक्तं च—

रेवती मृगशीर्षं च मघा पुष्यपुनर्वसू ।
हस्तस्वात्यनुराधा च श्रवणं रोहिणी तथा ।
उत्तरात्रितयं मूलं नक्षत्राणि चतुर्दश ॥ इति ॥

अथोशब्देन तिथियोगकरणानि सूचितानि भवन्ति । उक्तं च—

चतुर्थी नवमी षष्ठी ह्यष्टमी च चतुर्दशी ।
पौर्णमासीं विना शेषा हिताः शुक्ले बुभुक्षुषु ॥

योगश्च प्रीतिरायुष्मान् सौभाग्यश्शोभनश्शुभः ।
सुकर्मा च धृतिर्वृद्धिर्ध्रुवस्सिद्धश्च हर्षणः ॥

वरीयान् परिघस्सिद्धो ब्राह्म ऐन्द्रश्च षोडश ।
बवश्च बालवश्चैव कौलवं करणं शुभम् ॥

पूर्वोक्तनक्षत्रतिथिषु नक्षत्रयोगतिथियोगसंभवे त्याज्यानि । **भौमार्किवारे** कुज-शनिवारे, **अशुभम**मङ्गलं शेषाश्शुक्रादिवाराश्शुभदा इत्यर्थः ॥ ५९ ॥

उत्तमोत्तमादिभेदेन नवविधस्य लिङ्गस्य दीक्षादेश्च मण्डपविधानमाह— **यागेति** ।

यागधामकृतभूगृहादिकं शून्यरामखयमाष्टपङ्क्तिभिः ।
भास्करेण च विकल्पितैः करैः कल्पयेत्सविवरं सलक्षणम् ॥ ६० ॥

यागधामकृतभूगृहादिकं इदं यागधामेति शल्योद्धारादिकरणेन निश्चयीकृतभूम्यां विद्यमानगृहमण्टपहर्म्याग्रमण्टपादिकं गृहमण्टपलिङ्गविषयं गृहाग्रे द्वारोत्सेधमानान्तरं त्यक्त्वा, दशहस्तमानो मण्टपः कर्तव्यः ।

द्वारोच्छ्रायान्तरं त्यक्त्वा गृहलिङ्गे गृहाग्रतः ।
दशहस्तप्रमाणेन मण्टपं कारयेत्सुधीः ॥ इति ॥

हर्म्याग्रे अग्रे पार्श्वयोर्वा कर्तव्यम् । उक्तं च—

हर्म्याग्रे मण्टपं कुर्याद् यागार्थं वाग्रपार्श्वयोः ।
उत्तरे वा प्रकर्तव्यं चतुरश्रं यथा भवेत् ॥ इति ॥

शल्योद्धारादिक्रमो यथा—

भूमिमाशोध्य जान्वन्तात् समीकृत्योपलिप्य च ।
तत्र वास्तुं समभ्यर्च्य मण्टपं कारयेद् गुरुः ॥
अन्यथा शिवतुल्योऽपि विघ्नैरेवाभिभूयते । इति ॥

मण्टपविस्तारभेदमाह—**शून्यरामखयमाष्टपङ्क्तिभिः** । शून्यं विन्दुः रामस्त्रिसंख्या । शून्यरामस्थानमेलनेन त्रिंशत्संख्या जाता । त्रिंशद्धस्तप्रमाण इत्यर्थः । खमाकाशः । शून्यवाचकत्वाद्विन्दुः । यमो द्विसंख्यावाची तन्मेलनेन विंशतिहस्तो जातः । अष्टपङ्क्तिभिः अष्टहस्तदशहस्तैः **भास्करेण** च द्वादशेन **विकल्पितैः** विकल्पीकृतैः । **करैः** चतुर्विंशत्यङ्गुलप्रमाणभूतहस्तैः **सविवरं** नवपञ्चैककुण्डसहितं **सलक्षणं** उच्छ्रायतोरणादिलक्षणसहितं यथा तथा **कल्पयेत्** कुर्यात् । अत्र विहितत्रिंशद्धस्तविंशतिहस्तदशहस्तप्रमाणमण्टपं यथाक्रमेणोत्तमत्रय मध्यमत्रय अधमत्रयविहितलिङ्गविषयम् । उक्तं च—

त्रिषूत्तमेषु लिङ्गेषु त्रिंशद्धस्तो विधीयते ।
विंशत्या मध्यमेषूक्तः चान्येषु दशभिः करैः ॥ इति ॥

अष्टहस्तद्वादशहस्तदशहस्ताः पवित्रादिमण्टपविषयाः । उत्तममण्टपादिषु उन्नतप्रमाणं यथाक्रमेण दशाष्टषड्ढस्तैः कार्यम् । उक्तं च—

दशाष्टषट्करोत्सेधैः ज्येष्ठादीनामनुक्रमात् । इति ॥

अधमादिषु स्तम्भा यथा—

षोडशस्तम्भसंयुक्तं षट्त्रिंशत्स्तम्भसंयुतम् ।
चतुष्षष्ट्यङ्घ्रिसंयुक्तं मण्टपं चाधमादिकम् ॥ इति ॥

चतुर्द्वारेषु तोरणं यथा—

चतुरश्रं चतुर्द्वारं चतुस्तोरणभूषितम् ।
न्यग्रोधस्तस्य पूर्वस्यां दक्षिणस्यामुदुम्बरम् ।
अश्वत्थमुत्तरस्यां तु प्लक्षः पश्चिमतोरणम् ॥ इति ।

कुण्डदिग्विषयो यथा—

चतुरश्रं च योन्याभमर्धचन्द्रं त्रिकोणकम् ।
वृत्तं षडश्रकुण्डं च पद्माभं चाष्टकोणकम् ॥

इन्द्रादीशानपर्यन्तं प्रथमावरणे स्थितम् ।
पुरन्दरेशयोर्मध्ये वृत्तं वा चतुरश्रकम् ॥

पञ्चकुण्डमथैकं वा चललिङ्गे च कथ्यते ।
इन्द्रादिषु चतुर्दिक्षु त्वीशाने पञ्चकुण्डकम् ॥

एककुण्डमथैशान्यां एवं स्यात् कुण्डदिक्स्थितिः ।

अत्र ग्रन्थे भास्करेण चेत्यत्र चकारोऽनुक्तमण्डपविस्तारसमुच्चयार्थः । एवमर्थ उत्तरग्रन्थे कथितवेदीविस्तरवशात् ज्ञातव्यः । तत्र वेद्या एकहस्तादिविस्तारस्य विद्यमानत्वात् एकहस्तविस्तारवेदिः त्रिहस्तमण्डपविषयः । अत एव त्रिहस्तादि-मण्डपविषयश्चकार इत्यर्थः । उक्तं च—

हस्तत्रयं समारभ्य द्विद्विहस्तविवृद्धितः ।
एकविंशतिहस्तान्तं मण्टपं विस्तृतं मतम् ॥

अत्र त्रिहस्ते चतुस्तम्भः । पञ्चहस्तादि नवहस्तान्तं द्वादशस्तम्भः । एकादशहस्तादि पञ्चदशान्तं षोडशस्तम्भः । सप्तदशहस्तादि एकविंशतिहस्त-पर्यन्तं [1]द्वात्रिंशत्स्तम्भः । उत्तमत्रये चतुष्षष्टिस्तम्भः । त्रिहस्तः स्वमानोच्चः ।

1. ख. षट्

पञ्चहस्तादि नवहस्तपर्यन्तं पञ्चहस्तोच्चः । एकादशादि पञ्चदशपर्यन्तं षट्करोच्चः । सप्तदशाद्येकविंशतिपर्यन्तं अष्टकरोच्चः । मण्डपानां भूमेरूर्ध्वं [2]चतुर्दशाङ्गुलोन्नतिः कार्या । पुनरपि अविदितशल्यादिदोषनिवृत्त्यर्थं लक्षणेन निर्मितानां सर्वेषां मण्डपानां वीक्षणाद्यष्टादश संस्काराः कार्याः । उक्तं च—

मण्डपानां तु सर्वेषां संस्कारोऽष्टादश स्मृताः ।
वीक्षणादिसमायुक्तो गुप्तशल्यनिवृत्तये ॥ इति ॥ ६० ॥

पूर्वोक्तमण्डपानां वेदिविस्तारमाह—**एकेति** ।

एकद्वित्रिचतुष्कभूतरसयुक्सप्ताष्टभिर्मध्यतः
प्रत्येकं तु विकल्पितैः गुरुकरैरष्टाङ्गुलोच्छ्रायतः
वेदी दर्पणसन्निभा समचतुष्कोणा सनेमिस्त्वधः
सूत्रं तत्त्रिगुणं सुवर्तितमथो सोमप्रभं सद्घटि ॥ ६१ ॥

एकद्वित्रिचतुष्कभूतरसयुक्सप्ताष्टभिः । अत्र भूतेति पञ्चसंख्यावाचि रसः षट्संख्यावाची । इत्थमुक्तैकादिसंख्यायुक्तहस्तैर्मध्यतः मण्डपमध्ये वेदि कार्या । एकहस्तविस्तारा वेदिः त्रिहस्तमण्डपविषया । 'मण्डपं तु त्रिधा भज्य त्वेकभागेन वेदिका" इत्युक्तत्वात् । त्रिहस्तपञ्चहस्तमण्डपः अङ्कुरार्पणरत्नादिलिङ्ग-स्थापनविषयः । द्विहस्ता वेदी पञ्चहस्तसप्तहस्तमण्डपविषया । अष्टनवदशहस्तमण्डपेषु त्रिहस्ता वेदी कार्या । एकादशद्वादशत्रयोदशहस्तमण्डपेषु चतुष्करा वेदिः । पञ्चदशसप्तदशहस्तमण्डपयोः पञ्चहस्ता वेदी । एकोनविंशतिविंशतिहस्तमण्डपयोः षट्करा वेदी । एकविंशतिहस्तमण्डपस्य सप्तकरा वेदी । त्रिंशद्धस्तमण्डपस्य अष्टकरा वेदी कार्या । वेद्युत्सेधमाह—**प्रत्येकं तु विकल्पितैः गुरुकरैः** एक-हस्तादिविस्तारेण पृथक् पृथक् विकल्पीकृता अष्टकरपर्यन्तैः सह अष्टाङ्गुलो-च्छ्रायतः वेदी कार्या । एकहस्ताद्यष्टहस्तपर्यन्तविस्तारयुक्तसमस्तवेदीनामपि अष्टाङ्गुलोन्नता वेदी कार्येत्यर्थः, 'अष्टाङ्गुलोच्छ्रिता वेदी मध्यभागे व्यवस्थिता' । इत्युक्तत्वात् । अथवा गुरुकरैरित्यत्र करणार्थे तृतीया । वेदि

2. ख. र्ध्वं दशाङ्गुलिः । ग. र्ध्वं द्वादशाङ्गुलिः

विस्तारसाधनक्रमेण अष्टाङ्गुलपर्यन्तमुन्नतिः कार्या । अष्टाङ्गुलोच्छ्रायतः इत्यनेन अष्टाङ्गुलादिरित्यादिशब्दो लुप्तो द्रष्टव्यः । उक्तं च—

उच्चा सूर्याङ्गुलैर्वेदी तदूर्ध्वाङ्गुलिविच्युतिः ।
ज्येष्ठा ज्येष्ठा सुरज्येष्ठा ज्ञात्वान्यत्र प्रयोजयेत् ॥ इति ॥

दर्पणसन्निभा दर्पणोदरवत् समोन्नता श्लक्ष्णा समचतुष्कोणा समानचतुरश्रा समचतुष्कोणेत्युक्तत्वात् अन्या वेद्यस्तीति सूचिता । तथा सिद्धान्तशेखरे—

वेदी चतुर्विधा तत्र चतुरश्री च पद्मिनी ।
श्रीधरा सर्वतोभद्रा दीक्षासु स्थापनादिषु ॥

चतुरश्री चतुष्कोणा वेदी सर्वफलप्रदा ।
तटाकादिप्रतिष्ठायां पद्मिनी पद्मसन्निभा ॥

राज्यं स्यात्सर्वतोभद्रा चतुर्भद्राभिषेचने ।
विवाहे श्रीधरा वेदी विंशत्यश्रसमन्विता ।
दर्पणोदरसङ्काशा निम्नोन्नतविवर्जिता ॥ इति ॥

अधः वेद्यधःप्रदेशे **सनेमिः** समन्तात् त्र्यङ्गुलोन्नतः चतुरङ्गुलविस्तर-युक्तोपवेदियुक्ता इत्यर्थः । इत्थं वेदीविस्तारमुक्त्वा तदाच्छादनसूत्रमाह—**सोमप्रभं** श्वेतवर्णं **त्रिगुणं** त्रितंतु **सूत्रं** कार्पाससूत्रं पट्टादिश्वेतसूत्रं वा । **सद्वटि** सम्यग्वेदिकासम्बन्धयुक्तं यथा भवति तथा सुवर्तितं सम्यक् परिवेष्टितं कुर्यात् । अथोशब्दोऽत्र कार्त्स्न्यार्थः । अत एव वेद्युत्सेधं समन्तान्निश्छिद्रं सितसूत्रेणाच्छादयेदित्यर्थः । 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः ॥ ६१ ॥

चतुरश्रादिसर्वकुण्डानां सामान्याकारेण लक्षणमाह—**तिर्यक्खातेति** ।

तिर्यक्खातसमोर्ध्वमेखलयुजा खातेन चैकं करं
कण्ठोऽन्तर्वियदङ्गुलैर्बहिरितो वेदाग्नियुग्माङ्गुलैः ।
नेमीनां त्रितयं समोन्नततं कुण्डं तदर्धायता
नाभिः पिप्पलपत्रवद्वसुतता चैकोन्नता कण्ठगा ॥ ६२ ॥

तिर्यक्खातसमोर्ध्वमेखलयुजा तिर्यक्खातेन कुण्डस्य तिर्यग्विस्तारखननेन समेन सदृशेन; किंभूतेन सादृश्यमित्यत्राह—**ऊर्ध्वमेखलयुजा** । भूम्यूर्ध्वस्थित-

मेखलयायुक्तेन **खातेन** भूनिम्नेन **एकं करं** एकहस्तप्रमाणम् । अनेनायमर्थः संपन्नः भूमितिर्यग्विस्तारखननं चतुर्विंशत्यङ्गुलं जातम् भूनिम्नखननं तूर्ध्वमेखलया सह चतुर्विंशत्यङ्गुलं जातम् । तत्रोर्ध्वमेखला नवाङ्गुला जाता । भूनिम्नखननं तु पञ्चदशाङ्गुलं जातम् । 'तिथ्यङ्गुलं समं खातं मेखला तु नवाङ्गुला' इत्युक्तत्वात् । अन्यत्राप्युक्तम्—

हस्तमात्रं खनेत्तिर्यक् ऊर्ध्वमेखलया सह ।
हस्तमात्रं खनेत्खातं सर्वकुण्डेष्वयं विधिः ॥ इति ॥

अन्तः कुण्डस्याभ्यन्तरे **वियदङ्गुलैरेकाङ्गुलैः** **कण्ठः** कार्यः । एकाङ्गुलप्रमाणेन समन्ताद् भूमिं त्यक्त्वा मेखलाकरणेन कण्ठो जायत इत्यर्थः । **इतो बहिः** कण्ठात् बाह्यप्रदेशे **वेदाग्नियुग्माङ्गुलैः** चतुस्त्रिद्व्यङ्गुलैः **नेमीनां** मेखलानां **त्रितयं** कार्यम् । तथोक्तम्—

व्यासात्खातः करः प्रोक्तः निम्नतिथ्यङ्गुलेन तु ।
खाताद्बाह्येऽङ्गुलः कण्ठः तद्बाह्ये मेखलात्रयम् ॥ इति ॥

ऊर्ध्वमेखलादिक्रमेण चतुस्त्रिद्व्येकाङ्गुलैः मेखला कार्या । तथोक्तं कारणे—

त्रिमेखला तदूर्ध्वं तु श्रुत्यग्निद्व्यकाङ्गुलैः ॥ इति ।

ऊर्ध्वमेखलादित्रितयं समोन्नततं मेखलानां स्वप्रमाणेनोन्नतविस्तारं, कार्यमिति शेषः । अत्र कुण्डाकारेण मेखला कार्या । 'यदाकाराणि कुण्डानि तदाकारा स्वमेखला ।' इत्युक्तत्वात् । **कुण्डमनेन** प्रकारेण कृतं कुण्डमित्यर्थः । **तदर्धायता नाभिः** कुण्डमध्ये कुण्डार्धप्रमाणद्वादशाङ्गुलविस्तरा त्र्यङ्गुलोन्नता । द्विभागदलमानयुता एकभागकर्णिकायुक्ता नाभिः पत्राष्टकेन युक्ता कार्या । तथोक्तं कामिके—

नाभिः स्यात्कुण्डमध्ये तु सार्धमानेन निर्मिता ।
तच्चतुर्थांशकोत्तुङ्गा पद्माकारं यथा भवेत् ॥ इति ॥

दलकर्णिकामाने कारणे यथा—

पद्माकारं यथा नाभिं कुर्यात् कुण्डस्य मध्यमे ।
द्विभागदलमानं स्यात् एकभागं तु कर्णिका ॥ इति ॥

वसुतता अष्टाङ्गुलविस्तारा **एकोन्नता** एकाङ्गुलोन्नता द्वादशाङ्गुलदैर्घ्या कण्ठपर्यन्तगता योनिः पिप्पलपत्रवत् कार्या अश्वत्थदलवत् मेखलोपरि । तथा किरणे—

अश्वत्थपत्रवत् कार्या विस्तारोऽष्टाङ्गुलैः करैः ।
द्वादशाङ्गुलदैर्घ्यं तु तदेकाङ्गुलमुन्नतिः ॥ इति ॥

पूर्वाग्नियाम्यकुण्डेषु उत्तराभिमुखा योनिः कार्या । अन्येषु पूर्वाभिमुखा । तथा सिद्धान्तशेखरे—

इन्द्राग्नियमकुण्डेषु योनिस्सौम्यमुखी स्मृता ।
योनिः पूर्वमुखान्येषु रौद्रे सौम्यतरा तयोः ॥ इति ॥

योनिपद्मकुण्डयोः योनिनाभी न कर्तव्ये । तथा कारणे—

योनौ योनिर्न कर्तव्या पद्मे नाभिं न कारयेत् ॥

अथवा योनिकुण्डेषु चतुरश्राकारेण वा योन्याकारेण वा योनिः कर्तव्या । तथा कामिके—'सा योनिस्सर्वकुण्डानां कुण्डवद्वायुगाश्रका' इत्युक्तत्वात् । अत्र ग्रन्थे कुण्डस्य यद्रूपं तद्रूपेण कर्तव्या योनिरिति चतुरश्रादिकुण्डानां तत्तदाकारेण विधीयमाना योनिकुण्डे पतदाकारेण कर्तव्येत्यर्थस्संपन्नः ॥ ६२ ॥

अथैकग्रन्थेन योन्यर्धचन्द्रकुण्डयोर्लक्षणमाह—**क्षेत्रेति** ।

क्षेत्रांशपञ्चमविभागविनिर्गमेण
योनिश्च कोणचतुरंशपरिभ्रमेण ।
आद्यन्तभागविरहान्नवधा विभक्ते
मध्यस्थवारिधिपदैःस्फुटमर्धचन्द्रम् ॥ ६३ ॥

क्षेत्रस्य सर्वेषामपि कुण्डानां, चतुरश्रकुण्डमुत्पत्तिस्थानमुच्यते । पूर्वं चतुरश्रकृतकुण्डक्षेत्रस्य चतुरश्रविधानं तु लिख्यते । समस्थलीकृतभूमौ पश्चिमात्पूर्वाभिमुखं सूत्रं सम्यक् पिष्टाक्तसूत्रेणास्फाल्य, तत्सूत्रपूर्वपश्चिममध्यमेषु चिह्नं विधाय, तत्पूर्वपश्चिमचिह्नदैर्घ्यप्रमाणेन मध्यस्थिते चिह्नवशाद्दक्षिणोत्तराभिमुखं सूत्रं साधयित्वा, तत्सूत्रदक्षिणोत्तरे चिह्नं विधाय सूत्रार्धदैर्घ्यप्रमाणतो दैर्घ्यं गृहीत्वा, तद्दैर्घ्यादग्निकोणे पूर्वसूत्रस्थितचिह्नवशात् याम्याभिमुखं दक्षिणसूत्रस्थितचिह्नवशात्

पूर्वाभिमुखं सूत्रमास्फाल्य सूत्रसंयोगे चिह्नं विधाय, अनेन क्रमेण निर्ऋतिवाय्वीशानकोणेषु तत्तद्दिङ्मुखवशात् सूत्रास्फालनेन चिह्नं विधाय, तच्चिह्नवशात् पूर्वदक्षिणपश्चिमोत्तरदिक्षु चतुस्सूत्रास्फालनेन चतुरश्रं सिद्धं भवति । एवं चतुरश्रेण सिद्धीकृतक्षेत्रस्य अंशाश्चतुर्विंशति भागाः । तथा कामिके—

चतुर्विंशतिभागं तु विभजेत्कुण्डमानकम् ।
तदेकभागो मात्रं स्यात् तेन द्वित्रिचतुर्गुणैः ॥ इति ॥

चतुरश्रकुण्डेन साधयितुं योग्यस्य योन्यादिकुण्डस्य चतुरश्रादागतक्षेत्रविशालस्य चतुरश्रे त्यज्यमानक्षेत्रविशालस्य च समानक्षेत्रविशालदर्शनार्थं प्राक्सूत्रोदक्सूत्रपञ्चविंशत्या कुण्डक्षेत्रं षट्सप्तत्युत्तरपञ्चशतपदेन युक्तं कुर्यात् । क्षेत्रांशानां पञ्चमविभागविनिर्गमेण क्षेत्रांशसमूहं पञ्चभागं कृत्वा, तेषु एकभागप्रमाणं पञ्चमभागः । तस्य विनिर्गमेण क्षेत्रमध्यस्थितसोमसूत्राग्रे बहिर्गमनचिह्नेन कोणचतुरंशपरिभ्रमणेन आग्नेयाद्वायुकोणान्तं निर्ऋतेरीशानकोणान्तमास्फालनेन जातं सूत्रं कोणसूत्रम् । तस्य चतुरंशश्चतुर्भागः । तस्य भ्रमणेन योनिकुण्डं भवति । अत्रायमर्थः—कोणसूत्रं चतुर्भागं कृत्वा त्रिभागं हित्वा, एकभागप्रमाणेन क्षेत्रार्धभागपर्यन्तमुभयपार्श्वयोर्भागभ्रमणेन अश्वत्थपृष्ठवत् भवति । तस्मान्निर्गमनसूत्रपर्यन्तं सूत्रे संयोजिते पत्राग्रवद्भवति । एवं कृते योनिकुण्डं भवति । उक्तं च—

क्षेत्रार्धकोणं सङ्गृह्य क्षेत्रार्धाद् भ्रामयेत्ततः ।
क्षेत्रार्धावधिकं यावत् तथान्यद्भ्रामयेत् पुनः ॥

पञ्चभागकृतात्क्षेत्रात् भागमेकं बहिर्नयेत् ।
सूत्रे संयोजिते योनिर्भवेत्पिप्पलपत्रवत् ॥ इति ॥

योनिकुण्डमग्नेर्दिशि कार्यम् । तथा कामिके—

पञ्चमांशं पुरो नीत्वा कोणवेदांशमानतः ।
भ्रमादश्वत्थपत्राङ्गं कुण्डमाग्नेयमुच्यते ॥ इति ॥

अर्धचन्द्रकुण्डमाह—**नवधा विभक्ते** चतुरश्रक्षेत्रे नवभागेन विभाजिते सति **आद्यन्तभागविरहात्** आदावेकभागमन्ते च एकभागं त्यक्त्वा, **मध्यस्थवारिधिपदैः** मध्ये विद्यमानसप्तपदैरर्धचन्द्रं स्फुटमर्धचन्द्राकारेण व्यक्तकुण्डं भवति । तथा सिद्धान्तशेखरे—

यास्ये तन्मारणे शस्तमुत्तराभिमुखं मतम् ।
नवधा भाजिते क्षेत्रे चतुरश्रसमो यदा ॥
दक्षिणे चोत्तरे चांशमेकैकं तु परित्यजेत् ।
सप्तांशसमसूत्रेण भ्रमणादर्धचन्द्रकम् ॥ इति॥ ६३ ॥

एकेन श्लोकेन त्र्यश्रवृत्तषडश्रकुण्डानां लक्षणमाह—**त्र्यश्रमिति ।**

त्र्यश्रं त्रिभागपरिवृद्धिकृतत्रिमत्स्यैः
कर्णार्धकाष्टमविनाकरणेन वृत्तम् ।
[1]षड्भागवृद्ध्या रचितैश्चतुर्भिः
मत्स्यैः षडश्रं रचयेत कुण्डम् ॥ ६४ ॥

त्रिभागपरिवृद्धकृतत्रिमत्स्यैः चतुरश्रक्षेत्रस्य त्रिभागेन वृद्धीकृतं त्रिचिह्नैः त्र्यश्रं त्रिकोणकुण्डं भवेत् । अत्र चतुरश्रक्षेत्रं त्रिभागं कृत्वा एकभागादष्टाङ्गुलप्रमाणतः कुण्डमध्यसूत्रस्याग्रतो बाह्ये चिह्नं कृत्वा पृष्ठसूत्रस्य पार्श्वयोर्बहिरष्टाङ्गुलप्रमाणेन चिह्नं विधाय त्रिषु चिह्नेषु त्रिसूत्रसंयोजनात् त्रिकोणकुण्डं स्फुटं भवेत् । उक्तं च तथा कामिके—

त्रिभागवृद्धितो मत्स्यैः त्रिभिर्नैशाचरं भवेत् । इति ।

कर्णार्धकाष्टमविनाकरणेन कर्णार्धसूत्रस्य अष्टमभागं त्यक्त्वा करणेन तत्प्रमाणतो भ्रमणकरणेन वृत्तकुण्डं भवेत् । अत्र प्रथमं कर्णसूत्रस्यार्धं त्यक्त्वा शिष्टकर्णसूत्रार्धप्रमाणमष्टांशेन विभज्य तेषु भागेषु कोणाग्रस्य अन्तकमेकभागं त्यक्त्वा सप्तांशप्रमाणतो कुण्डमध्यात् वृत्ताकारभ्रमणेन वृत्तकुण्डं भवति । उक्तं च—

कर्णार्धाष्टांशसन्त्यागात् वृत्तकुण्डमिहोच्यते ॥ इति ॥

षड्भागवृद्ध्या चतुरश्रक्षेत्रषडंशवृद्ध्या पार्श्वयोः कुण्डपार्श्वयोः **रचितैः** कृतैः **चतुर्भिः मत्स्यैः** चतुर्भिः चिह्नैः षडश्रं षट्कोणं कुण्डं भवेत्किल । अत्र किलेति मध्यसूत्राग्रे पृष्ठे च युक्त्या किञ्चिदुन्नतं कार्यमिति सूचनार्थं कृतम् । अत्र चतुरश्रक्षेत्रं षड्भागं कृत्वा चतुरङ्गुलप्रमाणैकभागैकवृद्ध्या कुण्डाग्रसूत्रस्य पृष्ठसूत्रस्य चोभयपार्श्वयोर्याम्योत्तरे च चतुश्चिह्नं विधाय तच्चिह्नतः पृष्ठमध्यसूत्रपर्यन्तं

1. वृत्तं भिद्यते ।

द्विसूत्रसंयोजनं कृत्वा तदनन्तरं पृष्ठचिह्नमध्यतः कुण्डाग्रमध्यसूत्रपर्यन्तं द्विसूत्रसंयोजनेन षडश्रकुण्डं भवति । उक्तं च—

षड्भागवृद्धितो मत्स्यैश्चतुर्भिः स्यात् षडश्रकम् ॥ इति ।

एतत्कुण्डत्रयं निर्ऋतिवरुणवायुदिशि यथाक्रमेण कार्यम् ॥ ६४ ॥

अथ श्लोकद्वयेन[1] पद्माष्टाश्रकुण्डयोर्लक्षणमाह—**चतुष्कृत इति ।**

चतुष्कृते वृत्तकमेखलांशे स्यात् कर्णिकं सार्धविभागमानात् ।
पत्राष्टकं सार्धयुगेन पद्मं बहिर्दशांशाच्चतुरश्रक्लृप्तिः ॥ ६५ ॥
तत्कर्णशेषेण च मङ्गलाश्रं सुनित्रयैर्वा विधिना विदध्यात् ।
योन्यादिकुण्डानि तु काम्यपक्षे दीक्षादिके वृत्तमथाश्रमेव ॥ ६६ ॥

वृत्तकमेखलांशे वृत्तकुण्डे विद्यमानमेखलांशे **चतुष्कृते** चतुर्धा विभाजिते **सार्धविभागमानाद**र्धाङ्गुलसहितचतुरङ्गुलमानात् कर्णिका **स्यात्** भवेत् । **सार्धयुगेन** अर्धाङ्गुलसहितचतुरङ्गुलेन **पत्राष्टकम**ष्टपत्रसहितपद्मकुण्डं भवति । अत्र प्रथमं वृत्तकुण्डं विधाय वृत्तकुण्डस्य त्रिमेखलोन्नतविस्तारं समुदायेन चतुर्धा विभज्य तत्र सार्धचतुरङ्गुलेन समोन्नतविस्तारां कर्णिकां विधाय पुनरवशिष्टसार्धचतुरङ्गुलेन समोन्नतविस्तारपत्राष्टकरणेन पद्मकुण्डं भवति । यथा कामिके—

वृत्तकुण्डं पुरा कृत्वा चतुर्धा मेखलां भजेत् ।
उत्सेधं च तथा कृत्वा कर्णिकासाधको भवेत् ।
अवशिष्टदलं वेददलमष्टदलं तु वा ॥ इति ॥

दशांशात् क्षेत्राद्दशमभागात् **बहिः** क्षेत्रं दशभागं कृत्वा विधाय दशभागमध्ये नवभागं गृहीत्वा अन्त्ये दशमांशमेकं विहाय नवभागप्रमाणतश्चतुरश्रक्लृप्तिः अपरं चतुरश्रकुण्डं पूर्वक्षेत्रस्य अभ्यन्तरे कार्यम् । दशभागमध्ये एकं बहिर्भागं यथा भवति तथा अन्यत् कुण्डं कार्यमिति बहिश्शब्दार्थः । **तत्कर्णशेषेण** परकुण्डे पूर्वक्षेत्रकर्णात् शेषितकर्णार्धसूत्रप्रमाणेन । चकारः पूर्वक्षेत्रमध्यसूत्रात्

1. ग. द्वन्द्वेन

बहिश्चतुर्दिक्षु लाञ्छनसूचकोऽनुक्तार्थस्य समुच्चयार्थः । अत **एवापरकुण्डकर्णार्ध-सूत्रप्रमाणेन चतुर्दिक्षु लाञ्छनं** विधाय चतुर्दिक्षु **सूत्रसंयोजनेन** मङ्गलाश्रमष्टाश्र-कुण्डं भवति । अथवा **मुनित्रयैरेकविंशतिभागैः** विधिना **शास्त्रोक्तप्रकारेण विदध्यात्** । तथा कामिके—

क्षेत्रार्धदशमं भागं चतुर्दिक्षु तदन्तरे ।
विन्यस्य तत्प्रमाणेन [1]तुर्याश्रमपरं नयेत् ॥

तस्य कर्णार्धमानेन तद्भुजास्वपि लाञ्छयेत् ।
तत्राष्टसूत्रसंयोगादष्टाश्रं कुण्डमुच्यते ॥ इति ॥

योन्यादिकुण्डानि पूर्वोक्तयोनित्रिकोणादिकुण्डानि **काम्यपक्षे** उच्चाटनादिषट्कर्म-विषये । कर्तव्यानीति शेषः । **दीक्षादिके** दीक्षाप्रतिष्ठादिके **वृत्तमथाश्रमेव** वृत्तं चतुरश्रं वा कार्यमिति शेषः । एवशब्दोऽन्यकुण्डकरणनिषेधार्थः । एवमेवा-चार्यान्तरैरप्युक्तम् । तथा प्रतिष्ठासारसङ्ग्रहे—

सर्वदिक्षु क्षिपेत्कुण्डं वेदाश्रं स्थापनाविधौ ।
तदेव वृत्तं वा कार्यं काम्ये कल्पोदितं यथा ॥

चतुरश्रं भवेत्प्राच्यां सर्वकामप्रदं शुभम् ।
आग्नेय्यां तु भगाकारं सदा चैवोपकारकम् ॥

अर्धचन्द्रनिभं कुण्डं याम्ये तद्द्वेषकं नृणाम् ।
त्रिकोणं नैर्ऋताशायां मारणार्थं प्रकल्पयेत् ॥

नित्ये वाप्यायने वृत्तं पश्चिमे कुण्डमुत्तमम् ।
षट्कोणं वायुकोणस्थं कुण्डमुच्चारणे मतम् ॥

पद्माकारं भवेत्कुण्डमुत्तरे पुष्टिसाधनम् ।
अष्टकोणं तथैशान्यामत्यन्तमभयप्रदम् ।
काम्यमेतत्सदा कुण्डं स्थापनादौ विसर्जयेत् ॥ इति ॥

उक्तमाचार्यवचनमात्मार्थविषयम् । कामिकाद्यागमेषु लिङ्गप्रतिष्ठायां योन्यादि-कुण्डयुक्तमण्टपविधानात् । तथा कामिके प्रतिष्ठास्थापने—

---

1. ख. युगाश्र

वेदाश्रकशशाङ्कार्धव्यश्रवृत्तानि पञ्चसु ।
षडश्राष्टाब्जकोणानि दिक्ष्वन्यासु निवेशयेत् ।
वृत्तं प्रधानमेवं स्यात् चतुरश्रं तु वा भवेत् ॥ इति ॥ ६६ ॥

अथ युग्मेन श्लोकेन स्रुक्स्रुवयोर्लक्षणमाह—**षट्त्रिंशाङ्गुलेति** ।

षट्त्रिंशाङ्गुलसम्मितस्रुचि रसैर्विंशाङ्गुलैर्नाहतो
दैर्घ्याद्दण्ड इह त्रिवेदकलशो वेदाग्रमाद्गण्डिका ।
अष्टैकागसवेदिकागलमुखं वृत्तं श्रुतिस्त्र्यङ्गुलं
खातं चाङ्गुलमेखलं गलमुखे त्र्यंशोनवेद्यास्तते ॥ ६७ ॥

कनिष्ठाङ्गुलविस्तृताज्यसरणिः पृष्ठं कजेभोष्ठव-
च्छिष्टं चित्रयुतं स्रुवे जिनमिते ह्यङ्गुष्ठदण्डाग्रतः ।
वृत्तं त्र्यङ्गुलविस्तरं गजशिरःपृष्ठं पुरः कर्दमे
सारङ्गाङ्घ्रिवदाज्यसंस्थितिरधो गण्डचग्रतोऽब्जाङ्कितम् ॥ ६८ ॥

स्रुग्लक्षणं त्रिविधमुक्तमुत्तममध्यमाधमत्वेन । अस्मिन् ग्रन्थे उत्तमस्य लक्षणं चोक्तम्—**षट्त्रिंशाङ्गुलसंमितस्रुचीति** । षट्त्रिंशाङ्गुलदैर्घ्ययुक्तयाज्ञीय-वृक्षनिर्मितस्रुचि । यज्ञवृक्षाश्चोक्ताः क्वचित्—

अश्वत्थोदुम्बरप्लक्षाचाषादिखदिरं तथा ।
न्यग्रोधश्च शमी बिल्वं चूतो वैकङ्कतं तथा ।
असनं च शिरीषं च यज्ञवृक्षाः प्रकीर्तिताः ॥ इति ॥

वृक्षसङ्ग्रहणकाल एव मूलाग्रे विनिश्चित्य तेनैव मूलाग्रेण स्रुक्स्रुवयोर्मू-लाग्रं विधातव्यम् । मध्यसारं गृहीत्वा स्रुक्स्रुवयोरेकवृक्षत्वात् द्विधा कृत्वा तदन्तरे त्वक्पार्श्वे वा बिलं विदध्यात् । तथा कामिककारणयोर्वचनम्—

स्रुक्स्रुवौ विधिना कार्यौ तद्विधानमिहोच्यते ।
त्वक्पार्श्वे चान्तरे वापि तद्बिलं विधिना चरेत् ॥

सङ्ग्राह्य मध्यसारं तु द्विधा कृत्वा तरुं पुनः ।
त्वग्भागे बिलमाख्यातमवक्रं निर्व्रणं दृढम् ॥ इति ॥

सर्वदोषविनिर्मुक्तं समं ग्रन्थ्यादिवर्जितम् ।
वृक्षसारं समादाय द्विधा कुर्यात्तरुं ततः ॥

मूलं स्रुक्स्रुवयोर्दण्डे वृक्षाग्रं पुष्करं मतम् ।
त्वग्भागे तद्बिलं प्रोक्तं वृक्षवामाङ्गजा तु स्रुक् ।
वृक्षदक्षांङ्गसम्भूतः स्रुवः स्रुग्लक्षणं ब्रुवे ॥ इति ॥

रसैःषडङ्गुलैः**विंशाङ्गुलैः**विंशत्यङ्गुलैर्यथाक्रमेण **नाहतः** दण्डवृत्ताकारवेष्टनात् । **दैर्घ्याच्च** दण्डो विधेय इति शेषः । दण्डनाहष्षडङ्गुलं दण्डदैर्घ्यं विंशत्यङ्गुलमित्यर्थः । उक्तं च—

विंशत्यङ्गुलमायामो दण्डस्य परिकीर्तितः ।
दण्डस्य परिणाहस्तु षडङ्गुल इति स्मृतः ॥ इति ।

मध्यमाधमौ यथाक्रमेण चतुस्त्रिंशद्द्वात्रिंशदङ्गुलायामौ । उक्तं च—

षट्त्रिंशदङ्गुलायामा चोत्तमा स्रुगुदीरिता ।
मध्यमा कन्यसा ज्ञेया द्विद्व्यङ्गुलविहीनतः ॥ इति ॥

उत्तमादित्रयाणामपि षडङ्गुलेनानाहो विंशत्यङ्गुलेन दण्डायामाः कर्तव्याः । तथा पराख्ये—

उत्तमादित्रयाणां च दण्डः स्याद् द्विदशाङ्गुलः । इति ।

इह विंशत्यङ्गुलदण्डे **त्रिवेदकलशं** दण्डाग्रे चतुरङ्गुलेन त्र्यङ्गुलेन वा आयामयुक्ता दण्डनाहसमा कलशाकृतिः कार्येति शेषः । कलशादधःप्रदेशे पादाकृतिः कार्या कर्तव्या । 'वृत्तवत् कलशो ज्ञेयो वेदांशस्तत्प्रमाणकः ।' इत्युक्तत्वात् । ज्येष्ठायाः वेदांशोन्नतः कलशः मध्यमायाः कनिष्ठायाश्च यथाक्रमं त्र्यङ्गुलोन्नता द्व्यङ्गुलोन्नता षडङ्गुलानाहयुक्ता कलशाकृतिः कार्या द्वात्रिंशदङ्गुलायामस्याधमस्य द्व्यङ्गुलोन्नतस्य कलशस्य विद्यमानत्वात् । तथा कारणे—

तन्मूले कलशाकारमङ्गुलद्वयमानतः ।
कर्माङ्गुलं तु नाहस्स्यात् तस्याधस्तु सुपादयुक् ॥ इति ॥

कर्माङ्गुलं षडङ्गुलमथवा दण्डस्योत्तमादीनामपि समानविंशत्यङ्गुलत्वात् समानकलशाकृतिः कर्तव्या । **वेदाद्यमात् गण्डिका** चतुरङ्गुलविस्ताराद् द्व्यङ्गुलाद्दैर्घ्या-

न्महावेद्यासक्ता चतुरश्रा वाऽष्टाश्रा वा गण्डिका वेदाङ्गुलोन्नता । उपवेदि गण्डिकेतिनामा क्वचित् पद्माकारा । उक्तं च—

चतुरङ्गुलविस्तारा महावेदिसमीपगा ।
चतुरश्राथवाष्टाश्रा पद्माकाराथवा भवेत् ॥

गण्डिका द्व्यङ्गुला दैर्घ्याद्दण्डादेकाङ्गुलाऽधिका । इति ॥

एवं ज्येष्ठायाः कर्तव्या । मध्यमाया अधमायाश्च यथाक्रमं सार्धत्र्यङ्गुलत्र्यङ्गुलविस्तारा द्व्यङ्गुलदैर्घ्या कर्तव्या, तथा मृगेन्द्रे 'वेद्यर्धसम्मिता शस्ता गण्डिकासक्तवेदिका' इत्युक्तत्वात् । अस्यायमर्थः—उत्तमस्य अष्टाङ्गुला वेदी । मध्यमस्य सप्ताङ्गुला । कनिष्ठस्य षडङ्गुला । एतत्प्रमाणवेद्यर्धसम्मिता । आसक्तेति सामान्येनोक्तत्वात् चतुरश्रा वाष्टाश्रा वा गृह्यते । आसक्तवेदिका महावेद्या सह संश्लिष्टेत्यर्थः । **अष्टैकागसवेदिकागलमुखं** पूर्वोक्तगण्डिकाया ऊर्ध्वमष्टाङ्गुलेन, एकाङ्गुलेन, अगशब्दस्य पर्वतार्थत्वात् सप्ताङ्गुलेन सहितं, यथाक्रमेण वेदिकागलमुखं । वेदिका महावेदी, गलः कण्ठः, मुखं कण्ठादुपरिविद्यमानप्रदेशः । अष्टाङ्गुलेन वेदिकादैर्घ्यमेकाङ्गुलेन कण्ठदैर्घ्यं, सप्ताङ्गुलेन मुखदैर्घ्यमित्यर्थः । वेदिकाया विस्तारो दैर्घ्येन समः कार्यः । कण्ठस्य विस्तारश्चतुरङ्गुलः । कण्ठसमीपवर्तिमुखविस्तारः सप्ताङ्गुलः । मुखादारभ्य वेदिकापर्यन्तं चतुरङ्गुलमानेन घनं कर्तव्यम् । श्रेष्ठायाः स्रुचः प्रमाणमेवमुक्तम् । मध्यमायाः कनिष्ठायाश्च यथाक्रमं सप्ताङ्गुलषडङ्गुलसमा वेदिका कार्या, तदर्धघनोपेता च । सर्वेषां चतुरङ्गुलेन वा घनं कर्तव्यम् । कण्ठायामो ज्येष्ठादीनामपि समानः । मुखायामस्तु षडङ्गुलपञ्चाङ्गुलेन कर्तव्यः । **वृत्तं** वेदिमध्ये विद्यमानबिलवृत्तम् **श्रुतिः** चतुरङ्गुलप्रमाणोन्नतेन वर्तुलाकारभ्रमणं कार्यमित्यर्थः । **खातं** बिलखननप्रमाणं **त्र्यङ्गुलं** भवेत् । उक्तं च—

मध्ये वृत्तं तु संभाव्य चतुरङ्गुलमानतः ।
त्र्यङ्गुलं सुबिलं खात्वा शेषं शोभान्वितं कुरु ॥ इति ॥

श्रेष्ठविषयोक्तप्रमाणबिलमेव मध्यमाधमयोः कार्यम् । तथा च मृगेन्द्रे—

वेदवृत्तादिपृथुता संस्थितिः त्रिकलावटा ॥ इति ॥

अत्र व्याख्याने भगवता नारायणकण्ठेन गाम्भीर्यमेकरूपमेव सर्वासामिति त्रिकलावटा संस्थितिः त्र्यङ्गुलगम्भीरमुखा कार्येति व्याख्यातम् ।

अथवा मध्यमाधमयोः यथाक्रमं त्र्यङ्गुलद्व्यङ्गुलं वृत्तं खातं च सार्ध-द्व्यङ्गुलं द्व्यङ्गुलं च कर्तव्यम् । तथा कारणे

'बिलं सुवर्तितं मध्ये चाङ्गुलद्वयमानतः ।
तद्विस्तारसमं गर्तं सुवृत्तं बिलमुच्यते ॥'

इत्यधमस्य द्व्यङ्गुलमानेनोक्तत्वात् । तद्विस्तारसममित्यत्र वृत्तभ्रमणविस्तारमित्यर्थः । अथवा मध्यमस्य द्व्यङ्गुलमधमस्य एकाङ्गुलं कर्तव्यम् । **अङ्गुलमेखलमेकाङ्**-गुलप्रमाणेन मेखलापट्टिका कार्येति शेषः । बिलवृत्ते **वृत्ताकारा कार्या,** वेदिकायां परितः तदाकारेण कार्या । **वेद्याः त्र्यंशेन** तत्तद्वेदिविस्तारत्रिभागैकेन तते विस्तृते **गळमुखे** कण्ठे मुखे चेत्यर्थः । महावेदिविस्तारं त्रिभागं कृत्वा एकभागेन कण्ठविस्तारो विधेय इत्यर्थः । तथा मुखाग्रे च विस्तारः कर्तव्यः 'वेदिकायास्त्रिभागेन मुखाग्रस्य च विस्तृतिः ।' इत्युक्तत्वात् । पूर्वोक्तकण्ठ-विस्तारस्त्वागमान्तरेणात्र लिखितम् । मूलकारेणोक्तकण्ठविस्तारो वेदित्रिभागै-कविस्तारः । एकाङ्गुलेन मेखला कण्ठे मुखे च विधेया । **अर्धाङ्गुलेन निम्नं** च कार्यम् । मध्यमाधमयोर्यथाक्रमं अङ्गुलत्रिभागेन द्विभागेन च मेखला कार्या । सार्धनवेन यवप्रमाणेन च निम्नः स्यात् । **कनिष्ठाङ्गुलविस्तृताज्यसरणिः** कनिष्ठाङ्गुलिविस्तारवत् विस्तृतघृतनिस्सरणमार्गः गळात् मुखाग्रपर्यन्तं कर्तव्यः । मध्यमाधमयोः कनिष्ठाङ्गुलिविस्तार एव । अत्र ग्रन्थे गलमुखे घृतमार्गस्यो-क्तत्वात् बिलाद्गलपर्यन्तं कनिष्ठिकाङ्गुलिनाहतो अन्तर्विवरः कार्य इति ज्ञापितम् । 'तारेण वाथ ताम्रेण नालं कृत्वा सुयोजयेत् ।' इत्युक्तत्वात् । **पृष्ठं** पृष्ठशब्देन महावेद्यधःप्रदेशो मुखाग्रादधःप्रदेशश्च गृह्यते । **कजेभोष्ठवत्** द्वयोः पृष्ठयोर्यथा-क्रमेण कजः कमलं तद्वत् इभोष्ठवत् गजोष्ठपृष्ठाकृतिवत् । विधेयमिति शेषः ।

वेदिकायास्त्वधःपद्मं पृष्ठाकारं सकर्णिकम् ।
गजोष्ठपृष्ठसदृशमास्यपृष्ठाकृतिर्भवेत् ॥ इत्युक्तत्वात्

षट्सप्ताष्टाङ्गुलवेदिकानां पृष्ठभागं यथाक्रमेण चतुःपञ्चषडङ्गुलविस्तारेण वर्तुलीकृत्य वर्तुलप्रदेशे सकर्णिकं साष्टपत्रं कमलमूर्ध्वमुखाकारेण कर्तव्यम् । 'वेदिपृष्ठं प्रकर्तव्यं पद्मपृष्ठोपमं ततः ।' इत्युक्तत्वात् । तथा मृगेन्द्रे —

वेदवृत्तादिपृथुता संस्थितित्रिकलावता । इति ।

एतद्ग्रन्थव्याख्याने त्रिविधायाः वेद्याः पृष्ठे चतुर्भिरङ्गुलैर्वृत्ता पञ्चाङ्गुलै-र्वृत्ता षडङ्गुलैर्वृत्ता पृथुता विस्तीर्णता कार्येत्युक्तत्वाच्च । **शिष्टं** वेदिकाकण्ठ-मुखेषु शेषितविस्तारम् । **चित्रयुतं** चित्रैरनेकरूपकमलोत्पललतादिभिर्भूषणैर्युक्तं कार्यम् । अनेन प्रकारेण कृतायाः स्रुगिति नाम । **जिनमिते स्रुवे** जिनशब्देन चतुर्विंशतिसंख्या गृह्यते । चतुर्विंशदङ्गुलप्रमाणदैर्घ्ययुक्ते स्रुवे मध्यमाधमयोर्यथा-क्रममेकद्व्यङ्गुलहानिः कर्तव्या 'चतुर्विंशतिभागैश्च स्रुवमानं प्रकीर्तितम् । एकद्वित्र्यङ्गुलैर्हीनमथवा परिकल्पयेत् ॥' इत्युक्तत्वात् । **अङ्गुष्ठदण्डाग्रतः** अङ्गुष्ठनाहवत्स्थूलदण्डस्याग्रे अङ्गुष्ठोऽपि चतुरङ्गुलनाह इति प्रोक्तः । दण्डमूले चतुरङ्गुलनाहः । दण्डाग्रे क्रमेण **काश्यात्** त्र्यङ्गुलनाहः कर्तव्यः । **वृत्तं त्र्यङ्गुलविस्तरं** दण्डाग्रे त्र्यङ्गुलप्रमाणविस्तारयुक्तं वृत्ताकारं कर्तव्यमित्यर्थः । **गजशिरःपृष्ठं** वृत्तस्याधःप्रदेशे गजशिरसि विद्यमानकुम्भद्वयवत् पृष्ठं कर्तव्य-मित्यर्थः । तथा चोक्तं कामिके—

पृष्ठे कुम्भद्वयोपेतः कर्षात् पूरः सपुष्करः । इति ।

पुरः पृष्ठोर्ध्वप्रदेशे वृत्ते **कर्दमे सारङ्गाङ्घ्रिवत्** कुरङ्गपादवत् पङ्के विद्यमा-नकुरङ्गपादस्य मध्यरेखावदुन्नतत्वात् रेखोभयपार्श्वे निम्नत्वाच्च । प्रतिबिम्बाकृति-**वदाज्यसंस्थितिः** घृताधारस्थानं कर्षप्रमाणपूरकं कार्यमिति शेषः । 'गोखुरा-कारवत्कार्यमाज्यस्थानं तदग्रतः ।' इत्युक्तत्वात् । **अधः** आज्यस्थानादधः प्रदेशे द्विकुम्भमित्यर्थः । **गण्ड्यग्रतः** कुम्भमध्यस्थितगण्डिकाग्रे **अब्जाङ्कितं** कमलेन अङ्कितं चिह्नितं कुर्यादित्यर्थः । 'पुष्कराधः प्रकर्तव्या गण्डिका द्वियवोन्नता ।' इत्युक्तत्वात् । क्वचिन्मूलेऽपि गण्डिकाद्वयं विहितम् । तथा मृगेन्द्रे —

द्व्यङ्गुष्ठपर्वगोऽङ्गुष्ठदण्डो हस्तायतिः स्रुवः ॥ इति ।

एतद्व्याख्याने द्व्यङ्गुष्ठप्रमाणकयोः पर्वणोः सन्ध्योरन्तर्गतो द्व्यङ्गुष्ठ-पर्वगो दण्डः । दण्डमूलाग्रयोः अङ्गुष्ठद्वयमानकं गण्डिकाद्वयमस्य कुर्यादिति नारायणकण्ठेन व्याख्यातम् । एवं कृतं स्रुवं नाम ॥ ६८ ॥

अथ एकेन श्लोकेन विष्टरपरिधीध्मसमिधां लक्षणमाह—**श्यामैरिति ।**

**श्यामैर्दर्भदलैः खरामगणितैः बाहुप्रमाणाः कृता
वेण्या वाथ सुवर्तिताः समशिखाः सद्ग्रन्थयो विष्टराः ।**

तन्माना ऋजवः पलाशतरुजाः श्यामाः परिध्याह्वया
इध्माष्षोडशकाङ्गुलास्समिदपि प्रादेशमात्राव्रणाः ॥ ६९ ॥

श्यामैः शुकपक्षवत् हरिद्वर्णैः । अनेन तदानीमेव दर्भाणामाहरणं सूचितम् । अन्यथा शुष्कत्वेन हरिद्वर्णाभावात् । **खरामगणितैः** खशब्दस्य आकाशवाचकस्य शून्यत्वाद्बिन्दुः । रामशब्दः

मत्स्यः कूर्मो वराहश्च नारसिंहश्च वामनः ।
रामो रामश्च रामश्च कृष्णः कल्कीति ते दश ॥ इत्यत्र रामशब्दस्य त्रिधा पठितत्वात् त्रिसंख्यावाचकः । खरामयोर्यथाक्रमं एकद्वितीयस्थानत्वात् त्रिंशत्संख्या जाता । तेन गणितैः संख्यातैः त्रिंशत्संख्याकैरित्यर्थः । **दर्भदलैः** कुशपर्णैः **बाहुप्रमाणाः** कृताः बाहुश्चतुर्विंशत्यङ्गुलः तत्प्रमाणदैर्घ्येण युक्ताः कृताः । **वेण्यो** नाम स्त्रीणां केशपाशः वेण्याकृतिवत् वेणीकृताः । अथवा **सुवर्तिताः** ग्रन्थिपर्यन्तं वर्तुलाकारेण गाढीकृताः **समशिखाः** ग्रन्थ्युपरि चतुरङ्गुलमानेन सदृशीकृतदर्भाग्राः **सद्ग्रन्थयः** एकाङ्गुलमानेन प्रदक्षिणावर्तग्रन्थियुक्ताः **विष्टराः** । इत्थंभूतानां दर्भाणां विष्टरा इति नाम । विष्टरा इति बहुवचनेन कुण्डं प्रति चत्वार एव कार्या इति सूचितम् । तथा चोक्तं कामिके—

चत्वारो विष्टरास्तद्वत् मताः परिधयोऽपि च ।
त्रिंशद्दर्भदलैर्गाढं ग्रथिता बाहुमात्रकाः ।
वेणिका वर्तुला वापि विष्टरा दर्भनिर्मिताः ॥ इति ।

तन्मानाः बाहुप्रमाणाः । त्रिंशद्दर्भदलयुक्तनाहप्रमाणमूलाश्च । **ऋजवः** अवक्राः **पलाशतरुजाः** पलाशवृक्षेभ्य उत्पन्नाः । ननु आगमेषु वृक्षान्तरेभ्य उत्पन्नाः परिधयो दृश्यन्ते । तथा मृगेन्द्रे—'याज्ञीयवृक्षजा बाहुमात्राः परिधयस्समाः ।' इति । तस्मात्पलाशतरुजा इति कथमुच्यते । अत्रायं परिहारः—यस्मिन् कुण्डे यद्यत्कर्मार्थं या समिद्ध्रियते तस्मिन् कुण्डे तत्तत्समिदुत्पन्नाः परिधय एव ग्राह्याः इति सूचनार्थं एकवृक्षजमात्रोक्तमित्यदोषः । तथा कारणे —

प्रोक्तं तु यत्समित्तेन परिधिस्तानि सङ्ग्रहेत् । इति ।

श्यामाः हरिद्वर्णाः । अशुष्का इत्यर्थः । **परिध्याह्वयाः** कुण्डपरिष्करणशाखारूपत्वेन परिधिनामधेया इत्यर्थः । तथा कामिके—

तन्माना ऋजवस्साद्रास्तत्कुण्डसमिदुद्भवाः ।
निर्व्रणाश्च समच्छेदाः प्रोक्ताः परिधयस्समाः ॥ इति ॥

इध्माः षोडशकाङ्गुला षोडशाङ्गुलप्रमाणदैर्घ्ययुक्ता इध्मा इत्युच्यन्ते । अत्र पलाशतरुजा एव ग्राह्याः । 'षोडशाङ्गुलानिध्मान् पालाशान् जुहुयाद्' इति क्रियाक्रमे श्रीमता अघोरशिवाचार्येणोक्तत्वात् । **समिदपि प्रादेशमात्रा** द्वादशाङ्गुलप्रमाणदैर्घ्ययुक्ता पालाशी समिदुच्यते । अपिशब्दोऽनुक्तसमुच्चयार्थः । तेन अर्कोद्भवादयो गृह्यन्ते । तथा चोक्तम्—

अर्कोद्भवाः पलाशोत्थाः खादिराश्चापामार्गजाः ।
अश्वत्थोदुम्बरोद्भूताः शमीदूर्वाकुशोद्भवाः ॥ इति ॥

अव्रणाः कीटोत्पन्नग्रन्थ्यादिविवर्जिता परिधयः समिधो गृह्यन्ते इति सूचनार्थं बहुवचनं कृतम् । तथा चोक्तं कामिके—

याज्ञीयवृक्षजाश्शस्ताः समिधो द्वादशाङ्गुलाः ।
सत्वचस्तास्समच्छेदा वक्रग्रन्थ्यादिवर्जिताः ॥ इति ॥ ६९ ॥

अथ युग्मेन श्लोकेन यागोपकरणद्रव्याणां सङ्ग्रहणमाह—**दर्भाग्रैरिति ।**

दर्भाग्रैस्तत्वसंख्यैः समशिखकलितग्रन्थिवेणीकलोच्च-
ज्ञानासिः क्षेपणीयाश्शिवघटमभितः सप्तविंशद्घटास्ते ।
धान्यस्थास्तन्तुजालास्सुवसनफलयुक्चूतपत्रास्तिलाज्य-
पात्रे चर्वर्थपात्रं करकजलधयोऽप्येलधूपार्घ्ययोग्याः ॥ ७० ॥

पुष्पायोरचितां च पायितपयोमध्वाज्यकां कर्तरीं
सिद्धार्थादिकभस्मलाजविकिरान् कुम्भांस्त्वकालारुणान् ।
कन्यावर्तितवह्निबह्निगुणितं सूत्रं च पाशाह्वयं
कर्पूरागरुसारचन्दनयुतं पुष्पादिकं चाहरेत् ॥ ७१ ॥

तत्त्वसङ्ख्यैः षट्त्रिंशत्संख्याकैः **दर्भाग्रैः** समशिखकलितग्रन्थ्यावर्तितदक्षिणावर्तग्रन्थियुक्तया वेण्या स्त्रीकेशपाशवेणीसदृशवेण्या सह **कलोच्च**षोडशाङ्गुलदैर्घ्योन्नतः **ज्ञानासिः** ज्ञानखड्गः इत्थंकृतो यो ज्ञानासिः तं च सङ्ग्रहेदिति सम्बन्धः । **धान्यस्थाः** व्रीहितण्डुलतिलादिधान्योपरि विद्यमानाः । **तन्तुजालाः**

सूत्रवेष्टिताः **सुवसनफलयुक्चूतपत्राः** सुवसनाः श्लक्ष्णभूतवस्त्रयुग्माच्छादिताः फलयुजः नारिकेलफलयुक्ताः । चूतपत्राः चूतपर्णसहिताः । स्वफलैर्युक्तचूतपत्राणि वा गृह्यन्ते । **शिवघटमभितः** शिवघटशब्देनात्राष्टविद्येश्वरघटयुक्तशिवकुम्भो विवक्षितः । तस्याभितः समन्तात् **क्षेपणीयाः** प्रतिष्ठापितुं योग्याः । **ते सप्तविंशद्घटाः** करणाधिकारपटलोक्तप्रमाणनिर्मिता नन्दिशान्त्यादिदेवतात्मकत्वेन विद्यमाना ये सप्तविंशतिकुम्भास्तानाहरेदिति सम्बन्धः । उक्तं च—

नन्दिशान्तिमहाकालबलारातींश्च पूर्वके ।
इन्द्राग्न्योरन्तरे भानुमाग्नेय्यां दिशि पावकम् ॥

विद्यां भृङ्गिगणेशौ च यमं याम्ये प्रपूजयेत् ।
नैर्ऋत्यां निर्ऋतिं विष्णुं महालक्ष्मीं प्रपूजयेत् ॥

वृषं निवृत्तिं स्कन्दं च वरुणं वारुणे यजेत् ।
वायुं गणेशं क्षेत्रेशं वायव्यां दिशि चार्चयेत् ॥

देवीं प्रतिष्ठां चण्डेशं सोममुत्तरतो यजेत् ।
ऐशान्यामीशलोकेशगुरूनेवं प्रपूजयेत् ॥ इति ॥

तिलाज्यपात्रे तिलाधारपात्रमाज्याधारपात्रं **चर्वर्थपात्रं** चरुपाकनिर्मितपात्रं होमार्थं तदाधारपात्रं च **करकजलधयः** करकाः तिलादिहोमद्रव्याधारभूतकलशाः जलधयः जलाधारभूतस्थूलघटाः **एलधूपार्घ्ययोग्याः** एलाधारार्थं धूपसंतापनार्थमर्घ्यपाद्याचमनप्रदानार्थं च ये योग्याः विद्यन्ते तान् करणाधिकारोक्तप्रमाणयुक्तांश्च आहरेदिति सम्बन्धः । **पुष्पायोरचितां** पुष्पायसा पुष्पमृदुलोहेन मृदुलोहसूचनार्थं पुष्पशब्दोऽत्र कृत इत्यवगन्तव्यम् । रचितां कृतां मृदुलोहेन कृता कर्तरी तीव्रतीक्ष्णा भवतीति द्योतनार्थमिदं विशेषणं कृतम् । **पायितपयोमध्वाज्यकां** तीव्रतीक्ष्णदृढीकरणार्थं वह्निप्रतापितकर्तर्या पानीकृतक्षीरमाक्षिकघृतगोघृतां **कर्तरीं** पाशसूत्रच्छेदिनीं ज्ञानशक्तेराधारभूतां । तथोक्तम्—'कर्तरी ज्ञानशक्तिस्तु यथा पाशान् छिनत्त्यसौ ।' इति । **सिद्धार्थादिकभस्मलाजविकिरान्** सिद्धार्थः श्वेतसर्षपः । आदिशब्देनाक्षतादयो गृह्यन्ते । भस्म विभूतिः लाजाः व्रीह्यग्निसंयोगेन स्फुटीकृताः विकिरान् सप्तविकिरान् । विकीर्यन्ते समन्तात् विक्षिप्यन्ते मण्टपान्तर्गतसर्वविघ्ननिवारणायेति विकिरास्तान् । उक्तं च—

लाजचन्दनसिद्धार्थभस्मपुष्पकुशाक्षताः ।
सप्तधा विकिराः प्रोक्ताः सर्वविघ्ननिवारकाः ॥ इति ॥

अकालारुणान् कृष्णवर्णरहितान् अरुणवर्णयुक्तान् कुम्भान् **कन्यावर्तितवह्निवह्निगुणितं** कन्यया द्विजादिकन्यया वर्तितं कार्पासादितूलैर्निर्मितं वह्निवह्निगुणितं त्रिगुणीकृतं पुनरपि वह्निगुणितं । नवतन्तुमित्यर्थः । **पाशाह्वयं** सूत्रं मलकर्ममायापाशनामधेयं सूत्रं मलादीनामाधारत्वेन तद्व्यपदेशः । उक्तं च—

नातिस्थूलकृशं शुभ्रं निर्ग्रन्थि सुदृढं शुभम् ।
वर्तितं द्विजकन्याभिस्त्रिगुणं त्रिगुणीकृतम् ।
पाशाह्वयमिदं सूत्रं तदाधारतया कृतम् ॥ इति ॥

कर्पूरागरुसारचन्दनयुतं कर्पूरादिमेलनेन लिप्तीकृतं पाशसूत्रं कर्तव्यम् । **पुष्पादिकं** पुष्पोशीरमूलश्रीगन्धाक्षतादिविहितहोमद्रव्यादिकमाहरेत् ॥ ७१ ॥

शिवावाहनार्थं कुम्भे देहसिद्ध्यर्थं देहे विद्यमानत्वगादिकॢप्तिमाह—**वस्त्रमिति ।**

वस्त्रं चर्म विलिप्तमृच्च रुधिरं मांसं घटे मृत्तिका
मेदस्तोयमथास्थि कूर्चमभितः संवीतसूत्रं सिरा ।
शुक्लं मध्यगरत्नहेमकुसुमं न्यस्तो मनुर्जीवितं
धान्यं सप्तकमासनं मखविधौ शम्भोरिदं पूजनम् ॥ ७२ ॥

आच्छादितं **वस्त्रं चर्म** त्वग्भवति । **विलिप्तमृच्च रुधिरं** कुम्भस्य रक्तवर्णार्थं रक्तवर्णमृदा लेपितमृत्तिका रक्तं भवति । **घटे** कुम्भे विद्यमाना **मृत्तिका** मांसं भवति । **तोयं** कुम्भेषु पूरितमुदकं **मेदः** मज्जा भवति । **कूर्चमस्थि** भवति । अभितः सर्वत्र **संवीतसूत्रं** परिवेष्टितसूत्रं **सिरा** नाडी भवति । **मध्यगरत्नहेमकुसुमं** कुम्भमध्ये निक्षिप्तनवरत्नं सुवर्णनिर्मितपुष्पं **शुक्लमिन्द्रियं** भवति । **न्यस्तो मनुः** आवाहितमन्त्रः **जीवितं** प्राणो भवति । **सप्तकं धान्यं** व्रीहितिलतण्डुलमुद्गमाषाढकयवाख्यसप्तधान्यमासनं भवति । **मखविधौ** यागविधाने शम्भोरिदं पूजनं भवति ॥ ७२ ॥

चतुरश्रकरणसिद्धिमाह—**पूर्वेति** ।

पूर्वादापरगं सुमध्यगमितं सूत्रं च धाम्नोत्तरे
मत्स्ये तत्र च मध्यतोऽर्धविलयैर्मानैश्च कोणेष्वपि ।
कुर्यान्मत्स्यचतुष्टयं त्विह चतुस्सूत्रं च वेद्यां भवेद्-
वेदाश्रं कृतकर्णसूत्रकमिदं तत्रोक्तमानात् कजम् ॥ ७३ ॥

धाम्नः इदमेव उन्नतविशालमिति निश्चितक्षेत्रस्य **पूर्वात्** पूर्वदिशमारभ्य **आपरगं** पश्चिमदिग्गतं **सुमध्यगमितं** सम्यङ्मध्यगप्रमाणकमवक्रकमित्यर्थः । **सूत्रं** प्रथमं प्राचीसूत्रं सम्यक् कृत्वेति शेषः । **उत्तरे** उत्तरदिशि **मत्स्ये** मत्स्यरूपे कृते सति सोमसूत्रप्रसिद्ध्यर्थं प्राचीसूत्रोन्नतप्रमाणेन प्रतिलोमानुलोमतो भ्रमयन्त्रकरणेनोत्तरदक्षिणदिग्गतरेखासन्धीकृतचिह्नयुक्तमत्स्यरूपं भवेत् । तस्य मध्यचिह्ने दक्षिणोत्तराग्रे सूत्रे प्रसारिते सति सोमसूत्रं सम्यङ् मध्यगं भवति । तत्र च सोमसूत्रे प्राचीसूत्रे वा अर्धविलयैरर्धप्रमाणहीनैः **मानैः** प्रमाणैः सोमसूत्रप्राचीसूत्रार्धप्रमाणैरित्यर्थः । **मध्यतः** क्षेत्रमध्यात् कोणेषु अग्न्यादिषु चतुर्षु मत्स्यचतुष्टयं मत्स्याकृतिचतुष्टयं कुर्यात् । सोमसूत्रप्राचीसूत्रयोः मध्यादिन्द्रादिचतुर्दिक्षु वृत्ताकारभ्रमयन्त्रकरणेन अग्न्यादिचतुर्षु मत्स्याकृतिचतुष्टयकरणेन रेखादिसन्धियुक्तमग्न्यादिकोणगतचत्वारि चिह्नानि भवन्ति । इह मत्स्यरेखासन्धियुक्तचिह्ने चतुस्सूत्रं पूर्वादिदिग्गतं कुर्यात् । एवंकृते वेद्यां **वेदाश्रं** चतुरश्रं भवेत् । चतुष्केषु समविशालयुक्तचतुरश्रं स्फुटं सिध्येदित्यर्थः । इदं चतुरश्रकृतकर्णसूत्रकमग्नेः वायव्यान्तं निर्ऋतेरीशानान्तं कृतकर्णसूत्रयुक्तं कृत्वा कृतकर्णसूत्रे चतुरश्रे **उक्तमानात्** शास्त्रोक्तवत् वक्ष्यमाणप्रमाणवत् **कजं** कमलं कारयेदिति शेषः । तथा सिद्धान्तशेखरे—

लक्षणं चतुरश्रस्य पूर्वं तस्मान्मयोच्यते ।
प्राक्सूत्रं सादितं कुर्यात् मध्ये पूर्वे च पश्चिमे ॥
चिह्नत्रये मयीक्षेत्रे कुण्डमाने सुनिश्चिते ।
सोमसूत्रप्रसिद्ध्यर्थं शफरं भ्रमयन्त्रतः ॥
प्रागङ्के प्रत्यगङ्के च हस्तं दत्वा समाचरेत् ।
उदग्दक्षिणतो मध्ये रेखाभ्यां जायते क्रमात् ॥

शफरस्य मुखे पृष्ठे मध्ये चिह्ने प्रसारिते ।
समन्तात् सोमसूत्रं स्यात् ततः कोणं समाचरेत् ॥
क्षेत्रार्धमानसूत्रेण दिक्षु चिह्नं समालिखेत् ।
क्षेत्रार्धमानसूत्रेण प्रतिलोमानुलोमतः ॥
सूत्राणि विन्यसेत्तेषु चत्वार्यङ्केषु बाह्यतः ।
चतुष्कोष्ठसमं क्षेत्रं चतुरश्रं भवेदिह ॥ इति ॥ ७३ ॥

अथ पद्मकरणलक्षणमाह—**क्षेत्र इति** ।

क्षेत्रे वृत्तचतुष्ककाङ्गुलमितं वृत्तं च कृत्वा ततो
द्वात्रिंशत्परितो विभज्य च बहिर्वृत्ते च तुर्ये भ्रमेत् ।
चन्द्रार्धानि च षोडश द्विपदतोऽन्तस्तृतीये तथा
कुर्यादष्टदलानि चन्द्रदलयोरिन्द्रादिदिक्ष्वग्रकम् ॥ ७४ ॥

क्षेत्रे पूर्वोक्तवत् कर्णादिसूत्रयुक्तचतुरश्रक्षेत्रे **वृत्तचतुष्ककाङ्गुलमितं** वृत्तचतुष्ककाणां चतुर्वृत्तानामङ्गुलमितमङ्गुलप्रमाणयुक्तं **वृत्तं** वृत्ताकारं कृत्वा प्रथमं क्षेत्रस्य कर्णार्धप्रमाणोन्नतचतुर्वृत्तानां समानाङ्गुलप्रमाणोन्नतक्रमेण विभज्य तद्विभागप्रमाणतश्चतुर्वृत्तं कुर्यादित्यर्थः । **ततश्चतुर्वृत्तभ्रमणानन्तरं परितः** समन्तात् **द्वात्रिंशद्विभज्य** द्वात्रिंशत्विभागं कृत्वा प्रथमवृत्तस्य कर्णिकात्वात् तत्त्यक्त्वा द्वितीयतृतीयचतुर्थवृत्तगताष्टदलानां प्रतिपादं त्रिरेखाकरणेन सर्वत्र द्वात्रिंशद्भागं भवति । **तुर्ये** चतुर्थे **बहिर्वृत्ते** तथा तृतीये वृत्ते **चान्तः द्विपदतः** इन्द्राद्यष्टदिग्गतसूत्राणामुभयपार्श्वस्थितद्विपदतः **षोडश चन्द्रार्धानि भ्रमेत्** तृतीयचतुर्थवृत्तयोरष्टदिग्गतसूत्राणामुभयपार्श्वस्थितद्विपदग्रहणेन चन्द्रार्धं प्रति चतुष्पदं भवति । तच्चतुष्पदप्रमाणेनोत्तरत्र अष्टदलसिद्ध्यर्थं प्रथमं षोडशचन्द्रार्धानि **कुर्यात् इन्द्रादिदिक्षु** इन्द्राग्नेयादिदिक्षु अग्रकं यथा भवति तथा **चन्द्रदलयोश्चन्द्रार्धदलयोरेकीकरणेनाष्टदलानि** अष्टपत्राणि दलान्तरभागं त्यक्त्वा सकीलकानि कुर्यात् । शिष्टद्वितीयवृत्ते द्वात्रिंशत्केसराणि कुर्यात् ॥ तथा मृगेन्द्रे—

वेदभक्तेऽब्जकर्णार्धे चतुर्वृत्तावधि स्थितम् ।
कर्णिकादिदलाग्रान्तं पङ्कजाङ्गचतुष्टयम् ॥
तदष्टपत्रं द्वात्रिंशत्केसरं सर्वकामदम् ॥ इति ॥ ७४ ॥

अथ पद्मस्य रञ्जनार्थं पीतादिवर्णरचनाक्रममाह—**पीतेनेति** ।

पीतेनोज्ज्वलकर्णिकां च रजसा श्वेतेन रक्तेन वै
पीतेनापि च केसराणि रजसा शुक्लेन पत्राणि च ।
श्यामेनोच्चदलान्तरं सितवृती रक्तेषु कोणेष्वधो
शुक्लासृक्कपिलासिताभकलिताः कीलास्सपुष्पा बहिः ॥ ७५ ॥

पीतेन हरिद्रावर्णेन **रजसा** धूलिना **उज्ज्वलकर्णिकां** नीलवर्णनवबीजैः प्रकाशमानकर्णिकां कारयेदिति शेषः **श्वेतेन रक्तेन पीतेन** वर्णेन रजसा यथाक्रमं केसराग्रादारभ्य मूलपर्यन्तकेसराणि किञ्जल्कानि कुर्यात् । **शुक्लेन पत्राणि** कार्याणि । **श्यामेन** हरिद्वर्णेन उच्चदलान्तरमुभयदलमध्यं कार्यम् । **सितवृत्तिः** वृत्ताकृतिः श्वेतवर्णेन कार्या । **रक्तेषु कोणेषु** अग्न्यादिचतुर्षु कोणेषु रक्तवर्णानि पत्राणि कार्याणि । **शुक्लासृक्कपिलासिताभकलिताः** शुक्लरक्तकपिलकृष्णवर्णैर्यथाशोभं कलिता बन्धिताः । **कीलाः** दलानां सन्धानकीलाः कार्याः । अतसीपुष्पसन्निभा इत्युक्तत्वात् । **बहिः** कीलकानां बाह्यभागे । तदग्र इत्यर्थः । **सपुष्पाः** पत्रसहिताः [1]कीलाः कार्या इति शेषः । [2]कीलानामग्रे पत्राणि कार्याणीत्यर्थः । तथा मृगेन्द्रे—

हेमाभकर्णिकं नीलनवबीजं सितच्छदम् ।
पीतरक्तसितोदग्रकेसरालङ्कृतोदरम् ॥

चित्रं दिग्गात्रकं रक्तकोणाब्जं नीलकीलकम् ।
पीठं माहेश्वरं कुर्यात् मण्डलं चतुरश्रकम् ॥ इति ॥ ७५ ॥

अथ एकेन श्लोकेन गात्राणां वर्णानां सत्वरजस्तमोरेखाणां च विस्तारमाह—**गात्राणीति** ।

गात्राणि कृष्णेन्दुभमिन्दुरक्तं
सुरक्तहेमाभसुकृष्णमैन्द्रात् ।
सत्त्वादिरेखा यवनिम्नमध्या
मध्याङ्गुलिप्रक्रमविस्तराश्च ॥ ७६ ॥

1. क. किञ्जल्काः   2. किञ्जल्कानां

गात्राणि वक्ष्यमाणक्रमेण पद्माद्बाह्ये चतुर्दिक्षु विरचितपीठरचनाविशेषाणि । **कृष्णेन्दुभं** कृष्णश्वेतवर्णं **इन्दुरक्तं** श्वेतवर्णं रक्तवर्णं **सुरक्तहेमाभं** अत्यन्तं रक्तवर्णं स्वर्णवर्णं **सुकृष्णं** अत्यन्तं कृष्णवर्णं पीतवर्णमप्यत्रानुवर्तते । **ऐन्द्रादि**न्द्रादिचतुर्दिक्षु यथाक्रमं वर्णक्रमः । उक्तं च—

कृष्णश्वेतं पूर्वभागे श्वेतरक्तं तु दक्षिणे ।
रक्तपीतं पश्चिमतः पीतकृष्णमुदग्दिशि ॥ इति ॥

गात्राणां सोपानपद्धतिं यथाशोभं चित्रवर्णक्रमेण कार्यमिति नानावर्णत्वमुक्तमिति ज्ञेयम् । **सत्वादिरेखाः** सत्वरजस्तमस्संज्ञकानां यथाक्रमेण शुक्लरक्तकृष्णादिरेखाः **यवनिम्नमध्याः** सत्वरेखामारभ्य रजस्तमसोरेकैकं प्रति यवप्रमाणेन निम्नयुक्तमध्याः कार्याः । अन्यस्य वर्णस्य सकाशात् अन्यस्य वर्णस्य यवप्रमाणनिम्नत्वकरणेन न्यूनत्वं कार्यमित्यर्थः । **मध्याङ्गुलिप्रक्रमविस्ताराश्च** मध्यमाङ्गुलौ यः प्रक्रमविस्तारः तद्वत् विस्तारयुक्ता कार्येति शेषः । शालितण्डुलादिना श्वेतादिवर्णक्रमो ज्ञेयः । उक्तं च—

यवगोधूमजैश्चूर्णैः शालितण्डुलजैस्सितः ।
धातुसिन्दूरजं रक्तं कृष्णं दग्धयवादिकम् ।
हरिद्रासम्भवं पीतं धान्यैर्वा तत्प्रभान्वितैः ॥ इति केचित् ॥ ७६ ॥

एकेन श्लोकेन गात्रकरणलक्षणं पद्मविस्तारप्रमाणं चाह—**सप्तेति** ।

सप्तादीन् विषमान् दलांस्तु धरणीदिक्स्थैश्च सूत्रैः पुरा
तैस्सार्धं दलसंख्यया प्रतिदलं भक्त्वा चतुर्भिर्लिखेत् ।
दन्ताङ्गुल्युपरिस्थपद्ममपि वा नार्कांशतो नाप्यधो
वेदाधोऽर्कदलात्परं त्वनुचितं प्रोक्तं तथा देशिकैः ॥ ७७ ॥

धरणीदिक्स्थैः धरण्यां क्षेत्रे दिक्स्थैः अष्टदिक्संख्याकत्वेन उभयतो विद्यमानैः **सूत्रैः पुरा** प्रथमं **सप्तादीन्** सप्तपूर्वकान् **विषमान् दलान्** विषमपदान् । कारयेदिति शेषः । विषमपदत्वेन सप्तपदादूर्ध्वं नवैकादशपदक्रमेण यथारुच्युन्नत गात्रकरणं ज्ञापितं भवति । **तैः** सप्तपदैः **सार्धं** सहितं **दलसंख्यया** पदसंख्यया **प्रतिदलं** प्रतिपदं **भक्त्वा** लोपं कृत्वा प्रथमं सप्तपदादूर्ध्वमुभयपार्श्वत एकैकपदलोपेन पञ्चपदं तदूर्ध्वं द्विपदलोपेन त्रिपदं तस्मादूर्ध्वं एकपदं एवं क्रमेणोभयपार्श्वत

एकैकपदलोपेन एकैकपदान्तं कुर्यात् । तदनन्तरं **चतुर्भिश्चतुष्पदप्रमाणैः लिखेत्** पूर्वोक्तवत् पदलोपेन रेखां कुर्यात् । **सप्तसप्तपदं कृत्वा** मध्ये **एकपदं** गृहीत्वा तत्पदादारभ्य दक्षिणान्तमुत्तरान्तं च त्रिपञ्चसप्तपदग्रहणेन **कुर्यादित्यर्थः**। एवं **पूर्वपश्चिमदिग्गतगात्रकरणं** कर्तव्यम् । दक्षिणोत्तरगात्रकरणं तु मध्यपदै-कादारभ्य पूर्वान्तं पश्चिमान्तं त्रिपञ्चसप्तपदग्रहणेन गात्रं कार्यम् । एवमेव **पूर्व**-पश्चिमोत्तरदिशि दक्षिणदिशि च युक्त्या गात्रकं कार्यम् । **दन्ताङ्गुल्युपरिस्थपद्मं** दन्ताङ्गुलिः द्वात्रिंशदङ्गुलमुपरिस्थपद्मं तस्मादूर्ध्वस्थितकमलं न कर्तव्यम् । द्वात्रिंशदङ्गुलप्रमाणेन पद्मविस्तारप्रमाणं तदूर्ध्वं न भवतीत्यर्थः । 'द्वात्रिंशदङ्-गुलादूर्ध्वं प्रकृताद्यपि नाम्बुजम्' इत्युक्तत्वात् । प्रकृतिः मुख्ययागः । तत्रापि द्वात्रिंशदङ्गुलादूर्ध्वं पद्मं न कार्यमिति नियमः । द्वात्रिंशदङ्गुलपद्मं अष्टहस्त-विषयम् । द्वित्रिचतुर्हस्ते मण्टपे चतुर्विंशत्यङ्गुलप्रमाणपद्मं पञ्चषट्सप्तहस्ते मण्टपे यथाक्रमं षड्विंशत्यष्टाविंशतित्रिंशदङ्गुलप्रमाणेन पद्मं कर्तव्यम् । इदं तु मृगेन्द्रटीकायां [1]दृष्टम् । **अर्कांशतः** द्वादशाङ्गुलप्रमाणादधः पद्मं न कर्त-व्यम् । **वेदाधः** चतुष्पत्रादधः पद्मं न **अर्कदलात् परं** द्वादशपत्रादुपरि विद्यमानं पद्मं **अनुचितं** भवति । तथा अनेनैव प्रकारेण **देशिकैः** आचार्यैः **प्रोक्तम्** । आगमेषु दृष्ट्वैव प्रोक्तमिति शेषः ॥ ७७ ॥

लतालिङ्गोत्पन्नलक्षणमाह—**भक्तेति** ।

> **भक्ते विंशतिधा बहिश्शशिपदा वीथिः सिता दिक्षु जै-**
> **द्वाराणीशमुखद्युतीन्युभयतो लिङ्गानि पाण्डुद्युगैः ।**
> **कोणेष्वब्धिपदैर्लता हरितभा वीथिश्चतुष्षष्टिभिः**
> **पद्मं शान्तिकलादिभानि च लतालिङ्गोद्भवे मण्डले ॥ ७८ ॥**

विंशतिधा भक्ते क्षेत्रे विंशतिपदाकारेण विभाजिते सति **बहिर्बाह्यपदे शशिपदा** एकपदप्रमाणा **वीथिः सिता** समन्तात् पङ्क्तिः श्वेता कार्येति शेषः । **दिक्षु** इन्द्रादिचतुर्दिक्षु । **जैः** जैकारोऽष्टसंख्यावाची तावद्भिः पदैः **द्वाराणि** बाह्ये वीथेरूर्ध्वं द्विपदविशालेन चतुष्पदोन्नतपर्यन्तं मध्यस्थाष्टपदैः चतुर्द्वाराणि कर्तव्यानि । **उभयतः** द्वारोभयपार्श्वस्थितेषु विशालोन्नताभ्यां द्वादशप्रमाण-

1. ख. द्रष्टव्यम्

पदेषु **पाण्डुद्युगैः** पकार एकः डुकारस्त्रिः द्युः एकः गः त्रिः एतावत्संख्याकैः पदैः यथाक्रमेण द्वारसमानपदादारभ्य लिङ्गपट्टकण्ठपीठानि कार्याणि । प्रति-द्वारमुभयलिङ्गकरणादष्टलिङ्गानि **ईशमुखद्युतीनि** ईशस्य परमेश्वरस्य मुखानां तत्पुरुषादीनां द्युतयः कान्तयः इव कान्तियुक्तानि तत्तद्दिङ्मुखवर्णाकृतीनि कार्या-णीत्यर्थः । सद्योजातादिवक्त्राणां वर्णमुक्तं पञ्चावरणस्तवे श्रीमदघोरशिवा-चार्येण—

> प्रत्यक् श्वेतं वदनमरुणं चोत्तरं कृष्णवर्णं
> याम्यं पूर्वं कनकरुचिरं शुक्लमूर्ध्वं दधानम् । इति ।

कोणेषु अग्न्यादिचतुर्षु कोणेषु **अब्धिपदैः**चतुष्पदैः **लता** लताकारा कार्या । **हरितभा वीथिः** हरितवर्णा पङ्क्तिः लिङ्गोर्ध्वे एकपदेन समन्तात्कार्या । **चतुष-ष्टिभिः** पदैः मध्ये **पद्मं** कार्यम् । तत्र पद्मे चतुष्पदेन मध्ये कर्णिकाः तदु-पर्येकपदेन समन्तात्केसराणि ततो द्विपदेन अष्टदिक्षु पत्राणि **लतालिङ्गोद्भवे** लताकारलिङ्गोत्पन्ने मण्डले **शान्तिकलादिभानि** शान्त्यादिकलानां कान्तिरिव कान्तियुक्तानि पीतपत्राणि पूर्वादिचतुर्दिक्षु कपिलकृष्णश्वेतरक्तानि कर्तव्यानीति शेषः । अग्न्यादिकोणेषु भिन्नवर्णतया श्वेतरक्तपीतकृष्णैर्दलानि कार्याणीति च ॥ ७८ ॥

लतालिङ्गमण्डलभेदमाह—**अष्टेति** ।

> **अष्टाविंशतिभाजिते वसुपदैर्मध्येऽम्बुजं भागतः**
> **पट्टं स्यात्सितवीथिका शशिपदात् कोणे लता सप्तभिः ।**
> **द्वारं दिक्षु मुनिद्वयैरुभयतो लिङ्गं च षट्सप्तभि-**
> **र्वीथिर्बाह्यपदेन मण्डलमिदं चान्यल्लतालिङ्गजम् ॥ ७९ ॥**

अष्टाविंशतिभाजिते क्षेत्रे अष्टाविंशतिपदैर्भागीकृते सति **मध्ये** क्षेत्र-मध्ये **वसुपदैः** अष्टपदैः मध्ये अष्टपदत्वाभावात् वसुसंख्यागुणितवसुसंख्यया विहितचतुष्षष्टिपदैः**रम्बुजं** **कमलं** भवति । यथा **भागतः** कमलस्य समन्तादेकपदात् **पट्टं स्यात्** पट्टाकृतिः कर्तव्या । **शशिपदात्** एकपदात् **सितवीथिका** पट्ट-बाह्ये श्वेतवर्णपङ्क्तिर्भवति । **कोणे** अग्न्यादिचतुष्कोणे **सप्तभिः** पदैः लताकारा कर्तव्या । **दिक्षु** इन्द्रादिचतुर्दिक्षु **मुनिद्वयैः** द्विपदविशालेन सप्तपदोन्नत-पर्यन्तस्थितचतुर्दशपदैः **द्वारं** भवति । **उभयतः** द्वारोभयपार्श्वे **षट्सप्तभिः** षट्पद-

विशालेन सप्तपदोन्नतपर्यन्तस्थितद्विचत्वारिंशत्पदैः यथाक्रमेण चतुष्षट्चतुर्द्वि-चतुष्षट्पदैः लिङ्गपट्टकमलकण्ठकमलपीठयुक्तं **द्वारं** प्रति उभयलिङ्गकरणात् अष्टलिङ्गं कर्तव्यम् । **बाह्यपदेन** चतुर्दिक्षु शेषितैकपदेन **वीथिः** **पङ्क्तिः** स्यात् । **इदमनेन** प्रकारेण कृतम**न्यत्** पूर्वोक्तादन्यत्स्वरूपं **लतालिङ्गं** लताकारलिङ्गोत्पन्नमण्डलं भवतीति ॥ ७९ ॥

अथ नवनाभमण्डललक्षणमाह—**क्षेत्रे** इति ।

क्षेत्रे सप्तपदीकृते शशिपदाद्वीथिस्समन्तात्पदै-
दिक्ष्वष्टासु च पङ्कजानि परितो वीथीन्दुभागेन च ।
द्वाराण्यष्ट कजान्तरस्थितपदैरन्तस्स्थितैर्गात्रकं
पद्मं स्यान्नवनाभमण्डलमिदं श्रीमन्मतङ्गोदितम् ॥ ८० ॥

क्षेत्रे गृहीतक्षेत्रे **सप्तपदीकृते** प्रागुदक्सूत्राष्टकैः सप्तभागीकृते **शशिपदात्** मध्ये एकपदं प्रगृह्य तस्मात् पदात् बाह्ये **समन्तात् पदैः** परितःस्थिताष्टपदै**र्वीथिः** पङ्क्तिः कार्या । **दिक्ष्वष्टासु पङ्कजानि** वीथेर्बाह्यस्थितषोडशपदमध्येषु इन्द्राद्यष्टपदेषु कमलानि कार्याणि । पङ्कजाद्बाह्ये **इन्दुभागेन** शेषितैकपदेन **परितस्समन्तात्** **वीथी** कर्तव्या । तत्र वीथ्यामिन्द्रादिचतुर्दिक्षु स्थितमध्यपदानामुभयपार्श्वस्थितपदाष्टकं द्वारार्थं त्यक्त्वा अग्न्यादिकोणतः द्वादशपदेषु वीथी कर्तव्येति शेषः । **कजान्तरस्थितपदैः** अष्टकमलमध्यस्थिताष्टपदैः **अष्ट द्वाराणि** कर्तव्यानि । **अन्तस्स्थितै**रिन्द्रादिदिक्षु द्वारमध्यगतैः पदेन **गात्रकं** पीठरचनाविशेषः कार्यः । इदमेवंकृतं पद्मं नवनाभमण्डलमिति नाम स्यात् । **श्रीमन्मतङ्गोदितं** मतङ्गपारमेश्वरागमे उक्तम् । तथा मतङ्गे—

विभज्य सप्तभिर्भागैः मध्यपद्मं प्रकल्पयेत् ।
द्वात्रिंशदङ्गुलसमं सुविभक्तं तु पूर्ववत् ॥

भागमेकं परित्यज्य दिक्ष्वष्टासु यथाक्रमम् ।
मध्याम्बुजप्रमाणानि पद्मान्यष्टौ समालिखेत् ॥

चतुर्विंशद्दलं भद्रमष्टद्वारमथोदितैः ।
रजोभिः पूरयेत्सम्यक् यथा भवति शोभनम् ॥ इति ॥

शुक्लादिरागकरणं देवतावाहनं तु सा ।
मध्ये तत्कमलं शुक्लमापीतं पूर्वपङ्कजम् ॥

आग्नेय्यां रक्तकमलं नीलाब्जं दक्षिणे स्थितम् ।
नैर्ऋत्यां पीतकृष्णाभं शुक्लं वारुणदिक्स्थितम् ॥

आधूम्रं वायुकोणस्थं रक्तपीतं तदुत्तरे ।
ईशाने मौक्तिकं सख्यं शुक्लं वा नवपङ्कजम् ॥

नवनाभं समाख्यातं प्रासादाख्यं शिवस्य च ।
मध्ये पद्मे शिवः पूज्यो लोकेशाश्च परेषु च ॥

अस्त्राणि बाहुवीर्यं तु भक्त्या यः पूजयेत्ततः ।
अश्वमेधसहस्राणि राजसूयशतानि च ॥

एतन्मण्डलपूजायाः कलां नार्हन्ति षोडशीम् ।
नासौ लिप्यति पापेन पद्मपत्रमिवाम्भसा ।
नित्ये नैमित्तिके काम्ये कर्तव्यं भुक्तिमुक्तये ॥ इति च ॥ ८० ॥

अथानन्तविजयमण्डललक्षणं युग्मेन श्लोकेनाह—**क्षेत्रे** इति ।

क्षेत्रे षट्पदीकृते श्रुतिपदैर्मध्येऽम्बुजं भागयो-
र्वीथी स्यात् परितस्तदर्धविलयात् पीठाय गात्राणि च ।
बाह्ये दिक्ष्वभितो विदिक्षु च पदैरिन्द्रादिभैरावृति-
वीथीवक्त्रगतैस्तथाष्टपदकैर्द्वाराणि शान्त्यादिभिः ॥ ८१ ॥

शिष्टैरष्टपदैश्च दिक्स्थपदयोस्सव्यापसव्यस्थितैः
श्वेतार्कासितलोहिताभशशभृच्छ्वेतासितस्वर्णभैः ।
वर्गैरष्टभिरादिकैश्च लिखितैर्युक्तं च सत्वादिका
रेखा बाह्यकृता त्वनन्तविजयं स्वायम्भुवं मण्डलम् ॥ ८२ ॥

क्षेत्रे गृहीतक्षेत्रे **षट्पदीकृते** प्रागुदक्सूत्रसप्तकैः षड्भागीकृते **मध्ये** **श्रुतिपदै**श्चतुष्पदै**रम्बुजं** कमलं कर्तव्यम् । **भागयोर्वीथी** स्यात् परितः शेषितद्विपदयोः समन्तात् पङ्क्तिः कार्या । इदं वीथीकरणं पूर्वादिचतुर्दिक्षु कोणस्थितपदसमानपदकरणायेति मन्तव्यम् । **तदर्धविलयात्** इन्द्रादिचतुर्दिक्षु

पश्चात् **बाह्ये वीथिमध्यस्थितद्विपदेषु** मध्यपदकरणायार्धपदलोपात् **पीठाय विघ्नेश्वर-पीठकरणाय कर्तव्यम्** । पश्चात् बाह्यपङ्क्तौ पदाष्टकेषु अष्टपीठानि कार्याणीत्यर्थः । इन्द्रादिचतुर्दिक्षु स्थितपीठात् बाह्ये तत्पीठसमानपदकरणेन **गात्राणि** चतुष्पीठरचनाविशेषाणि कार्याणि । इममेवार्थं व्यक्तीकारेणाह **बाह्ये** पश्चात् बाह्ये **दिक्षु** इन्द्रादिचतुर्दिक्षु **विदिक्षु** अग्न्यादिकोणेषु **इन्द्रादिभैरिन्द्राग्न्यादि-**वर्णयुक्तैः **पदैः** अष्टदिक्षु स्थितैकैकपदैः **अभितः** समन्तात् **आवृतिः** देवावरणानि कुर्यात् । इन्द्रादिवर्णः पीतरक्तकृष्णेन्द्रनीलधवलहरिद्वर्गस्वर्णवर्णस्फटिकसमान-कान्तिः । एतैः वर्णैः पदानि कार्याणीत्यर्थः । **शान्त्यादिभैः** पीतकृष्णशुक्ल-रक्तवर्णैः तथा अष्टपदकैश्चतुर्दिक्षु व्यवस्थिताष्टपदकैः **द्वाराणि** अष्ट द्वाराणि कर्तव्यानीति शेषः । **दिक्स्थपदयोश्चतुर्दिक्षु** विद्यमानद्विपदयोस्सव्यापसव्यस्थितैः चतुर्दिक्स्थितद्वारस्य दक्षिणवामक्रमेण विद्यमानैः **शिष्टैः** शेषितैरष्टपदैः । किंभूतैः **श्वेतार्कासितलोहिताभशशभृच्छ्वेतासितस्वर्णभैः** अर्कवर्णो रक्तः शशभृच्चन्द्रवर्णः श्वेतः एतद्वर्णाष्टकसमानैरादिकैः श्वेतादिकैः **लिखितैः** श्वेतादिवर्णाकारेण लेखीकृतैः **अष्टभिर्वर्गैः** अष्टसंख्यायुतसमानवर्णैर्युक्तं सहितं कार्यमिति शेषः । **सत्त्वादिरेखा** शुक्लरक्तकृष्णपूर्वा रेखा **बाह्यकृता** बहिर्भूमिकृता भवेत् । तथा च मतङ्गे—

भूमिं शुक्लेन रजसा तिसृभिश्चतुरश्रकम् ।
रेखाभिः कारयेन्मन्त्री सितरक्तासितक्रमात् ॥ इति ।

एवंकृतस्यानन्तविजय इति नामानन्तविजयकरणादन्वर्थं प्राप्तमिति भावः । **स्वायम्भुवं मण्डलं** स्वायंभुवागमे प्रोक्तमण्डलम् । तथा स्वायम्भुवे—

अथाचार्याभिषेकार्थमनन्तविजयं यजेत् ।
काम्यानां च प्रसिद्ध्यर्थं निधिभूतमिदं यतः ॥

द्विहस्तपीठगर्भस्थमध्ये पद्मं समालिखेत् ।
षडङ्गुले पुरोभागे प्रथमे कर्णिकां लिखेत् ॥

केसराणि द्वितीये तु दलानां सन्धयोऽपरे ।
चतुर्थे तु दलाग्राणि पद्ममेवं प्रकल्प्य तु ॥

द्विहस्तामालिखेद्वीथीं पीठस्य परितः स्थिताम् ।
वीथ्यर्धेन पृथक् कार्यं देवतावरणं बहिः ॥

वीथीमुखाष्टविच्छेदभागाष्टकविकल्पिता ।
वीथीमुखार्धनिर्वृत्तबहिर्द्वाराष्टसंयुतम् ॥

सूत्रयित्वा ततः पश्चात् रजस्सर्वं निपातयेत् ।
तानि सम्यक्प्रणीतानि यथार्थविभवानि तु ॥

पातयेत् सूत्रमार्गेण सितादीन्यानुपूर्वशः ।
सितरेखासुनिर्वृत्तं बही रक्तादिभिर्वृतम् ॥

ऋजुमार्गाष्टकोपेतमनन्तविजयं शुभं ।
तस्य मध्ये न्यसेद् देवं कर्णिकायां परं शिवम् ॥

ईशानमूर्ध्नि विन्यस्य वक्त्रं पूर्वदले न्यसेत् ।
दक्षिणे तु तथाघोरं वामदेवमथोत्तरे ॥

पश्चिमे तु दले सद्यं पदव्यूहक्रमात्पुनः ।
अङ्गादीनामनेनैव विदिशा तु समारभेत् ॥

आग्नेयदलमूले तु प्रणवं हृदयं न्यसेत् ।
ईशाने तु शिरश्चैव नैर्ऋते च शिखां न्यसेत् ॥

वायव्यां कवचं तद्वद्दलाग्रेऽस्त्रं तथोत्तरे ।
सर्वात्मानं शिरोऽष्टार्णं ज्वालिनीं पिङ्गलं तथा ॥

नेत्रं पूर्वदलाग्रे तु दक्षिणेऽस्त्रं च विन्यसेत् ।
गायत्रीं पश्चिमे स्थाप्य विद्याङ्गानि तु पूर्ववत् ॥

दलान्तरेषु सर्वेषु ततः पाशुपतं न्यसेत् ।
ऐन्द्रे पीठे ततोऽनन्तं याम्ये सूक्ष्मं तु विन्यसेत् ॥

आवाहनार्घ्यपाद्यैश्च वारुणे च शिवोत्तमम् ।
एकनेत्रं ततो देवमुत्तरे स्थाप्य पूज्य च ॥

ईशाने तु न्यसेद्धीमान् एकरुद्रं समाहितः ।
त्रिमूर्तिमग्निदेशे[1] तु श्रीकण्ठं नैर्ऋते ततः ॥

1. क. मग्निकोणे तु

शिखण्डिनं च वायव्ये पीठे संपूजयेत्क्रमात् ।
ततो विद्येश्वरीशक्तिर्मूलविद्येति विश्रुता ॥
विद्यामूर्तिश्शिवस्यैषा संपूज्या यागकर्मणि ।
वर्गद्वयमनन्तस्य दक्षिणोत्तरपार्श्वयोः ।
विभिन्नां पूजयेद्देवीं सूक्ष्मादीनां ततः क्रमात् ॥
एवं वर्गाष्टकावस्था चतुर्दिक्षु व्यवस्थिता ।
संपूज्य पूजयेदस्त्रं द्वारस्थानाष्टकस्थितम् ॥ इति ॥ ८२ ॥

भद्रमण्डललक्षणमाह—**वेदैरिति ।**

वेदैश्चतुष्षष्टिपदेषु मध्ये पद्मं च वीथी पदतोऽब्जभागैः ।
द्वाराणि दिक्षु द्विपदं कपोलं स्यात्कोणबन्धोऽन्यपदैश्च भद्रम् ॥ ८३ ॥

क्षेत्रे प्राक्सूत्रोदक्सूत्रनवानामास्फालनेन जातेषु **चतुष्षष्टिपदेषु मध्ये वेदपदैः पद्मं** भवति । **पदतः वीथी** पश्चात् बाह्यस्थितैकपदात्परितः पङ्क्तिः कार्या । **दिक्षु** इन्द्रादिचतुर्दिक्षु अब्जभागैर्मध्यस्थितकमलसमानचतुष्पदैश्चतुर्द्वाराणि कर्तव्यानि । **द्विपदं कपोलं** स्यात् द्वारोभयपार्श्वस्थितद्विपदं **कपोलं** द्वारपार्श्वावयवं भवति । **अन्यपदैः** शेषितपदैः **कोणबन्धः** अग्न्यादिस्थितपदं भवति । एवंकृतस्य भद्रमण्डलमिति नाम । तथा षट्सहस्रे—

अष्टधा विभजेत्क्षेत्रं मध्ये पद्मं चतुष्पदम् ।
तद्बाह्ये वीथिका कार्या पदैकेन समन्ततः ॥
पद्ममानं चतुर्द्वारं द्विपदेन कपोलकम् ।
कोणबन्धं ततश्शिष्टो भद्रमेतदुदीरितम् ॥ इति ॥ ८३ ॥

पुराकारमण्डलभेदं युग्मेनाह—**क्षेत्रे** इति ॥

क्षेत्रे विंशतिवेदभागरचिते मध्ये कलाभिः कजं
द्वाभ्यां गात्रकवीथिके श्रुतिपदैर्विद्येश्वराद्यावृतिः ।
तत्राब्जोत्पलस्वस्तिकानि च तथा वज्रादिवल्लिप्तिर्बहि-
र्द्वारं पद्मसमं कपोलदलकाद्येकैकतः पार्श्वयोः ॥ ८४ ॥

शिष्टैः कोणमथेन्दुभच्छदवृतं पीतं च मध्यं शशी-
रक्तस्वर्णभकेसरं हरितभं कोणाश्च धर्मादिभाः ।
चित्रं गात्रकमिन्दु वीथि च सितं पद्मं च पाण्डूत्पलं
रक्तं स्वस्तिकमस्त्रकाणि मुखभं द्वारं पुरं कैरणम् ॥ ८५ ॥

क्षेत्रे गृहीतक्षेत्रे **विंशतिवेदभागरचिते** प्रागुदगन्तपञ्चविंशतिसूत्रैश्चतुर्विंशतिभागीकृते **मध्ये कलाभिः** षोडशपदैः **कजं** कमलं भवेत् । **द्वाभ्यां गात्रकवीथिके** कजात् बाह्यस्थितपदाभ्यां समन्तात् गात्रकवीथिके कार्ये तत्र इन्द्रादिदिक्षु चतुष्पदैः चतुर्गात्राणि कार्याणि । शेषितपदैः पङ्क्तिः कार्या । **श्रुतिपदैर**ष्टदिक्षु मध्यस्थितचतुष्पदप्रमाणयुक्तचतुर्व्यूहगतचतुष्पदै**र्विद्येश्वराद्यावृतिः** अनन्ताद्यष्टकनन्दिकाद्यष्टकेन्द्राद्यष्टकं वज्रादीनामावरणं कार्यम् । कोणेषु वीथिकोणादारभ्य चतुष्पदप्रमाणेन बाह्यकोणपर्यन्तं मध्यं ज्ञेयम् । तत्र विद्येश्वरगणेश्वरेन्द्राद्यष्टकेषु व्यूहेषु यथाक्रमं अब्जोत्पलस्वस्तिकानि कमलकुवलयस्वस्तिकानि कार्याणि कर्तव्यानि । **तथा वज्रादिवल्लिप्तिः** वज्रशक्त्यायुधानां स्वस्तिकानि पद्मायुधस्येशानकोणाद्दक्षिणचतुष्पदे कमलं कार्यम् । निर्ऋतिकोणादुत्तरचतुष्पदे चक्रस्य कुवलयं कार्यम् । ईशानाद्दक्षिणचतुष्पदे ब्रह्मणः कमलं कार्यम् । निर्ऋतिकोणादुत्तरचतुष्पदे विष्णोरुत्पलं कर्तव्यम् । ब्रह्मविष्ण्वोः निर्ऋतीशानदिक्पालयोः समानपदेन स्थानं ज्ञातव्यम् । बहिरिन्द्रादिचतुर्दिक्षु स्थितव्यूहस्योभयपार्श्वे पद्मसमं षोडशपदप्रमाणद्वारं द्विपदविशालेन अष्टपदोन्नतपर्यन्तं चतुर्द्वारं कर्तव्यम् । **पार्श्वयो**र्द्वारस्योभयपार्श्वयोः **एकैकतः** एकैकपदप्रमाणात् **कपोलगलकादि**द्वारपार्श्वावयवकण्ठोपकण्ठादि कार्यम् । **शिष्टैः** शेषितपदैः **कोण**मग्न्यादिकोणोभयपार्श्वपदं भवति । **इन्दुभच्छदवृतं** श्वेतवर्णदलावृतं **पीतं** कर्णिकायां पीतवर्णं **शशीरक्तस्वर्णभकेसर**मूर्ध्वभागादारभ्य श्वेतरक्तस्वर्णकान्तिकिञ्जल्कयुक्तं **मध्यं** मध्यकमलं कार्यम् । **हरितभं** दलान्तरप्रदेशो हरितवर्णेन कार्यः । **कोणाः** अग्न्यादिकोणपदानि **धर्मादिभाः** श्वेतरक्तपीतकृष्णवर्णा भवन्ति । **गात्रकं चित्रं** नानावर्णं भवति **वीथीन्दु** श्वेतवर्णा वीथी कार्या । **पद्मं** बाह्यव्यूहस्थपद्मं सर्वं **सितं** श्वेतवर्णं भवति । **उत्पलं** सर्वं कुवलयं **पाण्डुवर्णं** भवति । **स्वस्तिकं रक्तवर्णं** भवेत् । **अस्त्रकाणि** द्वारस्थपाशुपतादीनि स्वर्णानि **मुखभं द्वारं** तत्पुरुषादिमुखवर्णसहितं द्वारं भवति । **पुरं** पुराकारमण्डलविशेषः **कैरणं** किरणागमे प्रोक्तम् । तथा किरणागमे—

चतुष्षडष्टहस्तं वा षोडशात्मकमेव वा ।
क्षिप्त्वा भागत्रयं भागमेकैकं चाष्टधा पुनः ॥

चतुर्भिः कमलं भागैः वीथिका तत्समा भवेत् ।
वीथ्यर्धेन च यत्कार्यं देवतावेरणं बहिः ।
द्वाराणि पद्मभानानि तदंशेनैव वर्तयेत् ॥

एकभागसमं कर्णं कपोलं वर्तयेत् ततः ।
उपकण्ठं तथावर्त्य शेषा शोभेति गीयते ॥

एवं स्याद् द्वारविन्यासः पद्मे पूर्वास्तथेश्वराः ।
तीक्ष्णाम्रोत्पलसंस्थानाः पूज्याः प्रमथनायकाः ॥

लोकेशाः स्वस्तिके पूज्याः चतुर्भागविवर्जिते ।
बाह्यतोऽस्त्रगणं दद्यात् लक्षणेन सुवर्तनम् ॥ इति ॥ ८५ ॥

पुराकारं मण्डलविशेषं युग्मेनाह—क्षेत्रे इति ॥

क्षेत्रे षण्णवतीकृते स्वरपदैर्मध्येऽम्बुजं बाह्यतो
रेखागात्रकवीथिकेऽष्टभिरथो दिक्पङ्कजान्यष्टभिः ।
द्वाराण्यष्ट कजान्तरस्थितपदैस्साङ्गा त्वथो वीथिका
वेदैश्चाथ कजानि दिक्षु मुनिभिर्द्वाराणि चाभ्यन्तरैः ॥ ८६ ॥

वीथी पूर्ववदष्टदिक्षु कमलं सप्तांशकैरन्तरै-
र्द्वाराण्यष्टपदैस्स्थितैरपि बहिस्स्याल्लोकपालार्चनम् ।
द्वाभ्यां स्वस्तिकमष्टदिक्षु यदि वा बिन्दूत्पलं चान्तरै-
र्द्वाराणीशपलाशदिग्विधिहरिस्थानं मृगेन्द्रे पुरम् ॥ ८७ ॥

क्षेत्रे गृहीतक्षेत्रे **षण्णवतीकृते** प्रागुदक्सूत्राणां सप्तनवतिभिष्षण्णवतिपदीकृते **मध्ये स्वरपदैः** षोडशपदैः **अम्बुजं** पद्मं कार्यम् । **बाह्यतः** पश्चात् **बाह्ये अष्टभिः** अष्टपदैस्समन्तात् **रेखागात्रकवीथिके** शुक्लादिरेखागात्रकं पङ्क्तिश्च कार्येति शेषः । तत्र त्रिपदप्रमाणेन यथाक्रमं शुक्लरक्तकृष्णशुक्लैः रेखाचतुष्टयं कार्यम् । शेषितपञ्चपदैः चतुर्दिक्षु कोणेषु गात्रं वीथी च कार्या । **अथो** एवंकरणानन्तर**मष्टभिर**ष्टाष्टगुणितचतुष्षष्टिपदै**र्दिक्पङ्कजानि** अष्टदिक्कमलानि

कर्तव्यानि । **कजान्तरस्थितपदैः** षोडशपदैः द्विपदविशालेन अष्टपदोन्नतपर्यन्तैः पार्श्वयोर्द्विपदं कपोलार्थं न्यस्य चतुर्दिक्षु द्विद्वारकरणेना**ष्टद्वाराणि** कर्तव्यानि । **अथो** तदनन्तरं **वेदैश्च**तुष्पदैः परितः **साङ्गा** शुक्लादिरेखागात्रकसहिता **वीथिका** पङ्क्तिः कार्या । **दिक्षु** अष्टदिक्षु **मुनिभिः** सप्तसप्तगुणितैकोनपञ्चाशत्पदैः **कजानि** कमलानि कार्याणि । अथ सप्तपदप्रमाणेन कमलस्योक्तत्वात् पूर्वपश्चिमदिग्गतमध्यकमलं दक्षिणोत्तरपदवृद्धियुतं कार्यम् । दक्षिणोत्तरदिग्गतकमलं पूर्वपश्चिमपदवृद्धियुतं कार्यम् । **अभ्यन्तरैः** कमलमध्यगतपदैः कण्ठोपकण्ठाभ्यां द्वारपार्श्वयोस्त्रिभागैकभागं हित्वा एकभागेन अष्ट**द्वाराणि** कर्तव्यानि । उत्तरत्र द्वारेऽपि एवमेव कर्तव्यम् । **पूर्ववच्च**तुष्पद**वीथी** भवेत् । **सप्तांशकैः** सप्तसप्तपदैः **अष्टदिक्षु अष्टकमलं** भवेत् । **अन्तरैः** कमलमध्यपदैः **अष्ट द्वाराणि** कार्याणि । **बहिरेवं**करणा[न]न्तरं बाह्ये **स्थितैऽष्टपदैः लोकपालार्चनं** लोकपालानामिन्द्रादिदेवतानामस्त्रार्चनं वज्राद्यस्त्रपूजा **स्यात्** भवेत् । तत्रापि अष्टपदैश्चतुष्पदेन समन्ताद्वीथिका तद्बाह्ये **द्वाभ्यां** पदाभ्यां द्विगुणितचतुष्पदाभ्या**मष्टदिक्षु स्वस्तिकं** कार्यम् । **यदि वा** अथवा **बिन्दूत्पलं** बिन्द्वाकारमुत्पलाकारं कर्तव्यम् । **अन्तरैः** स्वस्तिकादिमध्यस्थितपदैः स्वस्तिकादिबाह्ये शेषितपदैस्सह चतुष्पदप्रमाणैः अष्ट **द्वाराणि** विधेयानि । **ईशपलाशदिक्** ईशानराक्षसदिक् । **विधिहरिस्थानं** यथाक्रमेण ब्रह्मविष्ण्वोः स्थानं भवति । अत्रेशाननैर्ऋत्यादिदिगुपलक्षणं भवति । ईशानादक्षिणपदे पद्मस्य स्थानम् । निर्ऋतेरुत्तरपदे चक्रस्य स्थानं पद्मचक्रयोरूर्ध्वाधःप्रदेशे यथाक्रमं ब्रह्मविष्णू पूजनीयौ । **मृगेन्द्रे** एवं मृगेन्द्रागमे **पुरं** पुराकारमण्डलविशेषमुक्तमिति शेषः । तथा मृगेन्द्रागमे—

पञ्चवर्गमहापीठे दन्तद्वारोपशोभिते ।
षट्त्रिंशमङ्गुलं हित्वा तत्र पद्म इति स्थिता ॥

पीठं चाब्जदलं त्र्यंशविस्तृताङ्गचतुष्टयम् ।
देवाम्बुजाष्टकं कुर्यादपीदमिह लक्षणम् ॥

कृत्वा वृतित्रयादीशमष्टांशेनातिरिच्यते ।
तदन्तराणि द्वात्रिंशद्दिक्षु द्वाराणि पूर्ववत् ॥

निर्वृत्य कल्पयेच्छोभां यत्र यत्रोपपद्यते ।
लोकभर्तृषु तद्धाम्नः सत्येशगरुडध्वजौ ॥

स्वास्त्रमूलोर्ध्वगौ पूज्यौ बहिर्बिन्द्वादिपूर्वकवत् ॥ इति ॥ ८७ ॥

लताकारलिङ्गविशेषमाह—**सूत्रैरिति ।**

सूत्रैस्सप्तदशात्मकैरुभयतो गौरीलतामाह्वयं
मध्ये वेदपदैर्विदिक्षु घपदैर्भूताम्बुजानि न्यसेत् ।
लिङ्गं पट्टसरोजकण्ठकमलं पट्टं क्रमादिक्पदै-
र्वर्षाभूरिविषैश्च कोणकलितैर्भूतैः पदैस्स्युर्लताः ॥ ८८ ॥

सप्तदशात्मकैः सप्तदशसंख्याकैस्सूत्रैः तन्तुभिः **उभयतः** प्राकृदक्षिणतः प्राक्पश्चाद्गतदक्षिणोत्तरदिग्गतसप्तदशसूत्रैः क्षेत्रं षोडशपदे कृत्वेति शेषः । **मध्ये वेदपदैः** चतुष्पदैर्विदिक्षु मध्यस्य आग्नेय्यादिचतुर्दिक्षु **घपदैरक्षरसंख्यया** घकारः चतुस्संख्यावाची तावता प्रमाणेन चतुष्पदैः **भूताम्बुजानि** पञ्च कमलानि **न्यसेत्** कुर्यात् । **वर्षाभूरिविषैः** अक्षरसंख्यया **वः** चतुः **षः** षट् **भूरिति** चतुः रेफो द्विः विकारश्चतुः षकारः षट् एतावत्संख्याकैर्दिक्पदैरिन्द्रादिचतुर्दिक्षु मध्यगतपदैः**क्रमात्** यथाक्रमेण **लिङ्गं पट्टसरोजकण्ठकमलं पट्टं** च कुर्यादिति शेषः । **कोणकलितैः** अग्न्यादिचतुष्कोणेषु **भूतैः पदैः** पञ्चपदैः [लताः] लताकाराः स्युः भवेयुः । एवं कृतस्य **गौरीलतामाह्वयं** लतामेतिनिपातना- लतेत्यर्थः । गौरीलतेति नामधेयं भवति ॥ ८८ ॥

सुभद्राख्यमण्डलमाह— क्षेत्र इति ॥

क्षेत्रे रुद्रपदीकृते ग्रहपदैर्मध्ये सितं पङ्कजं
कुर्यात्कोणचतुष्टयेऽष्टपदकैस्स्वर्णप्रभान् स्वस्तिकान् ।
दिक्ष्वादित्यपदेष्वथो लयलयैर्लिङ्गानि पीठानि त-
च्छेषं भिन्नरजो विलोप्यमतुलं भद्रं सुपूर्वं पुरम् ॥ ८९ ॥

क्षेत्रे गृहीतक्षेत्रे **रुद्रपदीकृते** प्रागुदग्गतद्वादशसूत्रैरेकादशपदीकृते **मध्ये ग्रहपदैर्नवपदैः सितं पङ्कजं** श्वेतकमलं कुर्यात् । **कोणचतुष्टये** आग्नेयादिकोण- चतुष्टयसमुदाये **अष्टपदकैः** अष्टाष्टगुणितचतुष्षष्टिपदैः चतुष्कोणसमुदायेन चतुष्षष्टिपदसंख्याकत्वात् प्रतिकोणं षोडशपदानि संजातानि । तैष्षोडशपदकैः **स्वर्णप्रभान्** पीतवर्णान् **स्वस्तिकान्** स्वस्तिकाकारान् कुर्यात् । अथवा

पदकैरिति पाठः । अग्न्यादिचतुष्कोणेषु प्रतिकोणमिष्टिपदैः षोडशपदैः स्वस्तिकं स्यात् । **अथो** अनन्तरं **दिक्षु** इन्द्रादिचतुर्दिक्षु **आदित्यपदेषु** द्वादशपदेषु **लयलयैस्त्र्येकत्र्येकपदैर्यथाक्रमेण पीठानि लिङ्गानि** कार्याणि । **तच्छेषं** शेषित- पदं **भिन्नरजः** लिङ्गवर्णात् भिन्नवर्णं यथा भवति तथा **विलोप्यं** मार्जितुं योग्यम् । **अतुलं** साम्यरहितं श्रेष्ठमित्यर्थः । **सुपूर्वं** सुशब्दपूर्वं **भद्रं पुरं** सुभद्र- मण्डलं इति नामधेयं भवतीत्यर्थः ॥ ८९ ॥

उमाकान्तकमण्डललक्षणमाह—**द्वात्रिंशदिति ।**

द्वात्रिंशत्पदभाजिते तु नलिनं मध्ये चतुष्षष्टिभि-
स्तद्बाह्ये त्रिपदैश्च पीठमथ तत्रैकेन वीथी हरित् ।
दिक्षु द्वारमृषिद्वयैरुभयतो वाचावरैर्वर्षयुक्
लिङ्गं बाह्यपदेन वीथिरितरच्चित्रं ह्युमाकान्तकम् ॥ ९० ॥

द्वात्रिंशत्पदभाजिते क्षेत्रे प्राच्यादिदिग्गतत्रयस्त्रिंशत्सूत्रैर्द्वात्रिंशत्पदैः भागी- कृते **मध्ये चतुष्षष्टिभिः** चतुष्षष्टिपदैः **नलिनं** कमलं कर्तव्यम् । **तद्बाह्ये** कमलबाह्ये **त्रिपदैः** समन्तात् **पीठं** कर्तव्यम् । चतुर्दिक्षु गात्रयुक्तपीठमित्यर्थः । **अथ** पीठकरणानन्तरं **तत्र** पीठसमीपे **एकेन** पदेन **हरिद्वर्णा वीथी** कार्या । **दिक्षु** इन्द्रादिचतुर्दिक्षु **ऋषिद्वयैर्द्विपदविशालेन** सप्तपदोन्नतपर्यन्तस्थितचतुर्दशपदैः **द्वारं** चतुर्द्वारं कर्तव्यम् । **उभयतः** द्वारोभयपार्श्वयोः **वाचावरैर्वर्षयुक्** अक्षरसंख्यया विहितैः चतुष्षट्चतुर्द्विचतुष्षट्पदैः पूर्वोक्तलिङ्गपट्टादिक्रमेण सहितं लिङ्गं कार्यम् । **बाह्यपदेन** लिङ्गात् बाह्यस्थैकपदेन **वीथी** कार्या । **इतरदन्यत्** स्वरूपं **चित्रं** शुक्लादिवर्णेन नानावर्णं **उमाकान्तकं** तन्नामधेयं मण्डलं भवति ॥ ९० ॥

स्वस्तिकलक्षणमाह—**स्यादिति ।**

स्यात्स्वस्तिकं चेष्टिपदेषु चैशात्कोणात्समारभ्य पदत्रयेषु ।
मध्यस्थकोष्ठान्तपदेन वेदकोष्ठान् विलोप्यान्यपदानि चैवम् ॥ ९१ ॥

इष्टिपदेषु षोडशपदेषु । इष्टिशब्दः षोडशसंख्यावाचकः । तथा श्रौत- स्मृतिवचनम्—

षोडशेऽहन्यभीष्टेष्टिर्मध्या पञ्चदशेऽहनि ।
चतुर्दशे जघन्येष्टिः पापा सप्तदशेऽहनि ॥ इति ।

अत्र ग्रन्थे पूर्वपक्षे कृतामिष्टिमारभ्योत्तरपक्षे षोडशेऽहनि कृतेर्मुख्यत्वात् इष्टेः षोडशसंख्यावाचकत्वं सिद्धम् । प्रागुदग्गतपञ्चसूत्रैः कृतषोडशपदे स्वस्तिकं कारयेदित्याह—**ऐशात् कोणात्समारभ्य पदत्रयेषु** पूर्वादिशि । ईशानकोणमारभ्य दक्षिणमुखपदत्रयेषु **मध्यस्थकोष्ठान्तपदेन** मध्यस्थितिचतुष्पदेषु मध्ये अन्तपदेन पूर्वोक्तत्रिपदसमीपस्थितपदेन सह मध्यस्थतत्पदसमानपदेन सहेत्यर्थः । **वेदकोष्ठान्** चतुष्पदान् **विलोप्य** मार्जयित्वा **अन्यपदानि** अग्न्यादिकोणगतपदानि । **एवं** पूर्वोक्तवत् कृत्वा **स्वस्तिकं** भवेत् अग्निकोणादारभ्य दक्षिणदिशि निर्ऋतिमुखपदत्रये तत्समानमध्यपदेन सह चतुष्पदान् विलोपयेत् । निर्ऋतिकोणादारभ्य वायुमुखपदत्रये तत्पदसमानस्थमध्यपदेन सह चतुष्पदान् विलोपयेत् । वायुकोणादारभ्य पूर्वमुखपदत्रये तत्पदसमानमध्यपदेन सह चतुष्पदान् विलोपयेत् । एवं कृते सति स्वस्तिकं स्यात् ॥ ९१ ॥

चण्डेशपूजार्थमर्धेन्दुमण्डलमाह—**क्षेत्र** इति ।

क्षेत्रे वेदविभाजितेऽधिकमितः प्राचीन्दुभागं न्यसे-
न्मध्ये भागमथ त्यजन्नधिपदैरर्धेन्दुमन्तर्मुखम् ।
कृत्वोर्ध्वे द्विपदं गलं तु परतः पङ्क्तिस्तु सौम्ये पदं
वृत्तं त्रीणि यमे न्यसेच्च कमलं चण्डस्य टङ्कं मतम् ॥ ९२ ॥

क्षेत्रे गृहीतक्षेत्रे **वेदविभाजिते** प्रागुदग्गतपञ्चसूत्रेण चतुष्पदीकृते **इतः** चतुर्धा विभाजितात् क्षेत्रात् **अधिकं** आधिक्येन **प्राचीन्दुभागं** पूर्वदिश्येकभागं **न्यसेत्** कारयेत् । चतुर्धा विभाजितक्षेत्रं पुनरपि पूर्वस्यां दिशि एकपदप्रमाण पङ्क्त्या आधिक्येन युक्तं कारयेदित्यर्थः । अथ अधिकपदकरणानन्तरं **मध्येभागं** द्विपदप्रमाणं **त्यजन्** त्यागीकुर्वन् **अधिपदैः** अधिकपदैः सह **अन्तर्मुखमर्धेन्दुं** अर्धचन्द्राकृतिमण्डलं कुर्यात् । **ऊर्ध्वे** अर्धचन्द्रादूर्ध्वे **द्विपदं गलं** कण्ठं भवति । **परतः** बाह्यस्थितपरपदात् **पङ्क्तिः** कार्या । **सौम्ये** उत्तरे **पदं** मध्यस्थैकपदं **वृत्तं** वृत्ताकारं कारयेत् । **त्रीणि** वृत्तानि सौम्यपदे कारयेदित्यर्थः । **यमे** दक्षिणैकपदे **कमलं न्यसेत्** कारयेत् । **चण्डस्य** चण्डेश्वरस्य **टङ्कं** टङ्काख्यमण्डलं **मतं** चण्डपूजायां संमतम् ॥ ९२ ॥

इत्थं मण्डलभेदप्रकारमुक्त्वा इदानीं समयविशेषदीक्षाविधानं प्रत्यग्द्वारकेत्यादिश्लोकपञ्चकेनाह—**प्रत्यग्द्वारकेति** ।

प्रत्यग्द्वारकमण्डले कुशयुते संस्थाप्य शिष्यं पदा-
दूर्ध्वं प्रोक्ष्य सुताड्य वीक्ष्य भसितैः केऽभ्युक्ष्य नाभेरधः ।
उल्लिख्यास्त्रकुशैः परं चहृदये संस्पृश्य संचिन्त्य तं
मन्त्रन्यासपटाक्षिबन्धनमथो ग्राह्यात्तपुष्पौ करौ ॥ ९३ ॥

प्रत्यग्द्वारकमण्डलेत्युक्तत्वात् प्रथमं मण्टपपूजादिकरणं सूचितं भवति । तद्यथामण्टपं सलक्षणं विधाय कृतनित्याह्निकद्वयः सायाह्ने सायन्तनीं सन्ध्यां विशेषसन्ध्यां च समाप्य । विशेषसन्ध्याविधानं तु मूलमन्त्रादिना विद्याविद्येश्वराणां तत्त्वतत्त्वाधिपानां च तर्पणम् । तथा मृगेन्द्रे—

ततश्च पुनराचम्य पाण्यग्रेण गुणोत्तमम् ।
ब्रह्मादिपञ्चकान् सर्वान् विद्याविद्येश्वरानपि ॥

तत्त्वान्यधिपतीन् सर्वान् ध्यायन् कालान्तमण्डले ।
चतुर्थ्यन्ताभिधानेन स्वाहान्तेन तु तर्पयेत् ॥

ततो यज्ञोपवीतेन मुनीन् कण्ठावलम्बिना ।
सनकादीन् सभृग्वादीन् सगोत्रप्रभवाधिपान् ॥

कनिष्ठामूलमार्गेण भूतादीन् पर्वसन्धिभिः ।
तथापसव्येन पितॄन् सपत्नीकान् पितामहान् ॥

प्रपूर्वांश्च गुरूनेवं चोदकान् बोधकान् परान् ।
भ्रातॄन् सखीनुपाध्यायान् समातामहमातुलान् ॥

स्वधान्तेनाभिधानेन नतिप्रान्तेन मध्यमान् । इति ।

शिवसूर्याभ्यर्चनं द्वाराणां द्वारपालानां च पूजा यागधामगतविघ्नोद्वासनं भूतशुद्धिकरणं अष्टत्रिंशत्कलान्यासपूर्वकमात्मनि शिवावाहनं मण्डलादिपञ्चाधिष्ठातृत्वेन शिवैक्यकरणं पञ्चगव्यविधानं तज्जलेन यागमण्टपप्रोक्षणं विकिरक्षेपणं यागेश्वराराधनं वर्धन्यां पाशुपतास्त्राभ्यर्चनं लोकपालानां शिवाज्ञाकरणं वर्धनीशिवकुम्भकरणं

वर्धनीशिवकुम्भभ्रमणं ज्ञानखङ्गसमर्पणं विघ्नेशगुरुपूजाकरणं मण्डले सर्वाध्वव्यापिनः शिवस्यावाहनं पञ्चावरणपूजाकरणं अग्निकार्यकरणं शिववक्त्राग्निवक्त्रयोस्सन्धानं मूलेन शिवतर्पणं ब्रह्माङ्गानां दशांशाहुतिकरणं देशापातनकलापातनदुर्निमित्तशान्तिसुनिमित्तापातनकरणं शिष्यप्रवेशाहुतिकरणं स्थालीपाकविधानं भागत्रयकरणं शिवप्रार्थनानुग्रहकरणं एवं समस्तकर्मकरणानन्तरं गुरुः मण्टपात् बहिर्निस्सृत्य उदगाननः शिष्यमाहूय **प्रत्यग्द्वारकमण्डले** मण्डलस्य पश्चिमद्वारं प्रत्यग्द्वारं तस्मात् बहिः संमुखं गोमयेनास्त्रमन्त्रेण चतुरश्रीकृतमण्डले **कुशयुते** शिष्यमुखानुकूलेन उत्तराग्रपूर्वाग्रदर्भपुष्पाक्षतादिप्रणवासनयुते **शिष्यं संस्थाप्य** शुक्लवस्त्रादिना संयुक्तमिति शेषः । उक्तं च किरणे—

प्रणवासनके तत्र शिष्यं स्नातमुपोषितम् ।
सितवस्त्रद्वयोपेतं शिवभक्तं परीक्षितम् ॥

बुभुक्षुं प्राङ्मुखं स्थाप्य मुमुक्षुं चोत्तराननम् ।
ऊर्ध्वकायं स्वके दक्षे स्वयं पूर्वाननस्स्थितः ॥

शिशुं तत्रैव संस्थाप्य स्थित्वा स्वयमुदङ्मुखः । इति वचनात् ।
पदात् पादादारभ्य **ऊर्ध्वं** मूर्धान्तं हुंफडन्तेन **प्रोक्ष्य** तस्य स्नानार्थमस्त्रमन्त्रेण प्रोक्षणं कुर्यात् । अत्र पादादारभ्य प्रोक्षणं मुमुक्षुविषयम् । बुभुक्षोर्मूर्ध्न आरभ्य पादपर्यन्तं प्रोक्षणं कार्यम् । एवमवलोकनादावपि मन्तव्यम् । तथा सिद्धान्तशेखरे—

मस्तकात्पादपर्यन्तं भुक्तौ मुक्तौ तदन्यतः ।
अस्त्रेण हुंफडन्तेन प्रोक्षण्यार्घ्योदकेन च ।
संप्रोक्ष्य स्नानसिद्ध्यर्थं पताकामुद्रया सुधीः ॥ इति ॥

सुताड्य भस्मनास्त्रेण सम्यग्घृदि ताडयित्वा **वीक्ष्य** दिव्यचक्षुषा प्रासादेनावलोक्य **भसितैः** भस्मभिः **के** शिरसि **अभ्युक्ष्य** भस्मस्नानार्थमस्त्रेणाभ्युक्षणं कृत्वा निरीक्षणप्रोक्षणताडनाभ्युक्षणाख्यचतुस्संस्कारा यथाक्रमेण विहिता भवन्ति । अत्र तु विपर्ययेण विहितत्वात् मुमुक्षुविषयमिति मन्तव्यम् । तथा मृगेन्द्रे मुमुक्षुविषयवचनम्—

पश्चिमे मण्डलं कृत्वा विन्यस्य प्रणवासनम् ।
प्रोक्ष्य ताड्याम्भसा चैनं भस्मनोल्लिख्य बर्हिषा ॥ इति ॥

अथवा गुरुसम्प्रदायक्रमागत इति विज्ञातव्यः । क्रियाक्रमे त्ववलोकनक्रमेणोक्तत्वात् ज्ञानरत्नावल्यां प्रोक्षणपूर्वपक्षेण विहितत्वात् । **नाभेरधः** नाभिमारभ्य पादपर्यन्तमित्यर्थः । अस्त्रकुशैरस्त्रमन्त्रेण जप्तदर्भमूलैरुल्लिख्य अघमर्षणाय त्रिवारमुल्लेखनं कुर्यात् । परं च नाभेरारभ्य मस्तकान्तप्रदेशमस्त्रमन्त्रेण कुशाग्रैर्मार्जनाय त्रिधा समुल्लिखेत् । इत्थं मुमुक्षुविषयम् । बुभुक्षोस्तु पूर्वं नाभेरूर्ध्वं पश्चान्नाभ्यधस्तादुल्लेखनं कार्यम् । तथा सिद्धान्तशेखरे—

कुशाग्रैरस्त्रमन्त्रेण मार्जनायालिखेच्च तान् ।
ऊर्ध्वं नाभेस्त्रिधा मन्त्री कुशमूलैस्तु नाभ्यधः ।
पापापनुत्तये पश्चात् पापविश्लेषणाय च ॥ इति ॥

अस्त्रेण दर्भाग्रेण नाभेरूर्ध्वं मार्जनाय दर्भमूलेन नाभ्यधस्तात् अघमर्षणाय च त्रिधा त्रिधा समुल्लिखेत् । भौतिकस्य नैष्ठिकस्य पूर्वं नाभ्यधस्तात् पश्चान्नाभेरूर्ध्वं समुल्लिख्यास्त्रेण हृत्प्रदेशे सर्वगुणसंपत्त्यर्थं संस्पृश्येति क्रियाक्रमवचनं **हृदये संस्पृश्यास्त्रमन्त्रेण** हृत्प्रदेशे शिष्यस्य सर्वगुणोत्पादनाय संस्पर्शनं कृत्वा **सञ्चिन्त्य** तत्रैव मूर्तिमन्त्रेणात्मानं ध्यात्वा शिष्यं **मन्त्रन्यासपटाक्षिबन्धनं** मन्त्रन्यासं शिष्यदेहे मस्तकात् पादाद्वा संहितामन्त्राणां न्यासः सकलीकरणं इति यावत् । पटाक्षिबन्धनं पटेनास्त्रप्रोक्षितकवचावगुण्ठितमूलमन्त्रजप्तकार्पासादिसितवस्त्रद्वयेनाक्षिबन्धनं नेत्रमन्त्रेण द्विनेत्रं बन्धनयुक्तं कुर्यादिति शेषः । तथा कामिके—

सकलीकृत्य तं शिष्यं नेत्रबन्धं विधाय च ।
अस्त्रेण प्रोक्षितेनैव गुण्ठितेन च वर्मणा ।
संस्कृतेनैव मूलेन सितवस्त्रेण देशिकः ॥ इति ॥

अथ नेत्रबन्धस्तु पापिनामनवबोधाय कर्तव्यः । 'नेत्रमन्त्रेण बध्नीयादनालोकाय पापिनाम्' इत्युक्तत्वात् । **आत्तपुष्पौ** अञ्जलिना स्वीकृतपुष्पौ **करौ** शिष्यहस्तौ **ग्राह्य** गुरुः स्वकरेण गृहीत्वा मण्टपमनुप्रवेशयेत् ॥ ९३ ॥

गत्वा दक्षिणतोऽग्रसंस्थितिरथो दृग्बन्धहानिं शिवे
पुष्पक्षेपमथाणुनाम च पुरस्संवेशनं तद्धृदि ।
आत्मस्थापनमन्त्रभूतविषया शुद्धिर्मनूनां स्थिति-
स्तत्के त्वीशकरस्थितिश्शिवघटावर्चापयेत्त पुनः ॥ ९४ ॥

दक्षिणतो मण्टपं प्रदक्षिणमार्गेण गत्वा प्रविश्य **अग्रसंस्थितिः** देवस्याग्रे **देवदक्षिणे** स्वात्मनो दक्षिणे च शिष्यस्थितिः कार्या । अत्र ब्राह्मणादिवर्णक्रमेण स्वदक्षिण-वामभागे संस्थितिः कर्तव्या । तदुक्तं ब्रह्मशम्भुपादैः—

तस्य दक्षिणतस्तिष्ठेत् ब्राह्मणः क्षत्रियस्तथा ।
वामाङ्गभागे वैश्यस्तु शूद्रश्चैवाज्ञया गुरोः ॥ इति ॥

अथो देवाग्रे स्थित्यनन्तरं **दृग्बन्धहानिं** नेत्रबन्धपटस्य विमोचनं कुर्यात् **शिवे पुष्पक्षेपं** कुसुमावकीर्णनं शिष्येण कारयित्वा पुष्पक्षेपानन्तरं नेत्रपटविमोचनं कुर्यादित्येकः पक्षः । 'प्रवेश्य पुष्पक्षेपं तु कारयित्वा तु दर्शयेत्' इति कामिकेऽप्युक्तत्वात् । उत्तरत्रापि 'अपनीय दृगालोकाच्छादकं वसनं क्रमाद् ।' इत्युक्तत्वाच्च । क्रियाक्रमे तु 'नेत्रपटमपनीय तस्मै पुष्पं क्षेपयित्वा' इत्युक्तत्वात् पूर्वं नेत्रपटविमोचनं कृत्वा तदनन्तरं पुष्पक्षेपं कार्यमित्येकः पक्षः । अथ पुष्पक्षेपानन्तरम**णुनाम** अणुभिरीशानादिमन्त्रैः नामधेयं गुरुणा द्विजादिवर्णानुक्रमेण शिवदेवगणान्तकं कर्तव्यम् । पुष्पे मण्डलस्थशिवस्य ईशानवक्त्रे पतिते सति ब्राह्मणस्य ईशशिव इति नाम कर्तव्यम् क्षत्रियस्येशदेव इति वैश्यस्य ईशगण इति शूद्रस्यापीशगण इति च । तत्पुरुषे पुष्पे पतिते सति विप्रादिवर्णक्रमेण तत्पुरुषशिवः तत्पुरुषदेवः तत्पुरुषगण इति नाम कर्तव्यम् । अघोरादिष्वेवमेव नाम कर्तव्यम् । हृदयादिषु पतिते हृदयशिव इति हृदयदेव इति हृदयगण इति नाम कर्तव्यम् । स्त्रीणां शक्त्यन्तनामधेयं कार्यमिति ईशशिवशक्तिरीशदेवशक्तिरीशगणशक्तिरिति । आसां ईशशिवी ईशदेवी ईशगणीति च । तथा कामिके—

तत्पातसूचितस्थानपूर्वं शिवपदोत्तरम् ।
नामावधार्य विप्रस्य शिवदेवगणान्तकम् ।
क्षत्रविट्छूद्रजातीनां स्त्रीणां शक्त्यन्तसंज्ञकम् ॥ इति ॥

तथा सिद्धान्तशेखरे—

पुष्पपातवशात्तेषां विप्रादीनामनुक्रमात् ।
आचार्यो नाम कुर्वीत यथावदधुनोच्यते ।
मस्तके पतिते पुष्पे विप्रस्त्वीशशिवो भवेत् ॥

ईशदेवो नृपः प्रोक्तो वैश्यस्त्वीशगणो भवेत् ।
एवं तत्पुरुषाघोरवामाजास्येष्वनुक्रमात् ॥

स्थानेषु हृदयादीनां पुष्पे निपतिते सति ।
विप्रराजन्यवैश्यानां शिवदेवगणान्तकम् ।
आचार्यो नाम कुर्वीत शिष्याणां स्वेच्छयाथवा ॥ इति ॥

विप्रक्षत्रिययोः शिवदेवान्तकं वैश्यशूद्रयोः गणान्तकं नाम सामान्येनोक्तम् । तथा मृगेन्द्रे—

शिवान्तकं द्विजेन्द्राणामितरेषां गणान्तकम् । इति ।

पुरस्संवेशनं शिवात्मनोरभिमुखं देवस्य दक्षिणे प्रणवासनयुक्ते मण्डले शिष्यनिवेशनं कार्यम् । **तद्धृदि** शिष्यस्य हृदये अस्त्रेण पुष्पेण सन्ताड्येति शेषः । **आत्मस्थापनमन्त्रभूतविषया शुद्धिः** आत्मस्थापनं संहारमुद्रया तच्चैतन्यमात्ममन्त्रेण तस्यैव हृदयकमलकर्णिकायां संरक्षणं निरोधनं मन्त्रभूतविषया शुद्धिः निवृत्त्यादिमन्त्रैः भूतशोधनमाप्लावनं । **मनूनां** मन्त्राणां **स्थितिः** सकलीकरणं, **तत्के** शिष्यशिरसि **ईशकरस्थितिः** शिवहस्तनिवेशनं गुरुः स्वदक्षिणहस्तं तेजोरूपं ध्यात्वा शिवहस्तं विधाय मूलमन्त्रं लयान्तमुच्चरन् पाशसमूहनिवारणं ध्यात्वा, शिष्यशिरसि निवेश्य, शिवमन्त्रमुच्चरन् सर्वाङ्गस्पर्शनं कुर्यात् । **तं** शिष्यं **पुनः** पश्चादपि **शिवघटौ** मण्डलस्थकुम्भस्थौ शिवौ **अर्चापयेत्** शिष्यदक्षिणकर्णे मन्त्रमुच्चरन् गुरुश्शिष्येण स्रगादिना देवार्चनं प्रणामं कारयेदित्यर्थः । 'मूलमन्त्रं गृणन् कर्णे पुष्पं देवे प्रदापयेत् ।' इत्युक्तत्वात् ॥ ९४ ॥

कुण्डाग्नेयकमण्डले स्थितिरथो दर्भेण नाडीस्थिति-
र्होमो मूर्ध्न्यणुभिः सपातहवनं मूलाहुतीनां शतम् ।
उक्तिश्शैवमनोश्च निष्कृतिरथो वागीशपूजाग्निगा
शिष्यप्रोक्षणताडनान्तरगतिश्छिद्रेदकोऽध्वा हृदि ॥ ९५ ॥

कुण्डाग्नेयकमण्डले कुण्डस्य आग्नेयदिग्भागे प्रणवासनयुक्तमण्डले **स्थितिः** शिष्यनिवेशनम् । अनेन गुरोः पूर्वाभिमुखत्वं शिष्यस्य उत्तराभिमुखत्वं द्योतितम् । **अथो** निवेशनानन्तरं **नाडीस्थिति**र्मूलमन्त्रमन्त्रितं दर्भमूलं शिष्यदक्षिणकरतले दत्वा दर्भाग्रं स्वजङ्घासन्धौ सन्नियोज्य, यद्वा दर्भाग्रं शिष्यकरतले दत्वा तन्मूलं स्वजङ्घायां नियोजयेत् ॥ उक्तं च—

कुशाग्रमात्मजङ्घायां तन्मूलं तत्करे हृदा ।
यद्वा विपर्ययेणैव सुषुम्नारूपमङ्कुशम् ॥ इति ॥

कुशव्याजेन बिसतन्तुनिभां शिष्यनाडिं पिङ्गलयाकृष्य स्वनाड्यामिडया प्रविश्यैक्यभावं मत्वा, शिवमन्त्रेण रेचकेन विनिस्सृत्य शिष्यस्य पूरकवायुना प्रविश्य रेचकेन विनिस्सृत्य स्वहृदयं पूरकेण प्रविश्यैवं कुम्भमण्डलवह्निस्थशिवैस्सह नाडीसन्धानं नाडीस्थितिः । **होमः** नाडीसन्धानार्थं मूलमन्त्रेण आहुतित्रयदानम् । **मूर्ध्नि** शिष्यमस्तके **अणुभिस्संहितामन्त्रैस्संपातहवनं** संपातहोमं कुर्यात् । **मूलाहुतीनां शतं** शिवहस्तस्य स्थिरत्वार्थं मूलमन्त्रेण विहिताहुतीनां शतसंख्याकं कार्यम् । ब्रह्माङ्गानां दशांशतो होमश्च कर्तव्यः । पूर्णाहुतिश्च विधेया । उक्तं च—

स्थिरार्थं शिवहस्तस्य मूलेनाष्टोत्तरं शतम् ।
ब्रह्माङ्गानां दशांशेन घृतेन सह पूर्णया ॥ इति ॥

शैवमन्त्रो शिवादिब्रह्मपञ्चकषडङ्गमन्त्रस्य **उक्तिः** उच्चारणम् । उपदेश इति यावत् । **निष्कृतिर्मूलेन** अष्टोत्तरशतेन प्रायश्चित्ताहुतिश्च कर्तव्या । शिवार्चनं कारयित्वा अनुष्ठेयांश्च ब्रूयादिति समयदीक्षाविधानम् । अथो इति विशेषदीक्षाप्रारम्भार्थः । समयोक्तवद्यागाद्यं शिष्यप्रवेशनं शिष्यहस्तप्रदानं च विधेयम् । **अग्निगा** कुण्डाग्नावाधारशक्तिं विन्यस्य वागीश्वरासनं च विधाय तत्रासने वागीश्वरीं वागीश्वरं च आवाहयेदिति अग्निगेत्युक्तम् । **वागीशपूजा** वागीश्वरीवागीश्वरयोरभ्यर्चनं सन्तर्पणं च कुर्यात् । **शिष्यप्रोक्षणताडनान्तरगतिः** शिष्यस्य प्रोक्षणमस्त्रमन्त्रेण तत्रैव वक्षसि हुंफडन्तास्त्रमन्त्रेण पुष्पेण ताडनमन्तरगतिः ताडनानन्तरं क्रियमाणकर्ममार्गश्छिद्रेदकोऽध्वा चैतन्यभेदेन विधीयमानमार्गः । अनेनायमर्थः सम्पन्नः—हुंफडन्तास्त्रमन्त्रेण भेदनं ज्येष्ठया वियोजनं ज्ञेयम् । पुनरात्ममन्त्रेण अङ्कुशमुद्रयोत्कृष्य शिष्यस्य द्वादशान्तानयनं तत्र तृणाग्रबिन्दुरूपजीवभावनमात्ममन्त्रेण संहारमुद्रया संहरणं च **हृदि** स्वहृदि ॥ ९५ ॥

स्वात्मस्थापनरेचने बहिरितो वागीशिगर्भे स्थिति-
गर्भस्थात्मकपापवीक्षणहुतं बीजाशयाहारतः ।
योनेस्तद्भवदेहतोऽपि हवनं रुद्रांशहोमस्ततो
जातीशाणुगयज्ञसूत्रधरणं मूलाहुतीनां शतम् ॥ ९६ ॥

स्वात्मस्थापनेति । स्वात्मस्थापनरेचने स्वात्मनि पूरकेण चैतन्यप्रवेशनं कुम्भकेन स्वात्मना सह समरसकरणमात्मस्थापनम् । रेचना मूलमन्त्रं लयान्तमुच्चरन् आत्ममन्त्रेणोद्भवमुद्रया ब्रह्मादिकारणेश्वरत्यागक्रमेण द्वादशान्तसंस्थानानन्तरं सृष्ट्या भ्रूमध्यमानीय दक्षिणनाड्या निस्सरणं रेचना । **इतः बहिः** रेचनानन्तरं बाह्ये **वागीशिगर्भे स्थितिस्**तयोस्संयोगं संभाव्य आत्ममन्त्रेण वागीश्वर्या योनौ वागीश्वरेण क्षिप्यमाणविभावनया गर्भस्थापनं गर्भाधानादिसंस्कारतर्पणं च । **गर्भस्थात्मकपापवीक्षणहुतं** वागीश्वरीगर्भे विद्यमानस्यात्मनः पापवीक्षणेन गर्भाधानादिसंस्कारार्थं क्रियमाणे सति तदा वह्नौ विद्यमानविष्ठागन्धादिना ब्रह्महत्यादिकृतप्राक्तनपापदर्शनेन हुतं कार्यम् । उक्तं च—

गर्भाधानादिसंपत्तौ शतपञ्चशिवाणुना ।
होमयेदग्निजैश्चिह्नैरूहयेच्छिष्यकल्मषम् ॥

विष्ठागन्धे स भूहर्ता ब्रह्महा गुरुतल्पगः ।
सुरापो गुरुहन्ता च गोघ्नश्च कृतनाशनः ॥

कृष्णेऽग्नौ शवगन्धे च गर्भभर्तृविनाशनः ।
भ्रमणे स्त्रीवधे वह्निः कम्पते हेमहर्तरि ॥

वधे स्फुटति बालस्य निस्तेजा गर्भघातके ।
एवमादिषु चिह्नेषु सहस्रं बहुरूपिणा ।
पापभक्षणमन्त्रेण होमयेद्वा नवात्मना ॥

अत्र बहुरूपी अघोरमन्त्रः । नवात्मना नवाक्षरयुक्तशिवमन्त्रेण । पापभक्षणमन्त्रो यथा—

शिखण्डार्धेन्दुमारं च विश्वरूपं शिवस्थितम् ।
नारसिंहं यमं वह्निं वायुषष्ठस्वरान्वितम् ॥

इन्दुबिन्दुशिखोपेतं खट्खट्फट्फड्विभूषितम् ।
प्रणवादि नमोऽन्तं च पापभक्षणसंयुतम् ॥ इति ॥

बीजाशयाहारतः बीजादिन्द्रियादुत्पन्नदोषनिवारणार्थं आशयात् भावशुद्ध्यभावादुत्पन्नदोषशान्त्यर्थमाहारतः आहारदोषनिवारणार्थं **योनेरु**पस्थदोषनिवारणार्थं **तद्भवदेहतः** पूर्वोक्तबीजादिभ्य उत्पन्नदेहदोषशान्त्यर्थं **हवनं** होमः कार्यः । मूलेन

त्रिवारं रुद्रांशो होमः [1]भो भगवन् अयमात्मा रुद्रांशो भवत्विति मूलेन आहुतित्रयं कार्यम् । तथा कामिके—

आहारभावदोषाभ्यां योनिबीजशरीरतः ।
शुद्धो द्विजो भवत्वात्मा भगवन्परमेश्वर ॥

रुद्रांशापादनं चैवमाहुतित्रयमाचरेत् ।
अयं रुद्रो भवत्वात्मा भगवंस्त्वत्प्रसादतः ॥

इति रुद्रांशापादनमिति शक्तिगर्भे शिष्यात्मनो योजनकार्यार्थत्वे योग्यत्वापादनं ततः रुद्रांशापादनानन्तरं **जातीशाणुगयज्ञसूत्रधरणं** जातीशाः द्विजादिजातिप्रधानाः अणवस्तत्पुरुषादिमन्त्राः तान् गच्छन्तीति जातीशाणुगानां यज्ञसूत्राणां यज्ञोपवीतानां स्वजातिविहितसूत्रसंख्यया च धारणं कार्यम् । तथा कामिके—

पुरुषाघोरवामाजा मन्त्रा विप्रादिषु क्रमात् ।
स्वस्वजात्युक्तमन्त्रेण धार्यं तदुपवीतनम् ॥

कार्पासनिर्मितं सूत्रं त्रिगुणं त्रिगुणीकृतम् ।
सूत्रं तदेकं शूद्राणां वैश्यानां द्विसरं भवेत् ॥

त्रिसरं क्षत्रियाणां तु विप्राणां सप्तसंख्यकम् ।
यद्वा पञ्चसरं तेषां नवसूत्रमथापि वा ॥ इति ॥

मूलाहुतीनां शतं यज्ञोपवीतधारणदृढीकरणार्थं मूलमन्त्राणां शतेन होमः कार्यः । मूलमन्त्रमष्टोत्तरशतसंख्यया तद्दशांशतो ब्रह्मणामङ्गानां च तर्पणं कर्तव्यम् ॥ ९६ ॥

ब्रह्माङ्गाहुतिपञ्चसंस्कृतिहुते पूर्वात्मयोगश्शिशो-
वागीश्यादिविसृष्टिपूर्तिहवनं पुष्पस्य विक्षेपणम् ।
वह्न्यादौ समयश्रुतिश्च समयाद्याचारशुद्धो हुतं
बालादावितरश्शिवार्चनशिवज्ञानादियोग्यो भवेत् ॥ ९७ ॥

ब्रह्माङ्गाहुतिपञ्चसंस्कृतिहुते वागीश्वरीगर्भस्थस्य आत्मनः गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणाख्यपञ्चसंस्काराहुतौ ब्रह्माङ्गाहुतिः पञ्चब्रह्मभिः सद्योजातादिमन्त्रैः गर्भाधानादीनां यथाक्रमेण सद्योजातादिशिवस्मरणपूर्वकमभ्यर्चनं अङ्गाहुतिः पञ्चाङ्गैः हृदयशिरश्शिखाकवचास्त्रमन्त्रैः गर्भाधानादीनां यथाक्रमेण प्रत्येकमाहुतीनां पञ्च भवन्ति । सीमन्तोन्नयनकर्मणि वक्त्राङ्गकल्पनार्थं शिखामन्त्रेणैव पञ्चब्रह्मन्यासपूर्वकमष्टत्रिंशत्कलान्यासं च कुर्यात् । शेषसंस्कारसिद्ध्यर्थं पूर्णां च दद्यात् । अत्र गर्भस्थात्मनः मायागर्भादुद्धृत्य शक्तिगर्भे शिवबीजत्वापादनेन नियोजनं गर्भाधानम् । आत्मनो निर्मलगुणव्यक्तिः पुंसवनम् । मायागर्भस्थमुद्धृत्य भुवनादूर्ध्वं उन्नयनमुद्गमनं तत्सीमन्तोन्नयनम् । शिवपुत्रतयैव जननं जातकर्म । आत्मनः शिवत्वोत्पादनेन शिव एवायमिति करणं नामकरणम् । उक्तं च—

मायागर्भस्थमुद्धृत्य शक्तिगर्भे नियोजनम् ।
आत्मनः शिवबीजत्वं गर्भाधानमितीरितम् ॥

पुंस्त्वमात्मगुणव्यक्तिः स्यादप्यनतिनिर्मलः ।
मायासीमन्तमूर्ध्नि यत्प्रत्यानयनं हि तत् ॥

सीमन्तोन्नयनं ज्ञेयं जन्म रुद्रस्य पुत्रता ।
अत एव शिवत्वेन बोधनं नाम कीर्तनम् ॥ इति ॥

शिशोः शिष्यस्य **पूर्वात्मयोगः** पूर्ववत् निर्मलात्मसम्बन्धः कर्तव्यः । अत्र वागीश्वरीगर्भस्थात्मानं वह्निज्वालाग्रसन्निभं संहारमुद्रयोद्धृत्य पूर्ववन्निजहृदयकमलं निवेश्य कुम्भकेन समरसीभावं कृत्वा मूलमन्त्रं लयान्तमुच्चरन् स्वात्मशिवौ विश्लिष्य पुनस्संहारमुद्रया गृहीत्वा ब्रह्मादिकारणत्यागक्रमेण द्वादशान्तं नीत्वा उद्भवमुद्रया आत्ममन्त्रेण शिष्यभोगायतनदेहे रेचकयोगेन योजयेदिति पूर्वात्मयोगः । **वागीश्यादिविसृष्टिः** वागीश्वरीवागीश्वरयोः सन्तर्पणपूर्वकं तयोर्विसर्जनं कर्तव्यम् । **पूर्तिहवनं** प्रायश्चित्तार्थं मूलेन सहस्रमर्धं शतं वा हुत्वा पूर्णहोमं कुर्यात् । **वह्न्यादौ** वह्निस्थशिवे मण्डलस्थे कुम्भस्थे च शिवे **पुष्पस्य विक्षेपणं** कुसुमेनाभ्यर्चनं शिष्येण कारयेत् । तदा गुरुपूजामपि यथाशक्ति द्रव्यादिना कृत्वा गुरुं प्रणमेत् । **समयश्रुतिः** सिद्धान्तविहितसमयाचारोपदेशस्य श्रवणं गुरुणा शिष्याय उपदेश्यम् । समयाचारास्तु नित्यवारुणाग्नेयादिभिर्नित्याभिः कार्यैश्चानेकविधा भवन्ति । तेषु अल्पसमयाचारो यथा—

1. क. हे आत्मन्

न शिवं शिवशास्त्रं च शिवाग्निं च तथा गुरुम् ।
निन्द्यान्न लङ्घयेत्तेषां छायामपि कथञ्चन ॥

निर्माल्यभोजनं दानं लङ्घनं च विवर्जयेत् ।
शिवाग्निगुरुपूजा च कर्तव्या जीवितावधि ॥ इति ॥

बालादौ समयानुष्ठानकरणासामर्थ्यबालवृद्धव्याधिस्थादौ समयाद्याचारशुद्धिविषये **हुतं** शतसंख्यया हवनं कार्यम् ।

अशक्तानाममून् सर्वान् पूर्वोक्तसमयानपि ।
शोधयेद्देशिकश्शम्भोराज्ञालङ्घनतो यथा ॥

मण्डले कलशे वह्नौ संपूज्य परमेश्वरम् ।
विघ्नेश्वरं गणेशानं लोकपालानले क्रमात् ॥

संपूज्य तर्पयित्वा तु शोधयेत्तच्छिवाणुना ।
हुत्वा शतद्वयं पूर्णां दत्वा विज्ञापयेच्छिवम् ॥

भगवन्नसमर्थोऽयं समयाचारपालने ।
तस्मादनेन होमेन तत्सर्वं त्वं क्षमापय ॥

विघ्नेश्वरं गणेशानं लोकपालांश्च साक्षिणः ।
कृत्वैवं योजयेत्तस्य समयान् देशिकोत्तमः ॥ इति ॥

इतरः समयाद्याचारानुष्ठानकरणे समर्थः शिवार्चनशिवज्ञानादियोग्यः शिवपूजायां सिद्धान्ताध्ययनमन्त्रश्रवणादौ योग्यो भवेत् । तथा कामिके —

एवं समयसंस्कारयुक्तो यः शिवपूजने ।
होमे चाध्ययने चैव मन्त्राणां श्रवणेऽपि च ॥

योग्यस्स्यादैश्वरं रौद्रं पदं प्राप्नोति मानवः ।
ततो निर्वाणदीक्षायां अधिकारी द्विजो भवेत् ॥ इति ॥ ९७ ॥

अथ निर्वाणदीक्षां वक्तुं षडध्वावाहनक्रमविधानं संहारक्रमेणाह—**क्ष्मेति** ।

क्ष्मातत्त्वं त्वजहृन्मनू प्रणवतश्चान्त्याद्भवद्व्यन्तकं
लोकाः कालकृशानुतश्शतमलावष्टौ च काल्यन्तिमाः ।

गन्धात्पञ्चगुणाश्च गन्धविषयः क्षोऽर्णो निवृत्तौ विधिः
प्राणापानमिडाख्यपिङ्गलयुगोपस्थाख्यनासाः स्मरेत् ॥ ९८ ॥

निवृत्तौ निवृत्त्याख्यकलायां **क्ष्मातत्त्वं** भूतत्त्वं भवति इति, संस्मरेदिति वा सम्बन्धः कार्यः । **अजहृन्मनू** सद्योजातहृदयमन्त्रौ **अन्त्यात् प्रणवतः** एकाशीतिपदानां मध्ये अन्त्ये विद्यमानादोङ्कारपदादारभ्य **भवद्व्यन्तकं** भवभवेतिपर्यन्तमष्टाविंशतिपदं भवति । नन्वत्रान्त्यात् पदादारभ्य महादेवपदान्तकमष्टाविंशतिपदं भवति । कथं भवभवेतिपदान्तमष्टाविंशतिपदं भवति ।

तथा वरुणपद्धतौ—

अन्त्यात्पदान्महादेवपदावधि विलोमतः ।
व्योमव्यापिपदान्यष्टाविंशतिः परिसंख्यया ॥ इति ॥

अत एवात्र चतुर्नवतिपदसंख्यया व्योमव्यापिपदन्यासक्रमो विहितः इति मन्तव्यः । वरुणपद्धतावेकाशीतिपदसंख्यया विहितत्वाद् द्विप्रकारः पदाभ्यास इति सिद्धो भवति । द्विप्रकारपदाध्वप्रपञ्चस्तु पूर्वमेव सर्वाध्वाधिकभागसंयुक्तेतिग्रन्थव्याख्याने विस्तरेण प्रदर्शितं तत्रैवावधार्यम् ॥ **कालकृशानुतः** कालाग्निरुद्रभुवनादारभ्य **काल्यन्तिमाः** भद्रकालीभुवनपर्यन्ताः **लोकाः** भुवनानि **शतमष्टौ** अष्टोत्तरशतं, **अलौ** अकारलकारौ द्वे बीजे **गन्धात्** गन्धगुणादारभ्य **पञ्च गुणाः** गन्धरसरूपस्पर्शशब्दाख्याः । **गन्धो विषयः क्षः** क्षकारः **अर्णो** वर्णः **विधिः** ब्रह्मा कारणेशः **प्राणापानौ** वायू **इडाख्यपिङ्गलयुगोपस्थाख्यनासा** नासा इडाख्यपिङ्गलयुगं इडापिङ्गलानाडीद्वयमुपस्थाख्यनासा उपस्थाख्यघ्राणाख्ये इन्द्रिये, एताः **स्मरेत्** निवृत्तिकलायामन्तर्भूता इति चिन्तयेत् ।

निवृत्तौ पार्थिवं तत्त्वमेकं च भुवनानि च ।
कालाग्निभुवनान्तानि भद्रकाल्यादिभिस्तथा ॥

अष्टोत्तरशतान्यत्र क्षकारो वर्ण एव हि ।
पदानि भवमारभ्य यावदोङ्कारमन्तिमम् ॥

अष्टाविंशतिसंख्यानि सद्योहृदयशम्भरौ ।
बीजे अले तथा नाडी इडापिङ्गलसंज्ञके ॥

प्राणापानौ तथा घ्राणोपस्थकौ त्विन्द्रियेऽपि च ।
विषयो गन्ध एवैकश्शब्दादि गुणपञ्चकम् ॥

मण्डलं पार्थिवं गौरं वज्राङ्कं कठिनं गुरु ।
वेदाश्रं योजनानां च शतकोट्युच्छ्रयं दृढम् ॥
जाग्रदवस्थासंयुक्तं कारणं कमलासनम् ।

शुद्धकाञ्चनसङ्काशं सर्वमेतद्विभावयन् ।
शिरोजान्वोश्च पादान्तं गुरुस्सूत्रे च विन्यसेत् ॥ इति ॥ ९८ ॥

प्रतिष्ठाकलायामन्तर्भूततत्त्वादीन्याह—**तत्त्वेति** ।

तत्त्वाध्वा प्राकृतान्तः प्रभृति सलिलतष्टान्तहाद्या प्रतिष्ठा
श्रीकण्ठान्तामरेशात् भुवनसरणिका वामदेवश्शिरोऽणुः ।
व्यापिन्यन्तानि शर्वद्वितयपदकतस्तालुपायू उवौ द्वौ
गान्धारी मध्यनाडी श्रुतिगुणरसकोदानमानौ हरिश्च ॥ ९९ ॥

सलिलतः प्रभृति जलतत्त्वादारभ्य **प्राकृतान्तः** प्रकृतितत्त्वपर्यन्तः चतुर्विंशतिसंख्याकः । प्रतिष्ठायां विद्यत [1]इत्यर्थः । **प्रतिष्ठा** प्रतिष्ठाकला **टान्तहाद्या** टकारपर्यन्ता हकाराद्या त्रयोविंशतिवर्णयुक्ता भवति । **अमरेशा**दमरेशभुवनादारभ्य **श्रीकण्ठान्ता** श्रीकण्ठभुवनपर्यन्ता **भुवनसरणिका** भुवनानां षट्पञ्चाशत्संख्याकानां पङ्क्तिः । **वामदेवश्शिरोऽणुः** वामदेवमन्त्रः शिरोमन्त्रः **शर्वद्वितयपदकतः** शर्वशर्वेतिपदद्वयादारभ्य **व्यापिन्यन्तानि** व्यापिन् व्यापिन्पदपर्यन्तानि द्वात्रिंशत्संख्याकानि **तालुपायू** तालुशब्देन जिह्वोच्यते तालोरिन्द्रियत्वाभावात् । जिह्वापायू इन्द्रिये । पायू इति पाठः कर्तव्यः । **उवौ** उकारवकारौ द्वौ बीजे **गान्धारी मध्यनाडी** गान्धारीनाडी सुषुम्नानाडी च **श्रुतिगुणाः** रसरूपस्पर्शशब्दाख्याः चतुर्गुणाः **रसः** विषयः **उदानसमानौ** वायू **हरिः** विष्णुः कारणेशः । **उक्तं** च—

तदधो विन्यसेत्पाशं प्रतिष्ठाकलयान्वितम् ।
स्मृतानि प्राकृतादीनि तत्त्वानि च जलावधि ॥

1. ग. इति शेषः

त्रयोविंशतिसंख्यानि भुवनानि च संख्यया ।
पञ्चाशदधिकान्यत्र षड्भिः श्रीकण्ठभैरवात् ॥

अमरेशान्तकं त्रिंशत्पदानि द्व्यधिकानि च ।
व्यापिन् व्यापिन् पदाच्छर्वशर्वान्तानि पदानि च ॥

टादिहान्ताक्षराणीह प्रोक्तानि च समासतः ।
त्रयोविंशतिसंख्यानि वामदेवशिरस्त्वणू ॥

बीजे उवौ तथा नाड्यौ गान्धरी च सुषुम्नया ।
समानोदानवायू च जिह्वापायू तथेन्द्रिये ॥

रसश्च विषयश्शब्दस्पर्शरूपरसानि च ।
चत्वारि वारुणं बीजं श्वेतमम्भोजलाञ्छितम् ॥

अर्धचन्द्रवदाकारं स्रवन्तं शीतलात्मकम् ।
घर्घरारवसंयुक्तं कोटिसाहस्रयोजनैः ॥

शतं च सुप्तिकावस्थं कारणं गरुडध्वजम् ।
सर्वमन्तस्थितं शिष्यनाभेर्जानुद्वयानुगम् ।
भावयन्विन्यसेत्तत्र पाशसूत्रे च सद्गुरुः ॥ इति ॥ ९९ ॥

विद्याकलायामन्तर्भूततत्त्वादीन्याह—**मायेति** ॥

मायातत्त्वान्तमादौ पुरुषमथ शिखारूपिणौ आदिघान्तं
वामाद्यङ्गुष्ठमात्रान्तिमसरजगतस्तारकान्तः पदाध्वा ।
व्योमिन्नादिर्मरौ द्वौ करिवररसना पूषसंज्ञात्र नाग-
व्यानौ पादाक्षि रूपाह्वयविषयगता रुद्रो विद्या गुणांस्त्रीन् ॥ १०० ॥

आदौ प्रथमे **पुरुषं** पुरुषाख्यतत्त्वमारभ्य मायातत्त्वान्तं सप्ततत्त्वं **शिखारूपिणौ** शिखाघोरमन्त्रौ **आदिघान्तं** आदिघकारान्तं सप्तवर्णकं **सरजगतः** सकार रसप्तसंख्याकः रेफो द्विसंख्याकः सरेण यथाक्रमं एकद्विस्थानकरणेन जातं यद्गणनं सप्तविंशतिसंख्याकं तद्गतः सरजगत इत्युच्यते । सप्तविंशतिसंख्याप्रमाणयुक्त इत्यर्थः । **वामाद्यङ्गुष्ठमात्रान्तिम** वामाख्यभुवनमादिं कृत्वा अङ्गुष्ठमात्रभुवनपर्यन्तलोकसमूहः **व्योमिन्नादिः** व्योमिन्व्योमिन्पदादिं कृत्वा **तारकान्तः** ओङ्कार-

पर्यन्तः एकविंशतिकः पदाध्वा मरौ द्वौ मकाररेफौ **द्वौ बीजौ करिवररसना** हस्तिजिह्वा **पूषसंज्ञा** पूषाख्या च नाडीद्वयम् । अत्र विद्याकलायां **नागव्यानौ** वायू **पादाक्षि** पादनयने इन्द्रिये **रूपाह्वयविषयगता** रूपनामधेयविषयसहिता **विद्या** विद्याकला । **त्रीन् गुणान्** शब्दस्पर्शरूपाख्यत्रिगुणान् गता **रुद्रः** कारणेशः । उक्तं च—

तदधो विन्यसेद्विद्याकलापाठं स्वमन्त्रतः ।
मायादिपुरुषान्तानि सप्ततत्त्वानि विन्यसेत् ॥

अङ्गुष्ठमात्रभुवनाद्यावद्वामपुरान्तकम् ।
विन्यसेद् भुवनान्यत्र सप्तविंशतिसंख्यया ॥

पदमोङ्कारमारभ्य व्योमिन् व्योमिन् पदावधि ।
एकविंशतिसंख्यानि विद्यायां च पदानि च ॥

घकारादिञकारान्तवर्णाः स्युस्सप्तसंख्यया ।
मन्त्रौ घोरशिखे प्रोक्तौ विद्यायां च विशेषतः ॥

बीजे मरौ तथा नाड्यौ पूषा च करिजिह्वया ।
व्याननागौ तथा वायू चक्षुःपादेन्द्रियेऽपि च ॥

रूपञ्च विषयश्शब्दस्पर्शरूपगुणानि च ।
मण्डलं तैजसं रक्तं गुहाकारं त्रिकोणकम् ॥

स्वस्तिकाङ्कं तदुच्छ्रायं योजनायुतकोटिभिः ।
कारणं रुद्रदेवं च तथावस्थां सुषुप्तिकाम् ॥
सर्वमेतन्न्यसेत्तत्र भास्वराभं गुरूत्तमः ।
हृदयान्नाभिपर्यन्तं शिष्यदेहे च संस्मरेत् ॥ इति ॥ १०० ॥

शान्तिकलायामन्तर्भूततत्त्वादीन्याह—**विद्येति** ।

विद्यात्वेशसदाशिवौ च गखकाश्शान्तिर्नृवर्मे मनू
वामाख्यादिसदाशिवान्तिमभुवस्त्वीशोऽधिपो बिन्दुयौ ।
व्यानाहारसुखो यशा च गगनव्याप्यन्तिमोऽलंबुषा
स्पर्शारावगुणौ च कूर्मकृकरौ स्पर्शश्च पाणित्वचौ ॥ १०१ ॥

विद्या शुद्धविद्यातत्त्वम् । **ईशसदाशिवौ** ईश्वरसदाशिवतत्त्वे । **एवं त्रीणि** तत्त्वानि । **गखका** वर्णाः **शान्तिः** शान्तिकला । एवं चिन्तनीयेति शेषः । **नृवर्मे मनू** तत्पुरुषकवचौ मन्त्रौ । **वामाख्यादिसदाशिवान्तिमभुवः** वामाख्य-भुवनमादि कृत्वा सदाशिवभुवनपर्यन्ताष्टादशभुवनानि । **ईशोऽधिपः** परमेश्वरः कारणेशः । **बिन्दुयौ** बिन्दुयकारौ बीजे । **व्यानाहारसुखः** व्यानाहारपदादिकः **गगनव्याप्यन्तिमः** व्योमव्यापिपर्यन्तद्वादशपदं । **यशा अलम्बुषा द्वे नाडी** । **स्पर्शारावगुणौ** स्पर्शशब्दौ गुणौ **कूर्मकृकरौ** वायू **स्पर्शो** विषयः **पाणित्वचौ** पाणित्वगिन्द्रिये । उक्तं च—

सदाशिवेश्वरौ विद्या शान्तौ तत्त्वत्रयं न्यसेत् ।
सदाशिवादिवामान्तान्यष्टादश पुराणि तु ॥

व्योमव्यापिनमारभ्य ध्यानाहारपदावधि ।
पदानि रविसंख्यानि वर्णाश्च खगकाः स्मृताः ॥

बीजे बिन्दुयकाराख्ये मन्त्रौ वक्त्रतनुच्छदौ ।
अलम्बुषा यशा नाडी वायू कृकरकूर्मकौ ॥

त्वक्कराविन्द्रिये प्रोक्तौ स्पर्शो विषय एव हि ।
मण्डलं वायवं कृष्णं चञ्चलं च षडश्रकम् ॥

अङ्कितं बिन्दुभिष्षड्भिः द्वौ गुणौ स्पर्शशब्दकौ ।
लक्षकोटिभिरुच्छ्रायं योजनानां तु वायवम् ॥

तुर्यावस्थमनन्तं च कारणं चेश्वरं न्यसेत् ।
श्यामवर्णमिदं सर्वं फालाच्च हृदयावधि ।
ध्यायेद्देहे शिशोस्तत्र पाशसूत्रे च देशिकः ॥ इति ॥ १०१ ॥

शान्त्यतीतायामन्तर्भूततत्त्वादीन्याह—**तत्त्व इति** ।

तत्त्वे शक्तिशिवे विसर्गत उभेऽकारान्तिमाश्च स्वरा
ईशानास्त्रशिवा निवृत्तिभुवनाद्यानाश्रितान्ताः पुरः ।
आद्यं तारपदं हनादयुगलातीता सदेशः कुहू-
शंखी देवधनञ्जयौ खगुणश्शब्दश्च वाक्छ्रोत्रके ॥ १०२ ॥

शक्तिशिवे उभे तत्त्वे शक्तितत्त्वशिवतत्त्वाख्ये द्वन्द्वतत्त्वे **विसर्गतः** अकारसहित-विसर्गादारभ्य **अकारान्तिमाः** ह्रस्वाकारपर्यन्ताः **स्वराः** षोडश । **ईशानास्त्रशिवा-स्त्रयो** मन्त्राः **निवृत्तिभुवनात्** निवृत्त्याख्यभुवनमारभ्य **अनाश्रितान्ता** अनाश्रि-ताख्यभुवनपर्यन्ताः **पुरः** पञ्चदश भुवनानि **आद्यं** प्रथमभूतं **तारमोङ्कारं** एकं पदं **हनादयुगला** हकारनादाख्यबीजद्वन्द्वयुक्ता **अतीता** शान्त्यतीतेत्यर्थः । **सदेशः** सदाशिवः कारणेश्वरः । **कुहूशङ्खी** कुहूशङ्खिनी नाड्यौ । **देवधनञ्जयौ** देवदत्त-धनञ्जयौ वायू । **रवः** शब्दो गुणः शब्द एव विषयः । **वाक्छ्रोत्रके** वचनश्रोत्रे इन्द्रिये । उक्तं च—

द्वे तत्त्वे शान्त्यतीतायां क्रमाच्छक्तिशिवात्मके ।
तथानाश्रितशक्त्यादिनिवृत्तिर्यावदन्तिमा ॥
ता भूरधिष्ठितान्यस्यां भुवनान्यूनषोडश ।
नादजं प्रणवं विद्धि पदं साक्षाच्छिवात्मकम् ।
अकारादिविसर्गान्ता वर्णाष्षोडश कीर्तिताः ॥
ईशानास्त्रशिवा मन्त्राः बीजेन्द्रे नादहौ तथा ।
नाड्यौ कुहूश्शङ्खिनी च देवदत्तधनञ्जयौ ॥
तदुन्नतं समाख्यातं कर्ता चैव सदाशिवः ।
शिखामारभ्य फालान्तं ध्यायेत्सर्वं सदा शिशोः ॥ इति ॥ १०२ ॥

षडध्वनां व्याप्यव्यापकभावं ज्ञात्वा दीक्षा कर्तव्येति के व्याप्या के व्यापका इति व्याप्यव्यापकविधानमाह—**व्याप्येति** ।

व्याप्यव्यापकभावनात्र हि पदैर्मन्त्राः पदान्यक्षरै-
वर्णास्ते भुवनैश्च तानि च तथा व्याप्तानि तत्त्वैरिमे ।
व्याप्याः कर्ममलाख्यमोहकभवा ये व्यापकास्तेऽप्यमी
व्याप्यव्यापकभावगा इह कलास्ताभिर्गृहीता इमे ॥ १०३ ॥

अत्र षडध्वनि **व्याप्यव्यापकभावना** ये पदार्थाः स्वान्यपदार्थैः व्याप्तुं योग्या भवन्ति ते व्याप्याः । स्वान्यपदार्थेषु अन्तर्हिता इत्यर्थः । ये पदार्थाः स्वान्यपदार्थान् स्वेषु गर्भीकृत्य अवतिष्ठन्ते ते व्यापकाः । इत्थं व्याप्यान व्यापकानां च भावना वस्तुत्वेन विद्यमानभावना । उच्यते इति शेषः । **पदैः**

व्योमव्यापिपदैः **मन्त्राः** ईशानादयः व्याप्ताः । अत एव व्याप्याः । पदानि तु व्यापकानीत्यर्थः । **पदानि त्वक्षरैर्वर्णैः** व्याप्तानि । पदानां व्याप्यत्वम्, अक्षराणां व्यापकत्वमिति भावः । **ते वर्णाः भुवनैर्**व्याप्ताः वर्णानां व्याप्यत्वम् । **तानि** भुवनानि **तथा तत्त्वैः** षट्त्रिंशत्तत्त्वैर्व्याप्तानि । भुवनानां व्याप्यत्वं तत्त्वानां व्यापकत्वम् । **इमे** तत्त्वसमूहाः **कर्ममलाख्यमोहकभवाः** कर्म पुण्यापुण्यात्मकं मलाख्यमाणवमलं मोहकं माया । ' माया विमोहिनी प्रोक्ता विषयास्वादभोगतः ।' इत्युक्तत्वात् । एतेभ्यो भवा उत्पन्नाः । पूर्वोक्ततत्त्वादयो व्याप्याः । मल-कर्ममायेयाः व्यापकाः । कर्मणः सुखदुःखकारणत्वात् तन्निमित्तं केषाञ्चित्पदा-र्थानामाविर्भावः । मलस्य भोक्तृत्वकारणत्वात् तन्निमित्तं केषाञ्चित्पदार्थाना-माविर्भावः । मायायाः शरीरेन्द्रियविषयकारणत्वात् तन्निमित्तं केषांचित् पदार्थानामाविर्भावः । ये मलादयस्तत्त्वादीनां **व्यापकाः** ते त्वमी मलादयः व्याप्या भवन्तीत्याह—**इह** षडध्वमध्ये व्याप्यव्यापकभावगाः व्याप्यत्वेन व्यापकत्वेन च विद्यमानाः कलाः निवृत्त्यादयः । निवृत्तिर्व्याप्या । प्रतिष्ठा व्यापिका । प्रतिष्ठा व्याप्या विद्या व्यापिका । विद्या व्याप्या शान्तिर्व्यापिका । शान्ति-र्व्याप्या शान्त्यतीता व्यापिका । विश्वस्य मलादेश्च व्यापकत्वात् कला इत्यु-च्यन्ते । उक्तं च—

कलयन्ति यतो विश्वं व्याप्नुवन्ति ततः कलाः ।
शक्तयस्ताः पराशक्तेः पञ्चभेदव्यवस्थिताः ॥
ययादौ पार्थिवे तत्त्वे कर्मभोगो निवर्त्यते ।
निवृत्तिस्सा कला ज्ञेया प्रतिष्ठा कथ्यतेऽधुना ॥
अनादितत्त्वान्युलङ्घ्य सोपानानुक्रमेण तु ।
शिवरागानुरक्तात्मा स्थाप्यते पौरुषे यया ॥
सा प्रतिष्ठा कला ज्ञेया ततो विद्या निगद्यते ।
मायाकार्यविवेकेन वेत्ति विद्यापदं यया ॥
सा कला परमा ज्ञेया विद्या ज्ञानक्रियात्मिका ।
मलमायाविकारौघशान्तिः पुंसः पुनाति या ॥
सा कला शान्तिरित्युक्ता साधिकारास्पदप्रदा ।
शान्त्यतीता कलाद्वैतनिर्वाणानन्तबोधदा ॥ इति ॥

ताभिः कलाभिः पूर्वोक्तमलादयः गृहीताः व्याप्ताः मलादीनां व्याप्यत्वं कलानां व्यापकत्वमिति भावः । **इमे** कलासमूहाः बिन्दुना व्याप्ता इति शेषः । बिन्दुश्शक्त्या व्याप्तः । शक्तिः शिवेन व्याप्ता । उक्तं च—

> व्यापको भुवनादीनामभिव्याप्तस्स बिन्दुना ।
> बिन्दुश्शक्त्या शिवेनैषा नान्येन व्याप्यते शिवः ॥ इति ॥

ताः कलाः स्थापिताश्चेत् सर्वे तत्त्वादयः स्थापिता भवन्ति । शोधिताश्चेत् शोधिता भवन्ति । अत एव कलाश्शोधनीया इति प्राप्तम् ॥ १०३ ॥

पाशसूत्रे विद्यमानशिवशक्तौ शिष्यचैतन्यस्य न्यासक्रममाह—**शिष्येति** ।

शिष्यस्योक्षणताडनेऽस्त्रमनुतो हुं तत्प्रवेशो हृदा
ह्यात्माकृष्टिशिखान्तसङ्ग्रहबहिर्निस्सारणे स्वात्मनि ।
नासा पूरकतः प्रवेश्य हृदये न्यस्त्वा तथोत्कृष्य तं
सङ्गृह्यान्तत एव पिङ्गलगतेर्निस्सार्य शक्तौ न्यसेत् ॥ १०४ ॥

शिष्यस्य कीदृग्भूतस्य अत्रापि पूर्वोक्तवद्यागादिचरुहवनप्रायश्चित्तादिकं कृत्वा शिष्यस्य मण्टपप्रवेशादिविशेषान्तसंस्कारं विधाय निर्वाणदीक्षाकरणार्थं मूलमन्त्राणां तर्पणदीपनान्तं कर्म निर्वर्त्य शिवाज्ञाप्रार्थनानन्तरं शिवाग्नेर्दक्षिणे मण्डले स्थितस्य त्रिगुणेन त्रिगुणीकृतेनास्त्रकवचमूलैर्यथा प्रोक्षणावगुण्ठनपूजितेन सुषुम्नामयपाशसूत्रेण शिखामारभ्य दक्षपादाङ्गुष्ठान्तमवलम्बितस्य शिष्यस्य देहे विद्यमानेऽपि पाशानां छेदनभेदनादिकरणार्थं सूत्रमयो देहः कार्यः । उक्तं च—

> छेद्या भेद्याश्च ते पाशाः सूत्रस्थानेन विग्रहे ।
> तस्मात्सूत्रमयो देहो भावनीयस्तु देशिकैः ॥ इति ॥

अस्त्रमनुतः अस्त्रमन्त्रेण **शिष्यस्य उक्षणताडने** कार्ये इति शेषः । अस्त्रेण हृदये कुशाग्रोदकेन प्रोक्षणं हुंफडन्तास्त्रेण पुष्पेण तत्रैव सन्ताडनं कर्तव्यम् । **हुं** हुङ्कारमुच्चरन् आत्मनो रेचकेन बहिर्निर्गत्य **तत्प्रवेशः**तस्य शिष्यस्य हृदयं पूरकेण शिष्यवामनाड्या प्रवेशनं कर्तव्यम् । **हृदा** हृदयसम्पुटितसद्योजातहुंफडन्तात्ममन्त्रेण ज्येष्ठया शक्त्या शिष्यहृदयकमलात् किञ्चिदुच्चलितभेदनं कार्यम् । **आत्माकृष्टिः** हृत्संपुटितसद्योजातयुक्तात्ममन्त्रेणाङ्कुश-

मुद्रया आत्माकर्षणं कार्यम् । **शिखान्तसङ्ग्रहबहिर्निस्सारणे** कृत्वेति शेषः । शिखान्ते शिष्यद्वादशान्ते तद्द्वादशान्तपर्यन्तमात्मानं नीत्वेत्यर्थः । सङ्ग्रहः आत्ममन्त्रेण द्वादशान्तस्थितात्मनः सङ्ग्रहः कार्यः । बहिर्निस्सारणं सङ्गृहीतात्मनः शिष्यभ्रूमध्यनयनानन्तरं बहिर्निर्गमनं कर्तव्यम् । **स्वात्मनि नासा पूरकवायुना प्रवेश्य** प्रवेशनं कृत्वा, **हृदये न्यस्त्वा** स्वहृदये कुम्भकेन स्वात्मना सह समरसीभावेन निवेशनं कृत्वा तमात्मानं **तथोत्कृष्य** तथा ब्रह्मादिकारणत्यागक्रमेण आत्ममन्त्रेणोत्कृष्य स्वद्वादशान्तपर्यन्तं नीत्वा **सङ्गृह्य** तत्रस्थात्मानं सङ्गृह्य **अन्ततः** द्वादशान्तादेव सृष्ट्या भ्रूमध्यमानीय **पिङ्गलगतेः** स्वदक्षिणनाडीनिर्गमेण रेचकवायोः **निस्सार्य** बहिर्गमनं कृत्वा **शक्तौ** पाशसूत्रे व्यापकत्वेन स्थितशिवशक्तौ **न्यसेत्** नमोऽन्तात्ममन्त्रेण मलादिपाशावगुण्ठितस्य आत्मनो न्यासं कुर्यात् । न्यासानन्तरं सन्निधानाहुतीनां त्रयं मूलेन देयम् । भोक्तृत्वकारणान्धकारसममलपाशसुखदुःखकारणसितासितरूपकर्मपाशशरीरेन्द्रियविषयकारणकर्बुरवर्णमायापाशानां पाशाधिष्ठात्रितया तमोरूपायाः शिवशक्तेश्च न्यासं सूत्रे कृत्वा सन्निधानाहुतीनां त्रयं त्रयं पृथक् पृथग् दद्यात् ।

ननु शिवशक्तिरमला सा कथं पाशरूपा भवितुमर्हति । सत्यम् । किन्तु शोध्यशोधकत्वेनानुरक्ता सती पाश इत्युपचर्यते । उक्तं च—

> तासां माहेश्वरी शक्तिस्सर्वानुग्राहिका शिवा ।
> धर्मानुवर्तनादेव पाश इत्युपचर्यते ॥ इति ॥

पूर्वोक्तवत्तत्त्वादिगर्भितां निवृत्त्यादिकलां पाशसूत्रे संयोज्य सन्निधानाहुतित्रयं देयम् । इति ॥ १०४ ॥

अथात्मानो वह्निस्थवागीश्वर्यां गर्भाधानादिसंस्कारार्थं होमविधानमाह—**तस्या इति** ।

तस्या योनिषु योजितस्य युगपद्गर्भाप्तये जन्मने
देहद्वर्या स्वककर्मसञ्चयकृते तद्भोगभुक्तौ लये ।
मायास्रोतसि निष्कृतौ च हवनं तत्त्वे च मूलेन नुः
पाशानां च तिरोहितौ विभजने छेदे कलाहेतिना ॥ १०५ ॥

प्रथमम् पूर्वोक्तवत् तत्त्वादियुक्तां ब्रह्मादिस्थावरान्तचतुर्दशविधभूतसर्गयुक्तां निवृत्तिकलां जान्वधः सूत्रे हृदयसंपुटितचतुर्थ्यन्तनिवृत्तिकलाबीजेनावलोक्याङ्कुशमुद्रया पूरकेणाकृष्य संहारमुद्रया कुम्भकेन सङ्गृह्य, रेचकेन उद्भवमुद्रया कुण्डस्थितायामाधारशक्तौ निवेश्य संपूज्य स्वाहान्तेन निवृत्तिकलाबीजेन संनिधानाहुतित्रयं दत्वा तदधिपतिं ब्रह्माणमावाह्य प्रार्थ्य निवृत्तिकलां व्यापिकां वागीश्वरीं वागीश्वरं चावाह्य संनिधानाहुतीर्दद्यात् । एवं प्रतिष्ठाकलादिष्वपि तत्त्वादिसंयुक्तावाहनादिकं कुर्यात् । निवृत्तिकलाव्यापिकायास्तस्या वागीश्वर्या **योनिषु** अनेकरूपयोनिषु । ननु वागीश्वरी तावदेकयोनिसहिता तस्या अनेकयोनित्वं कथम् । सत्यम् । निवृत्तिकलादिषु स्थावराद्यनेकयोनयो विद्यन्ते । वागीश्वर्याः तत्कलाव्यापकत्वेन अनेकयोनित्वं संभवत्येव । **योजितस्य** शिष्यस्य पूर्वोक्तवत् ताडनादिपूर्वकमात्मानं सङ्गृह्य स्वहृदि निवेशनानन्तरं ब्रह्मादिकारणत्यागक्रमेण बहिर्निस्सार्य पित्रोस्संयोगं विभाव्य आत्ममन्त्रेण युगपत् सर्वयोनिषु अनेकव्यक्तिरूपेण संयोगीकृत्य शिष्यात्मनः युगपदेकवारमेव सर्वासु योनिषु कर्मणां वैचित्र्यात् स्त्रीपुंनपुंसकमिति मृगपक्ष्यादिकमिति **गर्भासये** गर्भाधानप्राप्त्यर्थं भो आत्मन् गर्भाधानाय युक्तो भवेति **मूलेन** मूलमन्त्रेण **हवनं** होमः कार्यः । **जन्मने** सर्वगर्भात् बहिर्जननार्थं मूलेन होमो विधेयः । अत्र गर्भाधानानन्तरं जन्मने इत्युक्तत्वात् पुंसवनसीमन्तोन्नयने न कर्तव्ये इति ज्ञापिते । पुंसवनं स्त्रीत्वनपुंसकत्वप्रतिषेधार्थं कर्तव्यम् । तस्मादत्र स्त्रीनपुंसकजननस्य विहितत्वात् पुंसवनं न कर्तयम् । सीमन्तोन्नयनं काणकुब्जखञ्जादिरूपप्रतिषेधार्थं कर्तव्यम् । अत्र काणादिजननस्यापि विहितत्वात् सीमन्तोन्नयनमपि न कर्तव्यम् । **देहद्धूर्या** शरीरवृद्ध्या **स्वककर्मसञ्चयकृते** स्वककर्मणां स्वेन क्रियमाणकर्मणां वापीकूपप्रपादिलौकिकानां वैदिकानां चत्वारिंशत्कर्मणां च सञ्चयस्समूहः । तस्य कृते आर्जनकरणे मूलेन होतव्यम् । **तद्भोगभुक्तौ** स्वकर्मणः भोगभुक्तौ सुखदुःखवेदनात्मकभोगभोजने मूलेनाहुतिः कार्या । भोगार्थश्चोदितः मोहदुःखसुखेच्छायां महति प्रतिबिम्बिता चिद्व्यक्तिरात्मनो भोगः कर्मणां क्षयकारणमिति । **लये** भोगानन्तरं भोग्येषु भोक्तरि च भेदाध्यवसायरूपसंभृतौ मूलेनाहुतिः कार्या ॥ उक्तं च—

अभेदाध्यवसायो यो भोग्यभोक्त्रोः परस्परम् ।
अत्यन्तमनुरक्तो यः चिद्व्यक्तिस्स लयो मतः ॥ इति ॥

मायास्रोतसि मायोत्पन्नभुवनशुद्धौ अस्य निरुपभुक्तभुवनेषु पुनर्व्याप्तिर्माभूदिति स्रोतसां शुद्धिः । तदर्थं मूलेनाहुतिः **निष्कृतौ** जात्यायुर्भोगसंस्कारादिशुद्धौ मूलेन होतव्या । **तत्त्वे च** विगताम्बुघनवलाघवार्थं तत्तत्कलातत्त्वशुद्धौ मूलेन हवनं कार्यम् । उक्तं च—

उपभुक्तोदकस्येव शरन्मेघस्य लाघवम् ।
शुद्धिरत्र विनिर्दिष्टा तत्त्वस्य क्षीणकर्मणः ॥ इति ॥

पाशानां मलमायाकर्मणां मलमायाकर्मयुक्तनिवृत्त्यादिकलादीनां च **तिरोहितौ** मलशक्तिः तिरोधायिनी **विभजने** मलकर्ममायारूपपाशत्रयविश्लेषणे मलशक्तितिरोधानवशविश्लेषायुक्तौ—

पशुभावतिरोभावस्सहकारिवशादिव ।
भोगबीजकलानाशे मलवृत्तेरहेतुता ॥

भोक्तृत्वं प्रतिपाशेऽस्मिन् या स विश्लेष उच्यते ॥ इति ॥

छेदे निवृत्त्यादिकलापाशच्छेदने सप्तधा अस्त्रजप्तज्ञानशक्त्यात्मककर्तर्येति शेषः । उक्तं च—

कर्तरी ज्ञानशक्तिस्तु यया पाशांश्छिनत्त्यसौ ।
सा कला परमा सूक्ष्मा मन्त्राणां बोधिनी परा ॥ इति ॥

कलाहेतिना निवृत्त्यादिहुंफडन्तास्त्रमन्त्रेण तत्तत्कलापाशावधिं छिन्द्यात् ॥ ॥ १०५ ॥

पाशछेदानन्तरं तद्दहनकृत्यमाह—**पाणिभ्यामिति ।**

पाणिभ्यां च विमर्दनं हुतमथो पाशाङ्कुराभावतः
प्रायश्चित्तविधौ चिदैक्यमननं सूक्ष्माङ्गशुद्धौ हृदा ।
शब्दाद्यष्टकशुल्कदानमधिपेष्वात्मोद्धृतिश्चार्घ्यके
वागीश्येशहुतोद्धृतिर्हृदणुना मूलेन पूर्णाहुतिः ॥ १०६ ॥

पाणिभ्यां हस्ताभ्यां **विमर्दनं** हुंफडन्तास्त्रमन्त्रेण विमर्दनानन्तरं छेदितपाशसूत्रस्य वर्तुलीकरणं **हुतं** घृतपूर्णे स्रुगग्रे निधाय निवृत्तिकलामन्त्रेण निवृत्त्यादिकलापाशं जुहोमीति हवनं विधेयम् । **अथो** हुतानन्तरं **पाशाङ्कुरा-**

भावतः पुनः पाशाङ्कुरनिवृत्तितो हुंफडन्तास्त्रेण हुतं कार्यम् । **प्रायश्चित्तविधौ** न्यूनातिरिक्तकर्मदोषस्य विनाशविधाने अस्त्रेणाहुतिः कार्या । उक्तं च—

न्यूनाधिकान्यथाकृत्य प्रहुताशुभकर्मणः ।
प्रायश्चित्ताहुतीरष्टौ हुत्वा हानाय हेतिना ॥ इति ॥

चिदैक्यमननं समस्तशरीरनाशे चैतन्यस्य एकत्वसम्भावनं कुर्यात् तत्तत्कर्मजनितसमस्तदेहेषु भिन्नत्वेन विद्यमानात्मनः तत्तद्देहविनाशे चैतन्यस्यैकत्वेन सम्भावनमिति यावत् । **सूक्ष्माङ्गशुद्धौ** सूक्ष्मशरीरशुद्ध्यर्थं सूक्ष्मशरीरं तु पुर्यष्टकविहितम् । उक्तं च—

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।
बुद्धिर्मनस्त्वहङ्कारः पुर्यष्टकमिदं वपुः ॥ इति ॥

हृदा हृदयमन्त्रेण **अधिपेषु** ब्रह्मविष्णुरुद्रेश्वरसदाशिवेषु **शब्दाद्यष्टकशुल्कदानं** ब्रह्मादिक्रमेण पूर्वोक्तशब्दाद्यष्टकदानं कर्तव्यम् । तद्यथा हृदयमन्त्रेण 'हे ब्रह्मन् शब्दस्पर्शौ शुल्कं गृहाण' इति ब्रह्मणि शुल्कं समर्पयेत् । एवं विष्णौ रससमर्पणम् । रुद्रे रूपगन्धयोः समर्पणम् । ईश्वरे बुद्ध्यहङ्कारयोः समर्पणम् । सदाशिवे मनस्समर्पणम् । शब्दादीनां कारणभूतां बैन्दवीं शक्तिं सदाशिवे त्यजेत् । उक्तं च—

शब्दस्पर्शौ ब्रह्मणि च श्रीवत्साङ्के रसं त्यजेत् ।
रूपगन्धौ त्यजेत् रुद्रे धीगर्वावीश्वरे त्यजेत् ॥

मनस्सदाशिवे देवे शब्दादीनां च हेतुकम् ।
शक्तिं बिन्दुमपीत्यत्र त्यजेदित्थमनुक्रमात् ॥ इति ॥

आत्मोद्धृतिः निवृत्त्यादिकलापाशसमूहात् मुक्तात्मोद्धरणं कर्तव्यम् । उद्धरणानन्तरं स्वहृदि सन्निवेश्य द्वादशान्तं नीत्वा शिष्यसूत्रदेहे नियोजनं कार्यम् । **अर्घ्यक**माप्यायनाय वौषडन्तमूलेनार्घ्यजलबिन्दून् शिरसि दद्यात् । **वागीश्ये(शी)शहुतः** वागीश्वरीवागीश्वरयोः होम कार्यः । **हृदणुना** हृदयमन्त्रेण हृद्देहसूत्रधारणार्थं आत्मनः होमः कार्यः । **मूलेन** वौषडन्तमूलमन्त्रेण **पूर्णाहुतिः** समस्तक्रियापरिपूरणार्थमाहुतिः दातव्या इत्यष्टादशसंस्काराः कर्तव्याः । उक्तं च—

इत्यष्टादश संस्काराः तत्त्वे तत्त्वे गुरुः पशोः ।
मलादित्रयनाशाय कुर्वीत शिवतृप्तये ॥

आत्मनस्ताडनादाने स्वीकृतिस्तस्य योजना ।
आधानोत्पत्त्यधिकारो भोगो लयोऽथ स्रोतसाम् ।
शुद्धिस्तत्त्वविशुद्धिश्च पशुपत्यधिरोहणम् ॥

पाशविश्लेषसञ्च्छेदौ तद्दाहाद्युत्क्रमक्रिया ।
कारणेष्टिपशूद्धारा यष्ट्वान्यापि पूर्णया ॥

समस्संस्कारविज्ञेयः विज्ञेया मध्यवर्तिनः ।
विश्लेषार्थं ताडनं स्याद् विश्लेषः कर्षणाय च ॥

कर्षणं ग्रहणायैव ग्रहणं योगकारणम् ।
गर्भाधानाय योगस्स्यादाधानं जननार्थकम् ॥

जननं त्वधिकारार्थमधिकारोऽपि भूतये ।
भूतिश्च लयहेतुस्स्यात् लयस्त्वान्तेन निष्कृतिः ॥

निष्कृतिश्च वियोगार्थं वियोगश्छेदकारणम् ।
विक्षेपायैव विच्छेदो विक्षेपस्तत्स्थकारणम् ।
तत्स्थेनैव च पूर्णा स्यात् अणूद्धारादिहेतुकम् ॥ इति ॥ १०६ ॥

ब्रह्मादिपञ्चकारणदेवेषु शब्दस्पर्शादिशुल्कसमर्पणे कारणमाह—**श्रोत्राद्यैरिति** ।

श्रोत्राद्यैर्विप्लुतौ तत्स्थपतिकसहितं क्रव्यभक्ष्योद्भवत्वं
स्याद्देयं तन्निवृत्त्यै तदधिपतिषु च स्पर्शशब्दादिशुल्कम् ।
शब्दस्पर्शादिरूपास्तनुतरतनुगाश्शोधने रोधिनो वा
ब्रह्माद्ये कारणे स्याच्छिवपदगमने देयमेतच्च तृप्त्यै ॥ १०७ ॥

श्रोत्राद्यैः श्रोत्रत्वग्जिह्वाचक्षुर्घ्राणेन्द्रियैः **विप्लुतौ** विहितानाचरणरूपनिषिद्धाचरणरूपशास्त्राज्ञाविक्रान्तौ ब्रह्मांशराक्षसादियोनिप्रदा श्रोत्रत्वग्विप्लुतिः रसनाविप्लुतिः विष्ण्वंशक्रव्यादजन्मदा घ्राणलोचनजनिता विप्लुतिः रुद्रांशक्रव्यादयोनिप्रदा बुद्ध्यहङ्कारविप्लुतिः ईश्वरांशक्रव्याददेहप्रदा मनोविप्लुतिः सदाशिवांशक्रव्यादजन्मप्रदेति तत्स्थपतिकसहितं क्रव्यभक्ष्योद्भवत्वमित्युक्तम् । **तत्स्थपतिक-**

सहितं तेषां श्रोत्रेन्द्रियत्वगिन्द्रियविप्लुतिजनितशब्दस्पर्शादीनां स्थपतिकसहितं तदधिपतिब्रह्मादिसहितं **क्रव्यभक्ष्योद्भवत्वं** क्रव्यभक्षाः मांसभक्षकाः राक्षसादयः तेषु उद्भवत्वं जननं **स्यात्** भूयात् । श्रोत्रादिविप्लुतिजनितशब्दादिशुल्कसमर्पणाभावे ब्रह्मक्रव्यादादियोनिषु जननं संभवेदित्यर्थः । **तन्निवृत्त्यै** ब्रह्मक्रव्यादादियोनिजननिवृत्त्यर्थं **तदधिपतिषु** श्रोत्रादिविप्लुतिजनितशब्दाद्यधिपतिषु ब्रह्मादिकारणेश्वरेषु **शब्दस्पर्शादिशुल्कम्**आदिशब्देन रसादिशुल्कं **देयम्** दातुं योग्यम् । ननु पृथिव्यां गन्धादयः पञ्चगुणास्ते ब्रह्मणि समर्पणीयाः । यद्वा निजगुणगन्ध एकः समर्पणीयः । तत्कथं पार्थिवतत्त्वशुद्धौ शब्दस्पर्शौ गगनपवनगुणौ ब्रह्मणि समर्प्येते इति शङ्कानिराकरणार्थमाह—**शब्दस्पर्शादिरूपा इति** । शब्दस्पर्शादिरूपाः **तनुतरतनुगाः** तनुतरतनुः अत्यन्तं सूक्ष्मशरीरं लिङ्गशरीरमित्यर्थः । तां गच्छन्तीति तनुतरतनुगाः भवन्ति । उक्तं च कालोत्तरे—

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।
बुद्धिर्मनस्त्वहङ्कारः पुर्यष्टकमुदाहृतम् ॥ इति ॥

अत एव पुर्यष्टकदेहशोधनार्थमेते शब्दादयो गुणाः पुर्यष्टकात्मकाः–श्रोत्रादीन्द्रिय विप्लुतिसम्भूता एव समर्प्यन्ते । **शोधने** पृथिव्यादितत्त्वशुद्धौ **रोधिनो** रोधका भवन्ति । अत एव **शिवपदगमने** शिवपदप्राप्तिनिमित्तं **ब्रह्माद्ये कारणे** ब्रह्मविष्णुरुद्रेश्वरसदाशिवे **तृप्त्यै** ब्रह्मादितृप्त्यर्थमेतत् स्पर्शादिशुल्कं देयं स्यात् । अत्र श्रोत्रेन्द्रियविप्लुतिजनितः शब्दः । स्पर्शस्तु त्वगिन्द्रियविप्लुतिजनितः । पादपाणिपायूपस्थविप्लुतिः स्पर्शार्थत्वाद्धेतोः त्वगिन्द्रियेऽन्तर्भूता । वाग्विप्लुतिस्तु शब्दार्थत्वात् श्रुतावन्तर्भूता । तावुभौ ब्रह्मांशाविति ब्रह्मणि समर्प्येते । तथा रसनाविप्लुतिजनितो रसः विष्णवे समर्प्यते । तथा चक्षुर्घ्राणविप्लुतिजनितौ विषयौ रूपगन्धौ रुद्राय समर्प्येते । एवं बुद्ध्यहंकारविप्लुतिरीश्वरे समर्प्यते । तथा मनोविप्लुतिश्च समस्तविकारिकारणबिन्दुशक्तिरपि सदाशिवे समर्प्यते । उक्तं च—

श्रुतित्वग्विप्लुतिर्ब्राह्मी ब्रह्मक्रव्यादयोनिदा ।
रसना वैष्णवी रौद्री घ्राणलोचनहेतुकी ॥

ऐश्वरी गर्वधीमूला मानसी शिवदैवता ।
स्पर्शार्थत्वात्कर्मदेवाश्चत्वारस्त्वचि संस्थिताः ॥

शब्दार्थत्वाच्छ्रुतौ वाणी विधेयात्रेति सूरयः ।
ब्रह्मार्थास्तिसृभिस्सार्धं अन्तःकरणवृत्तितः ।
पाशाविश्लेषवत्कृत्वा देवतास्त्वधिरोपयेत् ॥ इति ॥

तथा कालोत्तरे च—

शब्दस्पर्शौ ब्रह्मणि च रसं वै केशवे त्यजेत् ।
रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहङ्कारमीश्वरे ।
मनोबिन्दू शिवे त्यक्त्वा मुक्त एव शिवो भवेत् ॥ इति ॥ १०७ ॥

आत्मविद्याशिवाख्यतत्त्वैः क्रियामन्त्रादिवैकल्यशुद्ध्यर्थं मूलेन होमविधानमाह—मायेति ॥

मायान्तात्माख्यतत्त्वे विकलविधिहृतौ भाष्यकोच्चारतोऽणो-
स्सादेशाख्यान्तविद्यात्मनि मनुविकलोच्चारगोपांशुसंज्ञात् ।
तत्त्वे शक्त्यन्तशैवे मनसि किल गुरोर्भावनाहानिनाशे-
ऽप्युच्चारान्मानसात्स्युश्शिवमनुविषयाण्याहुतीनां शतानि ॥१०८॥

मायान्तात्माख्यतत्त्वे पृथिवीतत्त्वमारभ्य मायातत्त्वावसानात्मतत्त्वनामधेयतत्त्वे । मायातत्त्वान्तव्यापकमात्मतत्त्वमित्यर्थः । **विकलविधिहृतौ** क्रियालोपसंयुक्तकर्मपरिहारे **अणोः** मूलमन्त्रस्य **भाष्यकोच्चारतः** स्वान्येषां किञ्चिच्छ्रवणयुक्तोच्चारणात् **सादेशाख्यान्तविद्यात्मनि** सदाशिवनामधेयतत्त्वावसानविद्यास्वरूपतत्त्वे **मनुविकलोच्चारगोपांशुसंज्ञात्** मन्त्रोच्चारवैकल्यशुद्ध्यर्थं उपांशुसंज्ञात् स्वस्यैव किञ्चिच्छ्रवणसंयुक्तोच्चारणात् **शक्त्यन्तशैवे तत्त्वे** शक्तितत्त्वान्तव्यापकशिवतत्त्वे **मनसि** मानसे **गुरोः** शिवस्य **भावनाहानिनाशे** चिन्तनात्यागस्य विनाशे मनसा शिवभावनाहानिदोषनिवृत्त्यर्थमित्यर्थः । **मानसादुच्चारात्** मनोभावनोच्चाराच्छिव**मनुविषयाणि** शिवमन्त्रविषयाणि **आहुतीनां शतानि** [स्युः] आत्मतत्त्वादिषु प्रत्येकं शिवमन्त्रेण शतसंख्यया होमानि कार्याणि । तथा कामिके—

शान्त्यतीतकलां शक्तितत्त्वे लीनां विचिन्त्य च ।
आत्मतत्त्वं तु मायान्तमुपस्थाप्य गुरूत्तमः ॥

आत्मतत्त्वं चतुर्थ्यन्तमादौ तत्त्वसमन्वितम् ।
मनःप्रणवसंयुक्तमुक्त्वा संपूज्य सन्निधौ ॥

विधिवैकल्यशुद्ध्यर्थं स्वाहान्तशिवमन्त्रतः ।
सशब्देन शतं हुत्वा विद्यातत्त्वमुपांशुमत् ॥

मन्त्रोच्चारणवैकल्यात् शिवमन्त्रेण शुद्ध्यति ।
शिवतत्त्वमुपस्थाप्य शक्त्यन्तं मानसं स्मरेत् ॥

शतमष्टोत्तरं हुत्वा मनोवैकल्यमात्रतः ।
मुच्यते शिवमन्त्रेण शिखाच्छेदमथारभेत् ॥ इति ॥ १०८ ॥

दीक्षान्ते पूर्णाहुतिविधानार्थं शिवभावनामाह— **शुद्धाध्वेति** ।

शुद्धाध्वादिमतत्त्वयागवसुधाबिन्द्वाख्यतत्त्वासनो
नादेन्ध्यादिकलाढ्यदेहकरणश्शैवैकधीर्देशिकः ।
शक्तिर्धीस्समनान्तरालयकरणः शुद्धात्मतत्त्वोन्मना-
विद्योर्ध्वस्थशिवाख्यतत्त्वनिचितं शैवं विभाव्य स्वयम् ॥

शुद्धाध्वादिमतत्त्वयागवसुधा शुद्धाध्वादिमतत्त्वं शुद्धविद्यातत्त्वं तदेव यागवसुधा यागधाम मनोभावनया पृथिव्यादितत्त्वानि संत्यजन् शुद्धविद्यातत्त्वस्वरूपं यागस्थानं चिन्तयेदित्यर्थः । **बिन्द्वाख्यतत्त्वासनः** तत्र यागवसुधायां बिन्दुनामधेयतत्त्वासनः **नादेन्ध्यादिकलाढ्यदेहकरणः** नादकलेन्धिकादिकलासमृद्धशरीरबाह्यकरणः अत्रेन्धिकादिनादकलाशरीरयुक्तः व्यापिन्याद्यनाश्रितान्तकलाबाह्यकरणयुक्तः **शैवैकधीः** परमेश्वरध्यानैकचित्तः **देशिकः** आचार्यः **शक्तिरेव धीः** बुद्धिः **समनान्तरालयकरणः** अन्तरालेभवमान्तरालयमन्तःकरणं समानशक्त्यन्तःकरणयुक्त इत्यर्थः । **शुद्धात्मतत्त्वोन्मनाविद्योर्ध्वस्थशिवाख्यतत्त्वनिचितं** शुद्धतत्त्वस्वरूपात्मतत्त्वोन्मनास्वरूपविद्यातत्त्वोर्ध्वस्थितशिवनामधेयतत्त्वत्रयेण **निचितं** व्याप्तं **शैवं** शिवसम्बन्धं **स्वयं** शिवं **विभाव्य** विचिन्त्य । तथोक्तं कामिके—

सकलीकारशुद्धिं च कृत्वा संयोजयेच्छिवे ।
विद्यातत्त्वे सदाचार्यो बिन्दुक्लृप्तासनस्थितः ॥

इन्धिका दीपिका चैव रोचिका मोचिका तथा ।
तथोर्ध्वगामिनी चैव सूक्ष्मा सूक्ष्मामृतामृता ॥

[अनुवर्तते]

திருவள்ளுவர் பிள்ளைத்தமிழ்

——:o:——

''அணுவைத் துளைத்தேழ் கடலைப் புகட்டிக்
குறுகத்தறித்த குறள்''

என உலகமெலாம் விரும்பியேற்க, இரண்டடியால் உலகளந்து உயர்பொருளை உயிர்கட்கீந்து, நிலையான இன்பமதின் நிலைக் களனாய் நின்றிலங்கும் நாவலனும் பொய்யாமொழிப்புலவன் வள்ளுவனின் அளவிலா அரும்பணியில் ஆழ்ந்த பெருங்காதலினால், அன்னவனை மூன்று முதலா மூவெழு திங்களின் பத்துப் பருவமுடை இளம்பருவப்பிள்ளையாக்கி, குறைவற்ற செல்வமாம் நோயற்ற வாழ்வுடைய பிள்ளையே பிற பருவங்களைப் பெற இயலுமாதலின் அப்பிள்ளையின் வாழ்வு விரும்பிய காப்பு மழலைமொழியின் மயக்க முடை செங்கீரை, சிறப்பினைப் பாடும் தால், கைகொட்டி விளையாட வைக்கும் சப்பாணி, இணையிலா இளவமுதம் விரும்பும் முத்தம், தளர் நடையொடு வர அழைக்கும் வாரானை, உடன் ஆட அழைக்கும் அம்புலி, வாழ்வாமமைப்பை அழிக்காதிருக்கவேண்டும் சிற்றில், மகிழ்வொடு முழக்கவேண்டும் சிறுபறை, தெருவினில் உருட்டி விளையாடவேண்டும் சிறுதேர் எனும் பத்துப் பருவங்களாகப் பகுத்துப் பைந்தமிழில் அவன் செய்த பெருஞ் சிறப்புடைப் பொருள்களைப் போற்றிப் பாடும் நூலாதலின் இஃது 'திருவள்ளுவர் பிள்ளைத் தமிழ்' எனும் பெயர் பெற்றது.

பிள்ளையின் அருமையுணரும் உள்ளமே, அன்பு மலர, அதன் வழி அருள் சுரக்க, உலகை ஒத்து நோக்கித் தனக்கென்பதழியப் பிறர்க்கெனவாழும் பெற்றியதாகு மல்லவா? இவ் வருமையின் அடிப்படையில் எழுந்ததே இப்பிள்ளைத்தமிழ் நூல்.

காலைக் கதிரவனே விரும்பிப் போற்றப்படுகின்றான். காரணம்? எவ்வகையுயிரும் அதன் இளமைப்பருவத்தே பொலிவொடு விளங்கிப் போற்றப் பெறுதல் இயற்கை. அதுபோல, அன்பிற்குரியாரை அவ்விளமையாம் பிள்ளைப் பருவத்தில் காணவிரும்புவதே அன்புள்ள மாகும். அத்தகைய அன்புள்ளத்தே சுரந்த பாடல்களின் தொகுப்பே '**பிள்ளைத்தமிழ்**' என்னும் சிறந்த பிரபந்தமாக வளர்ந்து நிற்கின்றது. உணர்ச்சியும் உவகையும் நிரம்பிய பாடல்கள் தமிழில் பல உண்டு. பத்தியும் பேரின்பமும் பயப்பன பலப்பல; ஆசு கவிகளும் உண்டு;

Vol. XIX

No. I

Bulletin of The Government Oriental Manuscripts Library Madras

EDITED

by

R. K. PARTHASARATHI, M.A., L.T.,
DIP. in FRENCH AND GERMAN,

Curator, Government Oriental Manuscripts Library, Madras.

©

Government of Tamil Nadu

1969

Price: Rs. 2.

पुटम्	संख्या	अङ्कः	पाठान्तराणि
35	3	क	ह्यति-
,,	4	क	अमोचयंश्च । श्रीपतेस्तु
,,	5	,,	मुख्यं नेति
,,	,,	ग	श्रियः पतेस्तु कारुण्यं मुख्यं मुक्त्युपायः । न परमिति विदुः ।
,,	6	क ग	ते नः
,,	7	,,	क्षमेरन् ।
,,	8	,,	इत्यन्वयः ।
,,	9	ग	वा
,,	10	,,	मां सुकृतपरिणतेराचार्यैरिदं
,,	11	क	नोऽघसङ्घं कृत्स्नं
,,	,,	ग	ददतः अघसङ्घं कृत्स्नं
36	1	क	दिविषदधिपतीनां च साध्याः प्रयत्नात्
,,	,,	ग	स्वर्गस्थानाञ्च साध्याः प्रयतनत इदङ्ग्रन्थसम्प्रोक्तनिष्ठाः प्रातानां
,,	2	क	दिविषदधिपतीनां च प्रयत्नात् साध्याः
,,	,,	ग	स्वर्गस्थानाञ्च प्रयतनतस्साध्या इदङ्ग्रन्थसम्प्रोक्तनिष्ठाः स्वयं
,,	3	,,	तत्कर्तरि च
,,	4	,,	क्लृप्ते च
,,	5	,,	इत्यन्वयः इदङ्ग्रन्थ इति समस्तं पदम् ॥ २७ ॥
,,	6	,,	"என்னெழின்"; "எம்மெழின்" என்றும் பாடம்.
,,	7	क	हे सूक्ष्मधियः । इति सम्बोधनम् । दीप्तेति धीविशेषणम् । उपदेशेन लेखिन्या हृदि पत्रे इत्युभयं व्यस्तरूपकम् । शेषोऽन्वयस्सुकरः ॥
,,	,,	ग	अन्वयस्सुकरः ॥ २९ ॥
37	1	क ग	-निरीक्ष्यतां कारुणिकैर्विमत्सरैः ॥
,,	2	,,	"अधिकार........" इत्यन्त्यश्लोको न दृश्यते ।

—: * :—

॥ श्रीः ॥

॥ त्रिलोचनशिवाचार्यकृता सिद्धान्तसारावलिः ॥

॥ अनन्तशम्भुकृतव्याख्यासहिता ॥

Edited by
Sri R. K. Parthasarathi, M. A., L. T.,
and
Sri T. H. Viswanathan, Siromani.

(*Continued from Page 64 of Volume XVIII No. 2*)

बिन्दुशक्तिरिति प्रोक्ता नादशक्तिकला द्विजाः ।
आभिः कलाभिस्संक्लृप्तदेहयुग्देशिकोत्तमः ॥

व्यापिनी व्योमरूपा च ह्यनन्ता ह्यपरा तथा ।
अनाथानाश्रिता चाभिः बहिःकरणसंयुतः ॥

अन्तःकरणसंयुक्तस्समनाकल्पतत्त्वयुक् ।
आत्मा तत्त्वोन्मनश्शैवे समापूरितदेहयुक् ॥ इति ॥ १०९ ॥

पूर्णाहुतिविधानार्थं स्रुचि षडध्वन्यासपूर्वकं शक्तिशिवावाहनमाह—**आज्याढ्यामिति** ।

**आज्याढ्यां निहितस्रुवां स्रुचमधश्शङ्खाख्ययादाय सः
प्रोत्थायोद्गतपूर्वकायसमपात् स्रुङ्मूलनाभिः स्मरेत् ।
पञ्चाधारसमस्थिताध्वनिचयं स्रुक्कुम्भदण्डाग्रख-
ग्रीवांशेषु च शक्तिमाज्यसरणौ वक्त्रे शिवं स्रुग्ध्रयम् ॥ ११० ॥**

आज्याढ्यां घृतसमृद्धामाज्यपूरितामित्यर्थः । **निहितस्रुवां** अधोमुखत्वेन स्रुग्बिलोपरि विन्यस्तस्रुवयुक्तां **स्रुचं शङ्खाख्यया** शङ्खाकारवत् कृतमुद्रया **आदाय**

गृहीत्वा स गुरुः **प्रोत्थाय** आसनादुत्थाय **उद्धृतपूर्वकायः** उन्नतपूर्वशरीरः **समपात्** सहशस्थितपादः **स्रुङ्मूलनाभिः** नाभौ धृतस्रुङ्मूलश्च **पञ्चाधारसमस्थिताध्वनिचयं** पञ्चाधारेषु मण्डलवह्निकुम्भशिष्यस्वात्माख्यपञ्चाधिकरणेषु समस्थिताध्वनिचयं समानाकारेण पूर्वं विन्यस्तषडध्वसमूहं पञ्चस्थानेषु शिवस्य विद्यमानत्वात्पूर्वं षडध्वन्यासः सर्वत्र कार्यः । इदानीं सर्वत्रावस्थिताध्वनिचयं गृहीत्वा स्रुच्यावाहयेत् ।

> सर्वेषां कर्मणां साक्षी मण्डले समवस्थितः ।
> यज्ञस्य रक्षकत्वेन शिवकुम्भे व्यवस्थितः ॥
>
> होमाधिकरणत्वेन पावकस्थस्सदाशिवः ।
> शिष्यदेहे तु तच्छिष्यपाशमोचनकारकः ॥
>
> अनुग्रहकरो देवो मम देहे व्यवस्थितः ।
> पञ्चाधिकरणो देवः सोऽहमेव सदाशिवः ॥ इत्युक्तत्वात् ॥

स्रुक्कुम्भदण्डाग्रखग्रीवांशेषु स्रुक्कुम्भः स्रुङ्मूलस्थितकलशः वृत्तो दण्डः वृत्ताकारदण्डः । अग्रं गण्डिका खशब्देन आकाशवाचकत्वात् बिलमुच्यते । बिलयुक्तवेदीत्यर्थः । ग्रीवा कण्ठः । एतेषामंशेषु भागेषु निवृत्त्यादिकलाक्रमेण सर्वाध्वनिचयं **स्मरेत्** चिन्तयेत् । तथा मृगेन्द्रे—

> स्रुचि वाध्वानमारोप्य कलशं स्कन्धगण्डिका ।
> वेदीग्रीवामुखांशेषु निवृत्त्यादिविभागशः ॥ इति ॥

स्रुङ्मुखे शिवावाहनस्य कृतत्वात् षडध्वस्यानं विहितमनुसन्धेयम् । **आज्यसरणौ** घृतनिर्गमनपद्धतौ **शक्तिं स्मरेत्** । **वक्त्रे** स्रुङ्मुखे **स्रुङ्मयं** स्रुक्स्वरूपं **शिवं स्मरेत्** । सर्वाध्वव्यापकं देवं स्रुगित्यनुस्मरेदित्यर्थः । 'स्रुक्स्रुवव्यपदेशेन शक्तिपिण्डस्सदाशिवः ।' इत्युक्तत्वात् ॥ ११० ॥

युग्मश्लोकेन पूर्णाहुतिसमये प्राणमन्त्रनाडीप्रशान्तशक्तिकान्ततत्वाख्यसप्तविषुवभेदध्यानमाह—**शिष्येति** ।

> **शिष्यात्मस्वमनस्समीरणसमायोगो भवेत्प्राणवं**
> **नादात्मैक्यविचिन्तनान्मनुविषुः कन्दान्मनूच्चारतः ।**

> **ग्रन्थिच्छेदत एव नाडिविषुवं तन्मध्यनादोद्गमात्**
> **षट् त्यक्त्वादिकलाः प्रशान्तविषुवं शक्तौ लयस्सप्तमे ॥ १११ ॥**
>
> **शक्तिस्थो ध्वनिरूर्ध्वमेव विसरेत्तच्छक्तिसंज्ञं कला-**
> **सप्तेन्द्वष्टदश प्रकल्प्य त्रुटिभिश्शक्तेर्मनान्तं त्रिधा ।**
> **तत्प्राणेऽप्यपरः परापरपरौ कालाह्वयं तत्परं**
> **तत्त्वाख्यं विषुवं ध्रुवं परशिवस्थानं तु चिद्व्यक्तिकृत् ॥ ११२ ॥**

शिष्यात्मस्वमनःसमीरणसमायोगः शिष्यात्मनः स्वमनसश्च समीरणेन प्राणवायुना समायोगः अन्योन्यैक्यसम्बन्धः, **प्राणवं** प्राणवायुसम्बन्धविषुवं प्रथमं भवेत् । तथोक्तम्—

> आत्मनश्च मनः प्राणे संयोज्य विषुवं भवेत् ।
> प्राणवद्विषुवं ख्यातं शिष्यस्वमनसोरपि ॥ इति ॥

कन्दात् मूलाधारे विद्यमानकमलकन्दात् **मनूच्चारतः** मन्त्रोच्चारणात् **नादात्मैक्यविचिन्तनात्** नादे आत्मनः ऐक्यस्वरूपध्यानात् **मनुविषुं** मन्त्रविषुवं द्वितीयम् । उक्तं च—

> आत्मनो नादमध्ये तु लयं सञ्चिन्त्य कन्दतः ।
> अकारोकारवर्णादिसंयोगेन वियोगतः ।
> हृदयादिबिलान्तेषु विषुवं मन्त्रसंज्ञकम् ॥ इति ॥

ग्रन्थिच्छेदतः मेढ्रादिदशग्रन्थिभेदनात् **तन्मध्यनादोद्गमात्** सर्वासां नाडीनां मध्ये सुषुम्नायाः प्रधानत्वात् सुषुम्नामध्यगतनादस्य प्रकाशनात् **नाडीविषुवं** तृतीयम् । उक्तं च—

> मेढ्रोर्ध्वे कन्दनाभिश्च हृदयं कण्ठकूपिका ।
> कण्ठस्याग्रं भ्रुवोर्मध्यं ललाटं ब्रह्मणो बिलम् ॥
>
> शक्तिं च द्वादशान्तं च दशग्रन्थीननुक्रमात् ।
> मूलमन्त्रं त्रिशूलेन भित्त्वा नादः प्रवर्तते ।
> नादनाडीसमायोगात् तन्नाडीविषुवं मतम् ॥ इति ॥

अन्यत्रापि—

सर्वासामेव नाडीनां मध्ये या संव्यवस्थिता ।
सुषुम्ना सा समाज्ञेया नामेश्शक्तेश्शिवं गता ।
तत्र प्रवाहयेन्नादं नाडीविषुवमुच्यते ॥ इति ॥

आदिकलाः अकारोकारमकारबिन्दुनादनादान्ताख्यषट् **त्यक्त्वा** कारणेश्वराणां त्यागात् **सप्तमे शक्तौ** सप्तमशक्तिस्थाने आत्मनो लयः **प्रशान्तविषुवं** चतुर्थम् । उक्तं च—

अकारोकारवर्णौ द्वौ मकारो बिन्दुसंज्ञकः ।
नादनादान्तसंज्ञौ च त्यक्त्वा ब्रह्मादिषु क्रमात् ॥

सप्तमे शक्तिमध्ये तु शिष्यात्मानं लयं नयेत् ।
प्रशान्तं तद्विजानीयात् प्रशान्तेन्द्रियगोचरम् ॥ इति ॥

शक्तिस्थः शक्तिमध्यस्थो ध्वनिस्स नादः **ऊर्ध्वमेव विसरेत्** 'यदा चलेत्तदा **शक्तिसंज्ञं** विषुवपञ्चमम् । उक्तं च—

शक्तिमध्यगतो नादः समनान्तः प्रसर्पति ।
तच्छक्तिविषुवं प्रोक्तं........ ॥ इति ॥

त्रुटिभिः त्रुटिः भ्रूक्षेपमात्रप्राणकाः ल'भ्रूक्षेपमात्रो यः कालः स त्रुटिः परिकीर्तितः' इत्युक्तत्वात् । ताभिः त्रुटिभिः **कलासप्तेन्द्वष्टदश प्रकल्प्य** कला षोडश सप्तेन्दुः सप्तदश अष्टादशसंख्याकान् कृत्वा **शक्तेः** शक्तिमारभ्य **मनान्तं** समनाशक्तिपर्यन्तं **त्रिधा प्रकल्प्य,** **तत्प्राणे** प्राणस्य एकमन्त्रोच्चारेण त्रिधाकरणात् त्रिधाभूतप्राणेऽप्यपरः **परापरपरौ** अपर इति परापर इति पर इति । **कालाह्वयं** कालनामधेयं विषुवं षष्ठम् । अत्रायमर्थः—

षोडशत्र्युटयात्मकश्शक्त्यन्तः प्राणसंचारः अपरः कालः । सप्तदशत्र्युटयात्मकः व्यापिन्यन्तः प्राणचारः परापरः कालः । अष्टादशत्रुटयात्मकः समनान्तः प्राणचारः परः कालः ।

प्राणमेवं त्रिधा कालं ज्ञात्वा चैवं त्रिधा कुरु ।
अपरष्षोडशो यावत् सप्तदशः परापरः ॥

तस्मात्परस्तु यः कालः स प्रियेऽष्टादश स्मृतः ।
प्राणमेवं त्रिधा कालं ज्ञात्वा चैव त्यजेत्पुनः ॥

अपरश्शक्तिमूर्ध्निस्थो व्यापिन्यन्तं द्वितीयकम् ।
तृतीयं समनान्तं तु कालं विषुवमुच्यते ॥ इति ॥

तत्परं समनाशक्तेः परं उन्मन्यन्ते विद्यमानं **ध्रुवं** नित्यभूतं **परशिवस्थानं** परमशिवस्य स्थानभूतं **चिद्व्यक्तिकृत्** आत्मव्यक्तिकारकं **तत्त्वाख्यं** तत्त्वनामधेयं **विषुवं** सप्तमं भवेत् । 'उन्मन्यन्तं ततः प्रोक्तं तत्त्वं विषुवसंज्ञकम्' इत्युक्तत्वात् । उन्मनायाः परे तस्मिन्निष्कळे परे शिवे शिष्यात्मसंयोजनं तत्त्वविषुवमित्यर्थः ॥ ११२ ॥

आध्यात्मस्रुग्भावनापूर्वं तत्त्वविषुवे शिष्यात्मयोजनार्थं पूर्णाहुतिमाह—**तस्मिन्निति** ।

तस्मिन्सत्सुधयाढ्यकन्दकलशान्नाडीसुदण्डा स्वहृ-
त्पद्मश्वभ्रगलोर्ध्वतालुसुषिराबिन्दुस्रवत्स्वामृता ।
स्रुक् चेत्यान्तरभावगा स्रुतघृतापातेन संयोजये-
त्स्थैर्यं चापरपूर्णया क्षणकलालक्ष्यं तथापादयेत् ॥ ११३ ॥

नाडीसुदण्डा मध्यनाडीयुक्तशोभनदण्डा । स्रुग्दण्ड एव मध्यनाडी इत्यर्थः । **स्वहृत्पद्मश्वभ्रगलोर्ध्वतालुसुषिरा** स्वहृत्पद्मं स्वहृदयकमलं, श्वभ्रं स्रुग्वेदिबिलं, तेन युक्तं । वेदीबिलमेव यथाक्रमं सत्स्वहृदयकमलमित्यर्थः । गलोर्ध्वतालुसुषिरा कण्ठतालुपथव्यक्तरन्ध्रा **बिन्दुस्रवत्स्वामृता** बिन्दुस्थानात् प्रक्रान्तप्रसरत् परसुधारसयुक्तामृता इति । एवं त्रिधा **स्रुक्चैवान्तरभावगा** आन्तरभावनां प्राप्ता स्रुग्रूपध्यानानन्तरं बहिरनुक्रियत इति भावः । एवं स्रुग्ध्यानम् । **तस्मिन्** चिद्व्यक्तिकृत्परशिवस्थाने पुनरावृत्तिरहिते स्रुवे **सत्सुधयाढ्यकन्दकलशात्** शोभनामृतसंपूर्णस्रुङ्मूले विद्यमानकलशकन्दात् **स्रुतघृतापातेन** कन्दाद्विनिर्गतपरामृतभावनायुक्तघृतधारापातेन **संयोजयेत्** शिष्यात्मानं संबन्धयेत् । उक्तं च—

पूरकं कुम्भकं कृत्वा सर्वद्वाराणि योजयेत् ।
नादस्संभावयेन्मन्त्रं प्रक्रियामूलमाश्रितः ॥

दिव्यं करणमास्थाय परभावसमन्वितम् ।
शिष्यात्मकुम्भवह्निभ्यो मण्डलादपि षड्विधम् ॥

सङ्गृह्याध्वानमारोप्य प्राणनाडीगतस्रुचः ।
अग्रे गुरूक्तकन्दादेर्मन्त्रमुच्चारयेत्क्रमात् ॥

मूलमन्त्रं त्रिशूलेन भित्वा ग्रन्थीननुक्रमात् ।
प्रासादाध्वशिखान्तस्थमात्मानं च लयावधि ॥

नीत्वा त्यक्त्वा मानसं वै व्यापारं बोधरूपयुक् ।
शिवे षड्गुणसंपूर्णे चिदानन्दस्वरूपके ।
ध्यायन्विधानमात्मानं शनैः पूर्णां निपातयन् ॥

तावत्तिष्ठेत्कुम्भकेन न यावत् सर्पिषा स्थितिः ।
धैर्येण योजना कार्या पुनः पूर्णाहुतिं क्षिपेत् ॥ इति ॥ ११३ ॥

शिष्यचैतन्यस्य सर्वज्ञत्वादिषड्गुणापादनमाह—**सृष्ट्येति** ।

सृष्ट्याग्नौ च नियोज्य तत्र परया शिष्यस्य चिद्व्यक्तिकं
सर्वज्ञत्वसुतृप्त्यनादिकमतिस्वातन्त्र्यसंज्ञानि च ।
शक्तिं पूर्तिमतीमनन्तविषयां षट्कं गुणानां न्विति
ह्यापाद्यानलतश्शिवेन सदृशं शिष्ये तदा योजयेत् ॥ ११४ ॥

शिष्यस्य पूर्वोक्तवत् पूर्णाहुतिपर्यन्तं दीक्षितस्य **चिद्व्यक्तिकं** दृक्क्रियात्मकचैतन्यव्यक्तिस्वरूपं **परया** उत्कृष्टया **सृष्ट्या** सृष्टिमार्गेण शिष्यचैतन्याकर्षणेन आत्मनः मूलस्थानादारभ्य द्वादशान्तपर्यन्तं नीत्वा पुनर्द्वादशान्ताद्दण्डिकास्थानमानीय नासिकाद्वारेण पुष्पाञ्जलिगतं ध्यात्वा **तत्राग्नौ** कुण्डे विद्यमानशिवाग्नौ **नियोज्य** संयोजनं कृत्वा स्रुवेण तिसृभिस्तिसृभिः आहुतिभिः **सर्वज्ञत्वसुतृप्त्यनादिकमतिस्वातन्त्र्यसंज्ञानि** च सर्वज्ञता परितृप्तता अनादिबोधता स्वातन्त्र्यसंज्ञानि च स्वतन्त्रशक्तिता । **पूर्तिमतीं** शक्तिमलुप्तशक्तिकामनन्त**विषयामनन्त**शक्तिकामिति एवंप्रकारेण **गुणानां षट्कमापाद्य** सम्पादयित्वा नैसर्गिकगुणा-

नामनादिमलपाशकदर्थितत्वादुत्पत्तिं जनयित्वेत्यर्थः । नु इति पदच्छेदः । **नु** पश्चादग्नौ पूर्णाहुत्या षड्गुणानां योजनानन्तरमिति । **अनलतः** आवाहितषड्गुणान्विताग्निसकाशात् । उच्यत इति शेषः । **तदा** तस्मिन् काले **शिवेन** स्वभावादनादिपाशरहितशिवेन **सदृशं** समानं शिष्यगुणं **शिष्ये योजयेत्** सम्पादयेत् । तथा मृगेन्द्रे—

गुणानापाद्य तत्रैव सिद्धानाहुतिभिस्त्रिभिः ।
स्वतन्त्रादिविधेर्दार्ढ्यादिच्छन्त्येवं विपश्चितः ॥ इति ॥ ११४ ॥

त्रिपदार्थां चतुष्पदां भुक्तिमुक्तिफलप्रदां संहितां यो विजानाति शिष्योऽसौ सेकमर्हतीत्युक्तत्वादेवंगुणशीलसंपन्नस्य शिष्यस्य आचार्याभिषेकविधिमाह—**सिक्त इति** ।

सिक्तः पाशविमोचको गुरुवरो रत्नौषधीबीजकैः
पूर्णैर्भूतघटैस्स्थिरासनकलाक्लृप्तैस्सपञ्चावृतैः ।
सब्रह्माङ्गशिवार्चनाजपयुतैर्दीक्षाप्रतिष्ठादिके
योग्यस्स्याद् गुरुणा शिवाग्रविहितप्राप्ताज्ञयोक्तव्रतः ॥ ११५ ॥

रत्नौषधीबीजकैः रत्नानि पञ्चरत्नानि । तथा चोक्तम्—

माणिक्यं चैव वैडूर्यं मुक्ताफलं प्रवालकम् ।
इन्द्रनीलं च रत्नानां पञ्चकं परिकीर्तितम् ॥

रत्नशब्देन स्वर्णादिलोहहरितालादिधातवश्च गृहीताः । ओषधयः सहदेव्यादयः । तथा मृगेन्द्रे—

सहदेवी तथा ब्राह्मी त्रायन्ती लक्ष्मणावती ।
शङ्खपुष्पी बला बीजा ज्योतिष्मत्यपराजिता ॥

विष्णुक्रान्ता बला मोटा बिल्वधान्यभयामृता ।
शताह्वा शाबरी दूर्वा कुशव्याघ्री पुनर्नवा ॥ इति ॥

बीजानि शालिसिद्धार्थयवादीनि । एतैः **पूर्णैः** प्रतिकलशं पूरितैः **भूतघटैः** पञ्च कुम्भैः पश्चिमोत्तरयाम्यपूर्वेशानादिदिक्षु संस्थापितैः । पुनः किंभूतैः । **स्थिरासन-**

कलाक्लृप्तैः स्थिरासनेन आधारशक्त्यादिसमग्रकासनेन व्रीह्यादिधान्यसप्तकासनेन च कलाभिर्निवृत्त्यादिपञ्चकलाभिर्यथाक्रमेण परिकल्पितैः **सपञ्चावृतैः** प्रत्येकं पञ्चावरणसहितैः **सब्रह्माङ्गशिवार्चनाजपयुतैः** ब्रह्मभिः सद्यादिपञ्चब्रह्मभिर्यथाक्रमेण अभिमन्त्रितैः अङ्गशिवार्चनया प्रत्येकं षडङ्गसहितशिवपूजया जपेन प्रत्येकं साष्टशतमूलमन्त्रजपेन युतैः कुम्भैः **सिक्तः** अभिषिक्तः । तथा चोक्तम्

पश्चिमं सद्यमन्त्रेण वामेनोत्तरतस्स्थितम् ।
दक्षिणं बहुरूपेण नरेण प्राग्व्यवस्थितम् ॥
ईशानेनैशमालभ्य सर्वान् साङ्गेन शम्भुना ॥ इति ॥

गुरुणा शिवाग्रविहितप्राप्ताज्ञया शिवाग्रे स्थण्डिलादिस्थितपरमेश्वरसंनिधौ विहितया एवमुत्तरत्र कार्यं कुर्विति कृतया । तथोक्तम्—

त्वयाधिकरणं वत्स गुरुपारम्परागतम् ।
नित्यं नैमित्तिकं काम्यं सदा तद्देशवासिना ।
अद्य प्रभृति कर्तव्यं सुविचार्य शिवाज्ञया ॥ इति ॥

प्राप्ताज्ञया शिष्येण तथेति प्रतिज्ञातगुर्वाज्ञया **उक्तव्रतः** गुरुणोक्तव्रताचारयुक्तः । तथा चोक्तं स्वायम्भुवे—

अथाचार्यव्रतं श्रेष्ठं चरेदाचार्य एव हि ।
सद्यादिशिवपर्यन्तामभ्यसेन्मन्त्रसंहिताम् ॥

पक्षत्रयमधश्शायी नक्ताशी चरुभुक् सदा ।
मौनी त्रिषवणस्नायी द्वन्द्वानुद्विग्नसंयतः ।
शुक्लाम्बरधरश्शान्तश्शुक्लमाल्यानुलेपनः ॥

योगपट्टाक्षसूत्रश्च मौञ्जाजिनपवित्रयुक् ।
जपं च प्रत्यहं कुर्यादनुद्विग्नस्सहस्रकम् ॥

होमं प्रतिदिनं कुर्याज्जपान्ते शक्तितः क्रमात् ।
घृतेन वा घृताक्तैर्वा तिलैः क्षीरेण तण्डुलैः ॥ इति ॥

एवमभिषिक्तश्शिष्यः **दीक्षाप्रतिष्ठादिके** दीक्षायां प्रतिष्ठायां लिङ्गप्रतिष्ठापवित्रितादिकार्यकरणे **योग्यः स्याद्भवेत्** । **पाशविमोचकः** मलादिपाशहरणदक्षः स्यात् । अत एव **गुरुवरो** भवेत् गुरुवरशब्देनैतदुक्तं भवति—

योग्यः स्यात् सर्ववर्णानां प्रतिष्ठायां महोत्सवे ।
स्नपने प्रोक्षणे चैव प्रायश्चित्तेऽभिषेचने ।
व्याख्यानादौ च शस्तः स्यात् स्वार्थे वाऽथ परार्थके ॥

सर्वदेवार्चने विप्रस्त्वादिशैवो गुरूत्तमः ।
विप्रादयस्त्रयो वर्णाः दीक्षायां स्थापनेऽपि च ॥

ब्राह्मणः क्षत्रियादीनां क्षत्रियश्शूद्रवैश्ययोः ।
वैश्यश्शूद्रस्य दीक्षायां स्वस्वजातौ विशिष्यते ॥

स्वार्थेष्टौ चललिङ्गस्य प्रतिष्ठायां त्रयस्त्विमे ।
शूद्रोऽपि शूद्रदीक्षायां स्वार्थे तु चलसंज्ञके ॥

बाणलिङ्गेक्षणे वापि स्थापको यदि नैष्ठिकः ।
सनादाखिलमन्त्रेषु शिवज्ञाने विशेषतः ॥

शूद्रस्यापि गृहस्थस्य नित्येष्टावेव योग्यता ।
तत्रापि नादरहितैर्मन्त्रैरेव प्रकीर्तिता ॥
अभिषेके त्वयोग्योऽयं किं पुनः स्थापनादिषु ॥ इति ॥ ११५ ॥

शिवागमविहितदीक्षायां विशेषाधिकारित्वद्योतनार्थं सर्वोपादानभूतबिन्दोरारभ्य शैवकुलमाह—बिन्दोरिति ।

बिन्दोस्तत्स्थमहेश्वराच्छिवकुलं गायत्रिशक्त्यङ्कितं
विघ्नेशादिसुरक्रमादुदभवद् दुर्वाससेह क्षितौ ।
ऋग्यादेस्तदनुग्रहोदयजुषो वर्षेऽभवद्भारते
श्रीमन्मुख्यकदम्बभूषणयुतं चामर्दसंज्ञाश्रमम् ॥ ११६ ॥

बिन्दोः सर्वोपादानभूतबिन्दोः **तत्स्थमहेश्वरात्** स्थावरजङ्गमात्मकजगदुत्पत्त्यर्थं बिन्दुक्षोभकात् सदाशिवात् । अत एव बिन्द्वतीतो निष्कळ इति द्योतितः । जगदुत्पत्त्यर्थं चिद्देहो भवतीत्यर्थः । चिद्देहवता सदाशिवेन बिन्दु-

क्षोभकाले मायत्रीशक्त्यङ्कितं गायत्रीशक्त्या चिह्नितं बिन्दुक्षोभकाले परा शैव-गायत्रीशक्तिरुत्पन्ना । तयाधिष्ठितं शैवकुलं शैवसन्तानं विद्येशादिसुरक्रमात् विद्येशा अनन्तादयोऽष्टौ सदाशिवेन बिन्दुक्षोभकाले बैन्दवशरीरिणो विद्येशा उत्पन्नाः । सदाशिवस्तु निष्कलशिवाज्जातः । आदिसुरक्रमात् अनन्तेशादि-क्रमतः अनन्तेशेन ब्रह्माण्डमध्यकैलासाधिपतित्वेन श्रीकण्ठरुद्रो जातः । श्रीकण्ठा-द्विष्णुः । विष्णोर्ब्रह्मा । ब्रह्मण इन्द्रादयः सर्वे देवता उत्पन्नाः । पुनरपि श्रीकण्ठाद् दुर्वासा जातः । एवं क्रमेण इह क्षितौ भूलोके दुर्वाससा सदाशिवकुलं उद-भवत् जातम् । तथा चोक्तं ज्ञानशिवाचार्येण—

आग्राही किल ईश्वरः परशिवस्तस्मात्सदेशः शिवः
नादात्मा सकलाकलः प्रभुरतोऽनन्तेशभट्टारकः ।
तस्मादण्डजविष्णुवासवविधिः श्रीकण्ठरुद्रस्ततः
तन्त्राणामवतारको मुनिवरो दुर्वासनामा गुरुः ॥ इति ॥

तत्रापि भूलोके भारते वर्षे भरतखण्डे तदनुग्रहोदयजुषः दुर्वाससा विहितदीक्षायुक्तस्य ऋष्यादेः कुशिककश्यपागस्त्यभारद्वाजगौतमानाम् । आदि-शब्देन सनत्कुमार सनक सनातन सनन्दनादीनां ग्रहणम् । भारतवर्षे भरतखण्डे भूलोके जम्बूद्वीपे मध्यस्थितमेरुपर्वतस्य दक्षिणप्रदेशे स्थितः हिमगिरेर्दक्षिणभागो भारतवर्षमिति प्रसिद्धम् । तत्रापि भरतखण्डे श्रीमद्भुक्तिमुक्तिसहितं मुख्य-कदम्बभूषणयुतं कदम्बवृक्षालङ्कारसहितमामर्दसंज्ञाश्रममामर्दकमठमिति विहित नामधेयं तपोवनमभवत् जातम् । चकारेण अनुक्तमठान्तरं सूचितम् । प्रथममाम-र्दकमठस्थानं दुर्वाससा स्थापितम् । 'स्थानमामर्दकं नाम श्रीदुर्वासनिषेवितम् ।' इत्युक्तत्वात् । दुर्वासानुग्रहपूर्वकमामर्दकमठनिवासिनः कौशिककाश्यपादयः दक्षिणामूर्तिरूपं श्रीकण्ठं आगमज्ञानार्थमुपासितवन्तः । श्रीकण्ठादागमज्ञानं लब्ध्वामर्दकमठे स्थितवन्तः । एतेषां शिष्यास्सनत्कुमारादयश्चत्वारो जातास्तान् प्रति आमर्दकमठात्त्रीणि मठानि जातानि—रणभद्रं गोळकी पुष्पगिरिरिति ।

'तस्माद्विनिर्गतं स्थानं रणभद्रं च गोळकी ।
तथा पुष्पगिरिश्च........॥' इत्युक्तत्वात् ।

आमर्दकादीनां मठानां यथाक्रमेण सनत्कुमारादयोऽधिपाः । तथा चोक्तम्—

कैलासशिखरे रम्ये वटमूलनिवासिनम् ।
दक्षिणामूर्तिरूपं तु मुनयस्समुपासिरे ॥

अगस्त्यः कौशिकश्चैव भारद्वाजोऽथ गौतमः ।
काश्यपः परमेशानादागमार्थं च तत्त्वतः ॥

ज्ञात्वा संप्रीतमनसः ते सर्वे मुनयस्तथा ।
तेषां शिष्यास्सनन्दाद्या मुनयस्तानुपासिरे ॥

ते च लब्ध्वागमार्थं तु माठापत्येन संस्थिताः ।
आमर्दकमठपतिस्सनत्कुमारको मुनिः ।
कदम्बो वृक्ष एव स्यात् तस्य सान्तानिकाश्च ये ।
पुष्पगिरिमठपतिस्सनको वृक्षमर्जुनम् ।
तस्य सान्तानिकाश्च ये गोलकीमठनायकः ॥

सनातनो ऋषिर्वृक्षो जम्बूकस्तस्य सन्ततिः ।
रणभद्राधिपः प्रोक्तः सनन्दन इति स्मृतः ॥

न्यग्रोधो वृक्षकः प्रोक्तः तस्य सान्तनिकाश्च ये ।
गोदावरीनदीतीरे शैवानां वसतिश्शुभा ॥

पुरं मन्धरकालीति तस्यां वसति शङ्करः ।
उत्पत्तिस्तस्य शैवानामाचार्याणां विशेषतः ॥

तत्र मन्धरकालीशममितश्च चतुर्मठाः ।
आमर्दकी पुष्पगिरिर्गोलकी रणभद्रकम् ॥ इति ॥

ननु कौशिककाश्यपादीनां कथं शिवसृष्टित्वम्, लोके तावत् ब्रह्मसृष्टित्वेन प्रसिद्धत्वात् । सत्यम् । प्रथमं शिवसृष्टित्वेनोत्पन्नाः कौशिककाश्यपादयस्त्वपरे । नामधेयेन समानाः कौशिककाश्यपादयः शिवब्रह्मसृष्टिभेदेन द्विविधाः । अत्र शिवसृष्टित्वेन काश्यपादयः शैवसंबन्धिन इति न दोषः ।

तथा कामिके गोत्रविनिर्णये—

कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः ।
अत्रिर्वसिष्ठश्चागस्त्यो जमदग्निश्च भार्गवः ॥

अङ्गिराश्च मनुश्चान्यो द्विविधास्ते प्रकीर्तिताः ।
शिवसृष्टिसमोपेता मुनयः तद्विवर्जिताः ॥

शिवसृष्ट्यान्विता एते पञ्चवक्त्रेषु दीक्षिताः ।
कौशिकाद्याश्च मुनयः सर्वे सर्वत्र दीक्षिताः ॥ इति ॥

तत्रैव कामिके अर्चनापटले—

शिवसृष्टिं विना ये तु जायन्ते ब्रह्मणो मुखात् ।
ते सामान्या न तेषां तु परार्थेऽस्त्यधिकारिता ॥ इति ॥ ११५ ॥

एकविधस्यामर्दकमठस्य चातुर्विध्यकालज्ञानपूर्वकं स्वसन्तानक्रममाह— **तत्रत्येति ।**

तत्रत्या मुनिपङ्क्तिकाश्च मनुजे पैतामहाख्ये स्थिताः
प्राजापत्यमुखाश्च गोचरयुगोदन्ता बभूवुस्ततः ।
आद्यात्तेषु च शौचसंयमयुतात्सद्गोचरादुद्ययौ
श्रीमद्व्यापकशम्भु पूर्वगुरुयुक् सन्तानमेवं स्थितम् ॥ ११६ ॥

तत्रत्या आमर्दकमठसंप्रदायोत्पन्ना **मुनिपङ्क्तिकाः** कौशिकादिऋषिसमूहाः **पैतामहाख्ये** स्वायम्भुवनामधेये **मनुजे** मनुरिति संज्ञया जातो मनुजः मनुरित्यर्थः । चतुर्दशमनुषु प्रथमभूतस्वायम्भुवमनुसमये **स्थिता** ऋषिसंज्ञया विद्यमानस्वायम्भुवमनुकालपर्यन्तमामर्दकमठे ऋषिसम्प्रदायेन स्थिता इत्यर्थः ।

रैवतश्चाक्षुषश्चैव वैवस्वत इति स्मृतः ।
सूर्यदक्षब्रह्मधर्मरुद्रसावर्णयस्तथा ।
रोच्यभावा इमे प्रोक्ता मनवश्च चतुर्दश ॥ इति ॥

ततः स्वायम्भुवमनुकालसमाप्त्यनन्तरं स्वारोचिषमनुकाले **प्राजापत्यमुखाः** प्राजापत्य इति नामधेयपूर्वकाः । **गोचरयुगोदन्ताः** गोचराणां स्वसंप्रदायभूतवशानां युगे आमर्दकमठादिचतुर्विधसंख्याके उदन्ताः प्रसिद्धा **बभूवुः** जाताः । आमर्दकमठादिचतुर्विधसम्प्रदायभूता बभूवुरित्यर्थः । चतुर्विधमठसंप्रदायेषु उत्पन्ना आदिशैवा ब्राह्मणाश्चतुर्विधा भवन्ति । उक्तं च—

स्थानमामर्दकं नाम श्रीदुर्वासनिषेवितम् ।
तस्माद्विनिर्गतं स्थानं रणभद्रं च गोलकी ॥
तथा पुष्पगिरिश्चेति स्थानमेवं चतुर्विधम् ।
एतत्स्थानसमुद्भूताः शैवास्ते च चतुर्विधाः ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्त्विति ।

स्वसन्तानक्रममाह—**आद्यादिति** । तेषु चतुर्विधमठसम्प्रदायेषु **शौचसंयमयुतात्** बाह्यभूतमलस्नानादिकं शौचम् । संयमः इन्द्रियनिग्रहः । संयमशब्दः यमनियमादीनामुपलक्षणम् । एतैस्सन्निहितात् **सद्गोचरात्** काश्यपभारद्वाजादिगोत्रसहितात् । **आद्यात्** आमर्दकमठात् कलियुगप्रारम्भकाले **श्रीमद्व्यापकशम्भु** श्रीमद्व्यापकशम्भुरेति नामधेययुक्तो भुक्तिमुक्तिप्रदो महागुरुः **उद्ययौ** जातोऽभूत् । **एवं पूर्वगुरुयुक्**—पूर्वकाले जातगुरुपारम्पर्यसहितं **सन्तानं** वंशक्रमः स्थितः । अनेन प्रकारेण स्वजननकालपर्यन्तं जातमित्युक्तम् । अत्र पूर्वकथाप्रसङ्गः—

राजेन्द्रचोल इत्याख्यचोलभूपो महीभवन् ।
गङ्गास्नानार्थमागत्य दृष्ट्वा शैववरांस्तदा ॥

स्नात्वा प्रतिनिवृत्तस्सन् तान् समादाय शैवकान् ।
स्वराज्ये स्थापयामास शैवाचार्यवरांस्ततः ।
काञ्चीमध्ये चोलभूमौ सर्वत्रैव प्रविस्तरान् ॥ इति ॥ ११७ ॥

इति अनन्तशम्भुकृतायां सिद्धान्तसारावलीव्याख्यायां
क्रियापादो द्वितीयः समाप्तः ।

॥ अथ योगपादः ॥

अथेदानीं योगपादं वक्तुकामः तदर्थं सुषुम्नादिनाडीनामुत्पत्तिस्थानमाह—

कन्द इति ।

कन्दो नाभ्यध उत्थितस्तु निलयो नाड्यङ्कुराणां च त-
न्मध्येऽध्वा द्विसहस्रसप्ततिरधश्चोर्ध्वं शरीरे स्थिता ।
पिङ्गा कन्दविनिर्गता पृथगिडा दक्षे च वामे बिला-
न्नासारन्ध्रयुगाश्रिते बहिरधस्ते द्वादशान्तात्स्थिते ॥ ११८ ॥

कदलीकन्दवत् सर्वनाड्यङ्कुराणामुत्पत्तिकारणभूतत्वात् कन्द इत्युच्यते । **नाभ्यधः** अत्र नाभ्यध इति नाभीसमीपस्याधःप्रदेशो न विवक्षितः किन्तु नाभेर्दूरस्थिताधःप्रदेशो विवक्षितः । नाभीकमलं तु कन्दादुत्पन्नमिति ज्ञापनार्थं **कन्दो नाभ्यध उत्थितः** इत्युक्तम् । अन्यथा कन्दस्य मेढ्राधप्रदेशोत्पन्नत्वान्नाभ्यध इति व्यर्थं स्यात् । 'कन्दस्थानं मनुष्याणां देहमध्यं नवाङ्गुलम् ।' इत्युक्तत्वात् । तथा चोक्तं सिद्धान्तशेखरे—

पायोश्च द्व्यङ्गुलादूर्ध्वं लिङ्गाच्च द्व्यङ्गुलादधः ।
मध्यमेकाङ्गुलं तत्र देहमध्यं प्रचक्षते ॥

नवाङ्गुलोर्ध्वतस्तस्मादस्ति कन्दोऽण्डसन्निभः ।
चतुरङ्गुलविस्तारमुत्सेधे नाभितस्समम् ॥

त्वगस्थिभूषितः कन्दस्तन्मध्यं नाभिरुच्यते ।
तस्माच्चक्रं समुद्भूतं द्वादशारयुतं समम् ॥

जीवो भ्रमति चक्रेऽस्मिन् प्राणारूढस्स्वकर्मणा ।
बिसतन्तुमये चक्रे यथा भ्रमति लूतिका ॥

चक्रेणानेन देहोऽयं वर्धितस्संप्रवर्तते ।
कुण्डली परितस्तस्मादष्टधा कुण्डलीकृता ॥

अष्टप्रकृतिरूपा सा सुप्तसर्पसमाकृतिः ।
कन्दनाभेरधोरन्ध्रे निधाय स्वफणां दृढम् ॥

सन्निरुध्य मरुन्मार्गान् पुच्छेन स्वमुखं तथा ।
ब्रह्मरन्ध्रं च संवेष्ट्य पृष्ठस्था च सहस्थिता ॥ इति ।

अस्मिन् ग्रन्थे नवाङ्गुलोर्ध्वतस्तस्मात् इत्यत्र तस्माद्देहमध्यादूर्ध्वत उपरिभागे नवाङ्गुलः कन्दस्तिष्ठतीत्यर्थः । तन्मध्यं नाभिरुच्यते इत्यत्र कन्दमध्ये छिद्राकारेण नाभिस्तिष्ठतीत्यर्थः । **नाड्यङ्कुराणां** सर्वनाड्यङ्कुरोत्पत्तिकारणानां **निलयः** आवासस्थानभूतः । **तन्मध्ये** कन्दस्य मध्ये अध्वा मार्गः कुहरमस्तीत्यर्थः । तथा चोक्तम्—

मूलालवालकुहरादुदिता भवानि निर्भिद्य षट्सरसिजानि तटिल्लतेव ॥ इति ।

द्विसहस्रसप्ततिः नाडीनां द्विसहस्रसंख्याधिकसप्ततिसहस्रमधश्चोर्ध्वं देहमध्यादधःप्रदेशमूर्ध्वप्रदेशं च व्याप्य शरीरे सर्वप्राणिनां कन्द्राद्विनिर्गताः ।

कन्दाद्विनिर्गताः नाड्यः अधस्तात् तिर्यगूर्ध्वतः ।
द्विसप्ततिसहस्राणि नाड्यः स्युस्सर्वदेहिनाम् ॥ इत्युक्तत्वात् ।

एतासां नाडीनां मध्ये द्वात्रिंशन्नाड्यः मुख्याः स्युः । तासु सुषुम्ना पिङ्गला इडा चेति तिस्रो नाड्यो मुख्याः स्युः । मुख्यत्वात् सुषुम्नादिनाडीनां व्याप्तिमाह—**कन्देति । कन्दविनिर्गता** कन्दादुत्पन्ना **पिङ्गा** पिङ्गला नाडी **पृथक्** भिन्नत्वेन कन्दोत्पन्ना **इडा** नाडी **दक्षे** कन्दमध्यात् विनिर्गतसुषुम्नाया दक्षिणभागे पिङ्गला स्थिता । इडा **वामे** वामभागे **बिलात्** ब्रह्मबिलपर्यन्तं स्थिता । उक्तं च नाडीशास्त्रे—

सुषुम्नाया इडा वामे पिङ्गला दक्षिणे स्थिता ॥ इति ।

इडापिङ्गले ब्रह्मरन्ध्रपर्यन्तं कथं स्थिते इत्याह—इडापिङ्गले **बहिर्बाह्यदेशे** दृश्यमानत्वेन **नासारन्ध्रयुगाश्रिते** नासिकारन्ध्रयुगे कुहरयुग्मे आश्रिते । सुषुम्नानाडीगते पिङ्गलेडानाडी नासारन्ध्रपर्यन्तं पृथग्भावेन स्थित्वा तदूर्ध्वं सुषुम्नानाडीमाश्रिते इत्यर्थः । **द्वादशान्तात्** शिखान्तात् **अधः** अधोभागस्थिते द्वादशान्तं त्यक्त्वा ब्रह्मरन्ध्रपर्यन्तं सुषुम्नया सह स्थिते इत्यर्थः ॥ ११८ ॥

सुषुम्नाया व्याप्तिपूर्वकं मूलाधारादारभ्य द्वादशान्तपर्यन्तं स्थितकमलदल-संख्याक्रमेण परशिवासनभूतकमलस्वरूपं युग्मेन श्लोकेनाह—पादाङ्गुष्ठत्यादिना ।

पादाङ्गुष्ठयुगाच्च बस्तिकमलाद् द्वेधैकधा मध्यतः
पङ्क्त्याधारगनाडिकोपरि गता स्याद् द्वादशान्तावधि ।
बस्तिर्वेदसिरादलाम्बुजयुता कन्दश्च षट्पत्रगो
नाभिः पङ्क्तिदला हृदष्टदलयुक्कण्ठः कलापत्रगः ॥ ११९ ॥

तालुर्विंशतिवेदपत्रकमलो भ्रूर्वेदपत्रा स्वरो
रन्ध्राब्जं कपरं नवच्छदकजं चोर्ध्वे सहस्रच्छदम् ।
युक्तं शक्तिसुकेसरैः समनया सत्कर्णिकाढ्यं रवेः
सोमाग्न्योः स्वकबिम्बकं तदुपरि व्याप्युन्मनान्ते शिवः ॥१२०॥

पादाङ्गुष्ठयुगात् दक्षिणवामपादाङ्गुष्ठद्वन्द्वादारभ्य **बस्तिकमलात्** कन्दस्थानादधःस्थितं स्थानं बस्तिरित्युच्यते । तत्र स्थितकमलपर्यन्तं **द्वेधा** द्विप्रकारा **मध्यतः** देहमध्यभूतकन्दस्थानादारभ्य ऊर्ध्वं ब्रह्मबिलान्त**मेकधा** एकरूपा **पङ्क्त्याधारगनाडिका** पङ्क्त्याधाराः पङ्क्त्या वक्ष्यमाणाकारेण दशसंख्यया स्थिताधारादिदशचक्राणि आधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञापर्यन्तानि, तदूर्ध्वं चत्वार्येवं दशसंख्यानि गच्छन्ति । व्याप्यस्थिता नाडिका सुषुम्नाख्या नाडी द्वादशान्तपर्यन्तमुपरि गता ऊर्ध्वं गता ब्रह्मरन्ध्रान्तं सकलरूपा तदूर्ध्वं द्वादशान्तपर्यन्तं निष्कलरूपा सकलशास्त्रज्ञैः ब्रह्मनाडीत्युच्यमाना सुषुम्ना द्वादशान्तं तिष्ठतीत्यर्थः । **बस्तिः** कन्दादधस्थानमाधारमित्यर्थः । **वेदसिरादलाम्बुजयुता** वेदसिरया चतुर्नाड्या सहिता वेददलाम्बुजयुता चतुष्पत्रयुक्तकमलेन सहिता बस्तिः **कन्दः षट्पत्रगः** षट्पत्रयुक्तः, तस्मादुपरि **नाभिः पङ्क्तिदला** दशपत्रसहिता **हृत्** हृदयकमलमष्टदळयुक् अष्टपर्णयुक्तः **कण्ठः कलापत्रगः** षोडशपर्णसहितः **तालुर्विंशतिवेदपत्रकमलः** विंशतिवेदानि विंशतिसंख्यायुक्तचतुस्संख्याकानि । चतुर्विंशतिसंख्यानीत्यर्थः । एतत्संख्याकपत्रयुक्तकमलसहितं तालुस्थानं उच्यते । **भ्रूः** भ्रूशब्देनात्र भ्रूमध्यमुच्यते **वेदपत्रा** चतुष्कर्णसहिता **रन्ध्राब्जं** ब्रह्मरन्ध्रस्थितकमलं **स्वरः** षोडशपत्रकमलं, **कपरं** कं शिरः तस्मात्पर-

मूर्ध्वे विद्यमानं **नवच्छदकजं** नवसंख्याकपर्णयुक्तकमलं **ऊर्ध्वे** द्वादशान्ते **सहस्रच्छदं** सहस्रसंख्यायुक्तपर्णसहितकमलं तिष्ठति । तत्कमलस्वरूपमाह—**शक्तिसुकेसरैः** वामादिनवशक्तिस्वरूपकिञ्जल्कैः **युक्तं** सहितं, **समनया** समनाख्यशक्त्या **सत्कर्णिकाढ्यं** पञ्चाशद्बीजयुक्तकर्णिकया सहितं **रवेस्सूर्यस्य सोमाग्न्योः** चन्द्रवह्न्योः **स्वकबिम्बकं** स्वाधिपतिसहितमण्डलयुक्तं **तदुपरि** मण्डलत्रयादुपरि ऊर्ध्वे **व्यापी** सर्वत्र व्यापकः, **उन्मनान्ते** उन्मनीशक्त्यन्ते । उन्मन्येवात्र शक्तिमण्डलं भवति । **शिवः** परशिवस्तिष्ठति इति ॥ १२० ॥

योगाभ्यासहेतुभूतां नाडीशुद्धिं युग्मेन श्लोकेनाह—**कुण्डेति** ।

कुण्डावेष्टितगेहमध्यकलिते पट्टादिकेच्छासने
स्वस्थः प्रागृजुपूर्वकायगलको लग्ने द्विजो रेचयेत् ।
शुद्ध्यै नाडिषु मन्दमन्दमुदरं सम्पूरयेद्वामतः
सेन्दोर्बाह्यसमीरणेन मिहिरैस्तालैः क्रमात्कुम्भकम् ॥ १२१ ॥

कृत्वा शक्तिवशाद्विरेचयति तं पिङ्गार्कवाहात्तथा
निर्गर्भस्स ततो जयं च कुरुते खानां सगर्भः पुनः ।
ध्यानाज्जापयुतान्निहन्ति सकलं पापं निशोत्थं पुनः
प्रातस्सायमहस्सु चैष कुरुते तत्त्वादिसाक्षात्कृतिम् ॥ १२२ ॥

कुण्डावेष्टितगेहमध्यकलिते स्वदेहयोग्यानुसारं वातादिशीतनिवारणार्थं कुण्डेन एकप्राकारेण द्वित्रिप्राकारेण वा आवेष्टितगेहमध्यकलिते **समन्ताद्वेष्टिते** गृहमध्यप्रदेशे कृते पट्टादिकेन दुकूलचेलाजिनादिनाच्छादिते इच्छासने स्वेच्छया विहितपीठादौ **स्वस्थस्सुखेन** स्थितः । उक्तं च—

हितजीर्णाशनस्वस्थस्त्रिकुण्डावेष्टिते गृहे ।
बाधाशून्ये वनादौ वा स्वासनस्थ उदङ्मुखः ॥ इति ॥

पट्टाकृतिना वर्तुलाकृतिना वा विहितपीठादौ स्थितः । अत्रासनशब्देन पद्मस्वस्तिकादीनि यान्यभ्यस्तानि[तानि] गृहीतानि । उक्तं च—

स्वस्तिकं गोमुखं पद्मं भद्रं मायूरकुक्कुटे ।
वीरं सिंहासनं कूर्मं चन्द्रपीठं दश क्रमात् ॥ इति सिद्धान्तशेखरे ।

लक्षणं तत्रैवोक्तमनुसन्धेयम् । **प्रागृजुपूर्वकायगलकः** प्रातःकालेऽवक्राकारेण स्थितोर्ध्वशरीरकरणसहितो **द्विजः** द्विजशब्देनात्र दीक्षादियुक्तः आलस्यादिरहित उच्यते । उक्तं च—

आलस्यादिविनिर्मुक्तो गुरुदेवेषु भक्तिमान् ।
निस्स्पृहस्सर्वविषये परं वैराग्यमाश्रितः ।
इत्यादिगुणसंपन्नो नाडीशुद्धौ प्रशस्यते ॥ इति ।

लग्ने सुमुहूर्ते, प्रथमारम्भविषयः । अथवा लग्नः **मननसंयमनयुक्तः** । **रेचयेत्** रेचनं कुर्यात् । उक्तं च—

उदरस्थसमीरस्य रेचनं (संज्ञिका)[सर्जनं] बहिः ।
बाह्यादापूरणाद्वायोः पूरकः प्राणसंयमः ।
रेचयेदुदरात्सम्यक् वायुं पिङ्गलया शनैः ।
पूरितस्योदरे वायोः धारणात्कुम्भकः स्मृतः ॥ इति ।

नाडिषु नाडिनिमित्तासु **शुद्ध्यै** शोधनं कर्तुं **मन्दं मन्दं** शनैश्शनैः **उदरं** जठरं **वामतः** वामनासापुटेन **सम्पूरयेत्** पूरणं कुर्यात् । उक्तं च—

इडया पूरयेत्सम्यक् बाह्यस्थमनिलं ततः । इति ।

सेन्दोः चन्द्रसहितवामभागस्य **बाह्यसमीरणेन** पूरितबाह्यस्थवायुना **मिहिरैः** द्वादशसंख्याकैः । "मिहिरारुणपूषाण" इति सूर्यपर्याये उक्तत्वात् । **तालैः** द्वादशमात्राभिः । मात्रालक्षणं द्विविधम्, जानुमण्डलस्य एकत्रिपरिभ्रमणभेदेन । तथा चोक्तं सिद्धान्तशेखरे—

वेष्टयित्वा त्रिधा जानुमण्डलं छोटिकां सकृत् ।
कुर्याद् द्वेधा भवेन्मात्रा कनिष्ठा कालमानतः ॥
आहुरन्येऽन्यथा मात्रां सकृज्जानुप्रदक्षिणम् ।
छोटिकां च सकृत्कुर्यात् एषा मात्रोनकालतः ॥ इति ॥

अत्र तालैरिति बहुवचनात् कनिष्ठादयो गृहीताः । **द्वादशतालैः कनिष्ठः** । चतुर्विंशत्या मध्यमः । अष्टचत्वारिंशता श्रेष्ठः । तथा चोक्तं सर्वज्ञानोत्तरे—

तालद्वादशको ज्ञेयः प्राणायामस्तु कन्यसः ।
मध्यश्चतुर्भिर्विंशत्या श्रेष्ठस्तद्द्विगुणो भवेत् ॥ इति ।

क्रमात्कुम्भकं पूरितवायोः पूरणोत्सर्जनत्यागस्वरूपं **शक्तिवशात्** सामर्थ्यानुसारेण कनिष्ठादिकालग्रहणात् **कृत्वा पिङ्गलार्कवाहात्** पिङ्गलनाडिगतार्किमार्गेण **तं** कुम्भकं **विरेचयति** विरेचनं कुर्वति पुरुषे ।

कुम्भितं रेचयेद्वायुं शनैः पिङ्गलया बुधः । इत्युक्तत्वात् ।

निर्गर्भः मन्त्रध्यानहीनप्राणायामो निर्गर्भः इत्युच्यते । तथा सिद्धान्तशेखरे—

अगर्भश्च सगर्भश्च मन्त्रहीनो ह्यगर्भकः ।
सगर्भो मन्त्रसंयुक्तः मन्त्राश्च प्रणवादिकाः ॥
प्रासादा जपहंसाश्च गायत्रीव्याहृतीमुखाः ॥ इति ॥

खानामिन्द्रियाणां जयं कुरुते । उक्तं च—

हन्त्यगर्भोऽपि देवानां प्रचलत्वं प्रधावताम् । इति ।

देवानामिति मनस्सहितानामिन्द्रियाणामित्यर्थः । **जापयुतात्** मन्त्रजापसहितात् शिवचिन्तनात् स प्रसिद्धः **सगर्भः** प्राणायामः **निशोत्थं** रात्रिकृतं **सकलं** समस्तं **पापं निहन्ति** नाशयति । "प्रातर्निशाकृतं पापं दिनान्ते तु दिवाकृतम्" इत्युक्तत्वात् । **पुनः पुनः** दिवसे दिवसे योगसिद्धिपर्यन्तं योगाभ्यासं कुर्वतः, पुरुषस्य **प्रातस्सायमहस्सु** प्रातः प्रातःकालः, सायं सायङ्कालः मध्याह्नकालेषु क्रियमाणः एष योगाभ्यासः **तत्त्वादिसाक्षात्कृतिं** तत्त्वादीनां पृथिव्यादीनां साक्षात्कृतिं प्रत्यक्षेण तत्तत्स्वरूपतां **कुरुते** । योगाभ्यासमाचरतः पुरुषस्य पृथिव्यादिस्थितगन्धकाठिन्यादिगुणान् प्रकटीकरोतीत्यर्थः । पृथिवीसाक्षात्कारेण बाह्यगन्धे निस्पृहस्स भवति । अग्निसाक्षात्कारेण दिव्यरूपं जानाति, वह्निसन्तापो नास्ति । वायुसाक्षात्कारेण दिव्यस्पर्शं जानाति, अणिमादिगुणाष्टकं सिध्यति । गगनसाक्षात्कारेण दिव्यनादं जानाति, व्योमचारी भवति, इत्यादयो गुणाः योगाभ्यासेन भवन्तीति ॥ १२२ ॥

एवं प्रतिदिनं योगाभ्यासेन संयुक्तः पुरुषः स्वद्वादशान्तस्थितं परशिवं प्रत्यक्षेण पश्यतीत्याह—हृद्व्योमेति ।

हृद्व्योमाम्बुजकर्णिकार्कशशभृद्बिम्बाग्निशक्त्यूर्ध्वगं
प्राणायामयुतं मृणाळविलसत्सूत्रप्रतीकाशकम् ।
ज्योतिस्तद्गतमानसोऽपि परतस्स्वद्वादशान्तस्थितं
स्वच्छाम्भस्सदृशप्रभं परशिवं योगी चिता पश्यति ॥ १२३ ॥

योगी योगो नाम शिवात्मनोरैक्यस्य प्रथमकालसम्बन्धः । तादृशयोगयुक्तो योगी **प्राणायामयुतः** पूरककुम्भकरेचकसहितं यथा भवति, तथा युक्तस्सन् **हृद्व्योमाम्बुजकर्णिकार्कशशभृद्बिम्बाग्निशक्त्यूर्ध्वगं**, हृद्व्योमाम्बुजस्य हृदयकुहरकमलस्य कर्णिकायां संस्थितार्कस्सूर्यः, शशभृत् चन्द्रः, तयोः बिम्बयोः मण्डलयोरुपरि विद्यमानाग्निशक्त्यूर्ध्वगं अग्निमण्डलशक्तिमण्डलयोरूर्ध्वस्थितं **मृणाळविलसत्सूत्रप्रतीकाशक** मृणाले बिसे विलसत्सूत्रस्य देदीप्यमानं प्रतीकाशकं प्रकाशरूपं **ज्योतिः** तेजोरूपं हृदयाम्बुरुहसंस्थं परञ्ज्योतीरूपं परापरमित्युक्तत्वात्, **तद्गतमानसः** हृदयकमलस्थितज्योतीरूपे शिवे प्रत्यक्षेण गतमानसस्सन् **परतः** हृदयकमलादूर्ध्वतः **द्वादशान्तस्थितं** आत्मीयद्वादशान्ते विद्यमानं **स्वच्छाम्भस्सदृशप्रभं** निर्मलोदकसमानकान्ति **परशिवं चिता** ज्ञानेन **पश्यति** प्रत्यक्षेण दृष्टो भवतीत्यर्थः ॥ १२३ ॥

प्रातःकालाद्युपाधिना शिवस्मरणक्रममाह—हृत्पद्म इति ।

हृत्पद्मे प्रातरर्कोदयनिवहनिभं मध्यनाड्यां विचिन्त्यं
मध्याह्ने भ्रूसरोजे परमशिवजचिद्रूपमिन्दुप्रकाशम् ।
सायाह्ने तूर्ध्वपद्मे ह्यमृतजलनिधिद्योतनं स्वोत्थनादं
रात्रेरर्धेऽप्रमेयं त्वविकलमचलं द्वादशान्ते महस्तत् ॥ १२४ ॥

हृत्पद्मे हृदयकमले । **प्रातः** प्रातःकाले । सूर्योदयात्पूर्वं द्वित्रिचतुष्कपञ्चनाडिकापर्यन्तं कालः प्रातः कालः । **अर्कोदयनिवहनिभं** सूर्योदयसमूहसमप्रभं, अनेकारुणवर्णमित्यर्थः । **मध्यनाड्यां** सुषुम्नायां **विचिन्त्यं** ध्यातुं योग्यं **मध्याह्ने भ्रूसरोजे** भ्रूकमले **परमशिवजचिद्रूपं** परमशिवजं परशिवस्वरूपम् ।

अनेन बिम्बस्य निमित्तकारणस्वरूपमुक्तम् । चिद्रूपं ज्ञानक्रियास्वरूपं, **इन्दुप्रकाशं** अनेकचन्द्रवद्देदीप्यमानं विचिन्त्यं, **सायाह्ने ऊर्ध्वपद्मे** ब्रह्मरन्ध्रस्थितकमले **अमृतजलनिधिद्योतनं** अमृतसमुद्रवत् प्रकाशमानं, **स्वोत्थनादं**, आत्मीयमूलाधारोत्थितनादस्वरूपम् । अनेन ओंकारसहितं प्रासादमन्त्रस्वरूपमुक्तं भवति । **रात्रेरर्धे** अर्धरात्रे **अप्रमेयं** मनोबुद्ध्यादिभिः ज्ञातुमयोग्यं **अविकलम**त्यन्तनिष्कलं **अचलं** चलरहितं, अनेन स्वदक्रियाशक्तेरुद्योगाधिकारव्यापाररहितत्वमुक्तम् । संहृतसर्वकार्यत्वाद्द्वादशान्ते एवंविधं तत् प्रसिद्धं महः तेजोरूपं चिन्त्यम् ॥ १२४ ॥

अथ समलात्मनां जाग्रदादिपञ्चावस्थाक्रममाह—बाह्येति ।

बाह्यान्तःकरणैरणोः स्वविषयज्ञानं तु जाग्रच्च त-
त्स्वप्नोऽन्तःकरणस्थवृत्तिविषयज्ञानं सुषुप्तिः परम् ।
देहे चेन्द्रियवृत्तिहीनमवचोग्राह्या मतिस्तुर्यकं
देहाक्षोपरतौ स्वचिन्मतिरथातीतं शिवत्वोदयः ॥ १२५ ॥

अणोस्समलात्मनः **बाह्यान्तःकरणैरत्र** बाह्यकरणैः चक्षुश्श्रोत्रादिभिरन्तःकरणैर्मनोबुद्ध्यहङ्कारैरत्र प्रथममात्मनोऽन्तःकरणैःसहितं तदनन्तरं बाह्यकरणैस्सह **स्वविषयज्ञानं** स्वेषां चक्षुरादीनां विषयज्ञानं ग्राह्यभूतरूपादिज्ञानं, तत् प्रसिद्धं **जाग्रत्** जाग्रदवस्था । **अन्तःकरणस्थवृत्तिविषयज्ञानं** मनोबुद्ध्यहङ्कारेषु विद्यमानप्रवर्तमानविषयज्ञानं **स्वप्नः** स्वप्नावस्था । **पर**मन्तःकरणेभ्यो व्यतिरिक्तं **सुषुप्ति**र्निद्रावस्था । **देहे** शरीरे **इन्द्रियवृत्तिहीनं** चक्षुरादीन्द्रियमानसादीन्द्रियप्रयत्नव्यतिरिक्तं **अवचोग्राह्या** अवचः वचनाभावः, ग्रहीतुं योग्या **मतिः** मतिशब्देनात्र प्राणो विवक्षितः प्राणयुक्तात्मेत्यर्थः । **तुर्यकं** तुर्यावस्था **देहाक्षोपरतौ** देहे शरीरे विद्यमानेन्द्रियमानसादिप्राणादीनां उपरतौ चलनादिलयने **स्वचिन्मतिः** आत्मज्ञानमात्रं प्राणेनायुक्तात्ममात्रमित्यर्थः । **अतीतं** तुर्यातीतावस्था । एवं समलात्मनः पञ्चावस्थाः । अथ निर्मलात्मनः **शिवत्वोदयः** शिवस्वरूपत्वप्राप्तिः । तथाऽचिन्त्यागमे समलस्य लक्षणमुक्तम्—

मुखे जाग्रमिति ज्ञेयं स्वप्नं तु हृदयान्तकम् ।
हृदयादि समारभ्य नाभ्यन्तं तु सुषुप्तिकम् ॥

तस्यैवाधस्तुर्यकं स्यात् तुर्यातीतं तु लिङ्गके ।
जाग्रादिस्थानमेवं हि प्रवर्तकमिहोच्यते ॥

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चैव तु पञ्चमम् ।
शब्दस्स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ॥

वाक्पाणी पादपायू च उपस्थं चेह पञ्चमम् ।
वचनादानगमनविसर्गानन्दपञ्चकम् ॥

प्राणस्त्वपानो व्यानश्च उदानस्तु समानकः ।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ।
मनो बुद्धिरहङ्कारः चित्तं क्षेत्र(ज्ञ) एव च ॥

पञ्चत्रिंशच्च वर्तन्ते जाग्रस्थानं विनिर्दिशेत् ।
शब्दादिवचनादीनि प्राणादीनि मनादिकम् ॥

अत्र प्राणादिशब्देन नागादयश्च गृह्यन्ते । तत्कार्याणामुद्गारादीनां दर्शनं स्वप्ने विद्यमानत्वात् ।

एते चरन्ति वै स्वप्ने शेषाण्येव तु वर्जयेत् ।
जाग्रद्विषयभुक्तिश्च प्रतिभा स्वप्न एव च ॥

प्राणयुक्तं मनश्चैव क्षेत्रज्ञश्च सुषुप्तिकः ।
आत्मा प्राणस्तु तुर्येण तुर्यातीतो विसर्गकः ॥ इति ।

अत्र शिवत्वोदयशब्देन निर्मलात्मनः जाग्रादिपञ्चावस्था उक्ता भवति । तथा ईशानदेवगुरुणाप्युक्तम्—

बीजस्योच्चारणं जाग्रं स्वप्नो बिन्दुपरिग्रहः ।
सुषुप्तिर्नादयोगस्तु तुर्यं शक्तिसमागमः ।
तुर्यातीतं लयं शान्तं परे महसि पठ्यते ॥ इति ॥ १२५ ॥

॥ इति अनन्तशम्भुकृतायां सिद्धान्तसारावलि—
व्याख्यायां योगपादस्तृतीयः समाप्तः ॥

—: × :—

॥ अथ चर्यापादः ॥

अथ चर्यापादं वक्तुकामः तत्रादौ कामिकाद्यागमानां शिवभेदरुद्रभेद-संज्ञाविधानमाह—**आत्मान इति ।**

आत्मानो दश सृष्टिपञ्चमगतान् कृत्वा शिवान् केवलां-
स्तेषां मन्त्रपतिप्रबोधपरतो ज्ञानं तथाभज्य तत् ।
साक्षाद्देव उपादिदेश स शिवश्शैवास्ततश्चागमा
रुद्रांश्चाष्टदशावबोध्य कथितास्तैरागमाश्चापरे ॥ १२६ ॥

परमेश्वरज्ञानं द्विप्रकारकम् अवबोधरूपं शब्दरूपञ्चेति । तत्रानादिमल-रहितमनादिनिधनं सर्वार्थप्रकाशकं सर्वानुग्राहकं शिवं शिवज्ञानात्मकमवबोधरूपं, परमशिवबोधरूपं परशिवे विद्यते । शब्दरूपं तु शास्त्रात्मकमेव । परमकारुणिकः परमेश्वरः सृष्टिकाले स्वात्मनि विद्यमानं अवबोधरूपमेव शब्दरूढं कृत्वा सर्वानु-जिघृक्षया गुरुपरम्परया योग्येषु प्रवर्तयति । गुरुपरम्पराक्रमश्चात्र द्विप्रकारः । महौघक्रमलक्षणः गुरुसंहिताक्रमलक्षणः शास्त्रावतारः । अत्र समये प्रतिसंहितं गुरुरूर्ध्वसृष्ट्या सृष्टान् । अत एव **केवलान्** शुद्धान् अभिव्यक्तसर्वज्ञत्वादिधर्मयुक्ता-नित्यर्थः । अत एव **शिवान्** शिवस्वरूपान् सदाशिवपदस्थान् । **दशात्मनः** दशसंख्यानात्मजान् प्रणवादीन् सृष्ट्वा, स्मरणमात्रेण कृत्वा एतेषां प्रणवादि-दशानां सदाशिवपदस्थितिरिति सिद्धम् । तथोक्तं श्रीमत्स्वतन्त्रे—

"सकलस्तु वृतो देव ओङ्काराद्यैरनुक्रमात्" इति । ओङ्काराद्यैः प्रणवाद्यैः इत्यर्थः । **तेषां** प्रणवादि दशात्मजानां **मन्त्रपतिप्रबोधपरतः**, मन्त्रपतीनां अन-न्ताद्यष्टविद्येश्वराणां, प्रबोध आत्मज्ञानोपदेशः स एव पर उत्कृष्टः पौर्वीक इत्यर्थः । तस्मात्परतः विद्येश्वरप्रबोधनानन्तरं प्रणवाद्यणूनां उपदेशः कृत इत्यर्थः । **ज्ञानं** नादरूपशिवज्ञानम् । उक्तं च—

अदृष्टविग्रहाच्छान्ताच्छिवात्परमकारणात् ।
नादरूपं विनिष्क्रान्तं शास्त्रं परमदुर्लभम् ॥ इति ।

तथा दशप्रकारेण **भज्य** भागं कृत्वा, यदुक्तं स्वायम्भुवे—

अथात्ममलमायाख्यकर्मबन्धविमुक्तये ।
व्यक्तये च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते ॥

एकमेव शिवज्ञानं विभिन्नं बहुधा पुनः ।
दशाष्टादशधा भूयो देशान्तरविसर्जितम् ॥ इति ।

देवः सर्वत्र प्रकाशमानः स शिवः परशिवः परमशिवः **साक्षात्प्रत्यक्षेण उपादिदेश** कामिकादि दशभेदेनोपदेशं कृतवान् । **ततः** वक्तृश्रोतृणां शिवस्वरूपत्वात् **शैवाः आगमाः** शिवसंज्ञया विहिताः कामिकादयो दशागमाः ।

तथा किरणे—

सृष्ट्यनन्तरमेवेशः शिवान् सृष्ट्वा दशात्मजान् ।
ज्ञानमेकं विभज्याशु तेषां तत्संख्ययावदत् ।
कामिकं प्रणवाख्यस्य सुधाख्यस्य च योगजम् ॥

दीप्ताख्यस्याप्यचिन्त्यं तु कारणाख्यस्य कारणम् ।
अजितं सुशिवाख्यस्य ईशाख्यस्य सुदीप्तकम् ॥

सूक्ष्मं तु सूक्ष्मसंज्ञस्य कालस्यापि सहस्रकम् ।
सुप्रभं यद्गणेशस्य अंशुसंज्ञस्य चांशुमान् ॥

एवं प्राधानिकः प्रोक्तः पुनरन्यो गुरुक्रमः ।
प्रणवात् त्रिकलः प्राप्तः कामिकं त्रिकलाद्धरः ॥

इत्यादिना द्रष्टव्यः । **अष्टदश**—अष्टाधिकदशसंख्याकान् **रुद्रान्** अनादिरुद्रनामधेयादीन् **अवबोध्य,** ज्ञानयुक्तानीश्वरतत्त्वस्थितानेवानुगृह्य, तत्संख्यया, एकमेव अवबोधज्ञानं यथाधिकारं शब्दारूढं कृत्वा क्रियादिभेदेन कथिताः- शिवेनैवोक्ताः । **तैः** शिवभट्टारकैः रुद्रान् श्रोतृत्वेन विधाय कथनात् **अपरे आगमाः** रुद्रसंज्ञया विहितागमाः विजयादयोऽष्टादश । अत्रापर इत्युक्तत्वात् शिवभेदरुद्रभेदयोर्यथाक्रमेण परापरत्वमुक्तमिति द्योतितं भवति ॥

तथा किरणे—

दशाष्टसंख्ययाप्यन्यो रुद्रभेदोऽपरो मतः ।
दशाष्टसंख्यया रुद्रान् पूर्वमुत्पाद्य बुद्धिमान् ॥

शिवस्तत्संख्ययैवेह पुनस्तान् बोधयेत्स्वगः ।
रुद्रस्यानादिसंज्ञस्य विजयं तेन भाषितम् ॥

पारमेशं महातन्त्रं श्रीरूपस्य प्रभाषितम् ।
निश्वासं यद्दशार्णस्य प्रोद्गीतं नाम शूलिनः ॥

इत्यादिना बोद्धव्यम् । शिवभेदस्य कामिकादेः प्रत्येकं त्रयः श्रोतारः । रुद्रभेदस्य विजयादेः द्वौ श्रोतारौ । उभयसम्मेळनेन षडधिकषष्टिसंख्याकाः श्रोतारः "षट्षष्टिभिः क्रमेणैव शिवाज्ञया" इत्युक्तत्वात् । एतेषां नामधेयानि मूलागमेषु द्रष्टव्यानि ॥ १२६ ॥

शैवागमानां वक्तृश्रोतृभेदेन विस्तृताः सम्बन्धाः षट्प्रकाराः सन्तीत्याह—**सम्बन्धा इति ।**

सम्बन्धास्तु परोऽणुनाथशिवयोरानन्तसोम्यो महान्
सोमाद्देवगतोऽन्तराळविदितो दिव्यो मुनिभ्यागतः ।
देवाद्दिव्यगतोऽप्यदिव्य ऋषितोऽप्युक्तो मुनीन्द्रान्नरे
तस्माच्छिष्यगतोऽप्यदिव्य इति षट् शैवागमानां विदुः ॥ १२७ ॥

अणुनाथशिवयोः । अणुनाथः सप्तकोटिसंख्याकानां नाथः अनन्तेश्वरः शिवः सदाशिवभट्टारकः । तयोः श्रोतृवक्तृभेदेन आगमानां सम्बन्धः **परः** पर इति नामधेयेनोक्तः । सम्बन्धः प्रथमः । **आनन्तसोम्यः** सोमशब्देनात्र श्रीकण्ठ उच्यते । अनन्तेश्वरो वक्ता श्रीकण्ठः श्रोता एतयोः सम्बन्धः **महान्** इति नामधेयेनोक्तः । द्वितीयस्सम्बन्धः । तथोक्तं श्रीमद्रौरवे—

जगतः कारणं देवमनन्तेशं परं गुरुम् ।
तेनोक्तं परमेशेन श्रीकण्ठाय महात्मने ॥ इति ।

सोमात् श्रीकण्ठात् **देवगतः** इन्द्रादिदेवगतः **अन्तरालविदितः** अन्तराळ इति नामधेयेन विदितः उक्तस्तृतीयस्सम्बन्धः । **मुनिभ्यागतः** इन्द्रादिदेवेभ्यः ऋषिषूक्तः **दिव्यः** दिव्य इति नामधेयेन विहितश्चतुर्थस्सम्बन्धः । **देवात् दिव्यगतः** वक्तृभूतदेवात् श्रोतृभूतमुनिषु प्राप्तत्वात् दिव्य इत्युच्यते । **ऋषितः अदिव्यः** वक्तृभूतऋषिसकाशात् श्रोतृभूतनरश्रेष्ठेषु प्राप्तत्वाद्दिव्यगतोऽप्यदिव्य इत्युच्यते अत एव **मुनीन्द्राद्देवर्षेः नरे** मनुष्यमुख्यर्षौ उक्तः सम्बन्धः दिव्यादिव्य इति पञ्चमः प्रोक्तः । **तस्मान्नरर्षेः शिष्यगतः** स्वशिष्यप्राप्तसम्बन्धः अदिव्य इति षष्ठः । इत्येवंप्रकारेण **शैवागमानां** कामिकदीनां सम्बन्धः षट्प्रकारः । **विदुः** उक्तवन्तः पूर्वाचार्यैः शास्त्रार्थविचारेणोक्त इति शेषार्थः ।

ननु कामिकादितन्त्रेषु प्रणवाद्यः श्रोतार इति श्रूयते । तत्कथं शिवानन्तयोः सम्बन्धः इति शङ्कायाः परिहारः । अत्र ग्रन्थे महौघक्रमलक्षणसम्बन्धः प्रोक्तः । एवमेव प्रतिसंहितं गुरुक्रमलक्षणसम्बन्धः संयोजनीयः ।

अनन्तेश्वरप्रबोधनानन्तरं प्रणवादीनां प्रबोधनात् । अत एव सम्बन्धो द्विविधः । अनन्तेश्वरादिसम्बन्धः प्रणवादिसम्बन्ध इति । शिवप्रणवयोः परस्सम्बन्धः । प्रणवत्रिकलयोर्महान् । त्रिकलहरयोरन्तरालः । हरदेवयोर्दिव्यः । देवऋष्योर्दिव्यादिव्यः । ऋषिमनुष्ययोरदिव्य इति । षड्विधः सम्बन्धः । एवं शिवभेदानामूहनीयः रुद्रभेदानां श्रोतृद्वयेन सम्बन्धः एव । शिवानादिरुद्रयोः परः । अनादिरुद्रपरमेशयोर्महान् । परमेशदेवयोर्दिव्यः । देवऋष्योर्दिव्यादिव्यः ।. ऋषिमनुष्ययोरदिव्य इति । एवमापरमेश्वरादविच्छिन्नसम्प्रदायदर्शनात्परशिवप्रणीतागमस्य प्रामाण्यं सिद्धम् । तथा मतङ्गे :—

"प्रमाणमेकं तद्वाक्यं तथ्यमीश्वरभाषितम्" । इति । नित्यत्वेनागमस्य प्रामाण्यं वदन्ति केचित् । तदसत् । अवबोधरूपमेव नित्यम् । तस्यैव शब्दादिरूढत्वेन कृतकत्वात् कृतकस्यानित्यत्वं सिद्धम् । अभिनवविरचितवाक्यरचनावदागमस्य कृतकत्वमेव नास्तीति केषाञ्चिन्मतम् । तदप्यसत् । अवबोधरूपस्य-शब्दारूढत्वेन कृतकत्वं प्रत्यक्षेण दृश्यते । प्रत्यक्षापलापिनां तेषां मिथ्याज्ञानत्वात् । अनीश्वरत्वप्रसङ्गाच्च । अत एव परमाप्तप्रणीतागमवचनस्य प्रामाण्यमेवेति सिद्धम् ॥ १२७ ॥

शिवागमानां मध्ये पूर्वे दश शिवभेदाः । परे अष्टादश रुद्रभेदा इति अष्टाविंशतितन्त्राणां नामधेयान्याह—**शैवा इति** ॥

शैवाः कामिकयोगजेऽजितमथो चिन्त्यं तु दीप्ताह्वयं
सूक्ष्मं कारणमंशुमांश्च दशधा साहस्रकं सुप्रभम् ।
रौद्रास्ते विजयश्च रौरवमथो निश्वासमाग्नेयकं
सन्तानं किरणाख्यसिद्धविमला[ः] श्रीचन्द्रभासं परम् ॥ १२८ ॥

उद्गीतं ललितं च माकुटमथो श्रीनारसिंहं तथा
श्रीस्वायम्भुवपारमेशमुखयुग्बिम्बानि भद्राह्वयम् ।

तेनाष्टादशसंख्ययोर्ध्वमुखतः साक्षात्सदेशेन ते
प्रोक्तास्सो हि पराप्त एव निखिलोत्तीर्णोऽखिलज्ञानवान् ॥ १२९ ॥

कामिकयोगजेऽजितमथो चिन्त्यमिति ग्रन्थकारेणोक्तम् । तथापि अत्र ग्रन्थे अन्वयमुखेनागमानां पौर्वापर्यक्रमपाठो ज्ञातव्यः । छन्दोभङ्गानुरोधेनोक्तत्वात् । **कामिकयोगजे** कामिकमिति योगजमिति **चिन्त्य**मिति **कारण**मिति **अजित**मिति **दीप्त**मिति **सूक्ष्म**मिति **साहस्र**मिति **अंशुमा**निति **सुप्रभेद**मिति **दशधा** दशसंख्याप्रकारेण **शैवाः** शिवभेदा इति प्रोक्ताः । **विजय**मिति **निश्वास**मिति, **स्वायम्भुव**मिति, **आग्नेयक**मिति अनलतन्त्रं **भद्राह्वय**भेदेन वीरतन्त्रमुच्यते । तथा मृगेन्द्रे :—

स्वायम्भुवं तथाग्नेयं वीरभद्रं सरौरवम् । इति ।

माकुटमिति **विमल**मिति **चन्द्रभास**मिति चन्द्रज्ञानमुच्यते **मुखयुग्बिम्ब**मिति मुखबिम्बमुच्यते । **उद्गीत**मिति प्रोद्गीतमुच्यते । **ललित**मिति **सिद्ध**मिति **संतान**मिति **नारसिंह**मिति शर्वोक्तमुच्यते । सोमदेवेन नृसिंहस्योक्तत्वात् । तथा कामिके :—

सोमदेवस्य शर्वोक्तं द्विलक्षेणैव संख्यया ।
नृसिंहः प्राप्तवान् सोमाद्भेदः पञ्चविधो भवेत् ॥ इति ॥

पारमेश्वरमिति **किरण**मिति **पर**मिति वातुलमुच्यते । वातुलस्य द्वादशभेदे परोहितत्वेनोक्तत्वात् नामैकदेशे नामग्रहणम् । अष्टादशसंख्यया ते प्रसिद्धाः **रौद्रा** रुद्रभेदा इति प्रोक्ताः । तथा कारणे—

कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा ।
दीप्तं सूक्ष्मं सहस्रं च ह्यंशुमान् सुप्रभेदकम् ॥
विजयं चैव निश्वासं स्वायम्भुवमथानलम् ।
वीरं च रौरवं चैव मकुटं विमलं तथा ॥
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा ।
सिद्धं सन्तानशर्वोक्तं पारमेश्वरमेव च ।
किरणं वातुलं त्वेतास्त्वष्टाविंशतिसंहिताः ॥
तेषु पूर्वं दश प्रोक्तं शिवभेदेति संज्ञिकम् ।
दशापराष्टकं तत्र रुद्रभेदमिति स्मृतम् ॥ इति ।

तेन प्रसिद्धेन सदेशेन सदाशिवेनोर्ध्वमुखतः, ईशानस्योर्ध्वमुखात्साक्षात् प्रत्यक्षं ते कामिकादयः प्रोक्ताः । ननु कामिकाद्यष्टाविंशतितन्त्राणां कथमीशानमुखात् उत्पन्नत्वम् । मूलागमेषु पञ्चवक्त्रेषु उत्पन्नमित्युक्तत्वात् । तथा कारणे—

कामिकाद्यजितान्ताश्च सद्योजातमुखोद्भवाः ।
दीप्तादिसुप्रभेदान्ता वामदेवमुखोद्भवाः ॥
विजयाद्याश्च वीरान्ता पञ्चैतेऽघोरसम्भवाः ।
रौरवान्मुखबिम्बान्ताः पुरुषाख्याननोद्भवाः ॥
प्रोद्गीताद्यष्टतन्त्राणि चेशानस्य मुखोद्भवाः ॥ इति ॥

अत्र सद्यादिपञ्चवक्त्राणां प्रत्येकं पञ्चवक्त्राणि विद्यन्त इत्यागमेषूक्तत्वात् ईशानवक्त्रसम्बन्धसद्योजातवक्त्रेषूत्पन्नमिति ऊर्ध्वमुखत इत्युक्तम् ।

तथा कामिके—

सद्यवाममहाघोरपुरुषेशानमूर्तयः ।
प्रत्येकं पञ्चवक्त्रास्स्युः तैरुक्तं लौकिकादिकम् ॥
पञ्चविंशतिभेदेन स्रोतोभेदः प्रकीर्तितः ।
लौकिकं वैदिकञ्चैव तथाध्यात्मिकमेव च ।
अतिमार्गं च मन्त्राख्यतन्त्रमेकमनेकधा ॥
तेष्वेव मन्त्रतन्त्राख्यं सदाशिवमुखोद्गतम् ।
ईशानवक्त्रादूर्ध्वस्थाज्ज्ञानं यत्कामिकादिकम् ।
दशाष्टादशभेदेन शिवरुद्रावतारकैः ॥ इति ।

सर्वज्ञत्वयुक्तशिवप्रणीतमाप्तवाक्यागमज्ञान(मे)[स्यै]व प्रामाण्यमित्याह—**सो हीत्यादिना । सो हि** प्रसिद्धभूतसदाशिवः **परातः** अतिशयेनाप्तः । आप्त इति यथाभूतस्यार्थस्य उपदेष्टा पुरुषः । स्वाज्ञानादेवायमर्थोऽयथाभूतार्थ इति उपदेष्टा पुरुषोऽनाप्त एवेति द्योतनार्थं परशब्दोऽत्र विहितः । पशुद्भिर्यथाभूतार्थोऽयमिति निश्चित्य उदीरितत्वात् अनादिमलसम्बन्धात् सर्वे पशव इत्युच्यन्ते । अयं तावत्पशुपतिरित्युक्तः । एवकारेणायं परातोऽन्ये त्वनाप्ता इति द्योतितं भवति । इममेवार्थं द्रढयति **निखिलोत्तीर्ण** इति । निखिलेभ्यः अनादिभूतमलमायादि-

पाशेभ्यः उत्तीर्णः उपरि विद्यमानः । मलादिसम्बन्धरहित इति यावत् । अत एवा**खिलज्ञानवान्** । सर्वज्ञानयुतः यथार्थेन सर्वं जानातीत्यर्थः ।

तथा मृगेन्द्रे—

वेदान्तसांख्यसदसत्पादार्थिकमतादिषु ।
ससाधना मुक्तिरस्ति को विशेषश्शिवागमे ॥
प्रणेतुस्सर्वदर्शित्वात् न स्फुटो वस्तुसङ्ग्रहः ।
उपायास्सफलास्तद्वत् शैवे सर्वमिदं परम् ॥ इति ।

परमाप्तशिवप्रणीतागमज्ञानमेव परं निश्रेयसहेतुः । यदुक्तं रौरवे—

पशूनां मुक्तिमुक्त्यर्थमाप्तः पशुपतिश्शिवः ।
यदाप्तवाक्यमकरोत् आप्तवाक्यं तदागमः ॥ इति ॥

तथा च वायुपुराणे उपमन्युकृष्णसंवादे—

शिवागमोक्तं यज्ज्ञानं तदेव ज्ञानमुत्तमम् ।
श्रीकण्ठेन शिवेनोक्तः शिवायै च शिवागमः ॥
शिवाश्रितानां कारुण्याच्छ्रेयसामेकसाधनम् ॥ इति ॥

तस्मादागमज्ञानेन मुक्तो मलादिपाशनिर्मुक्तः । अन्यशास्त्रोक्तज्ञानेन मुक्तः पशुरेव । तच्छास्त्रप्रणेतृणां पशुत्वात् । तथा कामिके—"अन्यशास्त्रेषु ये मुक्ताः सिद्धान्ते पशवो मताः" ॥ इति ॥ १२९ ॥

अथ सौरचान्द्रपवित्रकालनिर्णयमाह—**अर्क** इति ।

अर्के युग्मगते हरिर्निजतिथौ शेते सितायां ततः
सूत्रार्चा त्रिषु किन्तु षट्स्वधिकता मासेषु दर्शद्वये ।
सन्धिस्थैकतमे द्विजादिषु यदा शेते तदा कर्कटे
तद्वद्दर्शयुगं भवेद्यदि तदा सिंहे पवित्रोद्यमः ॥ १३० ॥

अर्के सूर्ये **युग्मगते** मिथुनराशिं प्राप्ते सति **हरि**र्नारायणः । **सितायां** मिथुनगतशुक्लपक्षे **निजतिथौ** द्वादश्यां **शेते** निद्रां करोति । **ततः** हरिस्वापानन्तरं **सूत्रार्चा** पट्टकार्पासतन्त्वादिभिर्निर्मितपवित्रैः क्रियमाणपूजा कर्तव्येति शेषः । अनेन नारायणस्वापकालात्प्राक्तनका(लो [ले] पवित्रकरणनिषेध इति सूचितः । तथा

मोहादज्ञानतो वापि चाप्रसुप्ते जनार्दने ।
पवित्रं कारयेद्यस्तु स पापी पापमोहितः ॥

त्रिपञ्चदिनमनाहारो जपेत्पञ्चायुतं हरः ॥ इति ।

मोहशूरोत्तरेः—नन्वत्र लोके तावत् आषाढशुक्लपक्षद्वादश्यां विष्णुस्वापः प्रसिद्धः । मिथुनस्थितेऽर्के ज्येष्ठमासगते सति मि(त्र)[त्रि]मिथुनगता शुक्लद्वादशी भवति । तत्र हरिस्वापः कथं विधीयत इति । अत्र परिहारः, अर्के युग्मगत इति ऊर्ध्वमिथुनोऽत्र विवक्षितः । नत्वधोमिथुनः । अत्राषाढमासगतमिथुनराशिः सौरत्वेनोर्ध्वमिथुन इत्युच्यते । ज्येष्ठमासगतमिथुनराशिः चान्द्रत्वेनाधोमिथुन इत्युच्यते । तथा (श्रीपति)रत्नमालायामुक्तम्—

"स्वापोर्ध्वमिथुने शुक्लद्वादश्यां नाधिके हरेः" इति । अत एव उत्तरायणे माघादिषण्मासाः सौराः चान्द्रा इति द्विप्रकाराः । तथा दक्षिणायने श्रावण्यादिषाण्मासाः । माघमासो यदा मकरस्थितार्केण युक्तः, तदा सौरमानत्वेन मुख्यः । यदा माघमासः कुम्भरविणा युक्तः तदा चान्द्रमासत्वेन मुख्यः । एवं सर्वेषां मासानां सौरचान्द्रत्वं योज्यम् । तथा चोक्तं निश्वासकारिकायाम्—

माघमासादितः कृत्वा चाषाढान्तेन शोभने ।
विज्ञेयं लौकिकं कालं उत्तरायणमुत्तमम् ॥

श्रावणीमादितः कृत्वा पुष्यान्तेन तु शोभने ।
विज्ञेयं लौकिकं कालं दक्षिणायनमुत्तमम् ॥ इति ॥

माघादिमासानां मकरादिसंज्ञा च तत्रैवोक्ता—

यस्मिन् राशौ स्थितो भानुः माघमादि करोति सः ।
मकरः कुम्भमीनौ च मेषश्चैव वृषस्तथा ॥

मिथुनं कथितष्षष्ठः राश्यष्षाण्मासि कीर्तिताः ।
कर्कटः सिंहकन्ये च तुलावृश्चिक एव च ॥
धनुश्चैव समाख्यातं दक्षिणे भास्कराश्रयः ॥ इति ।

तथा वाग्भटाख्ये वैद्यग्रन्थे :—

मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षड् ऋतवः स्मृताः ।
शिशिराद्यैस्त्रिभिस्तैस्तु विद्यादयनमुत्तरम् ॥ इति ।

तथा नैघण्टुकैरपि :—

द्वौ द्वौ माघादिमासौ स्यादृतुस्तैरयनं त्रिभिः ।
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ॥ इति ।

तथा आत्रेयसंहितायाम् :—

शिशिरश्च वसन्तश्च ग्रीष्मश्चाप्युत्तरायणे ।
वर्षाश्शरच्च हेमन्तो दक्षिणायनमध्यगाः ॥ इति ।

ऋतवश्च द्विप्रकाराः सौराश्चान्द्रा इति । उक्तं च :—

वसन्ता(द्द)[द्यृ]तवो द्वेधा चान्द्रास्सौराश्च चन्द्रगाः ।
दर्शाद्या अथ मीनाद्या मेषाद्या वा विवस्वतः ॥ इति ।

अत्र मेषादिसङ्क्रान्तिचारात् रवेः सौरमासः चान्द्रमासस्तु तत्तन्मासशुक्लपक्षपौर्णमासीयुक्ततत्तन्नक्षत्रप्रधानभूतपौर्णमासीमध्योपरिवर्तमानामावास्यान्तः ।

तथा अमरसिंहेनोक्तम् :—

पुष्ययुक्ता पौर्णमासी पौषी मासी तु यत्र सा ।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥ इति ।

दर्शावधिं मासमुशन्ति चान्द्रं सौरं तथा भास्करराशिचारात् । इति सिद्धान्तशेखरे । तथा ज्योतिषसङ्ग्रहे :—

मेषादिस्थे सवितरि यदा दर्शः प्रवर्तते ।
तदन्तस्थश्चान्द्रमासः स च चैत्रादिकः स्मृतः ॥ इति ।

अत एवात्र चान्द्राषाढः कर्कटः । सौराषाढस्तु मिथुनराशिरिति प्रतिपादितः ।

शशिमासं च सौरं च द्वौ विज्ञेयौ विशेषतः ।
चान्द्रेण व्यवहारार्थं सौरेण शुभकर्मसु ॥

इति ज्योतिर्विदां नियमात् । एवं सौरत्वेन विहितेषु मिथुनकर्कटकसिंहराशियुक्तेषु आषाढश्रावणभाद्रपदमासाख्येषु उत्तममध्यमाधमत्वेन पवित्रारोपणं कार्यमिति त्रिष्वित्युक्तम् । "आषाढादित्रयो मासा ज्येष्ठमध्यमकन्यसाः" । इत्युक्तत्वात् । त्रिष्विति नियमात् तदूर्ध्वमासपवित्रकरणं निषिद्धमिति सूचितम् । "भाद्रादूर्ध्वं न कुर्वीत सिद्धान्ते दोषभाग्भवेत् । इति श्रुतेर्विद्यमानत्वात् । अत एव

कन्याराशौ प्रायश्चित्तपूर्वमेव पवित्रं करणीयम् । तुलायां कदापि न कुर्यात् । तथा षट्सहस्रिकायाम्—

आषाढादित्रयो मासाः सुप्त एव जनार्दने ।
शुक्लपक्षेऽथवा कृष्णे प्रशस्तास्सूत्ररोहणे ॥

रोगाभिवृद्धिसंयुक्तः प्रवासी राजपीडितः ।
उक्तमासत्रये यस्तु न कुर्यात् सूत्ररोहणम् ॥

असौ कन्यागते भानौ जप्त्वा दक्षाणुना युतम् ।
कुर्यात्पवित्रकं शम्भोः तुलायां न कथञ्चन ॥ इति ।

तथान्यत्रापि—

आषाढादित्रये दैवादविधाय पवित्रकम् ।
लक्षद्वयमघोरस्य जप्त्वा चान्द्रायणं चरेत् ॥ इति ।

किन्त्वितिपदेन पवित्रकालनिर्णये विशेषार्थो द्योतितः । नारायणस्वापकालानन्तरमेव पवित्रस्य विहितत्वात् । स्वापकालस्त्वधिकमासरहिते सौरत्वेन विहितमिथुनगताषाढशुक्लपक्षद्वादशी चान्द्रत्वेन विहितकर्कटगताषाढशुक्लद्वादशी चाधिकमासयुक्ते मिथुनगतपूर्वाषाढं विना कर्कटयुक्तद्वितीयाषाढशुक्लद्वादशी । तथा कर्कटयुक्तश्रावणशुद्धद्वादशीति स्वापकालनिर्णयमाह—**षट्स्वधिकृतेत्यादिना** । षट्सु मासेषु मेषादियुक्तचैत्रादिषाण्मासादिषु वैशाखादिषु पञ्चसु मध्ये यत्र कुत्रैतस्मिन् मासे **यदा** यस्मिन् संवत्सरे—दर्शद्वये मेषादिसंक्रान्तौ अमावास्याद्वये सति **अधिकता** अधिमासः स्यात् । तदा तस्मिन् संवत्सरे **कर्कटे शेते** शयनं करोति । शयनानन्तरं **द्विजादिषु** पूर्वाषाढोत्तराषाढ इति द्विजादिमासेषु सन्धिस्थैकतमे सन्धिगतोत्तरमासे **सूत्रार्चा** कर्तव्या पूर्वमासस्य मलमासत्वादिति भावः ।

दर्शद्वयमतिक्रम्य यदा सङ्क्रमते रविः ।
मलमासः स विज्ञेयः सर्वकर्मबहिष्कृतः ॥ इति वचनात् ।

तथा पवित्रकालनिर्णये चोक्तम् :—

द्वादश्येव सिता रवौ मिथुनगे निद्रां विधत्ते हरे-
स्तां सास्यैव करोति कर्कटरवौ मेषादिषड्राशिषु ।
एकत्राप्यधिमासता यदि हरौ सुप्ते पवित्रक्रिया-
प्रायश्चित्तमथान्यथेदमुदितं श्रीमोहशूरोत्तरे ॥ इति ।

(अनुवर्तते)

(Vol. XVIII-No. 2—31-பக்கத்தின் தொடர்ச்சி)

7. அம்புலிப் பருவம்

66. கலைகளி னிரம்பியவ னென்றுலகு புகழவரு
காட்சியுளை யாதலானும்
காயமிசை நின்றுலகி லுளபொருள் விளங்குறக்
காட்டுபணி பூணலானும்
அலைகளி னிறைந்தகட லுடைபூணு நிலமங்கை
யன்புளம் பொங்கிமகிழ்வோடு
அளியுருவ னெனவெண்ணி வரவேற்க வுறுதகுதி
யமையுமொரு பெருமையானும்
நிலைமைபெறு பலகோடி யொளியுரு வணங்கியெதிர்
நிற்கவே தோன்றலானும்
நிகரெனக் கருதவரு தகுதியுளை யெனவுளம்
நினைந்துன்னை யெங்கள் பெருமான்
அலைவுதவி ருளமுடைய வள்ளுவ னழைக்குமா
லம்புலீ யாடவாவே
ஆலவாய்க் கழகமம ரமுதவாய்ப் புலவனொடு
மம்புலீ யாடவாவே. (1)

67. உலகவிரு ளோட்டியுயிர் மனமலர வரியபணி
யுரிமையொடு பூணலானும்
உவமையறு மின்பமய வுருவமொடு மக்கள்மன
முட்புகுந் துறைதலானும்
புலவருக் காரமுத நல்கியவர் புகழுரைகள்
போர்த்துவரு பெருமையானும்
போதபரி பூரண கலாநிதி யெனுந்தகுதி
பொற்பொடு பொருந்தலானும்
நலமுறப் பெறுமதிய னென்றறிஞ ரேத்துமொரு
நன்னிலைமை யெய்தலானும்
ஞாலமிசை நீயுநிக ரென்றருளி னெங்கள்பெரு
நாவலனு முனையழைத்தான்
அலகில்புக ழுடையவவ னருகிலுற மனமகிழ்வி
னம்புலீ யாடவாவே
ஆலவாய்க் கழகமம ரமுதவாய்ப் புலவனொடு
மம்புலீ யாடவாவே. (2)

بلا را بلے گفتة باختیار ازاں عالم مخمصه واضطرار طریق نجات جستند و بحکم «لا تلقوا باید یکم الی التهلكة» جوق جوق از دائره آں مهلکه بیروں بر جستند وبهر ناحیه که تو هم سلامت ره نموں شاں گشته راه خود پیش گرفتند و برخی بسر خوشی باده بے خمار «ان مع العسر یسرا» انشاء و همت رسا یافتند و عاقبت هماں مضیق را گوشه عافیت پنداشتند و بذیل کرم کریم مطلق که قاضی حاجات وکافی مهمات است پشت نمودند که «ومن یتوکل علی الله فهوحسبه» احوال بقیه ساکنان از پیرتا جوان بدین نمط که نفس شماری از تفریغ اوقات می پندارند و فرصت لحظات لطیفه کم از عمر دراز نمی شمارند ـ ع

تا یار کرا خواهد و میلش بکه باشد

(دنباله دارد)

INDIAN INSTITUTE OXFORD

Bulletin of The Government Oriental Manuscripts Library, Madras.

அரசினர் கீழ்த்திசைச் சுவடி

நூலகப் பருவ வெளியீடு

EDITED BY

R. N. SAMPATH, M.A., P. & P. A. (Dip.)

Curator, Government Oriental Manuscripts Library, Madras-5.

Volume XIX 1972 No. II

Published by the orders of the Government of
Tamil Nadu

© Govt. of Tamil Nadu

MADRAS INSTITUTE
5 DEC 1972
LIBRARY

Price: Rs. 2/- per copy.

Printed at the Bharati Vijayam Press, Triplicane, Madras-5.

॥ श्री: ॥

॥ त्रिलोचनशिवाचार्यकृता सिद्धान्तसारावलिः ॥

॥ अनन्तशम्भुकृत व्याख्यासहिता ॥

Edited by

Thiru. T. H. VISWANATHAN
(Siromani. Retd. Pandit)
and
P. G. SEETHARAMAN
(Siromani. Sanskrit Pandit)
and
Thiru. R. GANESAN
(Siromani. Sanskrit Pandit)

(Continued from page 84 of Volume XIX No. 1.)

नन्वत्र आषाढमासस्य द्विराषाढत्वे सति पूर्वाषाढं विना कर्कटयुक्तोत्तराषाढे विष्णुस्वापो भवति। कथं चैत्रादिमासषट्के अधिमासश्चेत् कर्कटके स्वाप: ? अत्र परिहार: । मिथुनस्थो रविर्यदा अमावास्याद्वयं स्पृशति तदा आषाढस्य द्विराषाढसंज्ञा मुख्यार्थत्वेन प्राप्ता । यथा ज्योतिश्शास्त्रे —

मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढस्स विज्ञेयो विष्णु: स्वपिति कर्कटे ॥ इति ॥

अन्यत्रापि— चैत्रकृष्णदशम्यादिदिनेष्ववर्वाक् चतुर्दशी
रवौ मेषगते दर्शद्वयं च मिथुने भवेत् ॥
आषाढस्य द्विरावृत्तेर्द्विराषाढो यथार्थत: ।

इति यथार्थत्वेन प्राप्तिर्द्विराषाढसंज्ञाया: माधवादिषण्मासेषु यत्र कुत्रापि आधिक्यसम्भवे तन्मासस्य गौणार्थत्वेन द्विराषाढसंज्ञाया विधानात् षण्मासेष्वधिक्युक्तवर्तमानसंवत्सरे कर्कटकमासे विष्णो: स्वापस्सिद्ध: ।

उक्तं च— वैशाखाद्यन्यमासेषु पञ्चस्वेकाधि[कत्र] मासि चेत् ।
द्वौ दर्शाविकसङ्क्रान्तौ गौणोच्चाषाढ एव तु ॥

तथान्यत्रापि— माधवाद्येषु षट्स्वेकमासि दर्शद्वयं यदा ।
द्विराषाढस्स विज्ञेयः शेते कर्कटकेऽच्युतः ॥

इति ज्योतिर्विदां नियमात् । इयं द्विराषाढसंज्ञा विशेषशयनज्ञापनार्थं प्रत्युक्ता भवति । तथा ज्योतिश्शास्त्रे—

द्विराषाढविकल्पोऽयं वैकुण्ठशयनं प्रतिम् ।

माधवादिषण्मासेष्वधिकयुक्तवर्तमानसंवत्सरे मुख्यद्विराषाढे कर्कटके तथा विष्णोः स्वापः प्रोक्तः । तथैवेतरमासेषु गौणद्विराषाढसंज्ञाकरणात् कर्कटकस्वापस्सिद्धः । अन्यथा गौणद्विराषाढसंज्ञाकरणस्य निरर्थकत्वादित्यभिप्रायः । अत एव "शेते कर्कटकेऽच्युत" इति कर्कटकत्वेनोक्तः । किञ्च यथा श्रावणे भाद्रपदे वा अधिमासश्चेत् तदा पञ्चमासकत्वात् चातुर्मास्यमिति विहितसंज्ञाया अभावात् तत्र विहितनियमव्रतादीनामानर्थक्यप्रसङ्गाच्च । श्रावणभाद्रपदयोरधिमासेऽपि कर्कटके स्वापस्य सिद्धत्वात् न दोषः । तथा मोहशूरोत्तरे—

दर्शद्वयं भवेद्यत्र रविसङ्क्रान्तिवर्जितम् ।
अधिमासस्स विज्ञेयो विष्णुस्स्वपिति कर्कटे ॥

तुल्यमासेऽधिमासेऽस्य कर्तव्यं तु पवित्रकम् ।
सुप्ते चैव हृषीकेशे दोषभागन्यथा भवेत् ॥ इति

माधवादिषु विहिताषाढसंज्ञा उत्तरत्र पदान्तरे विष्णुस्वापकालविध्यर्थं विहितेति केषांचिन्मतम् । मेषादिमिथुनान्तेषु द्विराषाढसंज्ञा चेत् आगामिनि संवत्सरे मिथुनाषाढे हरेः स्वापः कर्कटादिसंज्ञा चेत् आगामिनि संवत्सरे कर्कटाषाढे स्वापः । तथैव न भवति । वर्तमानसंवत्सरे भविष्यत्संवत्सरे चोभयार्थं द्विराषाढसंज्ञा विहितेति वक्तव्या भवति । अन्यथा उत्तरत्रासितैः षट्स्वधिकयुक्तवर्तमानसंवत्सरे मिथुने स्वापो वा कर्कटके स्वापो वेति अर्थो वक्तव्यः । वर्तमानवर्षे मेषादित्रिष्वधिमासश्चेत् स्वभावत एवाषाढः कर्कटयुक्तो भवति । तत्र स्वापो विहितः । कर्कटादिषु अधिमासश्चेत् आषाढो मिथुनयुक्तो भवति । तदा मिथुने स्वापस्सिद्धः । एवं वर्त-

मानविहितस्वापस्य सम्मतिवचनं च प्रदर्शनीयं भवति । तथा सम्मतिवचनाभावादेव

माधवाद्येषु षट्स्वेकमासि दर्शद्वयं यथा ।
द्विराषाढस्सविज्ञेयः शेते च श्रवणेऽच्युतः ॥

इति वचनं वर्तमानसंवत्सरयुक्तकर्कटके विहितस्वापकालज्ञापकवचनं भवति । उत्तरत्र स्वापकालज्ञापकवचनम्—

मेषादिमिथुनान्तेषु यदा दर्शद्वयं भवेत् ।
अब्दान्तरे तु द्वादश्यां मिथुनार्के हरिः स्वपेत् ।
कर्कटादित्रिके वापि यदा दर्शद्वयं भवेत् ।
अब्दान्तरे तदावश्यं कर्कटार्के हरिः स्वपेत् ॥

इति भविष्यत्कालस्वापविषयवचनम् । यद्यनेन प्रकारेण स्वापकालो न भवेत् तर्हि आषाढशुक्लपक्षद्वादशी प्राधान्येन मिथुनगता वा कर्कटगता वा भवति, तस्यामेव स्वापकालोऽवश्यं भवतीत्यर्थो भवति । अनेनार्थेन स्वापकाले सिद्धे स्वापकालसिद्ध्यर्थं विहितानि वचनानि अनेकानि व्यर्थानि भवन्ति । द्विराषाढसंज्ञा च व्यर्था भवति । अत एव एकदा आषाढशुक्लद्वादशीं विना श्रावणशुद्धद्वादश्यामाधिक्येन सौरापेक्षस्वापस्सिद्धः । तथा शिवागमवचनम्—

आषाढेऽपि प्रकर्तव्यं प्रसुप्ते मधुसूदने ।
कालोऽस्य नियतः ख्यातः श्रूयतां विधिनिर्णयः ॥
शुक्लाषाढचतुर्दश्यां कुर्याच्छ्रावणभाद्रयोः ।
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ॥

अत्र आषाढशुक्लचतुर्दश्यामित्यनेनैव विष्णुस्वापानन्तरं कालः स्वयमेव लभ्यते । अत एव सुप्ते मधुसूदन इति व्यर्थं स्यात् । व्यर्थं सज्ञापयति— श्रावणभाद्रपदयोरधिमासे सति मिथुनगताषाढद्वादशीं विना कर्कटकयुक्तश्रावणशुद्धद्वादश्यां स्वापस्सिद्ध इति । तथा तन्त्रसागरे—

आषाढो ह्युत्तमो मासः श्रावणो मध्यमस्स्मृतः ।
जघन्यो भाद्रमासः स्यात् शुक्लपक्षे समाचरेत् ॥
अष्टम्यां च चतुर्दश्यां पौर्णमास्यामथापि वा ।
द्वादश्यां वा प्रकर्तव्यं कृष्णपक्षस्तु पैतृकः ॥

पवित्रारोहणं कर्म न तु तत्र समाचरेत् ।
आषाढेऽपि न कर्तव्योऽप्रसुप्तेऽपि जनार्दने ॥
प्रसुप्तेऽपि प्रकर्तव्यं अष्टमीभूतयोरपि । इति ॥

अत्र ग्रन्थे एकदाषाढे विष्णोः स्वापो नास्तीत्युक्तत्वात्, यदा श्रावणे भाद्रपदे वाधिमासः तदा मिथुनयुक्ताषाढशुक्लद्वादशीं (विना) कर्कटकयुक्तशुद्धद्वादश्यां एव पवित्रारोहणं कर्तव्यमित्युक्तम् । यदा श्रावणे भाद्रपदे वाधिमासो न स्यात् तदा कर्कटकाषाढे वा मिथुनाषाढे वा स्वापस्य सिद्धत्वात् तत्रैव पवित्रारोहणोद्योगः कर्तव्यः । अष्टमीग्रहणसामर्थ्यात् अयं ग्रन्थः प्रथमाषाढविषयो न भवति । प्रथमाषाढविषयश्चेत् द्विराषाढे अष्टम्यां स्वापः । त[ता]वदष्टमी-।ग्रहणश्रावणप्रथममासं त्यक्त्वा द्वितीयश्रावणे पवित्रारोपणं कर्तव्यमिति सिद्धम् प्रथमश्रावणे शुक्लाष्टम्यां स्वापस्य विहितत्वात् । तथा विष्णुरहस्ये—

श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम् ॥
सिंहस्थे वा रवौ कार्यं कन्यायां तु गते तथा ॥ इति ॥

एतच्छ्रावण्यामाधिक्यविषयवचनं आधिक्यं चेत् मलमासत्वात् प्रथमश्रावणं विना सिंहयुक्तद्वितीयश्रावणे पवित्रारोपणं कर्तव्यम् । अत एव सिंहस्थे वा रवौ कार्यमित्युक्तं निरर्थकं स्यात् । ननु पवित्रारोपणस्य चान्द्रमासेन किं प्रयोजनम् ? सौर एव गृह्यताम् । तत्राधिकमासस्य शङ्का नास्तीति न च वाच्यम् । प्रायेण पवित्रारोहणे चान्द्रमास एवाभिमतः मध्यमत्वेनाभिमतं च सौरम् ॥ तथा वैष्णवे—

तव मासचतुष्कस्य मध्ये कुर्याच्छुभे दिने ।
आषाढपञ्चदश्यादि यावद्वै कार्त्तिकस्य च ॥
सम्पूर्णचन्द्रदिवसस्तत्कालश्चान्द्रसंज्ञकः ।
आकर्कटार्कतुल्योः पवित्रारोपणे विधिः ॥
कालश्च मासःपक्षश्च सौरो मध्यमसंज्ञकः ॥ इति ॥

तथा वैखानसे अत्रिप्रोक्तसंहितायाम्—

आषाढे श्रावणे चैव मासि भाद्रपदे तथा ।
एषां मासि सिते पक्षे द्वादश्यां रोपणं हरेः ॥

हृताश्चान्द्रमासे वापि सौरे वापि च कारयेत् ।
ज्येष्ठाषाढयोः द्विके [क]र्कटके श्रावणभाद्रपदाश्वयुक् (दिगेक) [द्विके] ।
कार्तिकमार्गशीर्षयोः कारयेदिति केचन । इति ।

ज्येष्ठे चाषाढे द्विके सहितश्रावण्यां कर्कटे पवित्रारोपणं कार्यमित्यर्थः । श्रावण्यां द्विके सति श्रावण्यां सहकारयेदित्यर्थः । तथा भाद्रपदाश्वयुग्द्विके सति श्रावण्यां कारयेदिति सम्बन्धः । द्विके सति कारयेदिति केचन वदन्ति । पक्षान्तरत्वेन ग्राह्यमित्यर्थः । तथा कामिके—

पूर्वपक्षे चतुर्दश्यामेवाषाढे पवित्रकम् ।
इतरेष्वन्यमासेषु पक्षयोश्शुक्लकृष्णयोः ॥
चतुर्दश्यामथाष्टम्यां पवित्रं विधिनाचरेत् ।
शुक्लपक्षे गृहस्थस्य यतेरुभयपक्षयोः ॥

अ(पि)[धि]मासद्वयपवित्रकरणे आषाढशुद्धचतुर्दश्यामारम्भः । भाद्रपदशुद्धचतुर्दश्यां परिसमाप्तिः । तत्पौर्णमास्यामवभृथस्नानकरणम् । एकमासकरणे श्रावणशुद्धचतुर्दश्यां परिसमाप्तिः । तत्पौर्णमास्यामवभृथस्नानम् ।

पौर्णमास्यामवभृथं पवित्रे कारयेद्गुरुः । इत्युक्तत्वात् ।

शुद्धपक्षविषये श्रावणशुद्धाष्टम्यामारम्भः । भाद्रपदकृष्णाष्टम्यां परिसमाप्तिः । शुक्लप्रतिपदारभ्य पञ्चदश्यन्तं कार्यम् ।

मासद्वायं तु पक्षं वा अभावाद्दिनसप्तकम् ।

इत्युक्तत्वात् आषाढशुद्धचतुर्दश्यां गृहस्थस्यारम्भः । तत्कृष्णचतुर्दश्यां मुक्तिकामस्य । एवं श्रावणमासान्तौ ज्ञेयम् । तथा सिद्धान्तशेखरे—

आषाढमासे शुभदा वलक्षा चतुर्दशी स्यादपरा तु नेष्टा ।
चतर्दशी स्याच्छुभदाष्टमी च शुक्ला च कृष्णा च तु मुक्तिहेतुः ॥ इति ।

इति सर्वमासेषु तिथिनिर्णयः । यथा करणे—

अष्टम्यां च चतुर्दश्यां प्रतिपत्पौर्णमास्यपि ।
पञ्चदश्यान्तरं कार्यं पूर्वपक्षे प्रजापतेः ॥
द्वितीयादिचतुर्थ्यादिषष्ठ्यादीनि विशेषतः ।
अष्टम्यन्तं प्रकर्तव्यं कृष्णपक्षे द्विजोत्तमः ॥

सप्ताहं चैव पञ्चाहं त्र्यहं वापि च कारयेत् ।
एकाहं चेत्प्रकुर्वीत चाष्टम्यां कृष्णपक्षके ॥

चतुर्दश्यां तु शुक्ले तु पवित्रारोहणक्रियाम् । इति ।

सप्ताहपक्षे श्रावणशुद्धाष्टमीमारभ्य तच्छुद्धचतुर्दश्यन्तं कार्यम् । एवं द्विदिनपवित्रकरणे त्रयोदश्यामधिवासः । चतुर्दश्यां पवित्रसमर्पणं कार्यम् । यदा त्वेकदिनेऽधिवासं पवित्रसमर्पणं वा कर्तव्यं तत्र सम्पूर्णा चतुर्दशी ग्राह्या । उक्तं च—

यदेकस्मिन् दिने कार्यं सर्वं पूर्णतिथिर्यदि ।
तदा त्वेकदिने शम्भोः पवित्राद्यं चिकीर्षति ॥
कृतनित्यस्तदा सन्ध्यां कृत्वा नैमित्तिकीं सकृत् ।

सम्यग्गन्धपवित्रं च दत्वोपरि पवित्रकम् ॥
उद्धृत्य दत्वा चण्डाय लिङ्गं संस्नाप्य पूजयेत् । इति ॥

यदा चतुर्दशी दिवाद्वयगता भवति, तदा परदिवायुक्तचतुर्दश्यां पवित्रसमर्पणं कर्तव्यम् । तथा सिद्धान्तशेखरे—

पवित्रकार्ये परघस्रयुक्ता चतुर्दशी स्याच्छुभदाष्टमी च । इति ॥

तथाप्यन्यत्राप्युक्तम्—

यदा खण्डतिथिस्तत्र तदा तत्तिथिभागयोः ।
गन्धसूत्रं पवित्रं च दद्याद्यद्वा चतुर्दशी ॥

पौर्णमास्यार्धसंमिश्रा तदा कालान्तरे हितम् ।
यद्वा तत्रैव कर्तव्यं यदि व्यग्रतया गता ॥

गोदोहान्तरितं ग (कृ)त्वा साधिवासं निवर्तकम् ।
चतुर्दशीक्षणे कुर्यात्त्वेष [च्छेषं]शेषतिथौ चरेत् ॥ इति ॥

अस्यार्थः । यदा यस्मिम् काले खण्डतिथिः दिवाद्वयगततिथिर्भवति तदा तस्मिन् काले तत्तिथिभागयोः दिवाद्वयगततिथिघटिकासम्बन्धयुक्तभागयोर्यथाक्रमेण गन्धसूत्रमधिवासदिनसमर्पणपवित्रं पुनरपि प्रातः काले समर्पणपवित्रं

च दद्यात् । परमेश्वराय समर्पयेदित्यर्थः । अयमभिप्रायः रात्रियुक्तचतुर्दश्यां गन्धपवित्रं दिवागतपरदिवसचतुर्दश्यां पवित्रसमर्पणं कर्तव्यम् । यदा परदिवसगतचतुर्दशी अपराह्णयुक्ता भवति तदा पूर्वोक्तवत् कर्तव्यम् । मध्याह्नपर्यन्तं परदिवसगता चेत्, तदा कालान्तरे कर्तव्यमित्याह । यद्वा द्वयसमानकाले सति पवित्रस्य परदिवस एव ग्राह्य इत्युक्तत्वात् उभयकालसमर्पणसमानरूपचतुर्दशी त्याज्येति । तदा कालान्तरे हितमित्युक्तम् । यदि व्यग्रतया तत्रैव शीघ्रेण कर्तव्यमिति व्यग्रमानसतया युक्तं चेत्, चतुर्दशीक्षणे गोदोहान्तरितगोदोहनसमानकालपर्यन्तं मध्ये व्यवधानं कृत्वा साधिवासं पवित्रं कुर्यात् । चतुर्दशीयुक्तपूर्वरात्रेण अधिवासनं न कर्तव्यम् । पूर्वदिवसदिवाकाले पवित्रसमर्पणसमानरूपत्वात्तदुपर्यधिवासनं न योग्यमित्यभिप्रायः । शेषं ग्रामप्रदक्षिणोत्सवादिकं शेषतिथौ पौर्णमा(स्यु)[स्यामु]क्तापराह्णे कारयेत् । तथोक्तम्—

सप्तम्यां वा त्रयोदश्यां कृत्वा गन्धपवित्रकम् ।
अपरेऽहनि कर्तव्यं सपवित्रमिति स्थितिः ॥ इति ।

एतत्खण्डतिथिविषयवचनम् । केचिदेवमाहुः—त्रयोदशीयुक्तरात्रौ अधिवासं चतुर्दशीयुक्तापराह्णे काले गन्धपवित्रसमर्पणं तदनन्तरं चतुर्दशीयुक्तप्रातःकाले पवित्रसमर्पणं यथाक्रमेण एकैकं दिनं कर्तव्यमिति । तथा च तद्वचनम्—

अथवाभ्यां दिनकैकं कर्तव्यं वापरे जगुः ।
अधिवासं त्रयोदश्यां अपरेऽह्नि विधिद्वयम् ॥ इति ॥

आभ्यां गन्धसूत्रपवित्राभ्यां एकैकं दिनं प्रति कर्तव्यमिति अपरे आचार्या जगुः उक्तवन्तः । त्रयोदश्यां अधिवासः अपरेऽह्नि गन्धसूत्रपवित्रसमर्पण कर्तव्यम् । सद्योऽधिवासनपक्षे चतुर्दशीक्षणे गोदोहान्तरितं कृत्वा साधिवासं पवित्रसमर्पणं कर्तव्यम् । चतुर्दशी अपरघटिका चेत्, तदा चतुर्दशीक्षणे गन्धसूत्रसमर्पणं पौर्णमास्यां पवित्रसमर्पणं कर्तव्यम् । तथाचोक्तम्—

गोदोहान्तरितं कृत्वा यदि स्याद्व्यग्रमानसः ।
चतुर्दशीक्षणे कुर्यात् साधिवासं पवित्रकम् ॥
सपवित्रं पौर्णमास्यां तिथिविद्धे त्वयं विधिः ।
अष्टम्यामपि बोद्धव्यः क्रमोऽयं सूत्ररोपणे ॥ इति ॥

गुरुशुक्रमूढसंयुक्तमासं त्यक्त्वा शुद्धमासे पवित्रारोहणं कर्तव्यम्। यदा मूढगुरुशुक्राभ्यां मासत्रयेऽपि उदयो न स्यात्, तदा पवित्रस्य नित्याङ्गत्वात् कर्तव्यमेव। तथा सिद्धान्तशेखरे—

कवौ गुरौ चास्तमयं प्रयाते मासत्रये चाप्युदयो न चास्ति।
तथापि कुर्वीत पवित्रकार्यं नैमित्तिकत्वा(दुतनै)[दनि]मित्तिकत्वात् ॥

ननु आषाढादिमासत्रये यदा गुरुशुक्राभ्यामुदयो न स्यात्, तदोदिताश्वयुजकार्तिकमासे कार्यं भवति। पवित्रकरणे तन्मासस्यापि ग्रहणत्वात्। तथा कामिके—

आषाढादित्रयो मासा श्रेष्ठमध्यमकन्यसाः।
अश्विनीकार्तिकौ मासौ अथवा सम्प्रकीर्तितौ ॥ इति ॥

एवमुक्तेऽपि मासत्रये कथं पवित्रकरणमित्यत्र परिहारः। मासत्रये दैवादिना अपवित्रकरणे सति एतन्मासद्वयस्य ग्रहणं, न मुख्यत इत्यदोषः। पवित्रकरणे मासत्रयस्य मुख्यत्वात्। अत्र श्लोके ग्रन्थकारेणैतत्सर्वं मनसि निधाय **तस्मिन् दर्शयुग**मित्यादिरुक्तः ॥ **तस्मिन्** कर्कटके **दर्शयुगम**-मावास्याद्वयं **यदि** तस्मिन् वत्सरे **भवेत्**, **तदा सिंहे** सिंहयुक्तोर्ध्वश्रावणे **पवित्रोद्यमः** पवित्रारोपणोद्योगः **कार्यः** कर्तव्यः। आषाढे (स्व)[। पा]भावात् प्रथमश्रावणे स्वापे सिद्धे सति मलमासत्वात् सिंह एव पवित्रारोपणं सिद्धम्। तथा चोक्तं मोहशूरोत्तरे—

दीक्षादिस्थापनाद्यं च पवित्रादि शतक्रतोः।
अधिमासि न कुर्वीत यदीच्छेच्छुभमात्मनः ॥ इति।

तथा च स्मृतौ—

उपाकर्मोत्सर्जने च पवित्रदमनार्पणम्।
अवरोहश्च हेमन्तः सर्पाणां बलिरष्टकम् ॥
ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम्।
दुर्गेन्द्रस्वापनोत्थाने ध्वजोत्थानं च वज्रिणः ॥
पूर्वं च प्रतिषिद्धानि परं चान्यच्च दैविकम्। इति।

अत्र विष्णोश्शयनमिति पूर्ववाक्यनिषेधवाक्यं पूर्वाषाढविषयवचनं पूर्वाषाढे विष्णोः स्वापाभावात्। पूर्वश्रावणे तु स्वापस्य सिद्धत्वात् तद्विषयवचनं न भवतीति वक्तव्यम्। विष्णुस्वापनानन्तरकाले पवित्रस्य क्रियमाणत्वात् मिथुनगतशुद्धाष्टमीं विना तच्चतुर्दश्यामारम्भः कर्तव्यः। उक्तं च—

शुक्लाष्टमीं विना द्वन्द्वे कुळीरे सिंहभाद्रयोः।
सितासितासु कर्तव्यं चतुर्दश्यष्टमीषु च। इति ॥ १३० ॥

अथ पवित्रारोपणार्थमात्मविद्याशिवगङ्गावताराख्यपवित्राणां तन्तुग्रन्थ्यादिप्रमाणमाह—कार्पासेति।

कार्पासोत्थनवात्मसूत्रशतदिक्कॢप्तं शिरोमानकं
पूजांशाय चतुर्थकं त्रयमथो सूत्रस्य संख्यावशात्।
ग्रन्थिं बिन्दुशरेण वा नवकरे पङ्क्त्याष्टविंशद्धृते
सूत्रं हस्तमिते श्रुतेः किल हृते चाष्टादश ग्रन्थयः ॥ १३१ ॥

बाणाद्येकतमार्चितेषु यदि वाशीतिश्च सैकाष्टयुक्-
त्रिंशद्बिन्दुशराख्यसंख्यमपि वा तत्त्वे प्रकृत्यादिकाः।
ग्रन्थीनामधिपाः शिवा शिवयुता चन्द्रांशुशैवाः कलाः
सूत्राणां प्रणवादयोऽधिपतयो व्यक्तेषु जान्वन्तकम् ॥ १३२ ॥

कार्पासोत्थं कार्पासादिनोत्थमुत्पन्नं द्विजकन्यकाभिः कर्तितमित्यर्थः **नवात्मसूत्रं** नवसंख्यास्वरूपेण कृतमेतत्सूत्रमित्युच्यते। तस्य **शतदिक्कॢप्तं** अष्टोत्तरशतसंख्यया कृतम्। तथा सोमशम्भौ—

सौवर्णं राजतं ताम्रं कृतादिषु यथाक्रमम्।
कलौ कार्पासकं वापि यथाशक्ति पवित्रकम् ॥
कर्तितं द्विजकन्याभिस्त्रिगुणं त्रिगुणीकृतम्।
लौतं शुक्लशुभं सूत्रमन्यदप्युपयुज्यते ॥
पट्टवल्कलपत्रोत्थं क्षौमं दर्भशणोद्भवम्।
मुञ्जादिसम्भवं सूत्रं पवित्राय प्रशस्यते ॥ इति ॥

अत्र ग्रन्थे पट्टक्षौमयोस्साधकविषयत्वेन प्राशस्त्यम् । तथा दर्भस्य यतिविषयत्वेन प्राशस्त्यम् । मुञ्जादिः दरिद्रविषयः । द्विजशब्दो विशेषसंस्कारकृ-[संस्कृ]तविषयः । तदभावे त्रैवर्णिकविषयः । कन्याशब्दस्तु विधवानिवृत्तिपर एव । अत्र अष्टोत्तरशतसूत्रेण कृतमुत्तमम् । तदर्धं मध्यमम् । तदर्धमधमम् । तथा ज्ञानरत्नावल्याम्—

अष्टाधिकशतं सूत्रं रुद्रसंख्या सदोत्तमम् ।
सूत्राभावे तदर्धं स्यात् तस्यार्धं वा प्रकल्पयेत् ॥ इति ॥

अष्टोत्तरशतादिना क्रियमाणपवित्रं स्थण्डिलादिपवित्रविषयम् । उक्तं च—

अष्टोत्तरशतैः कार्यं स्थण्डिलादौ पवित्रकम् ।
तस्यार्धेन तदर्धेन यथालाभेन वा हरेत् ॥
स्थण्डिले स्थललिङ्गे च बाणलिङ्गे स्वयंभुवि ।
लोहादौ नियमो नास्ति यथापूर्वमुदाहृतम् ॥
अष्टोत्तरशतादूर्ध्वं न कर्तव्यं कदाचन ।
सर्वेषां नियमश्शक्त इत्याज्ञा पारमेश्वरी ॥ इति ॥

शिरोमानकं तल्लिङ्गशिरः प्रमाणं त्रयमात्मविद्याशिवाख्यपवित्रकम् तथा षट्साहस्रिकायाम् —

लिङ्गमूर्ध्नि परीणाहे यथोच्चैः स्वात्मकं तथा ।
विद्यात्मकपरीणाहं ततो भागद्वयं विना ॥
ससाद्भागद्वयन्यूनं शिवाख्यं यत्पवित्रकम् । इति ॥

अथाथोशब्देन तत्त्वत्रयाणां प्रत्येकं दशग्रन्थ्यादयः कार्या इत्यर्थान्तरं सूचितम् । स्थण्डिले चललिङ्गादौ यथानुगुणमष्टाङ्गुलादिना तत्त्वत्रयपवित्रं कार्यम् । तथा ज्ञानरत्नावल्याम्—

लिङ्गमस्तकविंशत्या[विस्तृत्या]आत्मतत्त्वपवित्रकम् ।
विद्याशिवात्मकं तस्मात् न्यूनं न्यूनं तथा शुभम् ॥
अचले तु चले कार्यमष्टार्काद्यङ्गुलायतम् ।
कृत्वा कङ्कणवत्तत्र दशग्रन्थिसमान्तरम् ॥ इति ॥

अन्यत्रापि—

ग्रन्थिभिर्दशभिर्युक्तं नवभिर्वा समन्तरम् । इति

दशग्रन्थियुक्तपवित्रत्रयं अल्पशिरोमानयुक्तलिङ्गादिविषयं, बहुविशालशिरोयुक्तलिङ्गादौ सूत्रसंख्यया यथानुगुणेन वा पवित्रं कार्यम् । तथा श्रीमन्मृगेन्द्रे—

पूजाप्ररोचनं मूर्ध्नि त्रयं तत्त्वत्रयात्मकम् ।
तदिष्टग्रन्थिसंख्यातं शुभं कार्यं विपश्चिता ॥ इति ॥

पूजांशाय लिङ्गस्य पूजाभागाय **चतुर्थकं** गङ्गावताराख्यपवित्रकं पूर्वोक्तवदष्टोत्तरशतादिना उत्तममध्यमाधमेन विधातव्यम् । गङ्गावतारस्याष्टोत्तरशतेन सूत्रेण कार्यमिति केचित् । तथा सिद्धान्तशेखरे—

साष्टं शतं स्यात्प्रवरं पवित्रं मध्यं तदर्धं च तदर्धमन्त्यम् ।
एवं पवित्रत्रितयं विदध्यात् गङ्गावतारं च शतं च साष्टम् ॥ इति ॥

स्थिरलिङ्गे गङ्गावतारोन्नतप्रमाणं लिङ्गमस्तकादारभ्य पीठान्तावलम्बि कार्यम् । उक्तं च—

गङ्गावतारकं नाम चतुर्थं शक्तिसूत्रकम् ।
मस्तकात्पिण्डकान्तं तत् स्थिरलिङ्गे च नान्यथा ॥ इति ॥

सूत्रस्य अष्टोत्तरशतादिसूत्रस्य **संख्यावशात्** संख्यानुसारात् **ग्रन्थिं** गङ्गावतारस्य कुर्यादिति शेषः । तथा मृगेन्द्रे—

ग्रन्थयस्तास्तु संख्यातास्तेष्वावेदिप्रलम्बिषु । इति ।

आवेदिप्रलम्बिषु पीठावधि प्रलम्बमानेषु गङ्गावतारेष्वित्यर्थः । उत्तमोत्तमादिकनिष्ठकनिष्ठान्तनवलिङ्गेषु नवप्रकारसूत्रसंख्यां नवप्रकारग्रन्थिसंख्यां च (आह—) **बिन्दुशरेणेत्यादिना** । वाशब्देन वैकल्पिकार्थो द्योतितः । पूर्वोक्तवदष्टोत्तरशतेन तदर्धेन वा नवलिङ्गे पवित्रकं कार्यम् । नवप्रकारेण वा कार्यमिति । नवप्रकारे नवहस्तादि-एकहस्तपर्यन्तलिङ्गे **पङ्क्त्याष्टोत्तरशतसूत्रादारभ्य दशसंख्यया ह्रते** न्यक्कृते सति **अष्टविंशत्** अष्टाविंशतिसूत्रं **हस्तमिते** हस्तप्रमाणलिङ्गे भवति । **नवकरे** लिङ्गे अष्टोत्तरशतसूत्रं अष्टहस्तलिङ्गे अष्टोत्तरनवतिसूत्रं सप्तहस्ते अष्टोत्तराशीतिसूत्रं षट्करे अष्टोत्तरसप्ततिसूत्रं पञ्चकरे अष्टोतरषष्टिसूत्रं चतुष्करे

अष्टोत्तरपञ्चाशत्सूत्रं त्रिकरे अष्टोत्तरचत्वारिंशत्सूत्रं द्विकरे अष्टोत्रत्रिंशत्सूत्रं एककरे अष्टाविंशतिसूत्रम्। अनेन प्रकारेण नवलिङ्गविषयं गङ्गावतारसूत्रसंख्याप्रमाणम्। उक्तं च—

अष्टबिन्दु समारभ्य यावन्नागसमावधि।
ज्येष्ठादिकन्यसप्रान्ते नवलिङ्गे मया तव ॥
दशह्रासात्समाख्याता सूत्रसंख्या पुरन्दर। इति ॥

कङ्कणत्रयाणां सूत्रसंख्याप्रमाणमनेन प्रकारेण कर्तव्यम्। ग्रन्थिसंख्याप्रमाणं गङ्गावतारस्योत्तरग्रन्थिवत् द्वादशग्रन्थयो वा कर्तव्याः। नवकरे लिङ्गे गङ्गावतारे **बिन्दुशरेण** शरशब्देन पञ्चसंख्योक्ता बिन्दुयुक्ता चेत् पञ्चाशत् संख्या जाता। पञ्चाशत्संख्यया **ग्रन्थिं** कुर्यात्। **श्रुतेः** अपहरणभूतचतुस्संख्यायाः नवहस्तादेकहस्तान्तं चतुस्संख्यां ह्रासयेदित्यर्थः। **हस्तमिते** लिङ्गे गङ्गावतारे **अष्टादश ग्रन्थयो** जाताः स्युः। पञ्चाशद्ग्रन्थिं समारभ्य चतुस्संख्ययापहृते सति नवप्रकारलिङ्गे नवप्रकारग्रन्थयो जाताः स्युः। नवकरे लिङ्गे गङ्गावतारे पञ्चाशत् ग्रन्थयः कार्याः। अष्टकरे षट्चत्वारिंशत्, सप्तकरे द्विचत्वारिंशत्, षट्करे अष्टत्रिंशत्, पञ्चकरे चतुस्त्रिंशत्, चतुष्करे त्रिंशत् त्रिकरे षड्विंशत् द्विकरे द्वाविंशत्, एककरे अष्टादश ग्रन्थयः।

बिन्दुं बाणं समारभ्य यावत्स्यान्नागचन्द्रकाः।
युगह्रासात्समाख्याता ग्रन्थयस्सुरसत्तम ॥
ज्येष्ठादिकन्यसप्रान्ते पवित्रे सार्वदैवते। इति ॥

नवप्रकारलिङ्गे एवं नियमः स्वायम्भुवादौ नियमो नास्ति। अष्टोत्तरशतादिना उत्तममध्यमाधमत्वेन पूर्वोक्तवत्कार्यम्। उक्तं च—

स्थण्डिले चललिङ्गे च बाणलिङ्गे स्वयम्भुवि।
लोहादौ नियमो नास्ति यथापूर्वमुदाहृतम् ॥ इति ॥

किलशब्देनात्र स्वायम्भुवादिलिङ्गेषु प्रतिमादिषु गङ्गावतारे अष्टादश ग्रन्थयः कार्या इति सूचितं भवति। उक्तं च —

व्यक्ताव्यक्ते च वेदिस्पृक् व्यक्तेष्वाजानुलम्बि च।
गङ्गावतारकं तत्र ग्रन्थयोऽष्टादश स्मृताः ॥ इति ॥

अष्टादशग्रन्थिकरणं चोक्तम्। यथा—

ग्रन्थीनां द्वितयं चान्ते कुर्याद्गङ्गावतारके।
तत्र कालान्तरं त्यक्त्वा कुर्याद्ग्रन्थिचतुष्टयम् ॥
द्व्यङ्गुलान्तरतस्तद्वत् कृत्वा ग्रन्थिचतुष्टयम्।
इत्थं पार्श्वद्वये कार्यं षोडशैवं कलामयम् ॥
शिवशक्तिमयं प्रान्ते कुर्याद्ग्रन्थिमये पुनः। इति ॥

बाणादिलिङ्गानां पूर्वोक्ताष्टोत्तरशतादिसूत्रसंख्यया वा एकाशीत्यादिसूत्रसंख्यया वा पवित्रारोपणं कर्तव्यम्। एकप्रकारेण सूत्रेण वेत्याह— **बाणादीत्यादिना। बाणाद्येकतमार्चितेषु** बाणस्वायम्भुवादिलिङ्गानां अष्टोत्तरशतादिसूत्राणां मध्ये एकतमेन सूत्रेणार्चितेषु पूजितेषु लिङ्गेषु **यदि वा** अथवा **सैकाशीतिः** सूत्राणामित्यर्थः। **अष्टयुक् त्रिंशत्** वा **बिन्दुशराख्यसंख्यमपि वा** पञ्चाशत् सूत्रं वा पवित्रारोपणे कर्तव्यमिति शेषः। तथा सोमशम्भौ—

रत्नजे स्थण्डिले बाणे चले लोहे स्वयम्भुवि।
यथोद्दिष्टपवित्राणामेकं कार्यं यथारुचि ॥ इति ॥

तत्त्वे तत्त्वपवित्रे **ग्रन्थीनां** दशानाम**धिपाः प्रकृत्यादिकाः** प्रोक्ताः। तथा सोमशम्भौ—

प्रकृतिः पौरुषी वीरा चतुर्थी त्वपराजिता।
जयान्या विजया षष्ठी त्वजिताथ सदाशिवा ॥
मनोन्मनी स्यान्नवमी दशमी सर्वतोमुखी। इति ॥

नवग्रन्थौ कृते यद्वा वामाद्याश्शक्तयस्तदा।

इत्यन्यत्रोक्तम्। त्रितत्त्वे बहुग्रन्थिविषये एता एव कलाः अवृत्यावृत्य एकदेशे समाप्य वा कार्त्स्न्येन वा यथायोग्यं न्यसनीयाः। तदुक्तमाचार्यैः —

एतास्सर्वत्र योक्तव्याः पर्यायेणापि देशिकैः। इति ॥

अष्टादशग्रन्थियुक्तगङ्गावतारकग्रन्थिदे(शा)[वा]नाह - **शिवेत्यादिना।** ऊर्ध्वाधोग्रन्थिद्वितये **शिवयुता** शिवेन सहिता **शिवा** शिवशक्तिः देवतेत्यर्थः।

चन्द्रांशुशैवाः कलाः चन्द्रांशुभिः चन्द्रकलाभिः सहिताः शैवाः कलाः प्रासाद-मन्त्रोक्तषोडशकला देवता इति प्रोक्ताः। चन्द्रकलाश्शैवकलाश्च न्यसनीया इत्यर्थः। अत्र शिवशक्तिभ्यां सह प्रासादमन्त्रगतषोडशकला न्यस्तव्या इति केचित्। शिवशक्तिभ्यां सह शशिन्यादयश्चन्द्रकला न्यसनीया इति केचित्। उभयमपि न्यसनीयमित्यपरे।

उक्तं च—

कलास्ताश्च यथाशास्त्रं लिख्यते परिपाटितः।
अकारोकारमकारबिन्द्वर्धेन्दुनिरोधिकाः॥
नादनादान्तशक्तिश्च व्यापिनी व्योमरूपिणी।
अनन्तानाश्रितानाथा समना चोन्मनी तथा॥ इति॥

प्रासादकलाः —

शशिनी शाकिनी लक्ष्मीः कामिनी च प्रभा तथा।
पुष्पिणी सुप्रभा चैवामुदा च कुमुदा तथा॥
आश्वासी शायिनी विद्या मोहिनी च प्रमोहिनी।
वितर्किणी तथा सौम्या चामृता षोडशी कला॥ इति।

चन्द्रकलाष्षोडश गङ्गावतारे बहुग्रन्थिविषये एता एव कला आवृत्यावृत्य न्यसनीयाः। यद्वाष्टोत्तरशतादिना विकल्प्य एषु पवित्रेषु तत्तद्ग्रन्थिसंख्यानुगुणं अष्टोत्तरशतरुद्रा न्यसनीयाः। एकाशीतिपक्षे एकाशीतिपदानि न्यस्तव्यानि पञ्चाशत्पक्षे पञ्चाशद्वर्णाः। अष्टत्रिंशत्पक्षे अष्टत्रिंशत्कलाः। अत एतत्संख्यया शतादिनवविकल्पेषु सूत्रनियमोऽभिहितो ज्ञानरत्नावल्याम्—

अष्टाधिकशतं सूत्रं रुद्रसंख्या सदोत्तमम्।
सूत्राभावे तदर्धं वा तस्यार्धं वा प्रकल्पयेत्॥
एकाशीतिपदाकं वा पञ्चाशद्वर्णसंमितम्।
अष्टत्रिंशत्कलाकं वा सर्वलिङ्गेषु संमतम्॥ इति॥

सूत्राणां त्रिगुणं त्रिगुणीकृत्येति विहितैकसूत्रे विद्यमाननवतन्तूनां **प्रणवादय** ओङ्कारादयः **अधिपतयः** प्रोक्ताः। तथा सोमशम्भौ—

प्रणवश्चन्द्रमा वह्निर्ब्रह्मा नागो गुहो रविः।
सादाख्यास्सर्वदेवाश्च (विन्यसेन्न) [क्रमेण न] वतन्तुषु॥ इति॥

अथवा ब्रह्मादयो न्यसनीयाः। तथा कालोत्तरे—

अजं विष्णुं च रुद्रं च ईश्वरं च सदाशिवम्।
सोमसूर्याग्निदेवांश्च विन्यसेन्नवतन्तुषु॥ इति॥

एते नवदेवता नवसूत्रसंख्यानुसारेणावृत्यावृत्य न्यस्तव्या इति विवेकः। **व्यक्तेषु** प्रतिमादिषु **जान्वन्तकं** जानुप्रदेशपर्यन्तं गङ्गावतारकं कर्तव्यमिति शेषः। आत्मादितत्त्वत्रयं यथाक्रमेण गुह्यनाभिहृत्प्रदेशपर्यन्तं कार्यम्। तथा ज्ञानरत्नावल्याम्—

गुह्यनाभिहृदन्तं स्यात् मूर्तीनां कङ्कणत्रयम्।
मस्तकाज्जानुपर्यन्तं चतुर्थं परिकल्पयेत्॥ इति॥ १३२॥

आत्मादितत्त्वत्रयेण सार्वदैवतिकचतुर्थेन शिवस्य कङ्कणत्रयगङ्गावताराणां समर्पणमाह—शैवमिति।

शैवं मन्त्रमथोच्चरन्निषुकलायुक् चेतनास्थानयुक्
दण्डान्तान्तमनान्तकावधि शिवायात्मादितत्त्वत्रयम्।
सर्वात्माख्यचतुर्थकं क्रमयुतं दद्याल्लयोच्चारतः
सर्वान्तं परमीकृतौ च कुसुमं पूर्त्यै विधेर्वत्सरे॥ १३३॥

शैवं शिवसम्बन्धि **मन्त्रं उच्चरन्** **इषुकलायुक्** निवृत्त्यादिपञ्च-कलानां शुद्धियुक् अनेन भूतशुद्धिरुक्ता भवति। **चेतनास्थानयुक्** चेतनाशब्देनान्तर्यजनहवनध्यानान्युच्यन्ते। स्थानशब्देन [स्थान] द्रव्यलिङ्गमन्त्राणां शुद्धिरुच्यते। एतैस्सहितः आत्मादितत्त्वत्रये चतुर्थे च शिव एव तिष्ठतीत्याह-**दण्डान्तान्तमनान्तकावधि** शिवदण्डो नादः, तदन्तः नादान्तः, तस्यान्तः शक्तिः। एतेन आत्मादितत्त्वत्रयाणां व्याप्तिरुक्ता भवति। पृथ्वीतत्त्वमारभ्य प्रकृतितत्त्वान्तव्याप्तिके ब्रह्मकारणेश्वरेण युक्ते आत्मतत्त्वे शिव एवाधिपति-रिति मायातत्त्वान्तमुच्चरन् तथा बुद्धितत्त्वमारभ्य शुद्धविद्यातत्त्वान्तव्याप्तिके विष्णुकारणेश्वरेण संयुक्ते विद्यातत्त्वशिव एवाधिपतिरिति ईश्वरतत्त्वान्तमुच्चारः

तथैव पृथिवीतत्त्वमारभ्य शुद्ध(शक्ति)विद्यातत्त्वान्तव्याप्तिके रुद्रेण कारणेश्वरेण संयुक्ते शिवतत्त्वे शिव एवाधिपतिरिति शिवान्तमुच्चारः। मनान्तकावधि अत्र पृथिवीतत्त्वमारभ्य समनान्तशक्त्य(न्त)व्याप्तिके परवाचके शिवे परशिवोऽधिपतिरिति चतुर्थपवित्रसमर्पणे उन्मनान्तमुच्चारः। **आत्मादितत्त्वत्रयं** पूर्वोक्तवत् आत्मतत्त्वविद्यातत्त्वशिवतत्त्वाख्यतत्त्वत्रयं लिङ्गमूर्ध्नि दद्यात्। एवं दानक्रमस्तु मुमुक्षुविषयः। बुभुक्षुविषये शिवविद्यात्माख्यतत्त्वत्रयसमर्पणम्। तथा सोमशम्भौ—

आत्मतत्त्वे प्रकृत्यन्ते पालिते पद्मयोनिना।
मूलं मायान्तमुच्चार्य पवित्रेणार्चयेच्छिवम्॥
विद्यातत्त्वे च विद्यान्ते विष्णुकारणपालिते।
ईश्वरान्तं समुच्चार्य पवित्रमधिरोपयेत्॥
शिवान्ते शिवतत्त्वे च रुद्रकारणपालिते।
शिवान्तं मन्त्रमुच्चार्य तस्मै देयं पवित्रकम्॥
आत्मविद्याशिवैः प्रोक्तं मुमुक्षूणां पवित्रकम्।
विनिर्दिष्टं बुभुक्षूणां शिवविद्यात्मभिः क्रमात्॥ इति॥

अत्र शिवतत्त्वादिसमर्पणे सर्वेषां पवित्राणामुपरि विद्यमानशिवतत्त्वस्याधोऽवस्थानत्वमनुचितमिति प्रथमं समर्पितशिवतत्त्वं विद्यातत्वपवित्रसमर्पणानन्तरमुद्धृत्य विद्यातत्त्वोपरि स्थाप्यम्। एवं विद्यातत्त्वमात्मतत्त्वसमर्पणानन्तरमुद्धृत्यात्मतत्त्वोपरि स्थाप्यं इति केचित् वदन्ति। अन्ये तु एवं समर्पणवचनाभावात् कङ्कणत्रयप्रमाणं विशालेनान्तर्भूतं भवति। उपर्युद्धृत्य समर्पणमयुक्तमिति वदन्ति। शिवतत्त्वादिकङ्कणत्रयाणां प्रत्येकं क्रमेण भागद्वयन्यूनत्वात् अल्पन्यूनत्वेन कङ्कणत्रयं कार्यमिति केचित्। आत्मादितत्त्वत्रये न्यूनाधिष्ठिताय शिवाय पवित्रसमर्पणमुक्त्वा अधुना सामर्थ्येन सर्वतत्त्वेषु अधिष्ठातृतया अधिष्ठिताय शिवाय पवित्रसमर्पणमाह—**सर्वात्माख्यचतुर्थकं** सर्वदेवतास्वरूपे गङ्गावतारं **क्रमयुतं** ब्रह्मादिकारणेश्वरत्यागक्रमेण सहितं यथा भवति तथा **लयोच्चारतः** द्वादशान्तपर्यन्तस्थितोन्मनान्तोच्चारान् **दद्यात्**। उक्तं च—

सर्वकारणपाल्येषु सर्वतत्त्वेषु सुव्रतः।
मूलं लयान्तमुच्चार्य दद्याद् गङ्गावतारकम्॥

ब्रह्मादीनामधिष्ठाता सद्योजातादिसंज्ञकः।
तत्त्वे च शिव एवोक्तः कारणे योगपादके॥
एको वा नामभेदैः स्थितस्स परमेश्वरः।
ब्रह्मत्वात् व्यापकत्वाच्च ब्रह्मा वा ब्रह्मयोगतः॥
विष्णुः प्रभवशीलत्वात् प्रभवो जगतः प्रभुः।
रुजं द्रावयते यस्मात् तेन रुद्रो रुजः क्षयात्॥
सर्वैश्वर्यगुणैश्शेषादीश्वरस्स महेश्वरः।
सदाशिवस्सदाशान्तः शान्तोऽसौ संस्थितश्शिवः॥
संज्ञाभेदैः स्थितश्चैवमेक एव जगत्प्रभुः। इति॥

परमीकृतौ आत्मादितत्त्वचतुष्टयस्थितस्य शिवस्यैकीकरणे **सर्वान्तं** गङ्गावतारसमर्पणावसाने क्रियमाणं **कुसुमं** पुष्पाञ्जलित्रयं दद्यात्। ज्ञानरत्नावल्याम्—

नमोऽन्तं मूलमुच्चार्य भक्त्या पुष्पाञ्जलित्रयम्। इति

गङ्गावतारसमर्पणानन्तरमुक्तत्वात्। **वत्सरे** एकवर्षे **विधेः** क्रियमाणकर्मणः **पूर्त्यै** मन्त्रलोपक्रियालोपद्रव्यलोपयुक्तस्य कर्मणः सम्यक् परिपूरणाय पवित्रारोपणं कर्तव्यमिति शेषः। उक्तं च—

अथ नित्यं यदुक्तं तन्मन्त्रद्रव्यक्रियान्वितम्।
प्रमादाद्देवतामोहात्कार्यव्यग्रतयापि वा॥
राजचोरभयालस्यस्वदेहव्यसनैस्ततः।
अवश्यं जायते छिद्रं तच्छिद्रपरिपूर्तये॥
नृणां हिताय नित्याङ्गं पवित्रमधुनोच्यते॥ इति॥

नन्वत्र पवित्रारोपणं नित्याङ्गमिति प्रोक्तम्। कथमस्य नित्याङ्गत्वं भवितुमर्हति। प्रत्यहं विधीयमानं कर्म नित्यमित्युच्यते। तन्नित्यमेव सङ्क्रान्तिविशेषे तिथौ द्विगुणश्चेन्नित्याङ्गमित्युच्यते। उक्तं च कालोत्तरे—

समयीपुत्रकाभ्यां तु साधकस्य विशेषतः।
नित्यं क्रमेण कथितं यावज्जीवं शिवाज्ञया॥

स्नानं पूजा जपस्सन्ध्या होमश्चैव तु पञ्चमः ।
इति नित्यं सदा कुर्यात् नित्याङ्गं प्रोच्यतेऽधुना ॥

अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ।
पञ्चदश्यां दिनध्वंसे सङ्क्रान्तौ दक्षिणायने ॥

मासवृद्धौ दिनाधिक्ये षडशीतिमुखेष्वपि ।
रवीन्दुग्रहणे चैव द्विगुणार्चा जपादिकम् ॥

चातुर्मास्येऽपि तद्वत्स्यात् व्रतं नक्तं हविष्यभुक् ।
अष्टम्यां च चतुर्दश्यां न भोक्तव्यं कदाचन ॥

इति नित्याङ्गमेवोक्तम् इति ।

अत एव च पवित्रारोपणं तावत् कार्पासतन्तुभिः आषाढादिनियतकाले कर्मविशेषत्वेन क्रियते । तत्कथं नित्याङ्गमित्युच्यते । अत एव नैमित्तिकं काम्यं प्रायश्चित्तं वा भवतु । विष्णुस्वापादिनियतकालं निमित्तीकृत्य क्रियमाणत्वात् नैमित्तिकमित्युच्यते । अनेन प्रकारेणापि न नैमित्तिक[त्व]मुपपद्यते । नैमित्तिकलक्षणस्याव्याप्त्यतिव्याप्त्योः विद्यमानत्वात् । तथाहि—अनियतकालस्य दीक्षादेर्नैमित्तिकश्रवणादव्याप्तिः । तथा षट्सहस्रिकायाम्—

दीक्षा चैव प्रतिष्ठा च नैमित्तिकमिदं द्विधा । इत्युक्तत्वात् ।

तथा प्रातरादिनियतकालकर्तव्यानां सन्ध्यावन्दनादीनामपि नैमित्तिक[त्व]-प्रसङ्गादित्यतिव्याप्तिः । तथाचोक्तम् —

पवित्रारोपणे कार्या [या] सन्ध्या तन्निमित्ततः ।
तेन नैमित्तिकी प्रोक्ता नैमित्तिकमतो मतम् । इति ।

एतस्मादेव नैमित्तिकं[कमपि] न भवति । तथा काम्यमपि न भवति । काम्यं तावत् अणिमादिकं वश्यादिकं भवति ।

अणिमादिप्रसिद्ध्यर्थं काम्यं तदपि विस्तरम् ।

इयुक्तत्वात् । अत्र काम्यस्याविहितत्वात् अकाम्यमिति सिद्धम् ।

सर्वपूजाविधिच्छिद्रपूरणाय पवित्रकम् ।

इत्युक्तत्वात् संवत्सरे क्रियमाणकर्मणः मन्त्रद्रव्यक्रियालोपे सति तत्पूरणाय पवित्रकर्म क्रियते इति प्रायश्चित्तं भवतीति वक्तुं न शक्यते । यस्मिन् काले

कर्मणः लोपो भवति तस्मिन् काले प्रायश्चित्तं श्रूयते । पवित्रकर्मणस्तु आषाढादिकालनैयत्यात् प्रायश्चित्तेऽन्तर्भावो नास्ति । ननु एकसंवत्सरमध्ये कर्मणः लोपे सति तत्सांवत्सरिककर्मपरिपूरणार्थं क्रियमाणत्वात् कालनैयत्यं विहितमिति प्रायश्चित्तं भवतु । एवमपि प्रायश्चित्तं न भवति । तथाहि—लोके तावत् विध्युक्तानुष्ठानभङ्गे प्रायश्चित्तं श्रूयते । प्रायश्चित्ताकरणे प्रायश्चित्तं विधाय प्रायश्चित्तं कर्तव्यमिति न श्रूयते । अत्र पवित्रकर्मणि तु लोपे सति प्रायश्चित्तं विधाय, पवित्रारोपणं कर्तव्यमिति दृष्टत्वात् । उक्तं च—

उक्तमासत्रये यस्तु न कुर्यात्सूत्ररोहणम् ।
असौ कन्यागते भानौ जप्त्वा दक्षाणुना युतम् ॥
कुर्यात्पवित्रकं शम्भोस्तुलायां न कथञ्चन । इति ॥

अन्यत्रापि—

आषाढादित्रये दैवादविधाय पवित्रकम् ।
लक्षद्वयमघोरस्य जप्त्वा चान्द्रायणं चरेत् ॥ इति ॥

कर्म[लोप] परि(पूर्णा) [पूरणा]र्थत्वादेव यथाकथञ्चित् प्रायश्चित्तं चेत् तदा पवित्राकरणेऽपि पतितत्वमेव भवितव्यम् । प्रायश्चित्तस्य प्रायश्चित्ताभावात् । अत एव प्रायश्चित्तं न भवति । तस्मादिदं नित्याङ्गमिति निश्चित्योक्तम् । उक्तं च—

स्नानं सन्ध्या तथा पूजा जपो होमश्च पञ्चमः ।
इति नित्याङ्गमुद्दिष्टं पवित्रारोपणं तथा ॥ इति ॥

अत्रापि प्रत्यहमनुष्ठेयत्वात् प्रत्यब्दमनुष्ठेयत्वाच्च दैवसिकं वार्षिकं चेति द्विविधत्वम् । दिवसे दिवसे क्रियमाणं दैवसिकम् । वर्षे वर्षे क्रियमाणं वार्षिकम् । दैवसिकं वार्षिकं वा एकमेवास्तु । द्विविधत्वेन किं प्रयोजनमित्युक्ते पवित्रकर्मणो बाहुळ्यादेवं प्रत्यहं विधीयमानत्वेन शक्यत्वात् प्रतिदिनं पवित्रं पुष्पकुशादिभिः सूत्रप्रतिनिधिभिः क्रियमाणमपि असम्पूर्णमेव जायते । तस्मादनेनैव परिपूर्णत्वमापाद्यत इति दैवसिकापेक्षया वार्षिकं सिद्धम् । नित्यव्रतसन्ध्यावन्दनादिलोपवत् नित्यभूतपवित्रलोपे प्रायश्चित्तश्रवणाच्च । एवं चेत् दैवसिकं मास्तु वर्षिकमेव विधीयतामित्युक्ते दैवसिकाभावे वार्षिकस्याप्रधानत्वात् ।

नित्योत्सवेन या पूजा तस्यास्संवत्सरोत्सवम् । इत्युक्तत्वात् ।

अत एव दैवसिकापेक्षया वार्षिकं पवित्रं नित्याङ्गमेवेत्युक्तम् । तथा मोहशूरोत्तरे—

पत्रिकाभिः प्रसूनैर्वा कुशैर्वा परिकल्पयेत् ।
पवित्रं प्रत्यहं शम्भोः महापुण्यचिकीर्षया ॥

इति नित्यक्रिया ख्याता शृणु नैमित्तिकीं पुनः ।
आषाढस्य सिता ग्राह्या श्रावणस्य सितासिता ॥ इति ॥

नन्वेवं चेत् पवित्रारोपणं नैमित्तिकमिति सिद्धम् । कथं नित्याङ्गमित्युच्यते । अत्र परिहारः । नित्यभूतदैवसिकपवित्रे क्रियमाणनित्यादिसर्वकर्मछिद्रहरत्वपूरकनिबन्धनप्राधान्यज्ञापनार्थं वार्षिकस्य नैमित्तिकनामोक्तिः । न तु नैमित्तिकलक्षणयोगात् । अत एव नैमित्तिकशब्दः स्वार्थे कप्रत्ययः । दैवसिकनिमित्तत्वमेव नैमित्तिकं वार्षिकस्येत्युक्तत्वात् नित्याङ्गमिति सिद्धम् ।

तथा कालोत्तरे—

दीक्षाङ्गं संस्मृतं नित्यं तत्र मन्त्रद्वयात्मकम् ।
द्रव्यमन्त्रक्रियोपेतं विकलं विफलं नृणाम् ॥

अतो नित्याङ्गमेवोक्तं पवित्रारोपणं मतम् ।
उक्तवैकल्यतो घोरात् पुनातीति पवित्रकम् ॥

तस्मात्काले प्रकर्तव्यं प्रागुक्तं परमेष्ठिना ।
तेन सांवत्सरी पूजा सम्पूर्णा जायते स्फुटम् ॥

पूजाङ्गत्वात्प्रकर्तव्यं नित्यमेवं पवित्रकम् ।
पवित्रेण विना पूजा तामसी परिकीर्तिता ॥ इत्युक्तत्वात् ॥

अत्र केचित् मोहशूरोत्तरे—शिवागमे नैमित्तिकनाम कुतः कारणात् । नियतकालनिमित्तत्वात् नैमित्तिकमिति वदन्ति । समर्थास्तु नित्याङ्गमेवेति वदन्ति ।

नित्याङ्गमेव निपुणा (दर्शादिति विधिर्यथा) [दर्शादीष्टिर्विधीयते] ॥ इति ॥

कवौ गुरौ चास्तमयं प्रयाते मासत्रये चाप्युदयेन चास्तु ।
तथापि कुर्वीत पवित्रकार्यं नैमित्तिकत्वादनिमित्तकत्वात् ॥

इति सिद्धान्तशेखरे ॥ १३३ ॥

लोके तावदविच्छिन्नसम्प्रदायाः विच्छिन्नसम्प्रदायाश्च भवन्ति । विच्छिन्नसम्प्रदायानां गृहेष्वविच्छिन्नसम्प्रदायानां भोजनादयो न भवन्ति । अज्ञानाद्भोजनादिकरणेन सम्प्रदाययुक्तानां दोषो भवतीति मनसि निधाय तत्परिहारार्थं अष्टविधप्रासादमन्त्रं न्यासपूर्वकं भुञ्जानो दोषभाक् न भवतीति चतुर्भिर्ग्रन्थैराह—श्रुत्योरित्यादिना—

श्रुत्योर्दक्षिणवामयोस्तु खमलं न्यस्येत्कलाढ्यं तथा
नासायां सकलाकलौ क्षपणकं चान्तस्थमक्ष्णोर्न्यसेत् ।
पूर्वोक्तेषु विरिञ्चिकेशवहरेशानांश्च शक्तिं शिवं
दृष्ट्या चान्नविलोकनं ग्रहमथो शून्येन चोष्ठयेन च ॥ १३४ ॥

खण्डादेः क्षपणात्तु सङ्ग्रहमथो बन्धं तथोत्क्षेपणं
ग्रासस्यास्वदनं विमोचनमधस्सञ्चारणं चोष्ठगात् ।
कृत्वा यस्सकलात्कृतात्कमलकाच्छून्यात्तथा निष्कलात्
ध्यानाच्च क्षयतोऽन्ततो[तोऽन्नतो]ष्ठयमनुतो भुञ्जीत लेह्यादिकम् ॥ १३५ ॥

ब्रह्मान्नन्तु रसो हरिस्तु भगवान् भोक्ता महेशस्स्वयं
दाताप्येष महेश्वरस्तु यदि वा भोज्यं स्वमायात्मकम् ।
कर्ता तस्य महेश्वरः किल परो भोक्ता शिवश्शक्तिमान्
प्राणापानगमागमीति मतिमान् भुञ्जीत नीचेष्वपि ॥१३६॥

एवं भावयुगेव देशिकवरो गेहे महापापिनां
भुञ्जानो न तु दोषभागपि तथा श्राद्धादिदुर्भोजने ।
भुक्तेऽस्मिन् सकृदेव वेदविदुषां कोटिर्भवेद्भोजिता
निश्वासोक्तमिदं त्रिसप्तकुलजा दातुर्व्रजेयुश्शिवम् ॥ १३७ ॥

दक्षिणवामयोः श्रुत्योः दक्षिणवामकर्णयोः। खमलं खमलनामधेयमन्त्रं न्यस्येत् । दक्षिणकर्णे न्यासं कुर्यात् । तथा कलाढ्यं कलाढ्या-

ख्यमन्त्रं वामकर्णे न्यस्येत् । नासायां नासिकायाम् । सकलाकलौ सकलनिष्कलाख्यमन्त्रौ यथाक्रमेण नासिकायाः दक्षिणवामपुटयोर्न्यस्येत् । क्षपणकं क्षपण्याख्यमन्त्रं **अन्तस्थं** अन्तस्थाख्यमन्त्रं अक्ष्णोः दक्षिणवामदृष्ट्योः न्यसेत् । पूर्वोक्तेषु खमलादिमन्त्रेषु **विरिञ्चिकेशवहरेशानान्** ब्रह्मविष्णुरुद्रेश्वरान् न्यसेत् । **शक्तिं शिवं** तथा शक्तिं शिवं च न्यसेत् । **अथो** एवं न्यासानन्तरं दृष्ट्या नयनेन **शून्येन** शून्याख्यमन्त्रेणा**न्नविलोकनं** कांस्यादिपात्रे स्थितौदनावलोकनं कुर्यात् । **ओष्ठ्येन** कण्ठोष्ठाख्यमन्त्रेण । **ग्रहं** सङ्ग्रहं समूहीकरणं च कुर्यात् इति । अष्टविधप्रासादोद्धारस्तु श्रीमत्कालोत्तरागमादवधेयः ।

सकलं निष्कलं शून्यं कलाढ्यं खमलं कृतम् ॥
क्षपणं च तथान्तस्थं कण्ठोष्ठ्यं चाष्टमं स्मृतम् ॥ इति ॥

खण्डादेः खण्डाकारेण स्थितस्य शाकादेः **सङ्ग्रहं** समूहीकरणं **क्षपणात्** क्षपणमन्त्रात् कार्यम् । **अथो** समूहीकरणानन्तरं **बन्धं** सूपादिनान्नस्य सम्मेळनम् । **तथा उत्क्षेपणं** हस्तेनाशनस्योर्ध्व**मुद्धतिकरणं ग्रासस्य** अशनपिण्डस्य **आस्वादनं** भक्षणं **विमोचन**मोष्ठगतहस्तविमोचनम् । **ओष्ठगात्** ओष्ठगतस्यास्य हस्तस्य **अधः सञ्चारणं** हस्तस्य अधस्सञ्चारणं यथाक्रमेण **सकलात्** सकळमन्त्रात् । **कृतात् खमलकात्** शून्यात् शून्यमन्त्रस्य **ध्यानात्** । **निष्कलात्** निष्कळमन्त्रात् **क्षयतः** [**ध्यानात्**] क्षयमन्त्रस्तस्य मन्त्रस्य चिह्नं कृत्वा क्षयमन्त्रात् । एवं पञ्चमन्त्रेण बन्धनादिपञ्चकृत्यं विधाय **य एवं** न्यासध्यानादिकं करोति स पुरुषः । **उन्नतोष्ठ्यमनुतः**-उन्नत इत्य(न्तं) [न्तक] कण्ठोष्ठमन्त्रतः । **लेह्यादिकं** लेह्यपेयखाद्यचोष्यादिकं भुञ्जीत भोजनं कुर्वीत ।

ब्रह्मान्नं तु भोजनप्रारम्भकाले त्वन्नं ब्रह्मस्वरूपमिति ध्यायेत् । **रसः हरिः**-अन्नादिषु विद्यमानमधुरादिषड्रसः नारायणस्वरूपः भगवान् षाड्गुण्य (सम्पूर्णवान्) [सम्पन्नवान्] । **महेशः** महेश्वरः । **स्वयं भोक्ता** भोजनकर्ता । **एष महेश्वरः** एव **दातापि** अन्नादिदातापि इति ध्यानं कुर्यात् । **यदि वा** अथवा **भोज्यं** भोक्तुं योग्यं सर्वपदार्थं **स्वमायात्मकं** अधोमायोर्ध्वमायास्वरूपमिति ध्यायेत् । **तस्य** मायात्मकस्य **कर्ता महेश्वरः** कर्ता महेश्वर एव

परः सर्वेभ्य उत्कृष्टश्**शक्तिमान्** । समवेतशक्तिसहित**श्शिवः** । **भोक्ता** भोजनं कुर्वाणः । स्वसामर्थ्यादेव भोक्तेत्यर्थः । **प्राणापानगमागमीति** प्राणापानवाय्वोरूर्ध्वाधोरूपसञ्चारणज्ञानवानिति पूर्वोक्तप्रकारेण **मतिमान्** बुद्धिमान् महेश्वरात्मकबुद्धियुक्त इत्यर्थः । **नीचेष्वपि**-विच्छिन्नसम्प्रदायेष्वपि **भुञ्जीत** भोजनं कुर्वीत । **एवं** पूर्वोक्तप्रकारेण **भावयुगेव** भावनायुक्त एव **देशिकवरः** आचार्यश्रेष्ठः **महापापिनां गेहे भुञ्जानः** भोजनं कुर्वाणः । **दोषभाक्** पापयुक्तो **न** भवेत् । **तथा श्राद्धादिदुर्भोजने** दोषयुक्तो न भवति । **अस्मिन्** पूर्वोक्तवत् ध्यानयुक्तदेशिकवरे सकृदेव एकवारमेव । यस्य गृहे **भुङ्क्ते** भोजनं कुर्वति सति तस्य वेदविदुषां वेदशास्त्रार्थज्ञानयुक्तानां **कोटिः भोजिता भवेत्** । कोटिब्राह्मणभोजनफलमस्यास्तीति भावः । इदमुक्तार्थः । **निश्वासोक्तं** निश्वासागमे प्रोक्तः प्रामाण्यार्थद्योतनार्थं कृतम् । **दातुः** देशिकवरे भोजनदानयुक्तस्य पुरुषस्य **त्रिसप्तकुलजाः** एकविंशतिप्रकारवंशसम्भवाः । पितृजाः सप्त । मातृजाः सप्त । आत्मजास्सप्त । एवमेकविंशतिप्रकाराः । अथवा पूर्वे दश अपरे दश आत्मना सह एकविंशतिप्रकाराः । **शिवं** शिवपदं **व्रजेयुः** गच्छेयुः ॥ १३१ ॥

पापिनां द्रव्यपरिग्रहदोषनिवारणार्थं प्रकारद्वयेनाष्टविधप्रासादन्यासं ग्रन्थद्वयेनाह—हृदीति

हृद्यन्तर्बहिरेव मूर्ध्नि नयने दक्षे च सव्ये तथा
चूडायां वदने तनौ च सकलाद्योष्ठान्तमन्त्रान्न्यसेत् ।
यद्वोष्ठ्यं सकलाङ्कके ऽमृतरुचं न्यस्येत्तथा देशिकः
हृद्देशे सकलं तु पञ्चरुचिगं भावात्तु शून्यं बिले ॥ १३८ ॥

सिन्दूरारुणसप्रभं क्षपणकं चूडापदे नेत्रयोः
शङ्खाभं खमलं कलाढ्यमरुणं चान्तस्थमब्जाम्बुजम् ।
वक्त्रे कुन्दशशिप्रभं बहिरतोऽप्यन्तस्तनौ निष्कलं
पापिद्रव्यपरिग्रहाद्यघहरो न्यासश्शतोऽर्धाधिकः ॥ १३९ ॥

हृदि हृदये ब्रह्मस्थाने **अन्तर्बहिः** हृदयस्य अन्तस्स्थाने बहिस्स्थाने च **मूर्ध्नि** मस्तके **नयने दक्षे च सव्ये** दक्षिणनयने वामनयने **चूडायां** शिखायां **वदने** मुखे **तनौ** सर्वशरीरे **सकलाद्योष्ठान्तमन्त्रान्** न्यसेत् ।

सकलं निष्कलं शून्यं कलाढ्यं खमलं कृतम् ।
क्षपणं च तथान्तस्स्थं कण्ठोष्ठं चाष्टमं स्मृतम् ॥ इति ॥

अनेन प्रकारेणोक्तमन्त्रान् यथाक्रमेण न्यसेत् । **यद्वा** अथवा अन्यो न्यासप्रकारः कर्तव्य इत्यर्थः । **ओष्ठ्यं** कण्ठोष्ठ्यमन्त्रं तथा पूर्वोक्तवत् **सकलाङ्गके** समस्तशरीरे । अमृतरुचं न्यस्येत् अमृतकान्तियुक्तमिति ध्यात्वा न्यस्येत् । **देशिकः** आचार्यः । **हृद्देशे** हृदयप्रदेशे । सकळं सकलाख्यमन्त्रं । पञ्चरुचिकं श्वेतादिपञ्चवर्णयुक्तं न्यस्येत् । **शून्यं** शून्यमन्त्रं **बिले** ब्रह्मरन्ध्रे **भावात्** ध्यानात् न्यसेत् ।

सिन्दूरारुणसप्रभं गैरिकादिधातुरक्तसमानकान्तिं **क्षपणकं** क्षपणकमन्त्रं **चूडापदे** शिखास्थाने न्यसेत् । नेत्रयोर्नयनयोः **शङ्खाभं** शङ्खवच्छुभ्रवर्णं खमळं खमलमन्त्रम् **अरुणं** रक्तवर्णं **कलाढ्यं** कलाढ्यमन्त्रं न्यसेत् । **अब्जाम्बुजं** द्विरुक्तत्वादेव श्वेतकमलरक्तकमलवत् श्वेतरक्तवर्ण**मन्तस्थं** क्षयमन्तस्थमन्त्रं **वक्त्रे** मुखे न्यसेत् । **कुन्दशशिप्रभं** कुन्दाख्यपुष्पचन्द्रसमानवर्णं **निष्कलं** निष्कलमन्त्रं शरीरे **बहिरन्तर्न्यसेत्** । **पापिद्रव्यपरिग्रहाद्यघहरो न्यासः** पापयुक्तपुरुषाणां धनधान्यपरिग्रहणेन संभूतमहापापस्य परिहारभूतो न्यासः । **शतोऽर्धाधिकः** पञ्चाशदधिकशतन्याससमः इतरमंत्राणां पंचाशदधिकशतन्यासेषु कृतेषु यावत्फलं तत्फलसमान इत्यर्थः ॥ १३९ ॥

अथ दीक्षात्मनामन्त्येष्टिविधानं त्रिभिर्ग्रन्थैराह—कुण्डमित्यादिना ।

कुण्डं हस्तमितं षडङ्गुलवृतिस्तन्मृत्स्नया वेदिका
वायौ तद्वृतिमानतोऽन्तरकरा वह्नौ चतुर्हस्ततः ।
दीर्घा चार्धतता चिता वसुनता पञ्चाधिविंशत्पदैः
भक्ता मध्यगतांश पञ्चसु धरा पीताब्जजन्माधिपा ॥१४०॥

नैर्ऋत्यां च चतुष्पदे जलहरिःश्वेतेऽसृगग्नौ शिखी
रुद्रो वाय्वसितेश्वरो हरितभे चैशे सदेशो वियत् ।
दिक्ष्विन्द्रान्तकपाशियक्षपतयो हेमासितश्वेतयु-
ग्रक्ताः पीतकृशानुकोणगपती शक्रानलौ मध्यतः ॥ १४१ ॥

सद्दीक्षाचरणाञ्चितस्य (नि)[वि]गमेऽसूनामथेष्टिर्भवेत्
आज्ञालङ्घनबुद्धिपूर्वककृतानाचारसन्देहिनाम् ।
देहारम्भकशिष्टकर्ममलिनां शुद्धौ च विश्वामर-
द्वित्रिस्थेशपितृप्रतर्पणशिवं श्राद्धेन दीक्षा ह्यलम् ॥ १४२ ॥

अत्र जलाशयसमीपे कुण्डकरणात्पूर्वं नवहस्तं सप्तहस्तं वा मण्डपं कार्यम् । उक्तं च —

नवहस्तमितं कृत्वा मण्डपं कटकावृतम् ।
सप्तहस्तप्रमाणं वा याम्यद्वारं सतोरणम् ॥ इति ॥

कुण्डं तत्र मण्डपमध्ये चतुरश्रं **हस्तमित**मेकहस्तप्रमाणं कार्यम् । **षडङ्गुलवृतिः** तस्य कुण्डस्य षडङ्गुलप्रमाणेन विस्तीर्णोन्नता एकमेखला कार्या । **तन्मृत्स्नया** तत्कुण्डोद्धृतमृत्तिकया मण्डपस्य कुण्डाद्वायुकोणे **तद्वृतिमानतः** कुण्डमेखलाप्रमाणतः षडङ्गुलोच्छ्रायत इत्यर्थः । हस्तप्रमाणविस्तीर्णा **वेदिका** कार्या । **वह्नौ** मण्डपस्य कुण्डाग्निकोणे **चतुर्हस्ततः** चतुर्हस्तप्रमाणतो **दीर्घा अर्धतता चिता** द्विहस्तविशालयुक्तशवदहनचिता खातभूमिः **वसुनता** अष्टाङ्गुलैः कृतनिम्ना सती कार्येति शेषः । कुण्डदक्षिणदिग्भागे चिताखातं कार्यमिति केचित् । उक्तं च—

तत्र हस्तमितं कुण्डं वेदाश्रं चैकमेखलम् ।
ऋत्वङ्गुलोन्नतं वायौ तन्मृदा स्थण्डिलं करम् ॥
कुण्डाग्नेय्यां चिताखातं चतुर्हस्तमितायतम् ।
अष्टाङ्गुलैश्च गम्भीरं हस्तद्वितयविस्तृतम् ॥
कुण्डदक्षिणतः कृत्वा चिताखातं क्वचिन्मतम् ।
निष्पाद्य त्रितयं चैवं गोमयेनोपलेपयेत् ॥ इति ।

कुण्डदक्षिणत इत्यत्र कुण्डस्य वामेतरपार्श्वत इत्यर्थः, न कुण्डयाम्यदिग्भागतः । तथा कामिके —

कूटं वा तु प्रपां वापि निधायैवं तदन्तरे ।
षडङ्गुलोच्छ्रयोपेतं मेखलैकयुगाश्रकम् ॥

कृत्वा कुण्डं विधानेन हस्तकं तन्मृदानिले ।
सङ्कल्प्य स्थण्डिले तद्वत् चिताखातं चतुष्करम् ॥

हस्तद्वितयविस्तीर्णमष्टाङ्गुलगभीरकम् ।
कुण्डं दक्षिणतः कुर्यात् निष्पाद्यैवं त्रयं गुरुः ॥ इति ॥

पञ्चाधिविंशत्पदैः भक्ता चिताभूमिः पञ्चविंशत्पदैर्भागीकृता कार्या । मध्यगतांशपञ्चसु पञ्चविंशत्कोष्ठमध्ये एकपदं च तत्समीपपूर्वदक्षिणपश्चिमोत्तरेषु एकैकपदं मध्यगतपञ्चपदेषु **पीता** हरिद्राचूर्णैः पीतवर्णा कार्या । अत्र **अब्जजन्माधिपा** ब्रह्माधिपयुक्ता **धरा** भूमिः पूज्या । **नैर्ऋत्यां श्वेते** तण्डुलपिष्टेन श्वेतवर्णे **चतुष्पदे जलहरिः** जलेन सह नारायणः पूज्यः । **असृगग्नौ** रक्तवर्णाग्नेयकोणचतुष्टयपदे **शिखी रुद्रः** अग्निना सह रुद्रः पूज्यः । **असिते** कृष्णवर्णे **वायौ** वायुकोणगतचतुष्पदे **ईश्वरः** पूज्यः । **हरितभे** पलाशवर्णवत् हरितकान्तौ **ऐशे** ईशानगतकोणचतुष्टये **सदेशः** सदाशिवः **वियत्** आकाशेन सह पूज्यो **भवेत् । दिक्षु** शेषितपूर्वदक्षिणपश्चिमोत्तरेषु पदेषु **हेमासितश्वेतयुग्रक्ताः** यथाक्रमेण पीतकृष्णश्वेतरक्तवर्णयुक्ताः **इन्द्रान्तकपाशियक्षपतयः** इन्द्रयमवरुणकुबेराः पूज्याः । इन्द्रादियुक्तवर्णैः तत्तत्पदानि कार्याणि । **पीतकृशानुकोणगपती** कुण्डमध्ये पीतरजसा चतुरश्रं कृशानुशब्देन रक्तमुच्यते । रक्तरजसा तन्मध्ये त्र्यश्रं विलिखेत् । कोणगपती एतत्कोणप्रासाधिपती **मध्यतः** मण्डलमध्ये **शक्रानलौ** इन्द्राग्नी पूज्याविति शेषः । क्वचित् ब्रह्मरुद्रौ पूज्यावित्युक्तौ । तथा ज्ञानरत्नावल्याम् —

कुण्डे च संस्कृते तत्र पीतेन चतुरश्रकम् ।
ब्रह्माणं मध्यमेऽभ्यर्च्य तन्मध्ये च त्रिकोणकम् ॥

रक्तेन रजसा कृत्वा कालाग्निं तत्र पूजयेत् । इति ।

सद्दीक्षाचरणाञ्चितस्य सद्दीक्षया सम्यग्दीक्षया दीक्षितस्य दीक्षोत्तरकालं शास्त्रविहिताचाराचरणेन सम्यगनुष्ठितसमयाचारस्याचार्यस्य च साधकस्य च पुत्रकस्य **चासूनां** प्राणानां **विगमे** त्यागे मृते सतीत्यर्थः । अथवा प्राणत्यागानन्तरमिष्टिरन्त्येष्टिर्भवेत् । तत्रापि सदाचारवतामाचार्यसाधकपुत्राणां षडध्वशुद्धिवर्जितान्त्येष्टिः कार्या । दीक्षासमये अध्वशुद्धेर्विहितत्वात् समयाचाररहितानामा-

चार्यसाधकपुत्राणामध्वशुद्धियुतान्त्येष्टिः कार्या । दीक्षासमये अध्वशुद्धौ जातायामपि समयाचारलङ्घनेनाध्वशुद्धेरभावात् । समयिनस्तु अध्वशुद्धिविवर्जितान्त्येष्टिः कर्तव्या । समयदीक्षायामध्वशुद्धेरभावात् । उक्तं च ज्ञानरत्नावल्याम्—

जीवान्ततत्त्वनिष्ठानां सदाचारवतां नृणाम् ।
सिद्धान्तार्थविनोदेन कालेन विगतात्मनाम् ॥

शिवाग्निना दहेद्देहं किन्तु तेषां क्रियावताम् ।
अनाचारेण युक्तानामध्वशुद्धिर्विधीयते ॥

साधकाचार्यपुत्राणां कुर्यादध्वविशोधनम् ।
नैव तत्समयस्थस्य कुर्याद्वा मोक्षकाङ्क्षिणः ॥ इति ।

आज्ञालङ्घनबुद्धिपूर्वककृतानाचारसन्देहिनां आज्ञायाः शिवशास्त्रेणैवमेवानुष्ठेयमेवं नानुष्ठेयमिति विहिताज्ञायाः लङ्घनेन त्यागेन युक्तानां तथापि बुद्धिपूर्वकेण अबुद्धिपूर्वकेण राजचोरभयादिना आज्ञालङ्घनमबुद्धिपूर्वक(त्व?)म् स्वबुद्ध्या कृताज्ञालङ्घनं बुद्धिपूर्वक(त्व?)म् कृतानाचाराणां सन्देहिनां सत्कर्मानुष्ठाने क्रियमाणे सति अनुष्ठीयमानकर्मसंस्कारजनितफलमस्ति वा नास्ति वा केन दृष्टमिति सन्देहयुक्तानां **देहारम्भकशिष्टकर्ममलिनां** ऐहिकभोगेच्छायुक्तानां देहानां कर्मारम्भकत्वेन शेषितकर्मणा मलयुक्तानां साधकादित्रयाणां **शुद्धौ** शुद्ध्यर्थमध्वशुद्धियुतान्त्येष्टिः कर्तव्या । अत्र बुद्धिपूर्वकेत्युक्तत्वादेवाबुद्धिपूर्वकत्वेन समयादिलोपयुक्तानां स्वाज्ञानादेवाकृतप्रायश्चित्तानां साधकादीनां अध्वशुद्धियुतान्त्येष्टिर्विहिता । प्रमादेन समयादिलोपयुक्तानां कृतप्रायश्चित्तानामध्वशुद्धिविवर्जितान्त्येष्टिः कार्या । तथा कामिके—

आचार्यसाधकावाप्तपुत्रकास्समयस्थिताः ।
गतासवो यदा तेषां कार्यान्त्येष्टिस्तु दीक्षितैः ॥

आचार्याद्यास्त्रयश्चैते यद्याचारविवर्जिताः ।
प्रायश्चित्तमकुर्वाणा मृताश्चान्त्येष्टिकर्मणा ॥

तत्त्वशुद्ध्या च नित्यादि कर्म सम्यगनुष्ठितम् ।
परिहृत्य निषिद्धं च यैस्तेषामप्रमादिनाम् ॥

तत्त्वशुद्धिं विहायैव केवलान्त्येष्टिरुच्यते । इति ।

बुद्धिपूर्वकृतसमयलोपयुक्तानां ज्ञानादेवाकृतप्रायश्चित्तानां तत्त्वशुद्धियुतान्त्येष्टिः कृतापि न शोधिका भवति। यदि शोधिका चेत् सर्वेषां प्रायश्चित्तशास्त्राणामानर्थक्यप्रसङ्गात् आगमवाक्यस्यापि विरोधित्वाच्च। उक्तं च—

समयोल्लङ्घनात्प्रोक्तं क्रव्यादत्वं शतं समाः। इति ॥

एवं चेत् बुद्धिपूर्वकृतानामकृतप्रायश्चित्तानामध्वशुद्धियुतान्त्येष्टिर्न कर्तव्येति प्राप्ता। तथा न भवति। कर्तव्यैव। कृतायां सत्यां शतसंवत्सरपर्यन्तं पिशाचपदभुक्त्यनन्तरं शिवपदप्राप्तिः स्यात्। अर्थादेव बुद्धिपूर्वकृतानां विहितप्रायश्चित्तानामध्वशुद्धियुक्ता कर्तव्या बुद्धिपूर्वकत्वेन कृतत्वादित्यभिप्रायः। तथा चोक्तं द्विशतिकालोत्तरे —

दीक्षितस्तूत्तरे काले समयान्यस्तु लङ्घयेत्।
देवस्य च गुरूणां च महापातकभाग्भवेत् ॥

अमुक्तसंशया ये च ये चान्ये समयात्मकाः।
तेषां पापापनोदार्थमन्त्येष्टिः कथिता मया ॥ इति ॥

तद्वृत्तौ—दीक्षोत्तरकालमज्ञानेन त्यक्ताचारस्याज्ञानादेवाकृतप्रायश्चित्तस्य समयाचारलङ्घनस्य शुद्ध्यर्थं अन्त्येष्टिः कथिता न बुद्धिपूर्वकृतगुरुद्रोहादेरेषा शोधिका। तथा सति सर्वेषां प्रायश्चित्तशास्त्राणां आनर्थक्यप्रसङ्गात्। श्रुतिविरोधश्चात्र श्रूयते—

समयोल्लङ्घनात्प्रोक्तं क्रव्यादत्वं शतं समाः। इति।

विश्वामरद्वित्रिस्थेशपितृप्रतर्पणशिवश्राद्धेन दीक्षा विश्वे विश्वेदेवौ अमरा देवाः। एते यथाक्रमेण द्वित्रिसंख्यायुक्ताः विश्वेदेवौ द्वौ देवाः त्रय इत्यर्थः। तत्संख्यया विद्यमानेशपितरः ईशसदाशिवशान्ताः। एतैर्नामधेयैर्यथाक्रमेण पितृपितामहप्रपितामहाः रुद्रानन्तसंज्ञकौ विश्वेदेवौ। एतेषां पितॄणां प्रतर्पणेन भोजनादि(मा)[दा]नेन क्रियमाणं शिवश्राद्धमित्युच्यते तेन श्राद्धेन सहिता दीक्षा ह्यलं समर्था भवति सम्यक् फलदा इत्यर्थः। अनेन श्राद्धमवश्यं कर्तव्यमिति सूचितम्। पितृसंबद्धऋणापहत्वादित्यभिप्रायः। पुत्रशिष्यादिभिः पितृगुरूनुद्दिश्य सत्पात्रेषु भोजनादिदानेन यत्क्रियते तच्छ्राद्धमित्युच्यते। उक्तं च—

अथ[शिव]श्राद्धविधिं वक्ष्ये गुर्वादीनामृणापहम्।
ऋणमस्खलिताचारो मुनीनामपि नित्यशः ॥
गुर्वादीनामृणं दद्यात् दीक्षितः श्राद्धकर्मणा।
श्रद्धया दीयते शिष्यैर्गुरूनुद्दिश्य यद्धनम्।
सत्सु पात्रेषु विद्वद्भिः तद्धि श्राद्धमुदाहृतम् ॥ इति ॥

रुद्रानन्तसंज्ञकविश्वे(देवाभ्या)[देवाना]मीशसदाशिवशान्तसंज्ञपितृभिः[पितृपितामहप्रपितामहानां] क्रियमाणं श्राद्धं शिवश्राद्धमित्युच्यते। तथा कामिके—

ईशस्सदाशिवश्शान्तः शिवश्राद्धे प्रकीर्तिताः।
रुद्रोऽनन्तश्च कथितौ विश्वेदेवा इति द्विजाः ॥ इति।

तथाऽन्यत्रापि—

ईशस्सदाशिवश्शान्तः शिवश्राद्धमुदीरितम्।
तत्राह्वानं हृदा कार्यं ईशस्य पितृसंज्ञया ॥
सदाशिवं स्वमन्त्रेण कल्पयेत्तु पितामहम्।
शिवस्स्वसंज्ञमूलेन कल्पयेत्प्रपितामहम् ॥ इति ॥

शिवधर्मिण्या दीक्षितानामेवं कार्यम्। लोकधर्मिण्या दीक्षितानां रुद्रपदप्राप्तानां विश्वेदेवौ नन्दिमहाकाळौ चण्डस्कन्दगणाधीशाः पितरः। भुवनेशपदप्राप्तिनिमित्तया लोकधर्मिण्या दीक्षितानां ब्रह्मविष्ण्वीशाः पितरः यमारुणौ विश्वेदेवौ। तथा सोमशम्भौ—

ईशस्सदाशिवश्शान्तः शिवश्राद्धे तपस्विनः।
रुद्राह्वयश्च नागश्च विश्वेदेवौ स्थितौ द्वयौ ॥

दीक्षितानाममी देवा रुद्रांशानामतोऽन्यथा।
तत्र नन्दिमहाकाळौ विश्वेदेवौ गणौ द्वयौ।
चण्डस्कन्दगणाधीशा गणास्त्रिषु यथाक्रमम् ॥
लौकिके ब्रह्मविष्ण्वीशाः विश्वेदेवौ यमारुणौ।
पञ्चाभावे तु सर्वत्र पूज्यते पुरुषद्वयम् ॥
शिरस्कन्धविभागेन त्रयमेकत्र कल्पयेत्।
बाहुमूलविभेदेन विश्वेदेवौ द्वितीयके ॥

एकत्र बाहुयुग्मेन सह वा पञ्च कल्पयेत् ॥ इति ॥

तच्छ्राद्धं नित्यादिभेदेन पञ्चविधम् । तथा कामिके—

नित्यं नैमित्तिकं काम्यं वृद्धिः पार्वणमेव च ।
प्रोक्तं पञ्चविधं श्राद्धं ज्ञात्वा कर्म समाचरेत् ॥
नित्यं दद्यादहरहः निमित्तं स्यान्मृतेऽहनि ।
कामाय तु हितं काम्यं कुम्भे पार्वणमिष्यते ॥
वृद्धिश्राद्धं विवाहादौ एवं पञ्चविधं भवेत् । इति ॥ १४२ ॥

प्रतिष्ठेति स्थापनमिति स्थितस्थापनमिति उत्थापनमिति आस्थापनमिति प्रतिष्ठा पञ्चविधेत्याह—**पीठमिति** ॥

पीठं लिङ्गमुमा शिवस्तदनयोर्योगः प्रतिष्ठोदिता
विध्युक्तः परदृक्क्रियात्मकतनुः सा पञ्चधैवोदिता ।
लिङ्गे ब्रह्मशिलादिके शिवयुते पीठे स्थितस्थापनं
बाणे स्थापनमेव बेरजमनु यच्चास्थापनोत्थापने ॥ १४३ ।

पीठं पिण्डकं **लिङ्गं** परमेश्वरपूजाधिकरणत्वेन शिलादिनिर्मितं लिङ्गमित्युच्यते । यथाक्रमेण पीठमुमा शक्तिर्लिङ्गं शिवः **तत्** तस्मात्कारणात् **अनयो** रुमाशिवयोर्**विध्युक्तः** शिवशास्त्रोक्तो **योग**स्सम्बन्धः **प्रतिष्ठा** प्रतिष्ठेति **उदिता** उक्ता भवति प्रकर्षेण तिष्ठन्त्यनया अस्यां प्रकृतौ देवा इति प्रतिष्ठा । **परदृक्क्रियात्मकतनुः** उत्कृष्टज्ञानशक्तिक्रियाशक्तिस्वरूपः । अत्र ज्ञानशक्तिस्वरूपदेहेन लक्ष्यं लिङ्गमित्युच्यते । क्रियाशक्तिस्वरूपदेहेन लक्ष्यं पीठमित्युच्यते । अनेन शिवस्य शक्तिदेहत्वमधिष्ठानं मूर्तिभूतं द्विविधम् । ज्ञानशक्त्यात्मकं लिङ्गं क्रियाशक्त्यात्मकं पीठम् तयोः यथार्थवेदिना शिवाचार्येण शास्त्रोक्तेन वर्त्मना गुणप्रधानभावेन क्रियमाणं संयोजनं सङ्ग्रहात् प्रतिष्ठाशब्दार्थ इत्युक्तो भवति । तथाहि शिवस्साक्षात् स्वयं चिद्घनात्मकत्वात् स्वसमवेतया परसंविल्लक्षणया ज्ञानशक्त्यैवास्य प्रपञ्चस्य कर्तृकरणतया स्थित इत्यधिगम्यते ॥ अत एवोक्तं श्रीमन्मतङ्गे—

अथ पत्युरधिष्ठानं स्वशक्तिकिरणात्मकम् ॥ इति ।

सा प्रतिष्ठा **पञ्चविधा** पञ्चप्रकारेण **उदिता** उक्ता भवति । तथोक्तं वरुणशिवेन —

ज्ञानशक्त्यात्मके लिङ्गे क्रियाशक्तेस्समर्पणम् ।
पीठस्य विधिना योगः प्रतिष्ठा सा च पञ्चधा ॥ इति ।

यथाक्रमेण पञ्चविधप्रतिष्ठाभेदलक्षणमाह-**लिङ्ग इत्यादिना । ब्रह्मशिलादिके** ब्रह्मशिला आधारशिला तदादिके **लिङ्गे** शास्त्रोक्तविधिना क्रियमाणप्रतिष्ठाकर्म प्रतिष्ठा इति संज्ञां लभते । अयमभिप्रायः यस्यां प्रतिष्ठायामाधारशिलास्थापनपूर्वकं तदाधारशिलागर्ते लिङ्गभागस्य प्रवेशं कृत्वा पिण्डिकया सह योगः क्रियते सा प्रतिष्ठेत्युच्यते । उक्तं च —

प्रतिष्ठा स्थापनं तद्वत् स्थितस्थापनमेव च ।
आस्थापनं चतुर्थं तत् प्रोक्तमुत्थापनं ततः ॥
प्रतिष्ठा पञ्चधा ह्येवं प्रोच्यते तद्विनिर्णयः ।
यत्र ब्रह्मशिलामध्ये लिङ्गमादौ विधाय च ॥
अव्यक्तं मुखलिङ्गं वा पीठबन्धं विधाय च ।
शुद्धलग्नं समासाद्य योगः पिण्डिकया सह ॥
क्रियते सा प्रतिष्ठा स्यात् । इति ।

शिवयुते शिवशब्देनात्र लिङ्गमुच्यते । अभिन्नत्वेन लिङ्गसहितपीठे स्फटिकादौ क्रियमाणं प्रतिष्ठाकर्म **स्थितस्थापन**मित्युच्यते । उक्तं च —

अभिन्नपिण्डिके लिङ्गे स्फटिकादौ विधीयते ।
संस्कारो मानसो यत्र स्थितस्थापनमुच्यते ॥ इति ।

बाणे बाणलिङ्गे क्रियमाणं प्रतिष्ठाकर्म **स्थापन**मित्युच्यते । उक्तं च—

धातुरत्नमयं लिङ्गं बाणं वा लोहसम्भवम् ॥
लिङ्गं तत्पञ्चधा कृत्वा त्रिधा वा संविभज्य च ।
भागद्वयमथैकं वा ज्ञात्वा लिङ्गबलाबलम् ॥
स्थापिते पिण्डिकामध्ये स्थापनं तदुदाहृतम् ॥ इति ।

बेरजं-सदाशिवमूर्त्यादिबिम्बोद्भवं प्रतिष्ठाकर्म **आस्थापन**मित्युच्यते । उक्तं च—

चतुर्हस्तादिकं लिङ्गं व्यक्तलिङ्गमथापि वा ।
पीठपिण्डिकया युक्तं कृत्वा प्रासादमध्यगम् ॥
संस्कारः क्रियते यत्र तदास्थापनमीरितम् ॥ इति ॥

यद्व-पुनः लिङ्गादि जीर्णं समुत्थीयते, तत्र लिङ्गादौ क्रियमाणं प्रतिष्ठाकर्म **उत्थापनमिति** नाम लभते । उक्तं च—

व्यग्रादिदोषदुष्टं यत् लिङ्गमुद्धृतियत्नतः ।
अन्यत्स्थापनकं यत्र तदुत्थापनमुच्यते ॥
एवं पञ्चविधा प्रोक्ता शिवलिङ्गस्य सूरिभिः ॥ इति ॥ १४३ ॥

परमेश्वरपूजार्थं लिङ्गं तावदधिकरणं, तस्मात्सलक्षणं कर्तव्यम् । लिङ्गलक्षणं तावदागमे बहुविधम् । ग्रन्थविस्तरभयात् आढ्यानाढ्य[सुरेड्य]सर्वसमांशचतुर्विधलिङ्गोन्नतिविस्तारक्रमं यथाक्रमेणाह-सार्धांशेति ।

सार्धांशावसुसार्धसिन्धुचरणोनाद्यद्रिसाङ्घ्र्यष्टको-
द्न्वन्मङ्गलनन्ददिक्फणिनगैस्त्र्यंशोन्नतिस्त्र्यष्टके ।
दैर्घ्ये चेद्विकृतैः रसाक्षजलधिस्त्र्यंशान्वितेष्वंशकैः
आढ्यानाढ्यसुरेड्यसर्वसमके लिङ्गे विदुर्विस्तृतिम् ॥ १४४ ॥

लिङ्गं तावद्द्विविधम् । चलमचलं चेति । तत्पुनः प्रत्येकं त्रिविधम् । व्यक्तं व्यक्ताव्यक्तं अव्यक्तं चेति । सकलप्रतिमादिः व्यक्तमित्युच्यते । व्यक्ताव्यक्तं सकळनिष्कळं मुखलिङ्गम् । निष्कळलिङ्गं अव्यक्तम् । गृहेषु पूजितलिङ्गं चलम् । प्रासादेषु स्थापितं लिङ्गं अचलम् स्थिरलिङ्गम् । तत् पञ्चविधम् स्वायम्भुवदैविकगाणकार्षमानुषभेदेन । तथा सिद्धान्तशेखरे—

तल्लिङ्गं द्विविधं प्रोक्तमचलं च चलं तथा ।
प्रत्येकं त्रिविधं ज्ञेयं व्यक्ताव्यक्तो भयात्मकम् ॥
प्रासादे स्थापितं लिङ्गं अचलं तच्छिलादिकम् ।
स्थापितं तचलं गेहे स्थिरलिङ्गमथोच्यते ॥
पञ्चधा तत्स्थिरं लिङ्गं स्वयम्भुर्दैवगाणकम् ।
आर्षं च मानुषं लिङ्गं तेषां लक्षणमुच्यते ॥ इति ॥

एवं स्फटिकरत्नजा[दि]लिङ्गानां लक्षणं ज्ञानरत्नावळिसिद्धान्तशेखरादिषु उक्तत्वादत्र नोक्तं तत्रैव द्रष्टव्यम् । एकहस्तादि नवहस्तान्तं शिलादिलिङ्गं कार्यम् । उक्तं च—

एकहस्तं द्विहस्तं च त्रिहस्तं कन्यसं त्रिधा ।
चतुर्भिः पञ्चभिः षड्भिः हस्तैः स्यान्मध्यमं तथा ॥
सप्ताष्टनवभिर्हस्तैरुत्तमं त्रिविधं स्मृतम् ।

एवं गृहीतलिङ्गायामे **त्र्यष्टके** त्रिगुणीकृताष्टके चतुर्विंशतिभागीकृत इत्यर्थः । **आढ्यलिङ्गे** ब्रह्मविष्णुरुद्रांशानां प्रमाणं यथाक्रमेण **सार्धांशा वसुसार्धसिन्धु** । अत्र ब्रह्मांशं चतुरश्रोन्नतं, सार्धांशा चतुर्विंशद्भागस्यैव अर्धभागसहिताष्टभागयुक्तं भवति । विष्ण्वंशं वसुः अष्टभागयुक्तं, रुद्रांशं सार्धसिन्धुः । अर्धभागसहितसप्तभागयुक्तं भवति । एवं कृतप्रमाणमाढ्यलिङ्गमित्युच्यते— तथा चोक्तम्—

लिङ्गायामार्जनं कृत्वा सार्धाष्टांशैः कजासनम् ।
सार्धसप्तभिरैशं स्यात् आढ्ये वस्वंशको हरिः ॥ इति ।

लिङ्गायामार्जनं कृत्वा, चतुर्विंशतिभागं कृत्वेत्यर्थः । कजासनं ब्रह्मांशमित्यर्थः । अत्र ब्रह्मविष्णुरुद्रांशानां यथाक्रमेण चतुरश्राष्टाश्रवृत्तानि कार्याणि । तथा सिद्धान्तशेखरे—

आयामैर्निश्चितं लिङ्गं त्रिभागं तत्प्रकल्पयेत् ।
मूले मध्ये तथोर्ध्वे च ब्रह्मविष्णुहरांशकाः ॥
ब्राह्मांशं चतुरश्रं स्यात् अष्टाश्रं विष्णुभागकम् ।
कुर्याद्वृत्तं तु रुद्रांशं षोडशाश्रमथापि वा ॥
द्वात्रिंशदश्रसंयुक्तं चतुष्षष्ट्यश्रसंयुतम् ।
नपुंसकं भवेद्ब्राह्मं स्त्रीलिङ्गं विष्णुभागकम् ॥
पुंलिङ्गं रुद्रभागं च त्रिविधं तत्प्रकल्पयेत् । इति ।

अनाढ्यलिङ्गस्य ब्रह्मविष्णुरुद्रांशानामौन्नत्यं—यथाक्रमेण **चरणोनाद्यद्रिसाङ्घ्र्यष्टकः** । अत्र ब्रह्मांशं चतुर्विंशतिभागमध्ये चरणोनाद्रि पादरहिताष्ट-

भागयुक्तं । विष्ण्वंशमद्रिः अष्टभागयुक्तं रुद्रांशं साङ्घ्रयष्टकं पादसहिताष्टभागयुक्तं भवति । एवं कृतमनाढ्यलिङ्गमित्युच्यते । उक्तं च—

सपादाष्टांशकैस्त्र्यक्षश्चक्री स्यान्मङ्गलांशतः ।
पादोनाष्टांशतो ब्रह्मा कार्यमेवमनाढ्यकम् ॥ इति ।

सुरेड्यलिङ्गस्य ब्रह्मविष्णुरुद्रांशानामुन्नतं यथाक्रमेणोद**न्वन् मङ्गलनन्दम्** ।

अत्र ब्रह्मांशमुदन्व[च्छब्दः]समुद्रपर्यायत्वात् सप्तांशसंख्यावाची अतएव सप्तभागयुक्तं भवति । विष्ण्वंशं मङ्गलं अष्टभागयुक्तम् । रुद्रांशं नन्दं नवभागयुक्तम् । एवं कृतं सुरेड्यलिङ्गं भवति । उक्तं च—

ब्रह्मांशेन हरोच्छ्रायं विष्णुमष्टांशकैस्ततः ।
ब्रह्मांशं सप्तभागेन कुर्यादेवं सुरार्चितम् ॥ इति ।

सर्वसमके लिङ्गे सर्वसमलिङ्गस्य ब्रह्मविष्णुरुद्रांशानां यथाक्रमेण **दिक्फणिनगैः कृतत्र्यंशोन्नतिः** कार्या । दिक्फणिनगानां समत्वेन सर्वेषामष्टसंख्यावाचित्वात् ब्रह्मादीनां समांशत्वेन त्र्यंशोन्नतिर्जाता भवति । एवं कृतं लिङ्गं सर्वसममित्युच्यते । तथा कामिके—

लिङ्गायामं त्रिधा कृत्वा ब्रह्मांशस्त्वेकभागतः ।
विष्ण्वंशस्तद्वदेव स्यात् रुद्रांशो भाग एव च ॥
एकांशसदृशस्तारः समखण्डोऽयमीरितः । इति ।

आढ्यानाढ्यसुरेड्यसर्वसमाख्यचतुर्विधलिङ्गानां विस्तारक्रममाह-**दैर्घ्य इति** । **दैर्घ्ये** गृहीतलिङ्गदैर्घ्ये **विकृतेः** विकारस्य षोडशसंख्याकत्वात् षोडशधा भागीकृते सति आढ्यादिलिङ्गानां यथाक्रमेण **रसाक्षजलधित्र्यंशान्वितेषु अंशकै**र्विस्तृतिः कार्या । आढ्यलिङ्गस्य विस्तारः षोडशभागमध्ये रसः ब्रह्मादिभागानां षड्भाग उक्तः । तत्र ब्रह्मादिभागानां चतुरश्राष्टाश्रवर्तुलानि कर्तव्यानि । अनाढ्यलिङ्गस्य विस्तारः अक्षमिन्द्रियवाचकत्वात्पञ्चभागाः कर्तव्याः । सुरेड्यलिङ्गस्य विस्तारः जलधिश्चतुर्भागः कर्तव्यः । सर्वसमाख्यलिङ्गविस्तारः षोडशभागस्य मध्ये त्र्यंशान्वितेष्वंशकैः त्रिभागीकारेण सञ्जातपञ्चभागैः प्रकर्तव्यः । एवं आढ्यानाढ्यसुरेड्यसर्वसमके लिङ्गे विस्तृतिं विस्तारं **विदुः** उक्तवन्तः । तथा सिद्धान्तशेखरे—

दैर्घ्यं षोडशधा कुर्यात् लिङ्गानां त्रित्रिकस्य च ।
आढ्यलिङ्गस्य विस्तारो ब्रह्मांशे तु षडंशकैः ॥
अनाढ्ये पञ्चभिर्भागैः चतुर्भिश्च सुरार्चिते । इति ।

विष्ण्वादिभागानां विस्तारस्य नोक्तत्वादेव ब्रह्मादित्रिभागानां समविस्तारः प्रकर्तव्यः । तथोक्तमन्यत्र—

ऊर्ध्वमानं समाख्यातं विस्तारः कथ्यतेऽधुना ।
दैर्घ्यं षोडशधा कृत्वा षट्पञ्चचतुरंशकैः ॥
विस्तारं चतुरश्रं स्यात् आढ्येऽनाढ्ये सुरार्चिते ।
स च सर्वसमे कार्यस्त्र्यंशकैः पञ्चभिः पुनः ॥ इति ।

तथा मोहशूरोत्तरे—

नागभक्तेश्च लिङ्गार्धे रसबाणकृतौ भवेत् ।
आढ्यानाढ्यसुरेड्येषु विष्कम्भस्सर्वतस्समे ॥
सत्रिभागैर्भवेद्बाणैर्ब्रह्माङ्गचतुरश्रकम् । इति ।

एवं ब्रह्मादिरुद्रभागान्तमाढ्यादिलिङ्गानां यथाक्रमेण षट्पञ्चचतुर्भागैः विस्तारं समत्वेन विधाय ब्रह्मादिभागानां चतुरश्राष्टाश्रवर्तुलानि कर्तव्यानि इति सिद्धानि । अत एव कारणे पञ्चभागसमत्वेन चतुरश्राणि विहितानि ।

एवं लिङ्गोच्छ्रयं प्रोक्तं वक्ष्ये लिङ्गस्य विस्तरम् ।
लिङ्गस्योत्सेधमानार्धमष्टधा विभजेत्ततः ॥
विष्कम्भः पञ्चभागं स्यात् अधस्ताच्चतुरश्रकम् ।
अधस्ताच्चतुरश्रं तु ब्रह्मभागं तदुच्यते ॥
अष्टाश्रं मध्यमं ज्ञेयं विष्णुभागं तदुच्यते ।
ऊर्ध्वं सुवृत्तभागस्तु रुद्राङ्गमिति कीर्तितम् ॥ इति ॥ १४४ ॥

आढ्यादिचतुर्विधलिङ्गानां शिरोवर्तनक्रममाह—**चन्द्रार्धमिति** ॥

चन्द्रार्धमाढ्ये त्रिपुषं त्वनाढ्ये लिङ्गे सुरेड्ये चरणायुधाण्डम् ।
छत्रं शिरस्सर्वसमेऽपि कुर्यात् पृथक् पृथग्भिन्नवपुश्चतुर्धा ॥१४५॥

शिरोवर्तनानि तावच्चतुर्विधानि भवन्ति छत्रत्रिपुषचन्द्रार्धकुक्कुटाण्डाकार-भेदेन। लिङ्गशिरोमानमष्टधा विभज्य भागैकत्यागेन समन्ततः भ्रमणाच्छत्राख्यशिरोवर्तनं भवति। शिरोमानं त्रिधा विभज्य परितो भागैकत्यागात् अर्धचन्द्राख्यशिरोवर्तनं भवति। शिरोमानं षोडशधा विभज्य समन्ततः सपादैकभागत्यागात् त्रिपुषाख्यशिरोवर्तनं भवति। त्रिपुषमिति उर्वारुकफलमुच्यते। तच्छिरआकारत्वेन कारयेदित्यभिप्रायः। शिरोमानं चतुर्धा विभज्य समन्ततो भागैकत्यागात् कुक्कुटाण्डाकृति शिरोवर्तनं भवति। तथा मृगेन्द्रे—

विभाज्यमथ सिद्धयर्थं शिरोऽष्टाभिरसस्वराः।
भागं समन्ततो जाग्रत्त्रिपुषाख्ये सपादकम्॥ इति।

तथा अन्यत्रापि—

अष्टांशस्यैकसन्त्यागात् [छत्रा]कारं भवेच्छिरः।
रसभक्ते सपादैकशातनात् त्रिपुषाकृतिः॥

श्रुत्यंशस्य परित्यागात् कुक्कुटाण्डं भवेच्छिरः।
गुणभक्तेंऽशसंत्यागात् बालेन्दुः स्यात्परिस्फुटम्॥ इति।

एवं चतुर्विधशिरोवर्तनमध्ये **आढये लिङ्गे शिरः चन्द्रार्धं** कुर्यात्। **अनाढये लिङ्गे त्रिपुषं** कुर्यात्। **सुरेढये लिङ्गे चरणायुधाण्डं** कुर्यात्। **सर्वसमे लिङ्गे छत्रं शिरः कुर्यात्।** तथोक्तमन्यत्र—

कं त्रिधा विभजेत्पूर्वं पार्श्वभागार्धविद्धु[च्यु]तात्।
कोणसूत्रक्रमेणैव भ्रमणादर्धचन्द्रकम्॥

आढ्यस्यैव तु कर्तव्यं अनाढ्यस्य तु षण्मुखम्।
पुनरस्य भवेल्लिङ्गे षोढा भक्ते तु मस्तके॥

भागद्वयपरित्यागात् त्रिपुषं मस्तकं तथा।
अनाढ्यस्य प्रकर्तव्यं नाढ्यस्य तु कदाचन॥

कुक्कुटाण्डं समाख्यातं सुरेढ्यस्य न चान्यथा।
चतुर्भागात्मके लिङ्गे चतुर्थांशपरिक्षयात्॥

छत्रं चतुर्धा कथितं तथा सर्वसमे हितम्। इति।

छत्रादीनां चतुर्विधानां शिरसां **पृथक् पृथक् चतुर्धा** चतुर्विधत्वेन **भिन्नवपुः** भेदाकृतिः कर्तव्या। तथा चोक्तम्—

छत्रं कुक्कुटमर्धेन्दु त्रिपुषं लिङ्गमस्तकम्।
एकैकस्य चतुर्भेदः कथ्यते चागमोदितः।
अष्टमांशे चतुर्भक्ते भागैकैकविलोपनात्॥
विमलं विपुलं नाम वर्तमानं तृतीयकम्।
श्रीवत्सं च चतुर्थं स्यात् कुक्कुटाण्डं चतुर्विधम्॥
तृतीयांशे चतुर्भक्ते भागभागविशातनात्।
अमृतं पूर्णकुम्भं च बलं कुमुदसंज्ञकम्॥
इत्थं चतुर्विधं चन्द्रशिरस्सर्वमभीष्टदम्।
षष्ठेंऽशे तु युगैर्भक्ते भागैकैकनिकृन्तनात्॥
विजयं च विमानं च भीमाख्यं मित्रसंज्ञकम्।
इत्थं चतुर्विधं ज्ञेयं त्रिपुषाख्ये सपादकम्॥ इति॥ १४५॥

आढ्यसुरेढ्यलिङ्गयोः यथाक्रमेणैकोत्तरसहस्रलिङ्गकमष्टोत्तरशतलिङ्गं कर्तव्यमित्याह-**एकाधिकमिति।**

एकाधिकं लिङ्गसहस्रमाढये अ(त्व)ष्टोत्तरं लिङ्गशतं सुरेढ्ये।
विशेषतस्सर्वसमे सवक्त्रमाढयेऽप्यनाढयेऽपि न देवपूज्ये॥१४६॥

आढये लिङ्गे **एकाधिकं लिङ्गसहस्रं** कर्तव्यम्। **सुरेढये** लिङ्गे **अष्टोत्तरं लिङ्गशतं** कर्तव्यम्। एकाधिकसहस्रलिङ्गाङ्ककरणे तु आढ्यलिङ्गस्य रुद्रभागोत्सेधं कृत्वा एकादशभागं एकैकभागस्य विस्तारं समन्ततः एकोत्तरनवतिभागं विभज्य तेषु विभाजितभागेषु प्रतिभागं पृथक् पृथक् लिङ्गाकाराङ्कितकरणेन एकसहस्रलिङ्गं भवति। अष्टोत्तरशतलिङ्गकरणे सुरेढ्यलिङ्गस्य रुद्रभागोत्सेधं चतुर्भागं कृत्वा एकैकभागस्य विस्तारं समन्ततः सप्तविंशतिसंख्यया विभज्य तेषु विभाजितभागेषु प्रतिभागं पृथक् पृथक् लिङ्गाकाराङ्कितकरणेनाष्टोत्तरशतलिङ्गं भवति। तथा सिद्धान्तशेखरेऽप्युक्तम्—

मुखलिंगमिह प्रोक्तं शतलिङ्गमिहोच्यते ।
सुरार्चितस्य लिङ्गस्य रुद्रभागस्य दैर्ध्यकम् ॥

चतुर्भागं प्रकुर्वीत भागेषु च चतुर्ष्वपि ।
सप्तविंशतिलिङ्गानि कारयेच्च पृथक् पृथक् ॥

एवमष्टशतं लिङ्गं रुद्रभागे भवन्ति हि ।
अधोभागस्स लिङ्गानां कुर्यालिङ्गानि नोपरि ॥

लिङ्गस्योपरिभागं च त्यक्त्वा लिङ्गानि कारयेत् ।
अष्टाधिकशतेनार्धं युक्तं तच्छतलिङ्गकम् ॥
सहस्राख्यस्य लिङ्गस्य वक्ष्यते लक्षणं ततः ।
आढ्याख्यस्य च लिङ्गस्य रुद्रभागस्य कारयेत् ॥

एकादशांशमुत्सेधं तेषु चैकैकमुत्तमम् ।
एकोत्तरनवत्यंशं तेषु लिङ्गानि कारयेत् ॥

तत्संख्यातानि तल्लिङ्गं भवेच्चैकसहस्रकम् ।
सहस्रलिङ्गमित्युक्तं सर्वकामप्रदं नृणाम् ॥ इति ।

तथा कालोत्तरे —

यत्तदाढ्यं समाख्यातं सहस्राङ्कं प्रकल्पयेत् ।
सर्वकामप्रदं तस्मात् सहस्राङ्कं ततो हितम् ॥

रुद्रवद्रुद्रभागं तु उच्छ्रायेण तु कारयेत् ।
चन्द्ररन्ध्रैस्समं तत्र विस्तारं विभजेत्पुनः ॥

एकोत्तरसहस्रं तु लिङ्गं सञ्जायते स्फुटम् ।
विषमत्वेन कार्याणि उपर्युपरि वर्जयेत् ॥

लक्ष्मरेखासमायुक्ताऽसमायुक्ताऽथवा न्यसेत् ।
अष्टोत्तरशतं चान्यत् लिङ्गं सुरगणार्चितम् ॥

उच्छ्रायं श्रुतिवत्कृत्वा विस्तारं सप्तलोचनैः ।
तेन चाष्टशतं लिङ्गं कर्तव्यं पूर्ववत्सुत ॥ इति ।

सर्वसमे लिङ्गे **विशेषतः** वैशिष्ट्येन सवक्त्रं पञ्चवक्त्रं चतुर्वक्त्राद्युक्तं मुखलिङ्गं कर्तव्यम् । तथा सिद्धान्तशेखरे —

शिरोवर्तनमित्युक्तं मुखलिङ्गमथोच्यते ।
पञ्चवक्त्रं चतुर्वक्त्रं त्रिमुखं द्विमुखं तथा ॥

एकवक्त्रमितीमानि मुखलिङ्गानि पञ्च च ।
ईशतत्पुरुषाघोरवामाजैः पञ्चवक्त्रकम् ॥

मस्तके चेशवक्त्रं स्यात् पूर्वे तत्पुरुषं मुखम् ।
अघोरं दक्षिणे भागे वामदेवं तथोत्तरे ॥

लिङ्गपश्चिमभागे तु सद्योजातं प्रकल्पयेत् ।
ईशं विना चतुर्वक्त्रं कुर्यालिङ्गं विचक्षणः ॥

पुरुषाघोरवामैश्च त्रिवक्त्रं लिङ्गमीरितम् ।
पुरुषाजातवक्त्राभ्यां द्विमुखं लिङ्गमीरितम् ॥

पुरुषेणैकवक्त्रं स्यात् इत्येवं मुखनिर्णयः ।
संस्थापयेच्चतुर्वक्त्रं प्रासादे चतुरानने ॥

पश्चिमद्वारहीनेन त्रिवक्त्रं त्रिमुखे गृहे ।

प्राक्प्रत्यग्द्वारयुग्माढ्ये स्थापयेद्द्विमुखं गृहे ॥
प्रासादे प्राङ्मुखं लिङ्गं स्थापयेदेकवक्त्रकम् ।

प्रतिमाशास्त्रमार्गेण मुखलिङ्गानि कारयेत् ॥ इति ।

आढ्येऽनाढ्ये देवपूज्ये च लिङ्गे मुखलिङ्गं न **कारयेत्** ॥ १४६ ॥

भुक्तिमुक्त्यर्थं बाणलिङ्गं पूजयेदित्याह—**बाणमिति** ।

बाणं लिङ्गमधिष्ठितेशमनिशं माषादिहस्तान्तकं
जम्बूपक्वफलोपमं मधुनिभं भृङ्गप्रभं काचभम् ।
नीलं वा प्रतिबिम्बवद्धरितभं तद्वर्णपीठं कक्कु—
प्तुल्यं गोस्तनकुक्कुटाण्डसदृशं स्निग्धं सदार्च्यं श्रियै ॥ १४७ ॥

पूर्वं बाणाख्यो नाम कश्चिदसुरः शिवपूजार्थं ईश्वरं प्रति लिङ्गानि देयानीति प्रार्थ्य प्रार्थनानन्तरं महेश्वराद्विविधानि लिङ्गानि लब्ध्वा तेषु लिङ्गेषु शिवपूजां

कृत्वा पूजासमात्प्यनन्तरं पर्वतादिषु तानि लिङ्गानि क्षिप्तवानिति पूर्वकथाप्रसङ्गः। बाणासुरेण पूजितत्वात् बाणलिङ्गमिहोच्यते। तथा कामिके—

बाणो नामासुरः प्रोक्तः स च सिद्ध्यर्थमादरात्।
प्रार्थयामास पूजार्थं लिङ्गानि विविधानि च॥
दत्तवान् लिङ्गकोटीनां चतुर्दश महेश्वरः।
तानि सम्पूज्य कालान्ते स्थानेष्वेतेषु न्यक्षिपत्॥
लिङ्गाद्रौ कालिकागर्ते श्रीनगे कन्यकाश्रमे।
कन्यातीरे च नेपाळे माहेन्द्रे चामरेश्वरे॥
अन्यत्र च नदीमध्ये पर्वते च विशेषतः। इति।

तथा सिद्धान्तशेखरे—

बाणाख्येन च दत्तानि बाणलिङ्गानि तानि हि।
स्वयम्भुसदृशान्येव कोटयश्च चतुर्दश। इति।

अनिशं सर्वकालम्, **अधिष्ठितेशं** बाणलिङ्गेऽवस्थितम्। महेश्वरं सदाशिवस्थितम्। महेश्वरात् बाणलिङ्गपूजनं श्रेष्ठमित्युच्यते। तथा चोक्तम्—

नर्मदासम्भवं लिङ्गं बाणलिङ्गमितीरितम्।
स्वायम्भुवं तथा पूज्यं सर्वलिङ्गोत्तमोत्तमम्॥
बाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम्। इति।

अधिष्ठितेशमित्युक्तत्वात् बाणलिङ्गे शिवप्रतिष्ठा कर्तव्येति सूचिता भवति।

बाणलिङ्गप्रतिष्ठां तु वक्ष्ये सङ्क्षेपतः क्रमात्।

इति कामिकेऽप्युक्तम्। माषादिहस्तान्तकं अङ्गुलाष्टमो भागो माष इत्युच्यते। माषप्रमाणमारभ्य हस्तान्तकं एक हस्तप्रमाणान्तं बाणलिङ्गप्रमाणं ग्राह्यमित्यर्थः। तथा कामिके—

माषमात्रादिहस्तान्तं तेषां मानमुदाहृतम्।
पादाङ्गुलविवृद्ध्या तु गृह्णीयाद्वा यथेच्छया॥
विस्तारनाहमानं तु बाणलिङ्गस्य नेष्यते। इति।

जम्बूपक्वफलोपमं पक्वजम्बूफलवत् समानाकारं समानकान्ति। तथा चोक्तम्—

पक्वजम्बूफलाकारं कुक्कुटाण्डसमाकृति।
भुक्तिमुक्तिप्रदं चैतद् बाणलिङ्गमुदाहृतम्॥ इति।

अथवा **मधुनिभं** माक्षिकरसेन समानकान्ति **भृङ्गप्रभं** भ्रमरवर्णं **काचभं** काचमणिसमानकान्ति **नीलं** वा कृष्णं वा ग्राह्यम्। **प्रतिबिम्बवत्**-पक्वबिम्बफलवत् रक्तवर्णम् **हरितभं** हरिद्वर्णं वा शब्देन श्वेतवर्णमपि गृह्यते। उक्तं च—

श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम्।
अभावात्कृष्णवर्णं तु सर्वजातिषु सिद्धिदम्॥
नर्मदासम्भवं लिङ्गं बाणलिङ्गं समीरितम्। इति।

तद्वर्णपीठं बाणलिङ्गं यद्वर्णेन गृहीतं तद्वर्णयुक्तशिलादिना पिण्डिकासहितं कार्यम्। तथा कामिके—

शिलामृल्लोहसद्वृक्षरत्नाद्यैः पीठिका भवेत्।
एकवर्णा भवेत् पीठी सर्वकामार्थसिद्धये॥ इति।

बाणलिङ्गस्य पिण्डिकालक्षणमन्यत्रोक्तम्। यथा—

बाणलोहादिलिङ्गानां परिणाहेन विस्तृता।
तत्त्र्यंशेन समुच्छ्रेया पिण्डिका वसुभाजिता॥
नेत्रेणांघ्रिस्तु तत्पङ्क्तिरूपेण युगळैर्न[र्ग]ळः।
कर्णपट्टिकरूपेण कलाधारं करेण तु॥
व्यासत्र्यंशेन नाळं स्यात् क्वचिदर्धेन वा मतम्। इति।

ककुप्तुल्यम्। ककुप्शब्देनात्र तत्तद्दिगधिपतयः प्रोच्यन्ते। इन्द्रादिभिः पूजितत्वात् तद्वर्णाकारयुक्तत्वेन वा समानरूपं गृह्यते। तथा सिद्धान्तशेखरे—

इन्द्रादिपूजितं लिङ्गं तत्तच्चिह्नसमन्वितम्।
आपीतं च षडश्रं च शाक्रं वज्राङ्कितं भवेत्॥
तत्साम्राज्यप्रदं लिङ्गं बाणाख्यं समुदाहृतम्।
ताम्रवर्णं च शक्त्यङ्कं लिङ्गं वा शक्तिचिह्नितम्॥

उष्णस्पर्शं तदाग्नेयं तेजोवृद्धिप्रदायकम् ।
दण्डाकारं भवेद्याम्यं यदि वा दण्डचिह्नितम् ॥

यदव्यक्तमुहूर्तेन निर्मितं जायते तथा ।
कृष्णं तच्छत्रुनाशार्थं शिवेनोक्तं शिवागमे ॥

खड्गाभं खड्गचिह्नं वा नैर्ऋतेर्लिङ्गमीरितम् ।
धूम्राभं शत्रुविद्वेषे नियोक्तव्यं विशेषतः ॥

वारुणं वर्तुलाकारं पाशाङ्कं शुक्लवर्णकम् ।
तोयमध्ये गते तस्मिन् तोयं तत्स्वादु निर्मलम् ॥

वायव्यं धूम्रवर्णं स्यात् लिंगध्वजविभूषितम् ।
तन्मूर्ध्नि निहितं तूलं निर्वातं चलति ध्रुवम् ॥

उच्चाटनेन तल्लिंगं कर्तव्यं तत्र पारगैः ।
गदाकारं गदाङ्कं वा मध्यस्थलसुवर्णवत् ॥

सस्यमध्ये स्थिते तस्मिन् सस्य(बुद्धि)वृद्धिर्भवेद्दिने ।
रात्रौ वा तत्कुबेरस्य लिंगं सर्वसमृद्धिदम् ॥

शूलाभं वा त्रिशूलाङ्कं हिमकुन्देन्दुसन्निभम् ।
ईशानस्य तदा दृष्टं लिंगं सर्वार्थसाधनम् ॥

शङ्खचक्रगदापद्मं श्रीवत्सं स्वस्तिकाङ्कितम् ।
मत्स्यकूर्मवराहादिचिह्नं वा वैष्णवं स्मृतम् ॥

लिंगं तत् सर्वकामार्थं बाणलिङ्गेषु चोदितम् ।
पद्मांकं पद्मवर्णं च कुण्डिकाक्षविभूषितम् ॥

स्रुग्दण्डचिह्नितं वापि ब्राह्मं पुत्रादिवृद्धिदम् ।
सर्वेषां बाणलिङ्गानां साधारणमथोच्यते ॥

त्रिवारं पञ्चवारं वा तुलायां तुलितं तु यत् ।
साम्यं न याति चेल्लिंगं तदा तद्बाणमुच्यते ॥

अथवान्यप्रकारेण लक्षणं तस्य कथ्यते ।
नद्यां वा प्रक्षिपेत् भूयो यदा तदुपलभ्यते ॥
बाणलिंगं तदा ज्ञेयं शेषं पाषाणवत् त्यजेत् । इति ।

गोस्तनकुक्कुटाण्डसदृशं स्निग्धं दर्पणवच्छ्लक्ष्णं बाणलिङ्गं **सदा सर्वकालं श्रियै** भुक्तिमुक्त्यर्थं **अर्च्यं** पूज्यं भवेत् ॥ १४७ ॥

अथ बाणलिङ्गं पूजानिषिद्धमाह—**वर्ज्यमिति ।**

वर्ज्यं कर्कशरूक्षकुब्जमगुरु स्थूलं शिताग्रं कृशं
त्र्यश्रं दैर्घ्यसिताह्यलक्षणसुषित्रास्यन्त्यजातिक्षतम् ।
रेखाबिन्दुकळङ्कशूलि चिपिटं पिङ्गं स्फुरद्धीरकं
पीठं वा स्फुटितं सकर्णिकमिदं सर्वं मुमुक्षोश्शुभम् ॥१४८॥

कर्कशरूक्षकुब्जं कर्कशं अतिकठिनं बाणलिङ्गं **वर्ज्यं** त्याज्यम् । उक्तं च—

कर्कशे बाणलिंगे च पुत्रदारक्षयो भवेत् ।

तथा **रूक्षं** दर्दरं त्याज्यं **कुब्जमतिह्रस्वं अगुरु** भाररहितं लघ्वित्यर्थः । **स्थूलं**-अतिस्थूलं **शिताग्रं** कृशिताग्रं **कृशं** अतिकृशं, **त्र्यश्रं** त्रिकोणं **दैर्घ्यसिताह्यलक्षणसुषित्रास्यन्त्यजातिक्षतं दैर्घ्यं** अतिदैर्घ्यं **असिताहि** अतिकृष्णवर्णं **अलक्षणं** उक्तलक्षणरहितं, **सुषित्रास्यं** वक्रशिरः **अन्त्यजातिक्षतं** अत्यन्तहीनजातिस्पृष्टं तेषां गृहे स्थितमित्यर्थः । छन्दोभङ्गानुरोधेनाकारलोपः । अथवा सुषित्रं सुषित्ररूपं असि खङ्गाकारं **रेखाबिन्दुकळङ्कशूलि** रेखादिचिह्नयुक्तं त्रिशूलाकारं **चिपिटं** मध्ये श्वेतवर्णयुक्तं **पिङ्गं** अग्रे कपिलवर्णयुक्तं, **स्फुरद्धीरकं** प्रकाशमानहीरकाख्यफलाकारदोषयुक्तं **पीठं वा** एवंलक्षणयुक्तं पीठमपि त्याज्यम् । **स्फुटितं** स्फोटनयुक्तं **सकर्णिकं** कर्णिकासहितं एवं पूर्वोक्तदोषसहितं बाणलिङ्गं वर्जयेत् । इदं सर्वं पूर्वोक्तदोषसहितं समस्तं बाणलिङ्गं **मुमुक्षोः** मुक्तिकामस्य नैष्ठिकस्य लिङ्गिनश्च **शुभं** मङ्गलं पूज्यमित्यर्थः । उक्तं च —

चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ।
एकपार्श्वे क्षते धेनुपुत्रदारधनक्षयः ॥
शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च ।
अन्त्यजातिविलग्नं तु सर्वगात्रक्षयो भवेत् ॥

चित्रलिङ्गेऽर्चिते बाणे विदेशगमनं भवेत्।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधितो जायते पुमान् ॥

अग्रं स्यात्कपिलं लिङ्गं शुभदं मोक्षकांक्षिणाम् ।
लघु वा कपिलं स्थूलं गृही नैवार्चयेत्क्वचित् ॥
दक्षिणाग्रं वक्रशीर्षं त्र्यश्रं लिङ्गं विवर्जयेत् ।
अतिस्थूलमतिकृशं स्विन्नं श्वभ्रघनान्वितम् ॥

गृही प्रवर्जयेत्तादृक् तं मुमुक्षोर्यथोदितम् ।
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ॥

तत्सपीठमपीठं वा मन्त्रसंस्कारसंस्कृतम् ।
विद्धि मुक्तिप्रदं बाणं सर्वप्रासादपीठगम् ॥ इति ॥ १४८ ॥

भूलोके चतुर्दशकोटिबाणलिङ्गाधिष्ठितस्थलविशेषमाह—**प्रत्येकमिति** ।

प्रत्येकं कोटिरेका ह्यमरपतिमहेन्द्राद्रिनेपालकन्या-
तीर्थारण्येषु कोटित्रितयमथ पृथक् श्रीगिरौ लिङ्गशैले ।
कालीगर्ते च पीठैर्विरहितसहितन्येव लिङ्गानि सर्व-
प्रासादोपेतपीठान्यथ हरिदधिपार्च्यानि काम्यानि च स्युः ॥ १४९ ॥

अमरपतिमहेन्द्राद्रिनेपालकन्यातीर्थारण्येषु अमरपतौ अमरेश्वराख्य-पर्वते नेपाळाख्यपर्वते महेन्द्राख्यपर्वते कन्यातीर्थारण्येषु कन्यातीर्थसमीपस्थिताश्रमेषु **प्रत्येकं** पृथक् पृथक् **कोटिः** स्थिता । एवं पञ्चकोटिः **श्रीगिरौ** श्रीशैलपर्वते **लिङ्गशैले** लिङ्गाख्यपर्वते **कालीगर्ते** कालीगर्ताख्यपर्वते **पृथक्** प्रत्येकं कोटि-त्रितयं स्थितम् । एवमनेककोटिः । सर्वैर्मिळित्वा चतुर्दश कोटयः । तथा सिद्धान्त-शेखरे—

स्वयम्भुसदृशान्येव कोटयश्च चतुर्दश ।
लिङ्गाद्रौ कोटयस्तिस्रः तिस्रः श्रीपर्वतेऽपि च ॥

तिस्रश्च काळिकागर्ते कोटिरेका महेन्द्रके ।
महेश्वरे च नेपाळे कन्यातीर्थे तदाश्रमे ॥
एकैका कोटिरित्युक्ता तेषां लक्षणमुच्यते । इति ।

पीठैर्विरहितसहितान्येव । चतुर्दशकोटिबाणलिंगानां मध्ये कानिचित् लिङ्गानि पीठरहितानि कानिचित् लिङ्गानि पीठसहितानि दुर्लभानि । **सर्वप्रासादो-पेतपीठानि** । सर्वप्रासादेषु मृद्दारुशैलादिभिर्निर्मितालयेषु सर्वपीठेषु मृद्दारुशिला-लोहकाञ्चनादिभिर्निर्मितपीठेषु पीठरहितलिङ्गानि प्रतिष्ठातव्यानि । उक्तं च—

नर्मदासम्भवं लिङ्गं बाणलिङ्गमुदीरितम् ।
सर्वप्रासादयोग्यं च सर्वपीठार्हकं मतम् ॥ इति ।

हरिदधिपार्च्यानि बाणलिङ्गेषु मध्ये चेन्द्रादिदिक्पालैः पूज्यानि लिंगानि **काम्यानि** फलदातृत्वात् । इन्द्रादिदेवानामिन्द्रादिपदप्राप्तिहेतुत्वादिति भावः । फलार्थिभिस्तान्येव लिङ्गानि पूजितव्यानि । अत एव काम्यलिङ्गानि भवन्तीति भावः ॥ १४९ ॥

मण्डूकाख्यचतुष्षष्टिपदयुक्तवास्तूद्धारक्रममाह—**क्षेत्र इति** ।

क्षेत्रे चाष्टपदीकृते यमरसै रज्ज्वष्टकं वंशकौ
कोणस्थौ विधिरन्तरे श्रुतिपदे पूर्वादिषड्भागगाः ।
चत्वारस्त्रिदशाः विदिक्स्थपतयो द्वौ द्वौ पदस्थौ बहिः
(कोणार्धेषु तथापरेऽष्टप[दगा]दिका) बाह्येऽन्य ऐशेन्द्रतः ॥१५०॥

क्षेत्रे गृहीतभूस्थले । **अष्टपदीकृते** प्राचीमुखैरुत्तरमुखैर्नवसूत्रैश्चतुरधिकषष्टि-पदीकृते सति तत्र चतुष्षष्टिपदे कृते **यमरसैर्यम**शब्देन द्वित्वसंख्योच्यते रसशब्देन षट्संख्या (द्विपदैः) [द्वित्वसंख्यया च पदं] षट्पदैरित्यर्थः । ईशानकोणपदात् समीपस्थं याम्यपदमेकं तदीशानकोणात्समीपस्थं पश्चिमपदमेकं गृहीत्वा, तत्र द्विपदेऽग्निकोणादारभ्य वायुकोणान्तं कर्णसूत्रवद्रज्जुप्रदानेन द्विपदगतैकरज्जुर्भवति अग्निकोणपदात्समीपस्थोत्तरपदमेकं तदग्निकोणात् समीपस्थपश्चिमपदमेकं गृहीत्वा तत्र द्विपदे ईशाननिर्ऋतिपर्यन्तं कर्णसूत्रवद्रज्जुप्रदानैर्द्विपदगतैकरज्जुर्भवति । एवं निर्ऋतिवायुकोणयोः तत्समीपस्थद्विपदयोः रज्जुप्रदानेन द्विपदगताश्चतस्रो रज्जवः प्रोक्ताः ।

ईशानकोणपदात् याम्यगततृतीयपदं गृहीत्वा तत्पदस्येशानकोणादारभ्य कोणसम्मार्गेण षट्पदपर्यन्तं कर्णसूत्रवद्रज्जुप्रदानेन षट्पदगतैकरज्जुर्भवति । अग्निकोणादुत्तरगततृतीयपदमारभ्य षट्पदपर्यन्तं कर्णसूत्रवद्रज्जुप्रदानेन षट्पद-

गतैकरज्जुर्भवति । एवं निर्ऋतिवायुकोणयोर्युक्त्या रज्जुप्रदानेन षट्पदगताश्च-तस्रो रज्जवः प्रोक्ताः । एवं रज्ज्वष्टकं वास्तुपुरुषबन्धनकरपाशाष्टकं प्रोक्तम् । तथा सिद्धान्तशेखरे —

रज्जवोऽष्टौ सकोणस्थाश्चतस्रो द्विपदस्थिताः ।
चतस्रष्षट्पदास्तासां नाम वक्ष्ये यथाक्रमम् ॥ इति ।

तथा सोमशम्भौ —

कोणेषु विन्यसेद्वंशौ रज्जूरष्टौ त्रिकोणगाः ।
द्विपदाष्षट्पदास्ताश्च वास्तुं तत्रार्चयेद्यथा ॥

आकुञ्चिकवचं वास्तुमुत्तानमसुराकृतिम् ।
स्मरेत्पूजासु कुड्यादिनिवेशे त्वधराननम् ॥ इति ।

एवं वास्तुबन्धनपाशाष्टकरणं प्रोक्तं, पाशाष्टकैर्वास्तुबन्धनं किंनिमित्तं जातमित्यत्र पूर्वकथाप्रसङ्गश्चोच्यते । वास्तूत्पत्तिः कल्पभेदेन बहुविधा भवति । अन्धकासुरसङ्ग्रामे हरकोपादुत्पत्तिरिति । तथा सिद्धान्तशेखरे —

अन्धकासुरसङ्ग्रामे पुरा क्रुद्धस्य शूलिनः ।
आपतत्स्वेदपानीयं ललाटाद्भुवि भूषणम् ॥

अभूत्स्वेदोदकोद्भूतस्त्रैलोक्यग्रसनक्षमः ।
शिवाज्ञप्तेन भूतेन तेन पीतेन शोणितम् ॥

भूगतस्यान्धकस्यापि तथा तृप्तिर्न चाभवत् ।
तदा शिवस्य पुरतः तपश्चक्रे सुदारुणम् ॥

ततः कालेन सन्तुष्टश्शिवस्तस्मै वरं ददौ ।
शरण्योऽसौ भवेत्तेन त्रैलोक्यग्रसनक्षमः ॥

न्यरुन्धत्स्वेन देहेन त्रैलोक्यं स महासुरः ।
तदा भीतास्सुरास्सर्वे श्रीकण्ठं शरणं ययुः ॥

देवानां रक्षणार्थाय श्रीकण्ठः करुणानिधिः ।
रुद्रं चातिबलं नाम मायापाशान् ततोऽसृजत् ॥

पाशैरतिबलो रुद्रो बद्ध्वा तचाष्टभिस्ततः ।
कृत्वा चोर्ध्वमुखं दैत्यं चिक्षेप धरणीतले ॥

ब्रह्मादीनां च देवानां दैत्यदेहे बलात्प्रभुः ।
निवासमकरोत्तेन वास्तुदेवाधिवासनात् ॥

एवं वास्तुस्समाख्यातः ब्रह्मणो दिवसावधि ।
देवैरधिष्ठितश्शेते तावत्कालं शिवाज्ञया ॥

अन्यथा तस्य वोत्पत्तिः चोदिता च शिवागमे ।
शुक्रकोपात्समुद्भूतो वास्तुर्यज्ञापहारकः ॥

तस्योच्यतेऽन्यथा जन्म वराहेण यदोद्धृता ।
मही तदाद्रयस्सर्वे सपक्षास्सकलं जगत् ॥

पीडयन्ति स्म तत्काले पक्षाश्छिन्ना बिडौजसा ।
पक्षभारसमाक्रान्ता धरणी पन्नगैस्सह ॥

तदा मुमोच निश्वासं मुमुचुः पन्नगा विषम् ।
विषमात्समुद्भूतो वास्तुरित्यभिधीयते ॥

एवं वास्तुसमुत्पत्तिः बहुधा कीर्तितागमे ।
कल्पभेदेन तन्त्रज्ञैः व्यवस्थाप्या विचक्षणैः ॥

ईशानमस्तकः क्रुद्धो नैर्ऋत्यां गतपादकः ।
हृदञ्जलिरधोवक्त्रः स्थिरवास्तुः प्रकीर्तितः ॥

कन्यादिमासत्रितये प्राक्छिरोऽचलवास्तुकः ।
चापादिमासत्रितये वास्तुर्दक्षिणमस्तकः ॥

मीनादिमासत्रितये वास्तुः प्रत्यक्छिरोऽचलः ।
शेषे च मासत्रितये वास्तुरुत्तरमस्तकः ॥
पूजाकाले समुत्तानस्ततोऽवाङ्मुख उच्यते । इति ।

कोणस्थौ ईशान निर्ऋत्याग्नेयवायव्यकोणे विद्यमानौ यथाक्रमेणोर्ध्वाधोभागस्थौ **वंशकौ**वित्युच्येते । तौ यथाक्रमं दुर्धरदुर्जयनामकौ भवतः । उक्तं च—

तिर्यगूर्ध्वस्थितौ वंशौ दुर्जयो दुर्धरस्तथा । इति ।

रज्ज्वष्टकनामानि यथा—

कर्णयोः पादगुल्फे च क्रीडनी बन्धिनी ततः ।
संवर्ता च विवर्ता च जानुकूर्परसङ्गमे ॥

...AN INSTITUTE ... XFORD

हृद्गुह्यकुक्षिमार्गेषु सद्भावा जननीति च ।
पक्षी यक्षीति विज्ञेया रज्जवोऽष्टौ च नामतः ॥

प्रागग्राण्युत्तराग्राणि वास्तोस्सूत्राणि नाडयः ।
लक्ष्मीर्यशोवती कान्ता स्वप्रिया विमला शिवा ॥

सुभगा सुमती सारा नाड्यः प्राचीमुखोद्गताः ।
धन्या प्राणा विशाला च स्थिरा भद्रा जया निशा ॥

विरजा विभवा चैता नाड्यस्सौम्यमुखास्स्मृताः ।

तत्र मर्माणि यथा—

समस्तनाडीसम्पातः सन्धिरित्यभिधीयते ।
महामर्म तदित्याहुः ब्रह्मस्थाने यदुच्यते ॥

अष्टसूत्रसमायोगादम्बुजं परिकीर्तितम् ।
वंशरज्ज्वात्मकं सूत्रं सम्पुटं कोणसङ्गतम् ॥

तस्यार्धेन हलं कोष्ठचतुष्के स्वस्तिकं मतम् ।
रज्जूर्ध्वं रज्जुवंशोर्ध्वं महास्वस्तिकमुच्यते ॥

वज्रं षट्सूत्रसंयोगात् शूलं कोणे तदर्धतः ।
सूत्रपञ्चकसंयोगात् मणिबन्धः प्रकीर्तितः ॥

सुप्रान्तनाडीसम्पातः त्रिकरं मणिबन्धयुक् ।
सुविशुद्धपदं यत्र रज्जुवंशविवर्जितम् ॥

एवं द्वादश मर्माणि शतमष्टोत्तरं परम् ।
सूक्ष्ममर्मसहस्रं तु वर्जनीयं प्रयत्नतः ॥ इति ॥

(To be continued on the Vol, XX Part II)

தமிழக வரலாற்றின் சில குறிப்புகள்

வண்புகழ் மூவர் தண்பொழில் வரைப்பாகிய தமிழகத்தே செந்தமிழ்நாடென்று சிறப்பித் தோதப் பெறுவது பாண்டி நன்னாடு. அந்நாட்டகத்தே படைப்புக் காலந் தொட்டே பெருமை பெற்றுவந்த பாண்டிய மன்னர்கள் அரசுவீற்றிருந்த தலைநகராய் விளங்கியது மதுரைமாநகரம். திரிபுரமெரித்த விரிசடைக் கடவுளொடு நல்லிசைப் புலவர் பல்லோர் பன்னெடுங் காலஞ் சங்கத்தமர்ந்து அமிழ்தினுமினிய தமிழ்மொழியாய்ந்ததும் சான்றோர் பலரால் பாராட்டப் பெற்றதுமாகிய அம்மதுரைமாநகரின்கண் வீற்றிருந்து வாழையடி வாழையாக அரசோச்சிய மன்னர்களின் வரலாற்றினை நிரல்நிறையாகத் தொகுத்துச் சுருங்கக்கூறுந் திறத்ததாய் "மதுரைப் பாண்டிய மன்னர் சரித்திரம்" என்னும் பெயரொடு டி. 27[illegible]9 ஆம் எண்ணில் இந்நூலகத்துப் பாதுகாப்பிலிருந்துவரும் ஓலைச்சுவடியே இவ்வெளியீட்டின் மூலப்படியாகும்.

பிரம்மதேவருடைய பகல் ஆயிரம் சதுர் யுகத்தில் பதினான்கு மனுக்கள் ஆண்டனர் எனவும் அவர்களில் ஆறாவது மனு ஆண்டகாலத்தே ஐம்பத்தாறுமன்னர்கள் அரசு செலுத்தினர் எனவும் தொடங்கி, அம்மனுவினது குலத்தில் தோன்றிய சூரியகுலத்தார், சந்திர குலத்தார் என்ற இரு பிரிவினருள் சந்திரகுல மன்னர்களே பாண்டிய நாட்டில் செங்கோலோச்சினர் எனக்கூறியுள்ள முதற்பகுதி ஆய்தற்குரிய தொன்றாகும்.

மதுரை மாநகரினைத் தோற்றுவித்துச் சுந்தரேசுவரரைக் கண்டு வணங்கிக் களித்த குலசேகரபாண்டியன், மணலூரிலிருந்து அரசாண்டவன் என்பதும் அவனது மகனாகிய மலையத்துவச பாண்டியனின் ஆட்சியில் தோன்றிய மீனாட்சியம்மையின் திருவவதாரமும் இறைவன் பாண்டியனின் மருகனாகி சுந்தரபாண்டியனாக அரசுவீற்றிருந்தகாலை நிகழ்ந்த வெள்ளியம்பலத்தாடியது, குண்டோதரனுக்கு அன்னமிட்டது, அன்னக்குழியும் வையையுமழைத்தது, எழுகடலழைத்தது, மலையத்துவசனையழைத்தது போன்ற திரு

F.149. ऽनुमननं करोति। एतदुक्तं भवति। यथा राजा दैवज्ञेन पृष्ट एवं वक्ति यथा रिपुनिधनप्रणिधानं प्रति मम मनो न प्रोत्सहते तदान्यस्मिन् काले पुनरपि नृपः पृष्टव्यः। नैवं यतश्चिरेणापि कालेन तस्य मनोऽनर्थमनुमन्यत इति ॥

अन्यदप्याह ॥

निमित्तानुचरं सूक्ष्मं देहीन्द्रियमहत्तरम्।
तेजो ह्येतच्छरीरस्थं त्रिकालफलविन्नृणाम् ॥ [14,5]

यदेतन्मनस्तन्निमित्तानुचरं निमित्तानां शुभाशुभानामनुचरं पश्चाद् गच्छेत्। सूक्ष्ममतीन्द्रियं तथा देहस्य शरीरस्येन्द्रियाणां बुद्धीन्द्रियाणां च महत्तरमतिशयेन महत्। हि यस्मात्तेज आत्ममंनसा संपृक्तं शरीरस्थं किल त्रिकालफलवित् त्रिकालं फलं भूतं भाव्यं भविष्यन्नृणां वेत्ति जानाति ॥

अन्यदप्याह ॥

प्रीतये न मनो ऽनर्थे नासिद्धावभिनन्दति।
तस्मात् सर्वात्मना यातुरनुमेयं यथा मनः ॥ [14,6]

अनर्थे विपरीतार्थे मनश्चितं न प्रीतये प्रीतिं न भजते। असिद्धौ पराजये नाभिनन्दति न तुष्टिमनुविददाति। तस्माद्धेतोर्नैमित्तिकेन च सर्वात्मना प्रयत्नेन यातुर्विजिगीषोरनुमेयं तर्कनीयं यथा मनश्चित्तमिति ॥

end. F 149

भट्टोत्पलविरचितायां यक्षेशमेधीययात्राविवृतौ। (चित्तशुध्यध्यायः षोडशः ॥)

Apparatus

7 त्रिकालं ह वितर्य्येणाम् C 11 त्रिकालफलवर्त्तकालं C

19 भटोत्पल° C यक्षेश्व° C

Bulletin of The Government Oriental Manuscripts Library, Madras.

அரசினர் கீழ்த்திசைச் சுவடி நூலகப் பருவ வெளியீடு

EDITED BY

R. N. SAMPATH, M.A., P. & P. A. (Dip.)

Curator, Government Oriental Manuscripts Library, Madras-600005

Volume XX 1972 Part II

கர்மயோக ஞானயோக விளக்கப் பாடல்

மாடுபுல் லைத்தின் றிறந்தாலு முத்தியோ
    மரமட்டை தின்றுழலுவீர்
மண்டூக மீனுமை சலமூழ்கில் முத்தியோ
    வருந்தியே சல மூழ்குவீர்

ஆடுதழை சருகுதின் றிறந்தாலு முத்தியோ
    அடவியிற் சருகு தின்பீர்
அண்ணர்க ளிறந்தாலு முத்தியுண் டாகுமோ
    அவரவர்கள் சன நாசமே

வீடுதனில் மூசிகம் வங்கிலுறை முத்தியோ
    வீணிலே குகையிலுறைவீர்
மென்குழவி பால்குடித் திறந்தாலும் முத்தியோ
    விரும்பியே பாலுண்ணுவீர்

ஊடுவழி யூடுருவி நாடிவழி யூடே
    உள்ளொழுகி மண்டியுயிர் போய்
உறையும்வகை யறியாமல் உழலுமவ ருபதேசம்
    உண்மையிது காண் ஒக்குமே.

மூலம் எண். R. 428 (b) - ஓலை

॥ श्रीः ॥

॥ त्रिलोचनशिवाचार्यकृता सिद्धान्तसारावलिः ॥

॥ अनन्तशम्भुकृतव्याख्यासहिता ॥

Edited by

Thiru. T. H. VISWANATHAN
Thiru. P. G. SEETHARAMAN
Thiru. R. GANESAN
(Sanskrit Pandits of this Library)

(Continued from page 48 of Volume XIX No. 2.)

इन्द्रइन्द्रजयौ वायुकोणे रुद्ररुद्रदासौ पूज्यौ भवतः। **बहिरापवत्सा-द्याह्ये** स्थितपदपङ्क्तौ **कोणार्धेषु** ईशानैकपदस्थितार्धपदे उत्तरगतार्धपदं त्यक्त्वा पूर्वगतार्धपदमारभ्य स्थितपदेषु **अपरे** ईशानादयोऽष्टदेवाः वक्ष्यमाणनामधेय-युक्ताः **अष्टपदिकाः** पूर्वपङ्क्तौ एकैकपदभाजनत्वेनाष्टपदयुक्ताः पूजनीयाः। ईशानकोणार्धे पूर्वार्धे ईशानः पूजनीयः। अग्निकोणार्धे अन्तरिक्षः पूजनीयः। उक्तं च—

ईशानार्धपदे चेशः पर्जन्यश्च जयन्तकः।
महेन्द्रश्च तथादित्यः सत्यश्च भृशकस्तथा ॥
अन्तरिक्षोऽग्निकोणार्धे शेषार्धे चाग्निरेव च ॥ इति ॥

एवमग्न्यादयोऽष्टौ याम्यपङ्क्तौ पूजनीयाः। पश्चिमपङ्क्तौ पश्चिम-पदार्धमारभ्य पित्रादयोऽष्टौ पूजनीयाः। उत्तरपङ्क्तौ उत्तरपदार्धमारभ्य वाय्वादयोऽष्टौ पूजनीयाः। बाह्यपदात् (?) अन्ये चरक्यादयोऽष्टौ देवाः पूजनीयाः। **ऐशेन्द्रतः** ईशानादितः इन्द्रादितः ईशानाग्निनिर्ऋतिवायुकोणेषु चरक्यादयश्चतस्रः पूजनीयाः। इन्द्रयमवरुणकुबेरेषु स्कन्दादयः पूजनीयाः। उक्तं च—

वास्तोर्बाह्ये चरक्याद्याः शङ्कुस्थापनवर्जिताः।
चरकी च विदारी च पूतना पापराक्षसी ॥

ईशानादिषु कोणेषु राक्षस्योऽत्र व्यवस्थिताः ।
स्कन्दोऽर्यमा च जम्भश्च पिलिपिञ्छग्रहा इमे ॥
वास्तुबाह्ये क्रमाद्दिक्षु सम्पूज्याः पदवर्जिताः । इति ॥ १५० ॥

एकाशीतिपदवास्तूद्धारपूर्वकं त्रिपञ्चाशद्वास्तुदेवतानामान्याह - **एकाशीतीति** ।

एकाशीतिपदेऽब्जजो नवपदः षट्त्रिस्थरज्ज्वष्टकं
चापाद्या द्विपदा मरीचिकमुखाः षड्गाः पदस्थाः परे ।
ब्रह्माद्योऽथ मरीचिकश्च सविता सावित्रवैवस्वतौ
इन्द्रश्चेन्द्रजयोऽथ मित्र इतरो रुद्राह्वयो रौद्रकः ॥ १५१ ॥

दासश्चाथो धराद्यो धर इति च तथापापवत्सो बहिः स्या-
दीशः पर्जन्यनामा जय इति मघवान् सूर्यसत्यौ भृशश्च ।
व्योमाख्योऽग्निश्च पूषा वितथ इति ग्रहाध्यक्षतश्श्राद्धदेवः
गन्धर्वो भृङ्गराजो मृग इति पितृदौवारसुग्रीवसंज्ञाः ॥ १५२ ॥

पौष्पोदन्तः प्रचेता इति दितितनुजः शोषरोगौ च वायुः
नागो मुख्योऽथ भल्लो विधुरिति परतः सौम्यनामादितिश्च ।
दित्याख्यो बाह्य ऐशाच्छरकिसुविदरी पूतना पापराक्ष-
स्याख्या स्कन्दोऽर्यमा जम्भक इति पिलिपिञ्छो ग्रहाः
पूर्वतश्च ॥ १५३ ॥

एकाशीतिपदे पूर्वोत्तराग्रदशसूत्रेणैकाशीतिपदीकृते क्षेत्रमध्ये **अब्जजः** ब्रह्मा **नवपदः** नवपदयुक्तः । नवपदे ब्रह्मा पूज्य इत्यर्थः । **षट्त्रिस्थरज्ज्वष्टकं** षट्पदपदस्थाश्चतस्रो रज्जवः त्रिपदपदस्थाश्चतस्रो रज्जवः । एवं रज्ज्वष्टकं भवति । उक्तं च—

शान्तिर्यशोवती कान्ता विशाला प्राणवाहिनी ।
सती वसुमती नन्दा सुभद्रा च मनोरमा ॥

दश नाड्यस्स्मृता ह्येताः प्रत्यक्प्राचीमुखोद्गताः ।
हिरण्या सुप्रभा लक्ष्मीः विभूतिर्विमला स्त्रियः ॥

जया ज्वाला विशोका च इडा चैवोत्तरामुखाः ।
वंशद्वयं यथापूर्वं रज्जवोऽष्टौ तथैव च ॥
त्रिपदा षट्पदा किन्तु ब्रह्मा नवपदे स्थितः ॥ इति

अत्र रज्ज्वष्टकविन्यासः ईशानाद्यारभ्य याम्यगतचतुर्थपदं गृहीत्वा तत्पद-समानकोणषट्पदपर्यन्तं कर्णसूत्रवदेकरज्जुः कार्या । अग्निकोणादारभ्य उत्तर-गतचतुर्थपदात् षट्पदपर्यन्तं रज्जुः कार्या । एवं निर्ऋतिवायुकोणयोः कार्या । एवं षट्पदस्थाश्चतस्रो रज्जवः । ईशाग्नित्रिपदे त्रिपदस्थाने रज्जुरेका कार्या । अग्निनिर्ऋतिवायुकोणेष्वपि कार्या । एवं त्रिपदस्थाश्चतस्रो रज्जवः । एवं रज्ज्वष्टकं भवति । **आपाद्याः** आपाद्या आपवत्साद्याश्चाष्टौ देवाः द्विपदाः ब्रह्मस्थानादीशादारभ्य द्विपदे द्विपदे स्थिताः पूज्याः । **मरीचिकमुखा** मरीच्याद्याश्चत्वारो देवाः ब्रह्मस्थानात् पूर्वादिषु दिक्षु **षड्गाः** षट्पदस्थाः पूज्याः । **परे** ईशादयो द्वात्रिंशद्देवाः ईशानादिकोणादारभ्य **पदस्था** एकैकपदस्थिताः **ब्रह्माद्यो** वास्तुदेवानां मध्ये ब्रह्मा प्रथमभूत इत्युच्यते । **मरीचिकः** मरीचिरिति देवः स्वार्थे कप्रत्ययः । **सवितेति सावित्र** इति । **वैवस्वतः** विवस्वानित्यर्थः । **इन्द्र** इति **इन्द्रजय** इति । **इतरः** अन्यभूतः **मित्र** इति । **रुद्राह्वयः** रुद्र इति नामधेययुक्तः **रौद्रको** रुद्रसम्बन्धी **दासः** रुद्रदास इत्यर्थः । **धराद्यः** धराशब्दपूर्वः **धरः** धराधर इत्यर्थः । **आप** इति **आपवत्स** इति **बहिः स्यात्** बहिश्शब्दोऽत्र काकाक्षिन्यायवदुभयत्र सम्बन्धयुक्तः । पूर्वोक्तदेवाः ब्रह्मस्थानस्य समीपपङ्क्तिस्थाः । वक्ष्यमाणेशानादयो देवाः । पूर्वोक्तात् बाह्या इत्यर्थः । **ईश** इति **पर्जन्यनामा** पर्जन्य इति । **जय** इति जयन्त इत्यर्थः । **मघवान्** महेन्द्र इत्यर्थः । **सूर्य** इति **सत्य** इति **भृश** इति **व्योमाख्य** इति **अग्निरिति** **पूषा** इति **वितथ** इति **ग्रहाध्यक्ष** इति **श्राद्धदेव** इति **गन्धर्व** इति **भृङ्गराज** इति **मृग** इति **पितेति** **दौवार** इति **सुग्रीवसंज्ञः** सुग्रीव-नामधेयः इति । **पौष्पोदन्तः** पुष्पदन्त इत्यर्थः । **प्रचेता** वरुण इत्यर्थः । **दितितनुजः** असुर इत्यर्थः । **शोष** इति **रोग** इति **वायुरिति** **नाग** इति **मुख्य** इति **भल्ल** इति भल्लाट इत्यर्थः । **विधुस्सोम** इत्यर्थः । **परतः** ऊर्ध्व**मृचीति** (?) [**सौम्यनामा**] अदितिरिति **दित्याख्यो** दितिनामधेय इति **बाह्ये** पदात् बाह्ये

ऐशादीशानादारभ्य ईशानाग्निनिर्ऋतिवायुकोणेषु यथाक्रमं **चरकीति सुविदारीति पूतनेति पापराक्षस्याख्या** पापराक्षसीतिनामधेया पूजनीया। **स्कन्द** इति **अर्यमे**ति **जम्भ** इति **पिलिपिञ्छ** इति **ग्रहाः**। एते चत्वारो ग्रहनामधेया इत्यर्थः। **पूर्वतः** पूर्वादारभ्य पूर्वयाम्यपश्चिमोत्तरादिषु क्रमेण त्रिपञ्चाशद्वास्तु-देवाः पूजनीया इत्यर्थः। उक्तं च—

ब्रह्मेशपर्जन्यजयमहेन्द्ररविसत्यकाः।
भृशोऽन्तरिक्षः सप्तार्चिः पूषा वितथसंज्ञकः॥
ग्रहाध्यक्षः प्रेतपतिर्गन्धर्वो भृङ्गराण्मृगः।
पितृदौवारसुग्रीवपुष्पदन्तप्रचेतसः॥
असुरः शोषरोगौ च वायुर्नागोऽथ मुख्यकः।
भल्लाटश्चैव सोमोऽथो उरगोऽदितिरेव च॥
मरीचिश्च विवस्वांश्च मित्रश्चैव धराधरः।
आपापवत्सौ सविता सावित्रेन्द्रेन्द्रजित्ततः॥
रुद्रोऽथ रुद्रदासश्च चरकी च विदार्यथ।
पूतनापापराक्षस्यौ स्कन्दोऽर्यमाऽथ जम्भकः।
पिलिपिञ्छ इति प्रोक्तास्त्रिपञ्चाशच्च देवताः॥ इति ॥ १५३ ॥

लिङ्गपिण्डकादौ आत्मादित्रितत्वन्यासक्रमसूचनं पूर्वार्धेनोक्त्वा उत्तरार्धेनाधारशक्तिन्याससूचनं चाह - **आत्मेति** ॥

आत्माविद्याभिधानं शिव इति च पदं यच्च तत्वत्रयाख्यं
त्विच्छाज्ञानक्रियाविष्करणपदगतं ब्रह्मविष्ण्वीशदेवम्।
प्रत्यात्मस्थमथाध्वनीह कुटिलाजातं निवृत्त्यादितो
भिन्नं पूज्यपदाधरस्थजगति व्याप्त्या त्रिधावस्थितम् ॥१५४

आत्माविद्याभिधानं आत्मेति विद्येति नामधेयमुक्तं **शिव इति च** शिवनामधेययुक्तं **पदं यत् तत्त्वत्रयाख्यं** तत्वत्रयमितिनामधेयं भवति। आत्मतत्वमिति विद्यातत्वविति शिवतत्वमिति भवतीत्यर्थः। **इच्छाज्ञानक्रियाविष्करणपदगत**मिच्छाशक्ति[:] ज्ञानशक्ति[:] क्रियाशक्तिरिति प्रकटीकृतपदेषु विद्यमानं अत्र

आत्मतत्वस्य क्रियाशक्तिः। विद्यातत्वस्य ज्ञानशक्तिः। शिवतत्वस्येच्छाशक्तिः। उक्तं च—"शिवविद्यात्मतत्वं चेदिच्छाज्ञानक्रियान्वितम्" इति। अत्र ग्रन्थे आत्मतत्त्वादिना तत्त्वत्रयं चोक्त्वा इच्छादिशक्तित्रयस्य चोक्तत्वात् एकदात्मतत्वस्येच्छाशक्तित्वमस्तीति द्योतितं भवति। तथा अघोरशिवाचार्येण प्रथमं "शिवतत्वाधिपायै इच्छायै नमः" इत्युक्तत्वात्। 'तदूर्ध्वमेका। एवं पिण्डितेषु शिलावृक्षेष्वपि आत्मविद्याशिवतत्त्वानि इच्छाज्ञानक्रियासंख्ये'ति क्रियाक्रमे उक्तत्वाच्च। **ब्रह्मविष्ण्वीशदेवं** यथाक्रमेण आत्मादितत्वत्रयाणां ब्रह्मविष्णुरुद्राख्यदेवाधिपोपेतमात्मविद्याशिवान्तकम्। उक्तं च 'ब्रह्मविष्णुहरा एव लिङ्गे तत्वत्रयाधिपाः' इति। **इहाध्वनि** प्रसिद्धभूतषडध्वनि **प्रत्यात्मस्थं** प्रत्यात्मशरीरेषु उपादानभूततया विद्यमानं समस्ताध्वधारणतया च स्थितं **कुटिलाजातं** कुटिलाशक्त्युत्पन्नं उच्छूनावस्थाङ्कुराकारवत् कुटिलात्वमुपपन्नम्। अस्या ह्यशुद्धानामङ्कुराणां आधारतया शुद्धानां चोपादानतया समस्तजगदधिष्ठानात्तदाकारोपमानमुपपन्नम्। सेयमाधारशक्तिः शिवशक्त्यधिष्ठिता कुटिलेति विस्तारेणागमेषु प्रतिपादिता भवति। **निवृत्त्यादितः** निवृत्त्यादिपञ्चकलाभ्यः **भिन्नम्**। तासामपि उपादानतया स्थितमित्यर्थः। **पूज्यपदाधारस्थजगति व्याप्त्या त्रिधावस्थितं** लिङ्गस्याधः पूजनीयम्। पादशिलानामधःप्रदेशे विद्यमानभूमेर्व्यापकत्वेन त्रिधा त्रिप्रकारेणावस्थितं ब्रह्मविष्णुरुद्रभागे त्रिधावस्थितमित्यर्थः। कूर्मशिलायामाधारशक्तिः ब्रह्मादिभागत्रययुक्ता पूजनीया इत्यर्थः। उक्तं च—

अधः कूर्मशिलासीनां क्षीरोदसितविग्रहाम्।
मौळौ बीजाङ्कुराकारां शक्तिमाधाररूपिणीम्॥ इति ॥ १५४ ॥

शिलान्याससूचनमाह—धाम्न इति।

धाम्नः पादशिला त्रिखण्डसरणिर्धीचित्तमात्रान्तिका
भूतान्ता क्ष्माम्बु शब्दावधि च हुतवहः कर्मखान्तश्च वायुः।
बुद्ध्यक्षान्तं च मेधावधि च तु गगनं ब्रह्ममुख्यास्तथेशः
शर्वाद्याश्चाष्टपक्षे शशितरणिसखो यज्ञमूर्तिश्च बुद्धौ ॥ १५५ ॥

धाम्नः देवालयस्य **पादशिला** प्रथमशिला शिलया निर्मितस्य देवालयस्य शिलया कार्या। इष्टकया निर्मितस्येष्टकया कार्या। हस्तप्रमाणदैर्घ्यविस्तार-

युक्ता अष्टाङ्गुलोच्छ्रिता कार्या । अथवा तदर्धविस्तारा वा कार्या । तथा ज्ञान-रत्नावल्याम्—

शिलान्यासः प्रकर्तव्यः शिलास्ताश्च शिवागमे ।
शैलधाम्नि शिलाधस्तात् हस्तमात्रा समन्ततः ॥

हस्तमात्रा क्वचिद्दैर्घ्यात् तदर्धा विस्तरोच्छ्रिता ।
तदर्धदैर्घ्यका शस्ता प्रासादे चेष्टकामये ॥
चतुरश्रा शुभा मध्ये चक्राद्यैरंकिता नव ।

नन्दा भद्रा जया पूर्णा त्वजिता च पराजिता ॥
विजया मङ्गळाख्या च धरणी नवमी मता ।

निधिकुम्भाश्च कर्तव्याः—इति ॥ उक्तं च—

हेमताम्रमयाः कुम्भाः तदभावाच्च दारुजाः ।
हास्तिकाद्यङ्गुलाश्शस्ताः त्रिपञ्चपलमानतः ॥

हस्ते हस्ताङ्गुला वृद्धिः पलानां पञ्चभिस्तथा ।
विचित्ररचनायुक्ता लोकपालास्त्रलाञ्छिताः ॥

सुभद्रश्च विभद्रश्च सुनन्दः पुष्पनन्दनौ ।
जयश्च विजयश्चाथ कुम्भपूर्णमथोत्तरः ॥

इति कुम्भा नव प्रोक्ताः यदा नव शिलास्तदा ।
नन्दा भद्रा जया रिक्ता पूर्णा पञ्च शिलास्तथा ॥

आसां पद्मो महापद्मः शङ्खो मकरकस्तथा ।
समु[सुभ]द्रश्चेति कुम्भाः स्युः सर्वे पङ्कजलाञ्छिताः ॥

स तु रत्नौषधीगर्भकुम्भो मध्वाज्यपूरितः ॥ इति ॥

नवपक्षे मध्ये धरणी शिला स्थापनीया । तत्पार्श्वे उत्तराख्यकुम्भः स्थापनीयः । नन्दादयः पूर्वाद्यष्टदिक्षु स्थापनीयाः । तत्पार्श्वे सुभद्रादयो निधिकुम्भाः । नवशिलापक्षे निर्ऋतिदिक्स्थशिलायां विष्णवस्त्रं लाञ्छितव्यम् ।

पञ्चपक्षे मध्ये पूर्णशिला स्थापनीया । समुद्रकुम्भश्च स्थापनीयः । अग्न्यादिकोणेषु नन्दा भद्रा जया रिक्ता इति शिलाः पद्ममहापद्मशङ्खमकराख्याः कुम्भाः सर्वत्र पद्माङ्किताः स्थापनीयाः । उक्तं च—

मध्यमे धरणी प्रोक्ता उत्तराख्यो घटः स्मृतः ।
कुम्भानष्टौ सुभद्रादीन् दिक्षु पूर्वादितः क्रमात् ॥
लोकपालाणुभिर्न्यस्त्वा श्वभ्रेषु न्यस्तशक्तिषु ।
शिलास्तेषु च नन्दाद्याः क्रमशो विनिवेशयेत् ॥
एवं नवशिलापक्षे शिलाः पञ्च यदा तदा ।
मध्ये पूर्णशिलां न्यस्त्वा समुद्रकलशस्ततः ॥
पद्मादिषु च नन्दाद्याः कोणेष्वग्न्यादिषु क्रमात् ॥ इति ।

त्रिखण्डसरणिः प्रत्येकं सर्वशिलानां च नन्दादिना त्रिखण्डमार्गः कर्तव्यः । प्रतिशिलं खण्डत्रये तत्वत्रयन्यासः कर्तव्यः । **धीचित्तमात्रान्तिका ।** अत्र धीशब्देन बुद्ध्यहङ्कारौ गृह्येते । चित्तशब्देन एकादशेन्द्रियं गृह्यते । मात्राशब्देन शब्दादिपृथ्व्यन्तं गृह्यते । अन्तिकाशब्दस्य सर्वत्र सम्बन्धः बुद्ध्यहङ्कारान्तिका चित्तान्तिका मात्रान्तिका चेति । अत्रायमर्थस्सम्पन्नः । बुद्धितत्त्वमारभ्य अहङ्कारतत्त्वपर्यन्तं शिवतत्त्वव्याप्तिः । मनस्तत्वमारभ्य उपस्थतत्त्वपर्यन्तं विद्यातत्त्वव्याप्तिः । तथा शब्दतत्त्वमारभ्य धरातत्वपर्यन्तमात्मतत्त्वव्याप्तिः । तथा ज्ञानरत्नावल्याम्—

बुद्ध्यहङ्कृतितत्त्वे तु शिवतत्त्वं स शङ्करः ।
विद्यातत्त्वं च विष्णुं च न्यसेदेकादशेन्द्रिये ॥
ब्रह्माणमात्मतत्त्वं च तन्मात्रादौ न्यसेत्पुनः ॥ इति ॥

अथवा धीचित्तमात्रान्तिका भूतान्ता त्रिखण्डसरणिरिति योज्या । धीः चित्तान्तिका मात्रान्तिका भूतान्ता चेति त्रितत्त्वव्याप्तिः । अनेनायमर्थस्संपन्नः । बुद्ध्यहङ्कारमनःपर्यन्तं शिवतत्त्वम् । श्रोत्रतत्त्वमारभ्य गन्धतत्त्वान्तं विद्यातत्त्वम् । आकाशतत्त्वमारभ्य धरातत्त्वपर्यन्तमात्मतत्त्वम् । एवं क्रियाक्रमे 'बुद्धिमनःपर्यन्तं शिवतत्त्वम् । तन्मात्रान्तं विद्यातत्त्वम् । पृथ्व्यन्तमात्मतत्त्व'मिति शिलान्यासप्रकरणे चोक्तत्वात् । पञ्चपक्षमूर्तिन्यासक्रमे तत्त्वव्याप्तिमाह—**क्ष्मा-भूमिः**

भूतान्ता आकाशपर्यन्तव्याप्तियुक्ता द्वितीयत्रितत्त्वव्याप्तिपक्षे काकाक्षिन्यायवत् क्ष्मा भूतान्ता चेति योज्या भवति। **अम्बु** उदकं जलमूर्तिः **शब्दावधि** भवति शब्दतत्त्वपर्यन्तव्याप्तियुक्तम्। **हुतवहः** अग्निमूर्तिः। **कर्मखान्तः** कर्मेन्द्रियपर्यन्तं व्याप्तियुक्तः। **वायुः** वायुमूर्तिः**बुद्धचक्षान्तः** ज्ञानेन्द्रियपर्यन्तव्याप्तियुक्तः। **गगन**माकाशमूर्तिः **मेधावधि** बुद्धितत्त्वपर्यन्तं व्याप्तियुक्तं भवति। एतेन शिलासु बुद्धितत्त्वमारभ्य न्यासः कर्तव्यः इति सूचितः। उक्तं च—

बुद्ध्यादीनि धरान्तानि तासु तत्त्वानि विन्यसेत्।
तत्त्वेशांश्च हृदा न्यस्य तत्र तत्त्वत्रयं न्यसेत्॥

भूतान्ता क्ष्माम्बु शब्दान्तं वह्निः कर्मेन्द्रियान्तकः।
बुद्धीन्द्रियान्तको वायुः व्योम बुद्ध्यन्तमश्मनि॥ इति

ब्रह्ममुख्याः ब्रह्मविष्णुरुद्रेश्वरसदाशिवास्**तथा** यथाक्रमेण पृथ्व्यादि-पञ्चमूर्तीना**मीशा** अधिपा भवन्ति। **अष्टपक्षे** अष्टविधन्यासपक्षे **शर्वाद्याः** शर्वपशुपतिप्रमुखाः अष्टौ यथाक्रमेण पृथिव्याद्यष्टमूर्त्यधिपाः प्रोक्ताः। तथा सिद्धान्तशेखरे—

क्ष्मावह्नियजमानार्का जलवाय्विन्दुखानि च।
व्योमान्ता मूर्तयश्चाष्टौ न्यस्तव्याः प्रतिखण्डकम्॥ इति

शर्वं पशुपतिं चोग्रं रुद्रं भवमथेश्वरम्।
महादेवं च भीमं च मूर्तिमूर्तीश्वरान्न्यसेत्॥

नवस्वपि शिलास्वेवं मूर्तिपञ्चसु पञ्चधा।
पृथ्व्यप्तेजोऽनिलाकाशा आकाशान्ताधिपान्न्यसेत्।
ब्रह्माणं च हरिं रुद्रमीश्वरं च सदाशिवम्॥ इति।

पूर्वोक्तवत् पञ्चमूर्तीनां पृथिव्यादिबुद्धितत्वपर्यन्तव्याप्तिं अष्टपक्षेऽपि विदध्यात्। तद्बुद्धिपर्यन्तस्थितगगनमूर्त्या सह चन्द्रादिमूर्तित्रयस्य तत्त्वव्याप्ति-र्भवतीत्याह—**शशीत्यादिना शशी** चन्द्रः **तरणिः** सूर्यः **यज्ञमूर्तिः** यजमानः **बुद्धौ** बुद्धितत्त्वपर्यन्तं **सखं** आकाशसहितं गगनवत् बुद्धितत्त्वपर्यन्तं चन्द्रार्क-यजमानानां त्रयाणां व्याप्तिः कर्तव्येत्यर्थः॥ १५५॥

लिङ्गस्य लक्ष्मनिर्णयमाह—**अर्चांशेति**।

अर्चांशत्रिद्विभागात्तद(भि)[हि]विभजनादेकतो विस्तरं त-
द्रन्ध्रांशाद्रेखयोस्स्तो विततिसुविनती लक्षणार्धाच्च पक्षौ।
अष्टाभिर्भाजितेऽर्धे नवभिरपि बहिस्सप्तभिष्षट्कतो वा
भ्रान्त्याधःपृष्ठयोगो द्वितयविरहतो लिङ्गमूर्धेव मूर्धा॥ १५६॥

अर्चांशत्रिद्विभागात् अर्चांशाख्यपूजाभागस्य त्रिभागात् त्रिभागं कृत्वा द्विभागमारभ्य लिङ्गस्य रुद्रभागं त्रिधा भक्त्वा ऊर्ध्वभागं त्यक्त्वा द्विभागे लक्षणं कर्तव्यमित्यर्थः। उक्तं च—

रुद्रभागे त्रिधा भक्ते भागमूर्ध्वं परित्यजेत्।
भागयुग्मेन कुर्वीत लक्ष्मरेखाद्वयं गुरुः॥ इति।

तत् त्रिभागमध्ये एकभागं **अहिविभजनात्** अहिस्सर्पः अ(हि)संख्यया विभागकरणात् एकतः अष्टभागमध्ये एकांशतः **विस्तारं** लक्ष्मविस्तारं कार्यमित्यर्थः। **तद्रन्ध्रांशात्** तस्य लक्ष्मविस्तारस्य रन्ध्रांशान्नवभागीकरणा**देकतो** नवभागमध्ये एकांशतो **रेखयोरु**भयो रेखयो**र्विततिसुविनती** विस्तारनिम्ने भवतः। लक्ष्मविस्तारनवांशात् रेखयोः उभयरेखयोः वित[तिसुविन]ती विस्तारनिम्ने **स्तः** भवतः स्वभावतः लक्ष्मविस्तारं नवभागं कृत्वा एकभागेन लक्ष्मरेखाविस्तारनिम्ने समत्वेन कार्ये इत्यर्थः। **लक्ष्मणोऽर्धा**ल्लक्ष्मविस्तारस्यार्धप्रमाणतः **पक्षौ** उभयपार्श्वस्थ-रेखयोः क्षेत्रविस्तारौ कार्यावित्यर्थः। उक्तं च - "लक्ष्मक्षेत्रार्धभागेन पक्षक्षेत्रस्य विस्तरः" इति। **अष्टाभिः** संख्याभिः नवभिर्वा **भाजिते अर्धे** भागीकृतपक्षे क्षेत्रदैर्घ्यं अष्टभागं कारयेदित्यर्थः। **बहिः** बाह्यप्रदेशे **सप्तभिः षट्कतो वा** अष्टभागमध्ये एकभागमुपरि त्यक्त्वा सप्तभागपरिगणनया **अधः** लिङ्गाधःप्रदेशे **द्वितयविरहतः** द्विभागपरिवर्जनात् पञ्चभागावलम्बनेनेत्यर्थः। तत्र सूत्रभ्रमणेन **भ्रान्त्वा** भ्रमणं कृत्वा **पृष्ठयोगः** पृष्ठदेशसम्बन्धः कर्तव्यः। एवं सप्तपक्षे विधानं ज्ञातव्यम्। षट्पक्षे ऊर्ध्वे द्विभागत्यागेनाधःप्रदेशे द्विभागत्यागेन चतुर्भागावलम्बनेनेत्यर्थः। तत्र सूत्रभ्रमणेन पृष्ठरेखासंयोगः कर्तव्यः। तथोक्तम्—

लक्ष्मक्षेत्रेऽष्टधा भक्ते मूर्ध्नि भागद्वये च्युते ।
षट्भागपरिवर्तेन उक्तभागद्वयं त्वधः ॥
रेखा भ्रमणसम्बन्धं कारयेत्पृष्ठदेशतः ॥ इति ॥ तथा वरुणपद्धतौ—

रुद्रभागे त्रिधा भक्ते ब्रह्मरेखानुसारतः ।
अधो भागद्वये लक्ष्म लम्बयेदाजलाश्रयम् ॥

लिङ्गायामजिनांशे तु लक्ष्मविस्तृतिरीरिता ।
पृथ्वी निम्ना पतद्रेखा विस्तृते नवमांशतः ॥

लक्ष्मार्धे पक्षरेखे द्वे तत्क्षेत्रेऽष्टांशभाजिते ।
षट्सप्तांशभ्रमात्पृष्ठे तद्योयो[गो]ऽधोविवर्जनात् ॥ इति ॥

लिङ्गमूर्धेव लिङ्गस्य यदाकृतिना शिरः कृतं तदाकृतिना **मूर्धा** लक्ष्मशिरः कर्तव्यम् । इवकारेण अनन्यथाकरणीयत्वं द्योतितम् । उक्तं च—

यथा लिङ्गशिरः प्रोक्तं तथा लक्ष्मशिरो हितम् ।
सर्वसिद्धिप्रदं धन्यं सर्वविघ्नभयङ्करम् ॥ इति ॥

रत्नजातिषु निषेधश्चोक्तः । यथा—

नैतद्रत्नमये लिङ्गे न लोहेऽपि चले न हि ।
न बाणलिङ्गे रौहे वा नदीप्रस्रवणोद्भवे ॥

स्वाकारो लक्षणं तेषु तेजोरत्नेषु भास्वरम् ।
रत्नजे लोहजे लक्ष्म विधेयं वा नवा भवेत् ॥ इति ॥ १५६ ॥

पिण्डिकायां लक्ष्मनिर्णयमाह—**पीठ इति ।**

पीठे लक्ष्म भगाकृतिस्तु पुरतस्तूर्ध्वाग्रकं पिण्डिका
रन्ध्रस्यांशगुणांशभागयुगळे मूले भ्रमद्वन्द्वयुक् ।
नाळस्यार्धततं पृथुत्वनतयो रेखास्थयोस्साङ्घ्रिके
लिक्षे यूकयुगैकहस्तपरतो यूकैकलिक्षैकतः ॥ १५७ ॥

पीठे पिण्डिकायां **भगाकृतिः** अश्वत्थपत्रवत् योन्याकारं **लक्ष्म** लक्षणं कर्तव्यम् । **पुरतः** लिङ्गाग्रे ।

लिङ्गलक्ष्मसमीपस्थं यथा स्याद्भगलक्षणमित्युक्तत्वात् ।

ऊर्ध्वाग्रकमूर्ध्वमुखाग्रयुक्तं **पिण्डिकारन्ध्रस्य** पीठश्वभ्रस्य **गुणांशभागयुगळे** गुणांशस्य त्रिभागस्य मध्ये भागयुगळे भागद्वन्द्वे पीठरन्ध्रप्रमाणं त्रिभागं कृत्वा अध एकभागं त्यक्त्वा द्विभागे कार्यमित्यर्थः । **मूले** पीठरन्ध्रमूले **भ्रमद्वन्द्वयुक्** भ्रमणयुगळसहितं रन्ध्रमूलादारभ्य द्वे रेखे कार्ये इत्यर्थः । **नाळस्य** पीठजलमार्गस्या**र्धतत**मर्धविस्तारयुक्तं **रेखास्थयोः** रेखायां विद्यमानयोः **पृथुत्वनतयोः** विस्तारनिम्नयोः **साङ्घ्रिके** पादसहिते **लिक्षे** कर्तव्ये । अश्ववालरोमाग्रप्रमाणं अष्टभिर्वृद्धीकृतं लिक्षेत्युच्यते । लिक्षाष्टकं यूकं भवति । तथा कामिके—

परमाणुक्रमाद्वृद्ध्यां मानाङ्गुलमिति स्मृतम् ।
परमाणुरिति ख्यातो योगिनां दृष्टिगोचरः ॥

रजो रेण्वश्ववालाग्रं लिक्षा यूको यवस्तथा ।
क्रमशोऽष्टगुणाः प्रोक्ताः यवैष्षड्भिश्च सप्तभिः ॥ इति ॥

यूकयुगा द्विरेखयोर्मध्यं यूकद्वन्द्वयुक्तं पञ्चलिक्षया च संयुक्तं कर्तव्यम् । **एकहस्तपरतः** । पूर्वोक्तं सर्वं एकहस्तलिङ्गे कर्तव्यम् । एकहस्तादूर्ध्वद्विकरादिषु **यूकैकलिक्षैकतः** एकयूकवृद्ध्या एकलिक्षावृद्ध्या च कर्तव्यम् । उक्तं च—

रन्ध्रमध्ये भगाकारमूर्ध्वाग्रं लक्ष्मपीठयोः ।
रन्ध्रस्यैव द्विभागेन तन्मूले भ्रमरेखि सत् ॥

अश्वत्थपत्रवद्दुद्यं वर्तयेद्दुह्यलक्षणम् ।
प्रणाळस्यात्तविस्तारात् पीठरन्ध्रे कलेन्दुवत् ॥

द्वे यूके पञ्च लिक्षा वा रेखयोरन्तरं भवेत् ।
रेखापृथुत्वं साङ्घ्रीके द्वे लिक्षे मूर्धजौ तथा ॥
एकैकं वर्धयेद्यूकां लिक्षां च द्विकरादिषु ॥ इति ॥ १५७ ॥

तत्त्वत्रययुक्तत्रिखण्डकल्पनापूर्वकं क्षित्याद्यष्टमूर्तीनां तत्त्वव्यापितामाह - **विद्येति ।**

विद्याशक्त्यन्तशैवावधि शिवजनितं तत्त्रिखण्डं समाख्यं
क्षित्याद्याश्चाष्ट शर्वात्प्रभृति च परमा मूर्तयो मूर्तिपाश्च ।
रागान्ता क्ष्माम्बु कालावधि च हुतवहश्शुद्धविद्यावसानः
वायुर्विद्येश्वरान्तो वियदपि च शशी यष्टृसूर्यं शिवान्तम् ॥१५८॥

विद्याशक्त्यन्तशैवावधि विद्या शुद्धविद्यातत्वं शक्त्यन्तं शक्तितत्त्वपर्यन्तं शैवावधि शिवतत्त्वपर्यन्तं आत्मविद्या शिवाख्यतत्वत्रयाणां यथाक्रमेण व्याप्तिः कर्तव्या अन्यथा वा कर्तव्या । तथा कामिके आत्मविद्याख्यतत्वत्रयाणां यथाक्रमं

शिवशक्तिसदेशान्तं त्रिखण्डं कल्पयेत्पुनः ।
विद्याशक्तिशिवप्रान्तं मायासादेशशक्तिगम् ॥
शब्दचित्तमनीषान्तं लिङ्गपीठेऽश्मनि क्रमात् ॥ इति ।

शिवजनितं रुद्रभागोत्पन्नं **तत्** प्रसिद्धभूतं **त्रिखण्डं समाख्यं** त्रिखण्डमिति नामधेयसहितं रुद्रभागे त्रिखण्डमित्युक्तत्वात् विष्णुभागे त्रिखण्डं कल्पनीयमिति ज्ञापितम् । तथा ज्ञानरत्नावल्याम्—

आत्मतत्त्वं तदात्मान्तं विद्याविद्यान्तगोचरा ।
रागान्तं शिवतत्त्वं तु त्रितत्त्वं ब्रह्मणि न्यसेत् ॥
आत्मतत्त्वं नियत्यन्तं विद्यातत्त्वं कलान्तकम् ।
शिवाख्यं शुद्धविद्यान्तं विष्णुभागे त्रयं न्यसेत् ॥
आत्माख्यमीश्वरान्तं तु विद्याख्यं सकलावधि ।
शक्त्यन्तं शिवतत्त्वं तु रुद्रभागे त्रयं न्यसेत् ॥ इति ॥

क्षित्याद्याः भूमिप्रभृतयः **अष्ट** मूर्तय इत्युच्यन्ते । **शर्वात्प्रभृति** शर्वपशुपत्यादिमारभ्य **परमाः** ज्येष्ठाः **मूर्तिपाः** मूर्तीश्वराश्चाष्टौ । उक्तं च कामिके—

क्ष्मावह्नियजमानार्कजलवायुनिशाकराः ।
व्योमान्तमूर्तयश्चाष्टौ न्यस्तव्या प्रतिखण्डकम् ॥

शर्वः पशुपतिश्चोग्रो रुद्रो निर्ऋतिगोचरे ।
भवेशानमहादेवा भीमश्चेत्यष्ट मूर्तिपाः ॥ इति ॥

क्षमा पृथिवीतत्त्वं **रागान्ता** रागतत्त्वपर्यन्तं स्थिता **अम्बु** अम्बुतत्त्वमित्त्यर्थः [1]**वियदा**काशं **शशी** चन्द्रः **यष्टा** यजमानः आत्मेत्यर्थः । **सूर्यः** एतच्चतुष्टयं **शिवान्तं** शिवतत्त्वपर्यन्तं व्याप्तियुक्तं भवति ।

तथा वरुणपद्धत्याम्—

रागान्तं क्ष्माम्बु कालान्तं विद्यान्तश्च हुताशनः ।
वायुरीश्वरपर्यन्तं व्योम लिङ्गे शिवान्तकम् ॥ इति ॥ १५८ ॥

अष्टपक्षे पञ्चपक्षे पीठन्यासस्थानभेदपूर्वकं पीठे त्रिखण्डन्यासमाह—**प्रोक्तेति** ।

प्रोक्ता खण्डाष्टदिक्षु स्थितिरिति खलु वा क्ष्मादयो ब्रह्ममुख्याः
पञ्चाजातादिदिक्स्थाः पतय इह किल प्रोक्तवद्व्याप्तियुक्ताः ।
मायासादेशशक्त्यावधिकयुतमधःपीठगं चात्मतत्त्वं
अन्ये पिण्डयां च नाळे सह किल पतयस्स्युः क्रिया
दृक्तथेच्छा ॥१५९॥

खण्डाष्टदिक्षु खण्डेषु त्रिखण्डेषु प्रत्येकं अष्टदिक्षु पूर्वादीशान्ताद्यष्टदिक्षु **स्थितिः प्रोक्ता** क्ष्मादिमूर्तीनां यथाक्रमेणेति वाक्यशेषः । **क्ष्मादयः** पृथिवीजलाग्निवाय्वाकाशाख्यपञ्चमूर्तयः । **ब्रह्ममुख्याः** ब्रह्मविष्णुरुद्रेश्वरसदाशिवा अधिपतयः **पञ्च** भवन्ति । तथा कामिके—

पञ्चमूर्त्यात्मके न्यासे क्ष्मावारिदहनानिलाः ।
खञ्चेति मूर्तयो लिङ्गे ब्रह्माद्या मूर्तिपा मताः ॥ इति ॥

अजातादिदिक्स्थाः यथाक्रमेण ब्रह्मादिपञ्चमूर्तयः । पश्चिमोत्तरदक्षिणपूर्वेशानाख्यपञ्चदिक्षु विद्यमानाः । **इह** पञ्चपक्षे **प्रोक्तवत्** पूर्वग्रन्थोक्तवत् **व्याप्तियुक्ताः** षट्त्रिंशत्तत्वव्याप्तिसहिता भवन्ति । अत्र ग्रन्थे विद्यमानखलुशब्देन मुमुक्षुविषये अनन्तेश्वरादयः आकाशादिषु मूर्तिषु पूर्वादिदिक्रमेण न्यस्तव्या इति सूचितम् । तथा ज्ञानरत्नावल्याम्—

---

1. कालावधि etc., seem to be missing.

यद्वा मूर्तिषु ताश्चैव विद्येशा मूर्तिपा न्यसेत् ।
अनन्तस्सूक्ष्मसंज्ञश्च शिवोक्तश्चैकनेत्रकः ॥
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्ड्यथ ।
खादिमूर्तिषु पूर्वादिदिक्क्रमेणैव विन्यसेत् ॥ इति ॥

किलशब्देन पञ्चपक्षे निवृत्त्यादयो मूर्तयः सद्योजातादयो मूर्तिपा इति सूचितम् । उक्तं च—

मूर्तयो वा निवृत्त्याद्याः सद्योजातादयोऽधिपाः ॥ इति । **मायासादेशशक्त्यवधि** मायावधि मायातत्त्वान्तमात्मतत्त्वं सादेशावधि सदाशिवतत्त्वान्तं विद्यातत्त्वं शक्त्यवधि शक्तितत्त्वपर्यन्तं शिवतत्त्वम् । तत्र **आत्मतत्त्वं कयुतं** ब्रह्मभागयुक्तमधःपीठगं पीठमूलभागादारभ्य कर्णान्तभागपर्यन्तं स्थितम् । **अन्ये द्वे** विद्यातत्त्वशिवतत्त्वे यथाक्रमेण पिंड्यां कण्ठोर्ध्वभागयुक्तपिण्ड्यां विद्यातत्त्वं नाळे गोमुखभागे शिवतत्त्वम् । सहशब्देन स्वतत्त्वाधिपतिसहितत्वेन न्यासः कर्तव्य इति सूचितं भवति । **क्रियादृक् तथेच्छा** क्रिया क्रियाशक्तिः [दृक्] ज्ञानशक्तिः [इच्छा] इच्छाशक्तिश्च यथाक्रमेण आत्मादितत्त्वत्रयाणामधिपतयः ईश्वराः **स्युः** भवन्ति ॥ उक्तं च—

क्रिया ज्ञानी तथेच्छा च त्रितत्त्वादीश्वरा मताः ॥ इति ॥ १५९ ॥

पिण्डिकायामष्टपक्षपञ्चपक्षमूर्तिन्यासमाह—**क्ष्माद्या इति** ॥

क्ष्माद्यास्त्वष्ट च धारिकादय इहाधीशाश्च वा मूर्तयः
क्ष्माद्याः पञ्च च वामया तदधिपा ज्येष्ठा क्रिया दृक्तथा ।
इच्छा ब्रह्मशिलातले खमनस्सादेशखण्डत्रयं
गौर्यादेर्गळजानुखण्डपरिधिः पीठोक्तमूर्त्यादयः ॥ १६० ॥

क्ष्माद्या भूम्याद्यष्टमूर्तय इह पिण्डिकायां क्ष्मादिमूर्तिषु **धारिकादयः** धारिकादीप्तिमतीत्यादयः **अधीशाः** । यथाक्रमेण क्ष्मादिमूर्तीनां ईश्वरा भवन्ति तथा कामिके—

धारिका दीप्तिमत्युग्रा ज्योत्स्ना चेति बलोत्कटा ।
धात्री विधात्री देव्यश्च मूर्तिपाः परिकीर्तिताः ॥ इति ।

वाशब्देन उग्रकर्मणि तमाद्या अधिपतय इति सूचितं भवति । तथा वारुणपद्धत्याम्—

तमा मोहा जया निष्ठा मूर्तिर्माया भया ज्वराः ।
एवं पीठे शिलायां च न्यासः कार्योऽभिधानया ॥ इति ।

क्ष्माद्या भूम्यादयः **पञ्च मूर्तयः वामया** शक्त्या सह ज्येष्ठा क्रिया ज्ञानी चेति शक्तयः । **तथा इच्छा** यथाक्रमेण । तदधिपाः क्ष्मादिपञ्चमूर्तीनामधिपाः ईश्वरा भवन्ति । उक्तं च—

पञ्चमूर्त्यात्मके न्यासे वामाद्या मूर्तिपा मताः ।
वामा ज्येष्ठा क्रिया ज्ञानी चेच्छा चेति प्रकीर्तिता ॥ इति ।

इह पक्षे तमादयो मूर्तिपा भवन्ति । उक्तं च—

पञ्चपक्षे तमा मोहा घोरा मूर्तिर्ज्वराधिपाः ।
पञ्चानामपि मूर्तीनां लिङ्गपीठशिलास्वपि ॥ इति ।

ब्रह्मशिलातले ब्रह्मशिलाप्रदेशे **खमनःसादेशखण्डत्रयं** शब्दतत्वान्तमात्मतत्त्वं मनस्तत्वान्तं विद्यातत्वं सदाशिवतत्वान्तं शिवतत्वम् । एवं त्रिखण्डं कल्पयेत् । उक्तं च—

शब्दचित्तसदेशान्तं न्यसेद्ब्रह्मशिलोपरि । इति ।

गौर्यादेरादिशब्देन मनोन्मनीलक्ष्म्यादिः गळजानुमस्तकादारभ्य कण्ठान्तं शिवतत्वम्, कण्ठादारभ्य जानुप्रदेशान्तं विद्यातत्वम्, जानुप्रदेशादारभ्य पादान्तमात्मतत्वं न्यसेत् । एवं **खण्डपरिधिः** त्रिखण्डस्थानभागः कर्तव्यः । तथा सिद्धान्तशेखरे—

प्रतिमासु च सर्वासु व्याप्तिर्ज्ञेया यथोक्तवत् ।
जानुकण्ठशिरोव्याप्त्या व्याप्तिस्तत्त्वत्रयस्य च ॥ इति ।

अथवात्र गळजान्वित्युक्तत्वात् जानुपर्यन्तं आत्मतत्वं नाभ्यन्तं विद्यातत्वम्, गलान्तं शिवतत्वं न्यसेत् । तथा क्रियाक्रमे "वैकल्पिको जानुगलावधि त्रितत्वं" इत्युक्तत्वात् । **पीठोक्तमूर्त्यादयः** पीठोक्तवदष्टमूर्तिपञ्चमूर्तयस्तदधिपाश्च न्यस्तव्याः ॥ १६० ॥

हृत्कुम्भादीनां प्रतिष्ठाविधिसूचनमाह— **हृत्कुम्भ इति ।**

हृत्कुम्भे च मनः कला च सरणिः खण्डेषु माया नरे
शब्दो धीः पुरुषश्च चूलिकवरे प्रासादके वारिधौ ।
व्याप्तिर्लिङ्गवदीरितात्र शिखरे कण्ठे च जङ्घास्पदे
द्वारोदुम्बरशाखयोरुपरितस्तत्वत्रयं सेश्वरम् ॥ १६१ ॥

शिखरार्धप्रमाणसमाप्तौ पूर्ववेदिकायां प्रासादस्य चैतन्यसिद्ध्यर्थं प्रासादहृदयकमले कुम्भस्थापनं कर्तव्यम् । "हृत्कुम्भस्थापनं प्रोक्तं धामचैतन्यसिद्धये" इत्युक्तत्वात् शिवस्य सूक्ष्मदेहं लिङ्गमित्युच्यते । प्रासादं स्थूलदेहमित्युच्यते । तस्माच्चैतन्यसिद्ध्यर्थं प्रासादहृदये कुम्भं स्थापनीयम् । तथा सिद्धान्तशेखरे—

हृत्कुम्भस्य प्रतिष्ठा च कथ्यते च यथागमे ।
सूक्ष्मस्य लिङ्गदेहस्य प्रासादं स्थूलदेहकम् ॥

आत्मनः सूक्ष्मदेहस्य बाह्यदेहो यथा स्मृतः ।
तद्वदत्रापि चैतन्यसंयोगे विधिरीरितः ॥ इति ।

स्वर्णादिनिर्मितकुम्भे स्वर्णनिर्मितं पुरुषं न्यसेत् । तथा ज्ञानरत्नावल्याम्—

हेमताम्रादिकं कुम्भं निधिकुम्भवदुन्नतम् ।
हेमरत्नादिसम्पूर्णं स्थापयेल्लिङ्गवद् गुरुम् ॥

तालमानं तदर्धं वा हेमजं पुरुषं तथा ।
अङ्गुष्ठार्धप्रमाणं वा सर्वरूपसमन्वितम् ॥ इति ॥

एवंविधकुम्भे तत्र स्थिते **नरे** पुरुषे च **खण्डेषु** कुम्भत्रिखण्डेषु पुरुषत्रिखण्डेषु च **मनः** मनस्तत्वपर्यन्तमात्मतत्वं **कला** कलातत्वान्तं विद्यातत्वं **माया च** मायातत्वपर्यन्तं शिवतत्वं न्यसेत् । एवं **सरणिः** त्रिखण्डमार्गः कर्तव्यः । अथवा हृत्कुम्भे पुरुषे च **शब्दो धीः पुरुषः** शब्दतत्त्वान्तं आत्मतत्त्वम्, बुद्ध्यन्तं विद्यातत्त्वम्, पुरुषतत्त्वान्तं शिवतत्त्वं न्यसेत् । **चूलिकवरे** चूडाकारे शिखाग्रे लिङ्गदैर्घ्यप्रमाणेन कर्तव्या चूलिका । यथा—

लोहजं दारुजं वापि चूलिकाकीलमिष्यते ।
ऊर्ध्वभूम्यङ्घ्रिणा कुर्याद्विस्तारं पादतस्समम् ॥
अग्रमङ्गुलविस्तारमानुपूर्व्या कृशं यथा ।
चतुरश्रं समं कुर्यात् त्रिभागैकमधस्ततः ॥
अष्टाश्रं च सुवृत्तं च मूलतः कल्पयेत्क्रमात् ।
शैलादिकुम्भसंयुक्ता धाम्नि शैलादिके तथा ॥
कुम्भाग्रे च त्रिशूलं वा वृत्तं वा कारयेत्तथा ।

इत्युक्तत्वात् । **प्रासादके** शिखरयुक्तप्रासादके । **वारिधौ** देवखाततटाककूपादिके चूलिकादित्रये **लिङ्गवद्व्याप्तिः** त्रितत्वव्याप्तिरीरिता उक्ता भवति । चूलिकाया वृत्तभागे सरुद्रं शिवतत्त्वं शक्तितत्त्वान्तं न्यसेत् । अष्टाश्रे सविष्णु विद्यातत्त्वं सदाशिवतत्त्वान्तं न्यसेत् । चतुरश्रे सब्रह्माणमात्मतत्त्वं मायातत्त्वान्तं न्यसेत् । तथा खातादि त्रिभागं कृत्वा तत्वव्याप्तिः कर्तव्या । **अत्र** प्रासादे **शिखरे** चूडालपर्यन्ते शिवतत्त्वं **कण्ठे** शिखरकण्ठान्तप्रदेशपर्यन्ते विद्यातत्त्वं **जङ्घास्पदे** शिखरपदप्रस्तरवर्गपर्यन्तमात्मतत्त्वम् । अत्र मायाशब्देन सशक्त्यन्तं त्रितत्वन्यासः कर्तव्यः । "जङ्घागळकचूडान्तं प्रासादेऽपि विचिन्तयेत्" इत्युक्तत्वात् । **द्वारोदुम्बरशाखयोरुपरितः** द्वारस्थोदुम्बरे अधःप्रदेशस्थितदेहळ्यां शाखयोरुभयपार्श्वस्थितस्तम्भयोः **उपरितः** ऊर्ध्वस्थितोदुम्बरे यथाक्रमेण सेश्वरं ब्रह्मादिसहितं तत्त्वत्रयमात्मादितत्त्वत्रयं न्यस्तव्यम् । तथा ज्ञानरत्नावळ्याम् —

देहळ्यामात्मतत्त्वं तु मायातत्त्वान्तगोचरम् ।
विन्यस्याथ सदेशान्तं विद्यातत्त्वं च शाखयोः ॥
ऊर्ध्वोदुम्बरके न्यस्त्वा शक्त्यन्तं शिवतत्त्वकम् ॥ इति ॥ १६१ ॥

शिवलिङ्गस्थापनतो भुक्तिमुक्तिद्वयमस्तीत्याह—**लिङ्ग इति**

लिङ्गे स्थापनतो भवेत्करमिते मुक्तिः प्रसङ्गात्परा
भुक्तिः पीठवरेऽपि गर्भविषयान्मानाच्च लिङ्गे तथा ।
पीठे भुक्तिरथैकमुक्तिरचला बेरेषु भोक्तुः फलं
यावन्तः परमाणवश्शिवपुरे साहस्रकल्पानि च ॥ १६२ ॥

ऐहिकगता इहलोकसम्भवाश्शुद्धाध्वजाश्शुद्धाध्वविहितास्सिद्धयो भवन्ति। उक्तं च—

लिङ्गं त्रिविधमाख्यातं व्यक्ताव्यक्तोभयात्मकम् ।
स्वयम्भुबाणदैवार्षमानवाद्यमनेकधा ॥

स्थिरलिङ्गं चलं वाथ मण्डलं स्थण्डिलं तथा ।
पटं वा भित्तिचित्रं वा पीठं वा मन्त्रसंस्कृतम् ॥

आवाह्य गुरुवृद्धाद्यान् विद्यापीठमथापि वा ।
विशेषतः स्वयंसिद्धं सूर्यमण्डलमेव वा ॥

अन्यद्वा लिङ्गकल्पोक्तं सैकताद्यं विशेषतः ॥
एतत्सर्वं शिवेज्यार्थं यथायोगं प्रकल्पयेत् ॥ इति

तथा लिङ्गार्चनात्साधके साधकविषये **शुद्धाध्वजाः सिद्धयो भवन्ति।** शिवस्य पूजाधारमनेके भवन्ति तथापि लिङ्ग एव शिवार्चनं कर्तव्यमिति लिङ्गार्चनादित्युक्तम्। उक्तं च—

यद्यप्यस्ति सदेशस्य पूजाधारमनेकधा ।
तथापि लिङ्गे नित्यार्चा सम्पूर्णफलदायिका ॥ इति ।

तथा श्रीकालोत्तरे च—

पूजाधाराणि वक्ष्यामि समासात्कीर्तितानि ते ।
स्वमूर्तौ पूजनं कार्यं पूजारम्भे प्रयत्नतः ॥

योगिनां वा स्वमूर्तौ तु पूजनं विहितं सदा ।
यदारम्भे सदा पूजां गुरुमूर्तौ प्रकल्पयेत् ।
आशीर्वाद्यवनौ यावत्सकृदेव शिवं यजेत् ॥

विद्यापीठे तु यागान्ते पूजा कार्या सदैव हि ।
विद्यापीठं कोटिमात्रं पूजयेद्वा सुसंहिताम् ॥

जले सदाशिवः पूज्यः स्नानान्ते तु सकृत्सुताः ।
अग्नौ पूजावसानान्तं यष्ट्वा होमं समापयेत् ॥

निर्विघ्नार्थं स्थण्डिले तु शिवास्त्रं पूजयेत्सदा ।
शिवो वा स्थण्डिले पूज्यः जलवत्कलशे हितम् ॥

स्थिरलिङ्गे सदा कार्यं सिद्धिकामैः प्रयत्नतः ।
भुक्तिमुक्तिप्रदं पुंसां चललिङ्गे शिवार्चनम् ॥

पूजयेत्सूर्यबिम्बस्थं दर्पणे प्रतिबिम्बितम् ।
तद्वद्वै सोमबिम्बस्थं पूजयेन्मृत्युवञ्चने ॥

सर्वत्र संस्थितः पूज्यः सर्वाधारेषु सर्वदा ।
तत्रापि लिङ्गे भगवान् पूजां गृह्णाति धूर्जटिः ॥

असंपूर्णा कृता पूजा मन्त्रद्रव्यक्रियायुता ।
क्षणिके भित्तिचित्रादौ तथा वै स्थण्डिले सुत ॥

न्यूनाधिका तु या पूजा फलहीना प्रकीर्तिता ।
एतस्मात्कारणाद्वत्स लिङ्गाराधनमारभेत् ॥

लीयते यत्र भूतानि निर्गच्छन्ति यतः पुनः ।
तेन लिङ्गं परं पूज्यं निष्कळः परमश्शिवः ॥

लिङ्ग्यते चिह्न्यते येन भान्यते भगवाञ्छिवः ।
योगिभिस्तत्क्रियालिङ्गं व्यक्ताव्यक्तोभयात्मकम् ॥

व्यक्तं तत्सकलं ज्ञेयं अव्यक्तं निष्कळं मतम् ।
ज्ञानज्योतिर्मयं लिङ्गं व्यक्ताव्यक्तमिति स्मृतम् ॥

तदाकारतया भक्तं कृत्रिमं तदनुष्ठितम् ।
लिङ्गमित्युच्यते तत्र शिलामृद्दारुलोहजम् ॥ इति ।

अङ्गब्रह्मसदाशिवः अङ्गैः हृदयादिषडङ्गैः ब्रह्मभिः ईशानादिपञ्चब्रह्मभिः मूर्धादिशरीरयुक्तः सदाशिवः प्रासादमन्त्रेण लिङ्गे पूज्यः। **शिवयुता** सदाशिवसमवेता **शक्त्यात्मिका** परशक्तिस्वरूपा **तच्छिवा** तस्य सदाशिवस्य शिवा मनोन्मन्याद्या सहिता भार्या भवति। लिङ्गे मनोन्मनिसंज्ञा नृत्तमूर्त्यादिदेहेषु गौरीसंज्ञा भवति। तथा कामिके—

एवं देवी प्रकर्तव्या तत्संज्ञा द्विविधा मता ।
मनोन्मनीति गौरीति लक्ष्मभेदस्तु नानयोः ॥
मूर्तिस्सादाशिवी यत्र कल्प्यते तत्र कल्पिता ।
तदा मनोन्मनीसंज्ञां लभते विप्रपुङ्गवाः ॥
नृत्तमूर्त्यादिदेहेषु गौर्याद्याख्यां समश्नुते । इति ।

लोकाम्नायसुसिद्धदेववपुषः । लोकाम्नायेषु भुवनपारम्पर्येषु सुसिद्धदेववपुषः । सम्यक्सिद्धदैविकशरीरिणोः कालाग्न्यादिभुवनेश्वराः **सादेशचिच्छक्तिकाः** सदाशिवसम्बन्धशक्त्योत्पन्नशक्तिभेदसहितास्सन्ति ॥ १६३ ॥

अथार्धेन श्लोकेन भुवनेश्वराणां संस्थितिः परमेश्वरादुत्पन्नेत्याह—**तेषामिति** ।

तेषामीश्वरसंस्थितिस्तनुषु सत्संस्कारयुक्ता स्मृता
देवीनामपि शम्भुशक्तिविषयो न्यासोपि कार्यस्सदा ।

तेषां भुवनेश्वराणां **ईश्वरसंस्थितिः** परशिवात्तत्रत्या लोकेषु संस्थानं भवति । **तनुषु** भुवनेश्वराणां शरीरेषु **सत्संस्कारयुक्ता** सम्यग्दीक्षासंस्कारसहिता **स्मृता । देवीनां** मनोन्मन्यादिदेवीनां **शम्भुशक्तिविषयः** परमेश्वरविग्रहे ज्ञानशक्तिविषयः पीठे त्रिधा । शक्तिविषयः न्यासोऽपि क्रियाशक्तिमयन्यासः **सदा कार्यः** । उक्तं च—

गौर्यादीनां प्रतिष्ठायां ज्ञानशक्तिं त्रिधात्मिकाम् ।
विन्यसेद्विग्रहे ज्ञानी शेषं पीठवदाचरेत् ॥ इति ।

प्रतिष्ठापनाय शिवलिङ्गस्य यथार्थज्ञापनार्थं ब्रह्मादिसमस्तदेवानां पृथिव्यादितत्वव्याप्तिमाह-**ब्रह्मेति** ।

ब्रह्माव्यक्तगतश्च मोहकगतो विष्णुश्च विद्यागतो
रुद्रश्चेश्वर ऐशगोऽपि च सदेशान्तस्सदेशात्मकः ॥ १६४ ॥
दुर्गार्कौ शैवतत्वे वृषभवरमथो शक्तिके वागधीशः
स्वाहानाथस्सदेशे गणपतिकमले चेश्वरे वाक्तथैव ।
विद्येशाश्शुद्धविद्या भुवि च गणवरा लोकपा द्वारपालाः
धर्माद्या मातृरुद्राः शिवमतसहिताः कौहरा मूर्तयश्च ॥ १६५ ॥

लोकेशासुरयक्षकिन्नरमुनिक्षेत्रे [श] वेतालका
भूताः सर्पसरित्समुद्रगणपा विद्याधराश्चाश्विनौ ।
श्रीमच्छैवमतार्थसारखचिता सिद्धान्तसारावलिः
शैवज्ञानधिया त्रिलोचनशिवाचार्येण क्लृप्ता शुभा ॥ १६६ ॥
श्रीमच्छैवमतानुसारिविदुषामानन्दसन्दायिनी
शम्भोः प्रीतिकरी सदा विजयतां शक्त्या समेतस्य च ॥१६७॥

ब्रह्माव्यक्तगतः पृथिवीतत्वमारभ्य प्रकृतितत्वान्तव्यापको भवति । **विष्णुर्मोहगतः** पृथिवीमारभ्य मायातत्वान्तव्यापकः **रुद्रः विद्यातत्वगतः** पृथिवीमारभ्य शुद्धविद्यातत्वान्तव्यापकः **ईश्वरः ऐशगः** ईश्वरतत्वव्यापकः **सदेशात्मकः सदेशान्तः** पृथिवीमारभ्य सदाशिवतत्वान्तव्यापकः । **दुर्गार्कौ** शिवशास्त्रेण पूज्यमानौ पराशक्तिशिवसूर्यौ **शैवतत्वे** पृथिवीमारभ्य शिवतत्वान्तव्यापकौ । तथा चोक्तं वरुणशिवेन—

क्ष्मादिपुंसोऽवधौ ब्रह्मा क्ष्मादिमायान्तमच्युतः ।
क्ष्मादिविद्यान्तको रुद्रः क्ष्मादीशावधि चेश्वरः ॥
सदाख्यो क्ष्मादिनादान्तः शक्तिः क्ष्मादिपरावधिः । इति ॥

वृषभवरः वृषभश्रेष्ठः **शक्तिके** शक्तितत्वान्तव्यापकः । **गणवराद्या** अश्विनीदेवतान्ताः शुद्धविद्याभुवि व्याप्ताः । **शैवज्ञानधिया** शैवशास्त्रे निष्णातेन **त्रिलोचनशिवाचार्येण** तन्नामकेन **क्लृप्ता** निर्मिता **सिद्धान्तसारावलिः** शैवसिद्धान्तसारप्रदर्शनेन यथार्थनामायं ग्रन्थः । **श्रीमच्छैवमतानुसारिविदुषां** शैवतत्त्वज्ञानां **आनन्दसंदायिनी** संतोषप्रदानशीला **शक्त्या समेतस्य शम्भोः** गौरीशङ्करयोः **प्रीतिकरी** आनन्दसंदायिनी **सदा विजयतामिति** शिवम् ॥

इति श्रीमदनन्तशम्भुविरचितायां त्रिलोचनशिवाचार्यानुगृहीतायाः
सिद्धान्तसारावल्या व्याख्यायां तुरीयश्चर्यापादः समाप्तः ।
सिद्धान्तसारबलिश्च समाप्ता ।

—o—